कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र M257 विषय ५ वैदिक

नाव. संहिता (१-८ अष्टके) (mss.)

लेखक/लिपीकार गोविंदभट सातपुते

पृष्ठ 485 काळ शके 1692 पूर्ण/~~अपूर्ण~~

रूणामीशानंवार्याणां।इंद्रंसोमेसचासुते।सघानोयोगआ
भुवत्सरायेसपुरंध्यां।गमद्वाजेभिरासनः।यस्यसंस्थेनवृण्वते
हरीसमत्सुशत्रवः।तस्माइंद्रायगायत।सुतपाव्नेसुताइमे
शुचयोयंतिवीतये।सोमासोदध्याशिरः॥९॥त्वंसुतस्यपीत
येसद्योवृद्धोअजायथाः॥इंद्रज्यैष्ठ्यायसुक्रतो।आत्वाविशं
त्वाशवःसोमासइंद्रगिर्वणः।शंतेसंतुप्रचेतसे।त्वांस्तोमाऽ
अवीवृधंत्वामुक्थाशतक्रतो।त्वांवर्धंतुनोगिरः।अक्षितोतिः
सनेदिमंवाजमिंद्रःसहस्रिणं।यस्मिन्विश्वानिपौंस्या।मानो

सं.भ.
५

मर्त्ताऽअभिद्रुहंन्तनूनामिंद्रगिर्वणः। ईशानोयवयावधं॥१०॥
युंजंतिब्रध्नमरुषंचरंतंपरितस्थुषः।रोचंतेरोचनादिवि।युंजं
त्यस्यकाम्याहरीविपक्षसारथे।शोणाधृष्णूनृवाहसा।केतुंकृण्व
न्नकेतवेपेशोमर्याऽअपेशसे।समुषद्भिरजायथाः।आदहस्वधा
मनुपुनर्गर्भत्वमेरिरे।दधानानामयज्ञियं।वीळुचिदारुजत्नु
भिर्गुहाचिदिंद्रवह्निभिः।अविंदउस्रियाऽअनु॥११॥देवयंतो
यथामतिमच्छाविदद्वसुंगिरः।महामनूषतश्रुतं।इंद्रेणसंहिदृ
क्षसेसंजग्मानोअबिभ्युषा।मंदूसमानवर्चसा।अनवद्यैरभिर्म
द्युभिः

राघव
५

खःसहस्वदर्चति।गणैरिंद्रस्यकाम्यैः।अतःपरिज्मन्नागहिदिवो
वारोचनादधि।समस्मिन्नृंजतेगिरः।इतोवासातिमीमहेदिवोवा
पार्थिवादधि।इंद्रंमहोवारजसः॥१२॥इंद्रमिद्गाथिनोबृहदिंद्रमर्के
भिरर्किणः।इंद्रंवाणीरनूषत।इंद्रइद्धर्योःसचासंमिश्लऽआवचो
युजा।इंद्रोवज्रीहिरण्ययः।इंद्रोदीर्घायचक्षसऽआसूर्यंरोहयद्दि
वि।विगोभिरद्रिमैरयत्।इंद्रवाजेषुनोवसहस्रप्रधनेषुच।उग्रउग्रा
भिरूतिभिः।इंद्रंवयंमहाधनइंद्रमर्भेहवामहे।युजंवृत्रेषुवज्रिणं
॥१३॥सनोवृषन्नमुंचरुंसत्रादावन्नपावृधि।अस्मभ्यमप्रतिष्कुतः।

सं·ऋ·
१

तुंजेतुंजेयउत्तरेस्तोमाइंद्रस्यवज्रिणः।नविंधेऽस्यसुष्टुतिं।वृषा
यूथेवंवंसगः कृष्टीरियर्त्योजसा।ईशानोअप्रतिष्कुतः।यएकश्चर्ष
णीनांवसूनामिरज्यति।इंद्रःपंचक्षितीनां।इंद्रंवोविश्वतस्परिहवा
महेजनेभ्यः।अस्माकमस्तुकेवलः॥१४॥एंद्रसानसिंरयिंसजि
त्वानंसदासहं।वर्षिष्ठमूतयेभर।नियेनमुष्टिहत्ययानिवृत्रारु
णधामहे।त्वोतासोन्यर्वता।इंद्रत्वोतासऽआवयंवज्रंघनाददी
महि।जयेमसंयुधिस्पृधः।वयंशूरेभिरिंद्रत्वयायुजावयं।सा
सह्यामपृतन्यतः।महाँइंद्रःपरश्चनु×रस्तृभिः×महित्वमस्तुवज्रिणे।

राघव
५

द्यौर्नप्रथिनाशवः॥१५॥समोहवायआशतनरस्तोकस्यसनितौ।
विप्रासोवाधियायवः।यःकुक्षिःसोमपातमःसमुद्रइवपिन्व
ते।उर्वीरापोनकाकुदः।एवाह्यस्यसूनृताविरप्शीगोमतीमही।
पक्वाशाखानदाशुषे।एवाहितेविभूतयऊतयइंद्रमावते।
सद्यश्चित्संतिदाशुषे।एवाह्यस्यकाम्यास्तोमउक्थंचशंस्या।
इंद्रायसोमपीतये॥१६॥इंद्रेहिमत्स्यंधसोविश्वेभिःसोमपर्व
भिः।महाँअभिष्टिरोजसा।एमेनंसृजतासुतेमंदिमिंद्रायमं
दिने।चक्रिंविश्वानिचक्रये।मत्स्वासुशिप्रमंदिभिःस्तोमेभिर्वि

सं॰प्र॰
६

श्वचर्षणे। सचैषुसवनेष्वा। असृग्रमिंद्रतेगिरः प्रति त्वामुदहास
त। अजोषावृषभंपतिं। संचोदयचित्रमर्वाग्राध इंद्रवरेण्यं।
असादित्तेविभुप्रभु॥१७॥ अस्मान्त्सुतत्रचोदयेंद्ररायेरभस्व
तः॥ तुविद्युम्नयशस्वतः॥ संगोमदिंद्रवाजवदस्मेपृथुश्रवोबृह
त्। विश्वायुर्धेह्यक्षितं। अस्मेधेहिश्रवोबृहद्द्युम्नंसहस्रसातमं।
इंद्रतारथिनीरिषः। वसोरिंद्रंवसुपतिं गीर्भिर्गृणंतऋग्मियं।
होमगंतारमूतये। सुतेसुतेन्योकसेबृहद्बृहतएदरिः। इंद्राय
पो शूषमर्चति॥१८॥ गायंतित्वागायत्रिणोर्चंत्यर्कमर्किणः। ब्रह्माण राघव

६

एहि स्तोमाँ अभि स्वरा

स्त्वा शतक्रतउद्वंशमिव येमिरे। यत्सानोः सानुमारुहद्भूर्यस्पष्ट
कर्त्वं। तदिंद्रो अर्थं चेतति यूथेन वृष्णिरेजति। युक्ष्वा हि केशिना
हरी वृषणा कक्ष्यप्रा। अथा न इंद्र सोमपा गिरामुपश्रुतिं चर। अभि
गृणीह्या रुव। ब्रह्म च नो वसो सचेंद्र यज्ञं च वर्धय। उक्थमिंद्राय शं
स्यं वर्धनं पुरुनिष्षिधे। शक्रो यथा सुतेषु णो रारणत्सख्येषु च। तमि
त्सखित्व ईमहे तं राये तं सुवीर्ये। स शक्र उत नः शकदिंद्रो वसु दय
मानः॥ १९॥ सुविवृतं सुनिरजमिंद्र त्वादातमिद्यशः। गवामप
व्रजं वृधि कृणुष्व राधो अद्रिवः। नहि त्वा रोदसी उभे ऋघायमा

णमिन्वतः।जेषः स्वर्वतीरपः संगाऽअस्मभ्यंधूनुहि।आश्रुत्क
र्णश्रुधीहवंनूचिद्दधिष्वमेगिरः।इंद्रस्तोममिमंममकृष्वायुज
श्चिदंतरं।विद्माहित्वावृषंतमंवाजेषुहवनश्रुतं।वृषंतमस्य
हूमहऊतिंसहस्रसातमां।आतूनइंद्रकौशिकमंदसानःसुतं
पिब।नव्यमायुःप्रसूतिरकृधीसहस्रसामृषिं।परित्वागिर्वणो
गिरइमाभवंतुविश्वतः।वृद्धायुमनुवृद्धयोजुष्टाभवंतुजुष्टयः॥२०॥
इंद्रंविश्वाअवीवृधन्समुद्रव्यचसंगिरः।रथीतमंरथीनांवाजा
नांसत्पतिंपतिं।सख्येतइंद्रवाजिनोमाभेमशवसस्पते।त्वामभि

प्रणोनुमोजेतारमपराजितं।पूर्वीरिंद्रस्यरातयोनविदस्यंसूतयः।
यदीवाजस्यगोमतःस्तोतृभ्योमंहतेमघं।पुरांभिंदुर्युवाकविरमि
तौजाअजायत।इंद्रोविश्वस्यकर्मणोधर्त्तावज्रीपुरुष्टुतः।त्वंवल
स्यगोमतोपावरद्रिवोबिलं।त्वांदेवाअबिभ्युषस्तुज्यमानासआ
विषुः।तवाहंशूररातिभिःप्रत्यायंसिंधुमावदन्।उपातिष्ठंतगिर्वणो
विदुष्टेतस्यकारवः।मायाभिरिंद्रमायिनंत्वंशुष्णमवातिरः।विदुष्टे
तस्यमेधिरास्तेषांश्रवांस्युत्तिर।इंद्रमीशानमोजसाभिस्तोमाअ
नूषत।सहस्रंयस्यरातयउतवासंतिभूयसीः॥२१॥अग्निंदूतंवृ

णीमहेहोतारंविश्ववेदसं।अस्ययज्ञस्यसुक्रतुं।अग्निमग्निंहवी
माभिःसदाहवंतविश्पतिं।हव्यवाहंपुरुप्रियं।अग्नेदेवाँइहावहज
ज्ञानोवृक्तबर्हिषे।असिहोतानईड्यः।ताँउशतोविबोधययदग्ने
यासिदूत्यं।देवैरासत्सिबर्हिषि।घृताहवनदीदिवःप्रतिस्मरिष
तोदह।अग्नेत्वंरक्षस्विनः।अग्निनाग्निःसमिध्यतेकविर्गृहपति
र्युवा।हव्यवाड्जुह्वास्यः॥२२॥कविमग्निमुपस्तुहिसत्यधर्माणम
ध्वरे।देवममीवचातनं।यस्त्वामग्नेहविष्पतिर्दूतंदेवसपर्यति।
तस्यस्मप्राविताभव॥योअग्निंदेववीतयेहविष्माँआविवासति।

तस्मैपावकमृळय॥सनःपावकदीदिवोग्नेदेवांइहावह।उपयज्ञंह
विश्चनः।सनस्तवानआभरगायत्रेणनवीयसा।रयिंवीरवतीमि
षं।अग्नेशुक्रेणशोचिषाविश्वाभिर्देवहूतिभिः।इमंस्तोमंजुषस्वनः॥
॥२३॥सुसमिद्धोनआवहदेवाँअग्नेहविष्मते।होतःपावकय
क्षिच।मधुमंतंतनूनपाद्यज्ञंदेवेषुनःकवे।अद्याकृणुहिवीतये।
नराशंसमिहप्रियमस्मिन्यज्ञउपह्वये।मधुजिह्वंहविष्कृतं॥अग्नेसु
खतमेरथेदेवांईळितआवह।असिहोतामनुर्हितः।स्तृणीतबर्हि
रानुषग्घृतपृष्ठंमनीषिणः।यत्रामृतस्यचक्षणं।विश्रयंतामृता

यधो द्वारो देवीरसश्चतः। अद्या नूनं च यष्टवे ॥२४॥ न क्तोषासा सु
पेशसास्मिन्यज्ञ उप ह्वये। इदं नो बर्हिरासदे। ता सुजिह्वा उप ह्वये
होतारा दैव्या कवी। यज्ञं नो यक्षतामिमं। इळा सरस्वती मही तिस्रो
देवीर्मयोभुवः। बर्हिः सीदंत्वस्रिधः। इह त्वष्टारमग्रियं विश्वरूप
मुप ह्वये। अस्माकमस्तु केवलः। अव सृजा वनस्पते देव देवेभ्यो ह
विः। प्र दातुरस्तु चेतनं॥ स्वाहा यज्ञं कृणोतनेंद्राय यज्वनो गृहे। त
॥२५॥ त्र देवाँ उप ह्वये॥ ऐभिरग्ने दुवो गिरो विश्वेभिः सोमपीतये। देवेभिर्या
हि यक्षि च। आ त्वा कण्वा अहूषत गृणंति विप्र ते धियः। देवेभिर

ग्नः आगहि।इंद्रवायूबृहस्पतिंमित्राग्निंपूषणंभगं।आदित्यान्मा
रुतंगणं।प्रवोभ्रियंतइंदवोमत्सरामादयिष्णवः।द्रप्सामध्वश्च
मूषदः।ईळतेत्वामवस्यवःकण्वासोवृक्तबर्हिषः।हविष्मंतोऽ
अरंकृतः।घृतपृष्ठामनोयुजोयेत्वावहंतिवह्नयः।आदेवान्सो
मपीतये।२४।।तान्यजत्राँऋतावृधोग्नेपत्नीवतस्कृधि।मध्वः सु
जिह्वपायय।येयजत्रायईड्यास्तेतेपिबंतुजिह्वया।मधोरग्नेव
षट्कृति।आकींसूर्यस्यरोचनाद्विश्वान्देवाँउषर्बुधः।विप्रोहोतेह
वक्षति।विश्वेभिःसोम्यंमध्वग्नइंद्रेणवायुना।पिबामित्रस्यधामभिः।

सं·भ·
१०

त्वंहोतामनुर्हितोग्नेयज्ञेषुसीदसि।सेमंनोऽअध्वरंयज।युक्ष्वाह्य
रुषीरथेहरितोदेवरोहितः।ताभिर्देवाँइहावह॥२७॥इंद्रसोमंपि
बऋतुनात्वाविशंत्विंदवः।मत्सरासस्तदोकसः।मरुतःपिबऋ त
तुनापोत्राद्यज्ञंपुनीतन।यूयंहिष्ठासुदानवः।अभियज्ञंगृणीहि
नोग्नावोनेष्टःपिबऋतुना।त्वंहिरत्नधाअसि।अग्नेदेवाँइहा
वहसादयायोनिषुत्रिषु।परिभूषपिबऋतुना।ब्राह्मणादिंद्ररा
धसःपिबासोममृतूँरनु।तवेद्धिसख्यमस्तृतं।युवंदक्षंधृतव्रतमि
त्रावरुणदूळभं।ऋतुनायज्ञमाशाथे॥२८॥द्रविणोदाद्रविणसो

राघव
१०

ग्रावहस्तासोऽ अध्वरे। यज्ञेषु देवमी[illegible]ते। द्रविणोदा ददातु नो वसू
नि यानि शृण्विरे। देवेषु ता वनामहे। द्रविणोदाः पिपीषति जुहोत प्र
च तिष्ठत। नेष्ट्रादृतुभिरिष्यत। यत्त्वा तुरीयमृतुभिर्द्रविणोदो यजा
महे। अध स्मा नो ददिर्भव। अश्विना पिबतं मधु दीद्यग्नी शुचिव्रता।
ऋतुना यज्ञवाहसा। गार्हपत्येन संत्य ऋतुँ यज्ञनीरसि। देवान्देवय ना। ५
ते यज॥ २९॥ आ त्वा वहंतु हरयो वृषणं सोमपीतये। इंद्र त्वा सूरचक्ष
सः। इमा धाना घृतस्नुवो हरी इहोप वक्षतः। इंद्रं सुखतमे रथे। इंद्रं
प्रातर्हवामह इंद्रं प्रयत्यध्वरे। इंद्रं सोमस्य पीतये। उप नः सुतमाग

हि हरिभिरिंद्र केशिभिः। सुते हि त्वा हवामहे। सेमं नः स्तोममाजुहु
पेदं सवनं सुतं। गौरो न तृषितः पिब॥ ३०॥ इमे सोमास इंदवः सुता
सो अधि बर्हिषि। ताँ इंद्र सहसे पिब। अयं ते स्तोमो अग्रियो हृदि
स्पृगस्तु शंतमः। अथा सोमं सुतं पिब। विश्वमित्सवनं सुतमिंद्रो
मदाय गच्छति। वृत्रहा सोमपीतये। सेमं नः काममापृण गोभिर
श्वैः शतक्रतो। स्तवाम त्वा स्वाध्यः॥ ३१॥ इंद्रावरुणयोरहं सम्रा
जोरव आ वृणे। ता नो मृळात ईदृशे। गंतारा हि स्थो वसे हवं विप्र
स्य मावतः। धर्त्तारा चर्षणीनां। अनु कामं तर्पयेथामिंद्रावरुणा रा

प आ। ता वां नेदि[illegible]महे। युवाकु हि शचीनां युवाकु सुमतीनां। भूया
म वाजदाव्नां। इंद्रः सहस्रदाव्नां वरुणः शंस्यानां। क्रतुर्भवत्युक्थ्यः
॥२॥ तयोरिदवसा वयं सनेम नि च धीमहि। स्यादुत प्ररेचनं। इं
द्रावरुण वामहं हुवे चित्राय राधसे। अस्मान्त्सु जिग्युषस्कृतं। इं
द्रावरुणा नू नु वां सिषासंतीषु धीष्वा। अस्मभ्यं शर्म यच्छतं। प्र वाम
श्नोतु सुष्टुतिरिंद्रावरुणा यां हुवे। यामृधाथे सधस्तुतिं॥३॥ सो
मानं स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवंतं य औशिजः। यो रेवा
न्योऽ अमीवहा वसुवित्पुष्टिवर्धनः। स नः सिषक्तु यस्तुरः। मा नः

शंसोऽअररुषोधूर्त्तिःप्रणङ्मर्त्यस्य।रक्षाणोब्रह्मणस्पते।सघा
वीरोनरिष्यतियमिंद्रोब्रह्मणस्पतिः।सोमोहिनोतिमर्त्यं।त्वंतंब्र
ह्मणस्पतेसोमइंद्रश्चमर्त्यं।दक्षिणापात्वंहसः।।३४।।सदसस्पतिम
द्भुतंप्रियमिंद्रस्यकाम्यं।सनिंमेधामयासिषं।यस्मादृतेनसिध्य
तियज्ञोविपश्चितश्चन।सधीनांयोगमिन्वति।आदृध्नोतिहविष्कृ
तिंप्रांचंकृणोत्यध्वरं।होत्रादेवेषुगच्छति।नराशंसंसुधृष्टममप
श्यंसप्रथस्तमं।दिवोनसद्ममखसं।।३५।।प्रतित्यंचारुमध्वरंगो
पीथायप्रहूयसे।मरुद्भिरग्नऽआगहि।नहिदेवोनमर्त्योमहस्त

स

वक्रतुंपरः। मरुद्भिः० येमहोरजसोविदुर्विश्वेदेवासोअद्रुहः। मरु
द्भिः०। यउग्राअर्कमानृचुरनाधृष्टासओजसा। मरुद्भिः०। येशुभ्रा
घोरवर्पसः सुक्षत्रासोरिशादसः। मरुद्भिः०॥३६॥ येनाकस्या
धिरोचनेदिविदेवासऽआसते। मरुद्भिरग्न०। यईंखयंतिपर्वता
न्तिरः समुद्रमर्णवं। मरुद्भिः०। आयेतन्वंतिरश्मिभिस्तिरः समु
द्रमोजसा। मरुद्भिः० अभित्वापूर्वपीतयेसृजामिसोम्यंमधु।
मरुद्भिरग्नआगहि॥३७॥ ॥इतिप्रथमाष्टकेप्रथमोध्यायः
हरिः ॐ अयंदेवायजन्मनेस्तोमोविप्रेभिरासया। अकारिरत्नधा

तमः।यइंद्रायवचोयुजाततक्षुर्मनसाहरी।शमीभिर्यज्ञमाशत।
तक्षन्नासत्यौपरिज्मानंसुखंरथं।तक्षन्धेनुंसबर्दुघां।युवाना भ्यां २
पितरापुनःसत्यमंत्राऋजूयवः।ऋभवोविष्ट्यक्रत।संवोमदासो
अग्मतेंद्रेणचमरुत्वता।आदित्येभिश्चराजभिः॥१॥उतत्यंचमसं
नवंत्वष्टुर्देवस्यनिष्कृतं।अकर्त्तचतुरःपुनः।तेनोरत्नानिधत्तन
त्रिरासाप्तानिसुन्वते।एकमेकंसुशस्तिभिः।अधारयंतवह्नयो
भजंतसुकृत्यया।भागंदेवेषुयज्ञियं॥२॥इहेंद्राग्नीउपह्वयेतयो
रित्स्तोममुश्मसि।तासोमंसोमपातमा।तायज्ञेषुप्रशंसतेंद्राग्नी

श्रुंभतानरः।तागायत्रेषुगायत।तामित्रस्यप्रशस्तयइंद्राग्नीताह
वामहे।सोमपासोमपीतये।उग्रासंताहवामहउपेदंसवनंसुतं।इं
द्राग्नीएहगच्छतां।तामहांतासदस्पतीइंद्राग्नीरक्षउब्जतं।अप्रजाः
संत्वत्रिणः।तेनसत्येनजागृतमधिप्रचेतुनेपदे।इंद्राग्नीशर्मयच्छ
तं।।४।।प्रातर्युजाविबोधयाश्विनावेहगच्छतां।अस्यसोमस्यपी
तये।यासुरथारथीतमोभादेवादिविस्पृशा।अश्विनाताहवाम
हे।यावांकशामधुमत्यश्विनासूनृतावती।तयायज्ञंमिमिक्षतं।
नहिवामस्तिदूरकेयत्रारथेनगच्छथः।अश्विनासोमिनोगृहं।

हिरण्यपाणिमूतयेसवितारमुपह्वये।सचेत्तादेवतापदं॥४॥
अपांनपातमवसेसवितारमुपस्तुहि।तस्यव्रतान्युश्मसि।वि
भक्तारंहवामहेवसोश्चित्रस्यराधसः।सवितारंनृचक्षसं।
सखायआनिषीदतसवितास्तोम्योनुनः।दाताराधांसिशुं
भति।अग्नेपत्नीरिहावहदेवानामुशतीरुप।त्वष्टारंसोमपी
तये।आग्नाअग्नइहावसेहोत्रांयविष्ठभारतीं।वरूत्रींधिष
णांवह॥५॥अभिनोदेवीरवसामहःशर्मणानृपत्नीः।अच्छि
न्नपत्राःसचंतां।इहेंद्राणीमुपह्वयेवरुणानींस्वस्तये।अग्नायीं

सोमपीतये।महीःद्यौःपृथिवीचनइमंयज्ञंमिमिक्षतां।पिपृ
तांनोभरीमभिः।।तयोरिद्घृतवत्पयोविप्रारिहंतिधीतिभिः।
गंधर्वस्यध्रुवेपदे।स्योनापृथिविभवानृक्षरानिवेशनी।य
च्छानःशर्मसप्रथः।।६।।अतोदेवाअवंतुनोयतोविष्णुर्विच
क्रमे।पृथिव्याःसप्तधामभिः।इदंविष्णुर्विचक्रमे।त्रेधानिद
धेपदं।समूळ्हमस्यपांसुरे।त्रीणिपदाविचक्रमेविष्णुर्गोपाअ
दाभ्यः।अतोधर्माणिधारयन्।विष्णोःकर्माणिपश्यतयतोव्र
तानिपस्पशे।इंद्रस्ययुज्यःसखा।तद्विष्णोःपरमंपदंसदापश्यं

सं॰ प्र॰
१५

तिसूरयः।दिवीवचक्षुराततं।तद्विप्रासोविपन्यवोजागृवांसः
समिंधते।विष्णोर्यत्परमंपदं।।७।।तीव्राःसोमासआगह्याशी
र्वंतःसुताइमे।वायोतान्प्रस्थितान्पिब।उभादेवादिविस्पृशेंद्र
वायूहवामहे।अस्यसोमस्यपीतये।इंद्रवायूमनोजुवाविप्रा[illegible]
हवंतऊतये।सहस्राक्षाधियस्पती।मित्रंवयंहवामहेवरुणंसो
मपीतये।जज्ञानापूतदक्षसा।ऋतेनयावृतावृधावृतस्यज्यो
तिषस्पती।तामित्रावरुणाहुवे।।८।।वरुणःप्राविताभुवन्मित्रो
विश्वाभिरूतिभिः।करतांनःसुराधसः।मरुत्वंतंहवामहइंद्रमा

सोमपीतये। सजूर्गणेनतृंपतु। इंद्रज्येष्ठामरुद्गणादेवासःपू
षरातयः। विश्वेममश्रुताहवं। हतवृत्रंसुदानवइंद्रेणसहसायु
जा। मानोदुःशंसईशत। विश्वान्देवान्हवामहेमरुतःसोमपीत
ये। उग्राहिपृश्निमातरः॥ ९॥ जयतामिवतन्यतुर्मरुतामेतिधृ
ष्णुया। यच्छुभंयाथनानरः। हस्काराद्विद्युतस्पर्यतोजाताअ
वंतुनः। मरुतोमृळयंतुनः। आपूषञ्चित्रबर्हिषमाघृणेधरु
णंदिवः। आजानष्टंयथापशुं। पूषाराजानमाघृणिरपगूळ्हं
गुहाहितं। अविंदच्चित्रबर्हिषं। उतोसमह्यमिंदुभिःषड्युक्ताँअनु

सं॰प्र॰
१६

सेषिधत्। गोभिर्यवंनचर्कृषत्॥१०॥ अंबयोयंत्यध्वभिर्जाम
योअध्वरीयतां। पृंचतीर्मधुनापयः। अमूर्याउपसूर्येयाभि
र्वासूर्यः सह। तानोहिन्वंत्वध्वरं। अपोदेवीरुपह्वयेयत्रगावः
पिबंतिनः। सिंधुभ्यः कर्त्वंहविः। अप्स्वं१तरमृतमप्सुभेषज
मपामुतप्रशस्तये। देवाभवतवाजिनः॥ अप्सुमेसोमोअब्र
वीदंतर्विश्वानिभेषजा। अग्निंचविश्व~~भेष~~शंभुवमापश्चवि
श्वभेषजीः॥११॥ आपः पृणीतभेषजंवरूथं
तन्वे३मम। ज्योक्चसूर्यंदृशे। इदमापःप्रवहतयत्किंचदुरितं

रापव
१६

मयि। यद्वाहमभिदुद्रोह यद्वाशेपउतानृतं। आपोअद्यान्वचा
रिषंरसेनसमगस्महि। पयस्वानग्नआगहितंमासंस्रजवर्च
सा। संमाग्नेवर्चसास्रजसंप्रजयासमायुषा। विद्युर्मेअस्यदेवा
इंद्रोविद्यात्सहऋषिभिः॥१२॥ कस्यनूनंकतमस्यामृतानांम
नामहेचारुदेवस्यनाम। कोनोमह्याअदितयेपुनर्दात्पितरंच
दृशेयंमातरंच। अग्नेर्वयंप्रथमस्यामृतानांमनामहेचारुदेव
स्यनाम। सनोमह्याअदितयेपुनर्दात्पितरंचदृशेयंमातरंच।
अभित्वादेवसवितरीशानंवार्याणां। सदावन्भागमीमहे। य

श्चिद्धित इत्था भगः शशमानः पुरानिदः।अद्वेषो हस्तयोर्दधे।भगभक्तस्य ते वयमुदशेम तवावसा।मूर्धानं राय आरभे॥५॥न हि ते क्षत्रं न सहो न मन्युं वयश्चनामी पतयंत आपुः।नेमा आपो अनिमिषं चरंतीर्न ये वातस्य प्रमिनंत्यभ्वं।अबुध्ने राजा वरुणो वनस्योर्ध्वं स्तूपं ददते पूतदक्षः।नीचीनाः स्थुरुपरि बुध्न एषामस्मे अंतर्निहिताः केतवः स्युः।उरुं हि राजा वरुणश्चकार सूर्याय पंथामन्वेतवा उ।अपदे पादा प्रतिधातवे करुतापवक्ता हृदयाविधश्चित्।शतं ते राजन्भिषजः सहस्रमुर्वी गभीरा सुम

तिष्टे अस्तु। बाधस्वदूरेनिर्ऋतिंपराचैः कृतंचिदेनः प्रमुमुग्ध्य
स्मत। अमीयऋक्षानिहितासउच्चानक्तंददृश्रेकुहचिद्दिवेयुः।
अदब्धानिवरुणस्यव्रतानिविचाकशच्चंद्रमानक्तमेति॥ १४॥
तत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः। अहे
ळमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः। तदिन्नक्तंत
द्दिवामह्यमाहुस्तदयंकेतोहृदआविचष्टे। शुनःशेपोयमह्व
द्गृभीतः सोअस्मान्राजावरुणोमुमोक्तु। शुनःशेपोह्यह्वद्गृभीत
स्त्रिष्वादित्यंद्रुपदेषुबद्धः। अवैनंराजावरुणःससृज्याद्विद्वांअद

सं.प्र.
१८

द्धोविमुमोक्तुपाशान्।अवतेहेळोवरुणनमोभिरवयज्ञेभिरी
महेहविर्भिः।क्षयन्नस्मभ्यमसुरप्रचेताराजन्नेनांसिशिश्रथः
कृतानि।उदुत्तमंवरुणपाशमस्मदवाधमंश्रथाय।अथावयमा विमध्यमं
ये दित्यव्रतेतवानागसोअदितैस्याम॥१५॥यच्चिद्धितेविशोयथा
प्रदेववरुणव्रतं।मिनीमसिद्यविद्यवि।मानोवधायहत्नवेजि
हीळानस्यरीरधः।माहृणानस्यमन्यवे।विमृळीकायतेमनो
रथीरश्वंनसंदितं।गीर्भिर्वरुणसीमहि।पराहिमेविमन्यवः
पतंतिवस्यइष्टये।वयोनवसतीरुप।कदाक्षत्रश्रियंनरमावरु राघव

१९

णंकरामहे। मृळीकायोरुचक्षसं॥१६॥ तदित्समानमाशातेवे
नंतानप्रयुछतः। धृतव्रतायदाशुषे। वेदायोवीनांपदमंतरि
क्षेणपततां। वेदनावः समुद्रियः। वेदमासोधृतव्रतोद्वादश
प्रजावतः। वेदायउपजायते। वेदवातस्यवर्तनिमुरोर्ऋष्वस्यबृ
हतः। वेदाये अध्यासते। निषसादधृतव्रतोवरुणः पस्त्यास्वा।
साम्राज्यायसुक्रतुः॥१७॥ अतोविश्वान्यद्भुताचिकित्वां अभि
पश्यति। कृतानियाचकर्त्वा। सनोविश्वाहासुक्रतुरादित्यः सुप
थाकरत्। प्रण आयूंषितारिषत्। बिभ्रद्द्रापिंहिरण्ययंवरुणोव

वस्त्रनिर्णिजं।परिस्पशोनिषेदिरे।नयंदिप्संतिदिप्सवोनद्रुह्वाणो
जनानां।नदेवमभिमातयः।उतयोमानुषेष्वायशश्चक्रेअसाम्या।
अस्माकमुदरेष्वा॥१८॥परामेयंतिधीतयोगावोनगव्यूतीरनु।
इच्छंतीरुरुचक्षसं।संनुवोचावहैपुनर्यतोमेमध्वाभृतं।होतेवक्ष
दसेप्रियं।दर्शंनुविश्वदर्शतंदर्शंरथमधिक्षमि।एताजुषतमेगिरः॥
इमंमेवरुणश्रुधीहवमद्याचमृळय।त्वामवस्युराचके।त्वंविश्व
स्यमेधिरदिवश्चग्मश्चराजसि।सयामनिप्रतिश्रुधि।उदुत्तमंमु
मुग्धिनोविपाशंमध्यमंचृत।अवाधमानिजीवसे॥१९॥वासि

षाहिमियेध्यवस्त्राण्यूर्जंपते। सेमंनोअध्वरंयज। निनोहोतावरे
ण्यः सदायविष्ठमन्मभिः। अग्नेदिवित्मतावचः। आहिष्मासून
वेपितापिर्यजत्यापये। सखासख्येवरेण्यः। आनोबर्हीरिशादसो
वरुणोमित्रोअर्यमा। सीदंतुमनुषोयथा। पूर्व्यहोतरस्यनोमंदस्व
सख्यस्यच। इमाउषुश्रुधीगिरः॥२०॥ यच्चिद्धिशश्वतातनादेवंदेवं
यजामहे। त्वेइद्धूयतेहविः। प्रियोनोअस्तुविश्पतिर्होतामंद्रोवरे
ण्यः। प्रियाः स्वग्नयोवयं। स्वग्नयोहिवार्यंदेवासोदधिरेचनः। स्वग्न
योमनामहे। अथानउभयेषाममृतमर्त्यानां। मिथः संतुप्रशस्तयः॥

विश्वेभिरग्ने अग्निभिरिमंयज्ञमिदंवचः। चनोधाःसहसोयहो॥
॥२१॥ अश्वंनत्वावारवंतंवंदध्या अग्निंनमोभिः। सम्राजंतमध्व
राणां। सघानःसूनुःशवसापृथुप्रगामासुशेवः। मीढ्वाँअस्माकं
बभूयात्। सनोदूराच्चासाच्चनिमर्त्यादघायोः। पाहिसदमिद्विश्वा
युः। इममूषुत्वमस्माकंसनिंगायत्रंनव्यांसं। अग्नेदेवेषुप्रवोचः।
आनोभजपरमेष्वावाजेषुमध्यमेषु। शिक्षावस्वोअंतमस्य॥२२॥
विभक्तासिचित्रभानोसिंधोरूर्माउपाकआ। सद्योदाशुषेक्षरसि।
यमग्नेपृत्सुमर्त्यमवावाजेषुयंजुनाः। सयंताशश्वतीरिषः। नाकि

रस्यसहंत्यपर्य्येताकयस्यचित्।वाजोअस्तिश्रवाय्यः।सवाजंवि
श्वचर्षणिरर्वद्भिरस्तुतरुता।विप्रेभिरस्तुसनिता।जराबोधतद्वि
विड्ढिविशेविशेयज्ञियाय।स्तोमंरुद्रायदृशीकं।।२३।।सनोमहां
अनिमानोधूमकेतुःपुरुश्चंद्रः।धियेवाजायहिन्वतु।सरेवांइ
वविश्पतिर्दैव्यःकेतुःशृणोतुनः।उक्थैरग्निर्बृहद्भानुः।नमोम
हद्भ्योनमोअर्भकेभ्योनमोयुवभ्योनमआशिनेभ्यः।यजामदेवा
न्यदिशक्नवाममाज्यायसःशंसमावृक्षिदेवाः।।२४।।यत्रग्रावा
पृथुबुध्नऊर्ध्वोभवतिसोतवे।उलूखलसुतानामवेद्विंद्रजल्गुलः।

सं॰प्र॰ यत्र द्वाविव जघनाधिषवण्या कृता। उलूखलसुताना॰ यत्र नार्य
२१ पच्यवमुपच्यवं च शिक्षते। उलूखलसुताना॰ यत्र मंथां विबध्नते
रश्मीन्यमितवा इव। उलूखलसुताना॰। यच्चिद्धि त्वं गृहेगृह उलू
खलक युज्यसे। इह द्युमत्तमं वद जयतामिव दुंदुभिः॥२५॥ उत
स्म ते वनस्पते वातो वि वात्यग्रमित्॥ अथो इंद्राय पातवे सुनु सो
ममुलूखल। आयजी वाजसातमा ता ह्युच्चा विजर्भृतः। हरी इ
वांधांसि बप्सता। ता नो अद्य वनस्पती ऋष्वावृष्वेभिः सोतृभिः।
इंद्राय मधुमत्सुतं। उच्छिष्टं चम्वोर्भर सोमं पवित्र आसृज। निधे राघव
२९

हिगोरधित्वचि॥२८॥यच्चिद्धिसत्यसोमपाअनाशस्ताइवस्मसि।आ
तूनइंद्रशंसयगोष्वश्वेषुशुभ्रिषुसहस्रेषुतुवीमघ।शिप्रिन्वाजा
नांपतेशचीवस्तवदंसना।आतून०।निष्वापयामिथूदृशासस्ताम
बुंबुध्यमाने।आतून०।ससंतुत्याअरातयोबोधंतुशूररातयः।
आतून०।समिंद्रगर्दभंमृणनुवंतंपापयामुया।आतून०।पतातिकुं
डृणाच्यादूरंवातोवनादधि।आतून०।सर्वंपरिक्रोशंजहिजंभ
याकृकदाश्वं।आतूनइंद्रशंसय०॥२७॥आवइंद्रंक्रिविंयथावाज
यंतःशतक्रतुं।मंहिष्ठंसिंचइंदुभिः।शतंवायःशुचीनांसहस्रंवास

माशिरं।एदुनिम्नं।नरीयते।संयन्मदायशुष्मिणएनाह्यस्यो
दरे।समुद्रोनव्यचोदधे।अयमुतेसमतसिकपोतइवगर्भधिं।
वचस्तच्चिन्नओहसे।स्तोत्रंराधानांपतेगिर्वाहोवीरयस्यते।वि
भूतिरस्तुसूनृता॥२८॥ऊर्ध्वस्तिष्ठानऊतयेस्मिन्वाजेशतक्रतो।
समन्येषुब्रवावहै।योगेयोगेतवस्तरंवाजेवाजेहवामहे।सखा
यइंद्रमूतये।आघागमद्यदिश्रवत्सहस्रिणीभिरूतिभिः।वाजे
भिरुपनोहवं।अनुप्रत्नस्यौकसोहुवेतुविप्रतिंनरं।यंतेपूर्वंपिता
हुवे।तंत्वावयंविश्ववाराशास्महेपुरुहूत।सखेवसोजरितृभ्यः।

।।२१।।अस्माकंशिप्रिणीनांसोमपाः~~सोमपा~~सोमपाव्नां।सखे
वज्रिन्सखीनां।तथातदस्तुसोमपाःसखेवज्रिंन्तथाकृणु।यथा
तउश्मसीष्टये।रेवतीर्नःसधमादइंद्रेसंतुतुविवाजाः।क्षुमंतो
याभिर्मदेम।आघत्वावान्त्मनाप्तःस्तोतृभ्योधृष्णवियानः।ऋ
णोरक्षंनचक्र्योः।आयद्दुवःशतक्रतवाकामंजरितॄणां।ऋणो
रक्षंनशचीभिः।।३०।।शश्वदिंद्रःपोप्रुथद्भिर्जिगायनानदद्भिः
शाश्वसद्भिर्धनानि।सनोहिरण्यरथंदंसनावान्त्सनःसनिता
सनयेसनोदात्।आश्विनावश्वावत्येषायातंशवीरया।गोम

द्स्राहिरण्यवत्। समानयोजनो हि वां रथो दस्रावमर्त्यः। समु
द्रे अश्विनेयते। न्य१घ्न्यस्य मूर्धनि चक्रं रथस्य येमथुः। परि द्या
मन्यदीयते। कस्त उषः कधप्रिये भुजे मर्त्तो अमर्त्ये। कं नक्षसे वि
भावरि। वयं हि ते अमन्मह्यान्तादा पराकात्। अश्वे न चित्रे अरु
षि। त्वं त्येभिरा गहि वाजेभिर्दुहितर्दिवः। अस्मे रयिं नि धारय॥२१॥
त्वमग्ने प्रथमो अंगिरा ऋषिर्देवो देवानामभवः शिवः सखा।
तव व्रते कवयो विद्मनापसो जायंत मरुतो भ्राजदृष्टयः। त्वम
ग्ने प्रथमो अंगिरस्तमः कविर्देवानां परि भूषसि व्रतं। विभुर्विश्व

स्मैभुवनायमेधिरोद्विमाताशयुःकतिधाचिदायवे।त्वमग्नेप्र
थमोमातरिश्वनआविर्भवसुक्रतूयाविवस्वते।अरेजेतांरोदसी
होतृवूर्येसघ्नोर्भारमयजोमहोवसो।त्वमग्नेमनवेद्यामवाश
यःपुरूरवसेसुकृतेसुकृत्तरः।श्वात्रेणयत्पित्रोर्मुच्यसेपर्यात्वा
पूर्वमनयन्नापरंपुनः।त्वमग्नेवृषभःपुष्टिवर्धनउद्यतस्रुचेभ
वसिश्रवाय्यः।यआहुतिंपरिवेदावषट्कृतिमेकायुरग्रेविशआ
विवाससि॥३२॥त्वमग्नेवृजिनवर्तनिंनरंसक्मन्पिपर्षिविदथे
विचर्षणे।यःशूरसातापरितक्म्येधनेदभ्रेभिश्चित्समृताहंसि

भूयसः। त्वं तमग्ने अमृतत्व उत्तमे मर्तं दधासि श्रवसे दिवेदिवे। यस्ता
तृषाण उभयाय जन्मने मयः कृणोषि प्रय आ च सू[illegible]रये। त्वं नो अ
ग्ने सनये धनानां यशसं कारुं कृणुहि स्तवानः। ऋध्याम कर्माप
सा नवेन देवैर्द्यावापृथिवी प्रावतं नः। त्वं नो अग्ने पित्रोरुपस्थ आ
देवो देवेष्वनवद्य जागृविः। तनूकृद्बोधि प्रमतिश्च कारवे त्वं क
ल्याण वसु विश्वमोपिषे। त्वमग्ने प्रमतिस्त्वं पितासि नस्त्वं वयस्कृ
त्तव जामयो वयं। सं त्वा रायः शतिनः सं सहस्रिणः सुवीरं यन्ति व्र
तपामदाभ्य॥ ३३॥ त्वामग्ने प्रथममायुमायवे देवा अकृण्वन्नहुष

स्य विश्पतिं । इळामकृण्वन्मनुषस्य शासनीं पितुर्यत्पुत्रो ममकस्य
जायते । त्वं नो अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वंद्य । त्राता
तोकस्य तनये गवामस्यनिमेषं रक्षमाणस्तव व्रते । त्वमग्ने यज्य
वे पायुरंतरोनिषंगाय चतुरक्ष इध्यसे । यो रातहव्योवृकाय धायसे
कीरेश्चिन्मंत्रं मनसा वनोषि तं । त्वमग्न उरुशंसाय वाघते स्पार्हं यद्रे
क्णः परमं वनोषि तत् । आध्रस्य चित्प्रमतिरुच्यसे पिता प्र पाकं
शास्सि प्र दिशो विदुष्टरः । त्वमग्ने प्रयतदक्षिणं नरं वर्मेव स्यूतं प
रिपासि विश्वतः । स्वादुक्षद्मा यो वसतौ स्योनकृज्जीवयाजं यजते

सोपमा दिवः ॥२४॥ इमामग्ने शरणिं मीमृषो न इममध्वानं यमगा
म दूरात्। आपिः पिता प्रमतिः सोम्यानां भृमिरस्यृषिकृन्मर्त्यानां॥
मनुष्वदग्ने अंगिरस्वदंगिरो ययातिवत्सदने पूर्ववच्छुचे। अच्छ या
ह्या वह दैव्यं जनमा सादय बर्हिषि यक्षि च प्रियं। एतेनाग्ने ब्रह्मणा
वावृधस्व शक्ती वा यत्ते चकृमा विदा वा। उत प्र णेष्यभि वस्यो अस्मा
न्त्सं नः सृज सुमत्या वाजवत्या॥२५॥ इंद्रस्य नु वीर्याणि प्र वोचं या
नि चकार प्रथमानि वज्री। अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिन
त्पर्वतानां। अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष।

वाश्राइवधेनवः स्यंदमाना अंजः समुद्रमवजग्मुरापः।वृषायमा
णोवृणीतसोमंत्रिकद्रुकेष्वपिबत्सुतस्य।आसायकंमघवा
दत्तवज्रमहन्नेनंप्रथमजामहीनां।यदिंद्राहन्प्रथमजामहीनामान्मा ऋ
यिनाममिनाः प्रोतमायाः।आत्सूर्यंजनयन्द्यामुषासंतादीत्नाश
त्रुंनकिलाविवित्से।अहन्वृत्रंवृत्रतरंव्यंसमिंद्रोवज्रेणमहताव
धेन।स्कंधांसीवकुलिशेनाविवृक्णाहिः शयतउपपृक्पृथिव्याः
॥३६॥अयोद्धेवदुर्मदआहिजुह्वेमहावीरंतुविबाधमृजीषं।ना
तारीदस्यसमृतिंवधानांसंरुजानाः पिपिषइंद्रशत्रुः।अपादहस्तो

अपृतन्यदिंद्रमास्य वज्रमधि सानौ जघान। वृष्णो वध्रिः प्रति
मानं बुभूषन्पुरुत्रा वृत्रो अशयद्व्यस्तः। नदं न भिन्नममुया शया
नं [redacted] मनो रुहाणा अति यंत्यापः। याश्चिद्वृत्रो महिना पर्य
तिष्ठत्तासामहिः पत्सुतःशीर्बभूव॥ नीचावया अभवद्वृत्रपुत्रेंद्रो
अस्या अव वधर्जभार। उत्तरा सूरधरः पुत्र आसीद्दानुः शये सह
वत्सा न धेनुः। अतिष्ठंतीनामनिवेशनानां काष्ठानां मध्ये निहितं
शरीरं। वृत्रस्य निण्यं वि चरंत्यापो दीर्घं तम आशयदिंद्रशत्रुः॥ २७॥
दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः। अपां

सर्तवे

बिलमपिहितंयदासीद्वृत्रंजघन्वाँअपतद्ववार।अश्व्योवारोअ
भवस्तदिंद्रसृकेयत्त्वाप्रत्यहंदेवएकः।अजयोगाअजयःशूरसो
ममवासृजः सप्तसिंधून्।नास्मैविद्युन्नतन्यतुःसिषेधनयांमिह
मकिरद्ध्रादुनिंचा।इंद्रश्चयद्युयुधातेअहिश्चोतापरीभ्योमघवा
विजिग्ये।अहेर्यातारंकमपश्यइंद्रहृदियत्तेजघ्नुषोभीरगच्छत्।
नवचयंनवतिंचस्रवंतीःश्येनोनभीतोअतरोरजांसि।इंद्रोयातो
वसितस्यराजाशमस्यचशृंगिणोवज्रबाहुः।सेदुराजाक्षयति
चर्षणीनामरान्ननेमिःपरिताबभूव॥३८॥इतिप्रथमाष्टकेद्वितीयोध्यायः

हरिः ॐ एतायामोपगव्यंतइंद्रमस्माकंसुप्रमतिंवावृधाति।अ
नामृणःकुविदादस्यरायोगवांकेतंपरमावर्जतेनः।उपेदैंधनदाम हे
प्रतीतंजुष्टांनश्येनोवसतिंपतामि।इंद्रंनमस्यन्नुपमेभिरर्कैर्यः
स्तोतृभ्योहव्योअस्तियामन्।निसर्वसेनइषुधीँरसक्तसमर्यो
गाअजतियस्यवष्टि।चोष्कूयमाणइंद्रभूरिवामंमापणिर्भूरस्मद मा ५
धिप्रवृद्ध।वधीर्हिदस्युंधनिनंघनेनँएकश्चरन्नुपशाकेभिरिंद्र।
धनोरधिविषुणक्तेव्यायन्नयज्वानःसनकाःप्रेतिमीयुः।पराचिच्छी
र्षाववृजुस्तइंद्रायज्वानोयज्वभिःस्पर्धमानाः।प्रयद्दिवोहरिवः

स्थातरुग्रनिरव्रताँअधमोरोदस्योः॥५॥अयुयुत्संननवद्यस्यसेनामयातयंतक्षितयोनवग्वाः।वृषायुधोनवध्रयोनिरष्टाःप्रवद्भिरिंद्राच्चितयंतआयन्।त्वमेतान्रुदतोजक्षतश्चायोधयोरजसइंद्रपारे।अवादहोदिवआदस्युमुच्चाप्रसुन्वतःस्तुवतःशंसमावः।चक्राणासःपरीणहंपृथिव्याहिरण्येनमणिनाशुंभमानाः।नहिन्वानासस्तितिरुस्तइंद्रंपरिस्पशोअदधात्सूर्येण।परियदिंद्ररोदसीउभेअबुभोजीर्महिनाविश्वतःसीं।अमन्यमानाँअभिमन्यमानैर्निर्ब्रह्मभिरधमोदस्युमिंद्र।नयेदिवःपृथिव्याअंतमापुर्नमायाभि

६ संवज्रेणासृजद्वृत्रमिंद्रःप्रस्वांमतिमतिरच्छाशदानः।आवःकुत्समिंद्रयस्मिंश्चाकन्प्रावोयुध्यंतंवृषभंदशद्युं ६

सं॰प्र॰ १८

धनदांपर्यभूवन्।युजंवज्रंवृषभश्चक्रइंद्रोनिर्ज्योतिषातमसोगाअ ति
दुक्षत्॥२॥अनुस्वधामक्षरन्नापोअस्यावर्धतमध्यआनाव्यानां।
सध्रीचीनेनमनसातमिंद्रओजिष्ठेनहन्मनाहन्नभिद्यून्।न्याविध्य
दिलीबिशस्यदृळ्हाविशृंगिणमभिनच्छुष्णमिंद्रः।यावत्तरोमघव
न्यावदोजोवज्रेणशत्रुमवधीःपृतन्युं।अभिसिध्मोअजिगादस्य
शत्रून्वितिग्मेनवृषभेणापुरोभेत्।शफच्युतोरेणुर्नक्षतद्यामु
च्छ्वैत्रेयोनृषाह्यायतस्थौ।आवःशमंवृषभंतुग्र्यासुक्षेत्रजेषेमघव
ञ्छ्वित्र्यंगां।ज्योक्चिदत्रतस्थिवांसोअक्रञ्छत्रूयतामधरावेदनाकः॥३॥

रा॰पव
२८

गोहनात्रिरद्य

त्रिश्चिन्नोअद्याभवतंनवेदसा।विभुर्वांयामउतरातिरश्विना।युवोर्हि
यंत्रंहिम्येववाससोभ्यायंसेन्याभवतंमनीषिभिः।त्रयःपवयोमधु
वाहनेरथेसोमस्यवेनामनुविश्वइद्विदुः।त्रयःस्कंभासःस्कभितास
आरभेत्रिर्नक्तंयाथस्त्रिर्वश्विनादिवा।समानेअहॅ रवद्यॅयज्ञंमधु त्रि
नामिमिक्षतं।त्रिर्वाजवतीरिषोअश्विनायुवंदोषाअस्मभ्यमुषसश्च
पिन्वतं।त्रिर्वर्तिर्यातंत्रिरनुव्रतेजनेत्रिःसुप्राव्येत्रेधेवशिक्षतं।त्रिर्नां
द्यंवहतमश्विनायुवंत्रिःपृक्षोअस्मेअक्षरेवपिन्वतं।त्रिर्नोरयिंवहत
मश्विनायुवंत्रिर्देवतातात्रिरुतावतंधियः।त्रिःसौभगत्वंत्रिरुतश्रवां

सिनस्त्रिष्ठं वां सूरे दुहिता रुहद्रथं । त्रिर्नौ अश्विना दिव्यानि भेषजा त्रिः
पार्थिवानि त्रिरु दत्तमद्भ्यः । ओमानं शंयोर्ममकाय सूनवे त्रिधातु श
र्म वहतं शुभस्पती ।। ४ ।। त्रिर्नौ अश्विना यजता दिवे दिवे परि त्रिधातु
पृथिवीमशायतं । तिस्रो नासत्या रथ्या परावत आत्मेव वातः स्वसरा
णि गछतं । त्रिरश्विना सिंधुभिः सप्तमातृभिस्त्रय आहावास्त्रेधा
हविष्कृतं । तिस्रः पृथिवीरुपरि प्रवा दिवो नाकं रक्षेथे द्युभिरक्तुभि
र्हितं । क्व१ त्री चक्रा त्रिवृतो रथस्य क्व१ त्रयो वंधुरो ये सनीळाः । क
दा योगो वाजिनो रासभस्य येन यज्ञं नासत्योपयाथः । अनासत्या गछ

तंहूयतेहविर्मध्वःपिबतंमधुपेभिरासभिः।युवोर्हिपूर्वंसवितोषसोरथमृतायचित्रंघृतवंतमिष्यति।आनासत्यात्रिभिरेकादशैरिहदेवेभिर्यातंमधुपेयमश्विना।प्रायुस्तारिष्टंनीरपांसिमृक्षतंसेधतंद्वेषोभवतंसचाभुवा।आनोअश्विनात्रिवृतारथेनार्वांचंरयिंवहतंसुवीरं।शृण्वंतावामवसेजोहवीमिवृधेचनोभवतंवाजसातौ।।५।।ह्वयाम्यग्निंप्रथमंस्वस्तयेह्वयामिमित्रावरुणाविहावसे।ह्वयामिरात्रींजगतोनिवेशनींह्वयामिदेवंसवितारमूतये।आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतंमर्त्यंच।।हिरण्ययेनसवितार

सं॰प्र॰
३०

थेनादेवोयातिभुवनानिपश्यन्।यातिदेवःप्रवतायात्युद्वताया
तिशुभ्राभ्यांयजतोहरिभ्यां।आदेवोयातिसवितापरावतोपवि
श्वादुरिताबाधमानः।अभीवृतंकृशनैर्विश्वरूपंहिरण्यशम्यंय
जतोबृहंतं।आस्थाद्रथंसविताचित्रभानुःकृष्णारजांसितविषीं
ना दधानः।।विजँछ्यावाःशितिपादोअख्यन्रथंहिरण्यप्रउगंवहंतः।
शश्वद्विशःसवितुर्दैव्यस्योपस्थेविश्वाभुवनानितस्थुः।।तिस्रोद्यावः
सवितुर्द्वाउपस्थाँएकायमस्यभुवनेविराषाट्।आणिंनरथ्यममृ
ताधितस्थुरिहब्रवीतुयउतच्चिकेतत्।।६।।विसुपर्णोअंतरिक्षा

राघव
३०

ण्यख्यद्गभीरवेपा असुरः सुनीथः। क्वेदानीं सूर्यः कश्चिकेत कतमां द्यां
रश्मिरस्याततान। अष्टौव्यख्यत्ककुभः पृथिव्यास्त्रीधन्वयोजनासप्त
सिंधून्। हिरण्याक्षः सवितादेव आगाद्दधद्रत्नादाशुषेवार्याणि। हि
रण्यपाणिः सविताविचर्षणिरुभे द्यावापृथिवीअंतरीयते। अपा
मीवांबाधतेवेतिसूर्यमभिकृष्णेनरजसाद्यामृणोति। हिरण्यहस्तो
असुरः सुनीथः सुमृळीकः स्ववाँयात्वर्वाङ्। अपसेधन्रक्षसोयातु
धानानस्थाद्देवः प्रतिदोषंगृणानः। येतेपंथाः सवितः पूर्व्यासोरेण
वः सुकृताअंतरिक्षे। तेभिर्नोअद्यपथिभिः सुगेभीरक्षाचनोअधि

च ब्रूहि देव ।। ७ ।। प्र वो यह्वं पुरूणां विशां देवयतानां । अग्निं सूक्तेभि
र्वचोभिरीमहे यं सीमिदन्य ईळते । जनासो अग्निं दधिरे सहोवृधं
हविष्मंतो विधेम ते । स त्वं नो अद्य सुमना इहाविता भवा वाजेषु
संत्य । प्र त्वा दूतं वृणीमहे होतारं विश्ववेदसं । महस्ते सतो विचरंत्यर्च
यो दिवि स्पृशंति भानवः ।। देवासस्त्वा वरुणो मित्रो अर्यमा सं दूतं प्र
त्नमिंधते । विश्वं सो अग्ने जयति त्वया धनं यस्ते ददाश मर्त्यः । मंद्रो
होता गृहपतिरग्ने दूतो विशामसि । त्वे विश्वा संगतानि व्रता ध्रुवा या
नि देवा अकृण्वत ।। ८ ।। त्वे इदग्ने सुभगे यविष्ठ्य विश्वमा हूयते हविः ।

सत्वंनोअद्यसुमनाउतापरंयक्षिदेवान्त्सुवीर्या।तंघेमित्थानमस्वि
नउपस्वराजमासते।होत्राभिरग्निंमनुषःसमिंध।तेतितिर्वांसोअ
तिस्रिधः।घ्नंतोवृत्रमतरन्रोदसीअपउरुक्षयायचक्रिरे।भुवत्कण्वे
वृषाद्युम्न्याहुतःक्रंददश्वोगविष्टिषु।संसीदस्वमहाँअसिशोचस्व
देववीतमः।विधूममग्नेअरुषंमियेध्यसृजप्रशस्तदर्शतं।यंत्वादे
वासोमनवेदधुरिहयजिष्ठंहव्यवाहन।यंकण्वोमेध्यातिथिर्धनस्पृ
तंयंवृषायमुपस्तुतः।।९।।यमग्निंमेध्यातिथिःकण्वईधऋतादधि
तस्यप्रेषोदीदियुस्तमिमाऋचस्तमग्निंवर्धयामसि।रायस्पूर्धिस्व

धावोस्ति हि तेग्ने दिवेषाप्यं । त्वं वाजस्य श्रुत्यस्य राजसि स नो मृळ म
हाँ असि । उर्ध्व उ षु ण उतये तिष्ठा देवो न सविता । उर्ध्वो वाजस्य सनि
ता यदंजिभिर्वाघद्भिर्विह्वयामहे । उर्ध्वो नः पाह्यंहसो नि केतुना
विश्वं समत्रिणं दह । कृधी न उर्ध्वांच्चरथाय जीवसे विदा देवेषु नो
दुवः । पाहि नो अग्ने रक्षसः पाहि धूर्तेरराव्णः । पाहि रीषत उत वा
जिघांसतो बृहद्भानो यविष्ठ्य ॥ १० ॥ घनेव विष्वग्वि जह्यराव्णस्त
पुर्जंभ यो अस्मध्रुक् । यो मर्त्यः शिशीते अत्यक्तुभिर्मा नः स रिपुरी
शत । अग्निर्वव्ने सुवीर्यमग्निः कण्वाय सौभगं । अग्निः प्रावन्मित्रो

तमेध्यातिथिमग्निः साता उपस्तुतं ।अग्निना तुर्वशंयदुंपरावत उ
ग्रादेवंहवामहे ।अग्निर्नयन्नववास्त्वंबृहद्रथंतुर्वीतिंदस्यवेसहः ।
नि त्वामग्नेमनुर्दधेज्योतिर्जनायशश्वते ।दीदेथकण्वऋतजातउ
क्षितोयंनमस्यंति कृष्टयः ।त्वेषासोअग्नेरमवंतोअर्चयोभीमा
सोनप्रतीयेते ।रक्षस्विनः सदमिद्यातुमावतोविश्वंसमत्रिणंद
ह॥११॥क्रीळंवःशर्धोमारुतमनर्वाणंरथेशुभं ।कण्वाअभिप्र
गायत ।येपृषतीभिर्ऋष्टिभिःसाकंवाशीभिरंजिभिः ।अजायंत
स्वभानवः ।इहेवशृण्वएषांकशाहस्तेषुयद्वदान् ।नियामंचित्रमृंज

ते।प्रवः शर्धायघृष्वयेत्वेषद्युम्नायशुष्मिणे।देवत्तंब्रह्मगायत।प्र
शंसागोष्वघ्न्यंक्रीळंयच्छर्धोमारुतं।जंभेरसस्यवावृधे॥१२॥को
वोवर्षिष्ठआनरोदिवश्चग्मश्चधूतयः।यत्सीमंतंनधूनुथ॥निवो
यामायमानुषोदध्रउग्रायमन्यवे॥जिहीतपर्वतोगिरिः।येषाम
ज्मेषुपृथिवीजुजुर्वाँऽइवविश्पतिः।भियायामेषुरेजते।स्थिरंहि
जानमेषांवयोमातुर्निरेतवे।यत्सीमनुद्विताशवः।उदुत्येसूनवो
गिरः काष्ठाअज्मेष्वत्नत।वाश्राअभिज्ञुयातवे॥१३॥त्यंचिद्घादीर्घं
पृथुंमिहोनपातममृध्रं।प्रच्यावयंतियामभिः।मरुतोयद्धवोबलंज

नोअचुच्यवीतन।गिरीँरचुच्यवीतन।यद्धयांतिमरुतःसंहब्रुव
तेध्वन्ना।शृणोतिकश्चिदेषां।प्रयातशीभमाशुभिःसंतिकण्वेषु
वोदुवः।तत्रोषुमादयाध्वै।अस्तिहिष्मामदायवःस्मसिष्मावयमे
षां।विश्वंचिदायुर्जीवसे॥१५॥कद्धनूनंकधप्रियः।पितापुत्रंन
हस्तयोः।दधिध्वेवृक्तबर्हिषः।क्वनूनंकद्वोअर्थंगंतादिवोनपृथि
व्याः।क्ववोगावोनरण्यंति।क्ववःसुम्नानव्यांसिमरुतः।क्वसुविता
क्वो३विश्वानिसौभगा।यद्यूयंपृश्निमातरोमर्त्तासःस्यातन।स्तो
तावोअमृतःस्यात्।मावोमृगोनयवसेजरिताभूदजोष्यः।पथा

सं०प्र०
३४

यमस्यगादुप॥१५॥मोषुणःपरापरानिर्ऋतिर्दुर्हणावधीत्।पदी
ष्टतृष्णयासह।सत्यंत्वेषाअमवंतोधन्वंचिदारुद्रियासः।मिहं
कृण्वंत्यवातां।वाश्रेवविद्युन्मिमातिवत्संनमातासि
षक्ति।यदेषांवृष्टिरसर्जि।दिवाचित्तमःकृण्वंतिपर्जन्येनोदवा
हेन।यत्पृथिवींव्युंदंति।अधस्वनान्मरुतांविश्वमासद्मपार्थिवं।
अरेजंतप्रमानुषाः॥१६॥मरुतो~~य~~[illegible]~~सये~~वीळुपाणिभि
श्चित्रारोधस्वतीरनु।यातेमखिद्रयामभिः।स्थिरावःसंतुनेम
योरथाअश्वासएषां।सुसंस्कृताअभीशवः।अच्छावदातनागि

राघव
३४

राजरायै ब्रह्मणस्पतिं। अग्निंमित्रंनदर्शतं। मिमीहिश्लोकमास्ये
पर्जन्यइवततनः। गायगायत्रमुक्थ्यं। वंदस्वमारुतंगणंत्वेषं
पनस्युमर्किणं। अस्मेवृद्धाअसन्निह॥१७॥प्रयदित्थापरावतः
शोचिर्नमानमस्यथ। कस्यक्रत्वामरुतःकस्यवर्पसा। कंयाथकंह
धूतयः। स्थिरावःसंत्वायुधापराणुदेवीळूउतप्रतिष्कभे। युष्माक
मस्तुतविषीपनीयसीमामर्त्यस्यमायिनः। पराहयत्स्थिरंहथनरो
वर्तयथागुरु। वियाथनवनिनःपृथिव्याव्याशाःपर्वतानां। नहिवः
शत्रुर्विविदेअधिद्यविनभूम्यांरिशादसः। युष्माकमस्तुतविषीत

सं॰भ॰
३५

नायुजा रुद्रासो नू चिदाधृषे । प्र वेपयंति पर्वतान्वि विंचंति वनस्प
तीन् । प्रो आरत मरुतो दुर्मदा इव देवासः सर्वया विशा ॥ १८ ॥ उपो
रथेषु पृषतीरयुग्ध्वं प्रष्टिर्वहति रोहितः । आ वो यामाय पृथिवी
चिदश्रोदबीभयंत मानुषाः । आ वो मक्षू तनाय कं रुद्रा अवो वृणी
महे । गंता नूनं नोवसा यथा पुरेत्था कण्वाय बिभ्युषे । युष्मेषितो म
रुतो मर्त्येषित आ यो नो अभ्व ईषते । वि तं युयोत शवसा व्योजसा
वि युष्माकाभिरूतिभिः । असामि हि प्रयज्यवः कण्वं दद प्रचेतसः ।
असामिभिर्मरुत आ न ऊतिभिर्गंता वृष्टिं न विद्युतः । असाम्योजो

रा॰पा॰व
३५

बिभृथासुदानवोसामिधूतयः शवः। ऋषिद्विषेमरुतः परिमन्य
वइषुंनसृजतद्विषं॥१०॥ उत्तिष्ठब्रह्मणस्पतेदेवयंतस्त्वेमहे।
उपप्रयंतुमरुतः सुदानवइंद्रप्राशूर्भवासचा। त्वामिद्धिसहस
स्पुत्रमर्त्यउपब्रूतेधनेहिते। सुवीर्यंमरुतआस्वश्व्यंदधीतयोव
आचके। प्रैतुब्रह्मणस्पतिः प्रदेव्येतुसूनृता। अच्छावीरंनर्यंपंक्ति
राधसंदेवायज्ञंनयंतुनः। योवाघतेददातिसूनरंवसुसधत्तेअ
क्षितिश्रवः। तस्माइळांसुवीरामायजामहेसुप्रतूर्तिमनेहसं।
प्रनूनंब्रह्मणस्पतिर्मंत्रंवदत्युक्थ्यं। यस्मिन्निंद्रोवरुणोमि

सं० प्र० त्रो अर्यमा देवा ओकांसि चक्रिरे ।।२०।। तमिद्वोचेमा विदथेषु शंभु
२६ वं मंत्रं देवा अनेहसं । इमां च वाचं प्रतिहर्यथा नरो विश्वेद्वामा वो
अश्नवत् । को देवयंतमश्नवज्जनं को वृक्तबर्हिषं । प्रप्र दाश्वान्पस्त्या
भिरस्थितांतर्वावत्क्षयं दधे । उप क्षत्रं पृंचीत हंति राजभिर्भये चि
त्सुक्षितिं दधे । नास्य वर्ता न तरुता महाधने नार्भे अस्ति वज्रिणः ।
।।२१।। यं रक्षंति प्रचेतसो वरुणो मित्रो अर्यमा । नू चित्स दभ्यते जनः ।
यं बाहुतेव पिप्रति पांति मर्त्यं रिषः । अरिष्टः सर्व एधते । वि दुर्गा वि
द्विषः पुरो घ्नंति राजान एषां । नयंति दुरिता तिरः । सुगः पंथा अनृ

क्षर आदित्यास ऋतं यते । नात्रावखादो अस्ति वः । यं यज्ञं नयथा
नर आदित्या ऋजुना पथा । प्र वः स धीतये नशत् ॥ २२ ॥ स रत्नं म
र्त्यो वसु विश्वं तोकमुत त्मना । अच्छा गच्छत्यस्तृतः । कथा राधाम
सखायः स्तोमं मित्रस्यार्यम्णः । महि प्सरो वरुणस्य । मा वो घ्नंतं
मा शपंतं प्रति वोचे देवयंतं । सुम्नैरिद्व आ विवासे । चतुरश्चिद्द
दमानाद्बिभीयादा निधातोः । न दुरुक्ताय स्पृहयेत् ॥ २३ ॥ सं पूष
न्नध्वनस्तिर व्यंहो विमुचो नपात् । सक्ष्वा देव प्र णस्पुरः । यो नः पू
षन्नघो वृको दुःशेव आदिदेशति । अप स्म तं पथो जहि । अप त्यं

सं॰ प्र॰ पारपंथिनंमुषीवाणंहुरश्चितं।दूरमधिस्रुतेरज।त्वंतस्यद्वयावि

२७ स॰२ नोघशंसस्यकस्यचित्।पदाभितिष्ठतपुषिं।आतत्तेदस्रमंतुमःपूष

न्नवोवृणीमहे।येनपितॄनचोदयः॥२४॥अधानोविश्वसौभग

हिरण्यवाशीमत्तम।धनानिसुषणाकृधि॥अतिनःसश्चतोनय

सुगानःसुपथाकृणु।पूषन्निहक्रतुंविदः॥अभिसूयवसंनय

ननवज्वारोअध्वने।पूषं॰।शग्धिपूर्धिप्रयंसिचशिशीहिप्रास्यु

दरं।पूषं॰।नपूषणंमेथामसिसूक्तैरभिगृणीमसि।वसूनिदस्म

मीमहे॥२५॥कद्रुद्रायप्रचेतसेमीळ्हुष्टमायतव्यसे।वोचेमशं

राघव

२७

तमं हृदे। यथा नो अदितिः करत्पश्वेनृभ्यो यथा गवे। यथा तोकाय
रुद्रियं। यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति। यथा विश्वे स
जोषसः। गाथपतिं मेधपतिं रुद्रं जलाषभेषजं। तच्छंयोः सुम्न
मीमहे। यः शुक्रइव सूर्यो हिरण्यमिव रोचते। श्रेष्ठो देवानां वसुः
॥२६॥ शंनः करत्यर्वते सुगं मेषाय मेष्ये। नृभ्यो नारिभ्यो गवे। अ
स्मे सोम श्रियमधि नि धेहि शतस्य नृणां। महि श्रवस्तुविनृम्णं।
मा नः सोमपरिबाधो मारातयो जुहुरंत। आ न इंदो वाजे भज।
यास्ते प्रजा अमृतस्य परस्मिन्धामन्नृतस्य। मूर्धा नाभा सोम वेन

आभूषंतीः सोमवेदः ॥२७॥ अग्ने विवस्वदुषसश्चित्रं राधो अम
र्त्य। आदाशुषे जातवेदो वहा त्वमद्या देवाँ उषर्बुधः। जुष्टो हि दूतो
असि हव्यवाहनोग्ने रथीरध्वराणां। सजूरश्विभ्यामुषसा सुवीर्य
मस्मे धेहि श्रवो बृहत्। अद्या दूतं वृणीमहे वसुमग्निं पुरुप्रियं। धू
मकेतुं भाऋजीकं व्युष्टिषु यज्ञानामध्वरश्रियं। श्रेष्ठं यविष्ठमति
थिं स्वाहुतं जुष्टं जनाय दाशुषे। देवाँ अच्छा यातवे जातवेदसमग्नि
मीळे व्युष्टिषु। स्तविष्यामि त्वामहं विश्वस्यामृत भोजन। अग्ने त्रा
तारममृतं मियेध्य यजिष्ठं हव्यवाहन ॥२८॥ सुशंसो बोधि गृणते

यविष्ठ्यमधुजिह्वःस्वाहुतः।प्रस्कण्वस्यप्रतिरन्नायुर्जीवसेनम
स्यादैव्यंजनं।होतारंविश्ववेदसंसंहित्वाविशइंधते।सआवहपु
रुहूतप्रचेतसोग्नेदेवाँइहद्रवत्।सवितारमुषसमश्विनाभगम
ग्निंव्युष्टिषुक्षपः।कण्वासस्त्वासुतसोमासइंधतेहव्यवाहंस्वध्व
र।पतिर्ह्यध्वराणामग्नेदूतोविशामसि।उषर्बुधआवहसोमपी
तयेदेवाँअद्यस्वर्दृशः।अग्नेपूर्वाअनूषसोविभावसोदीदेथवि
श्वदर्शतः।असिग्रामेष्ववितापुरोहितोसियज्ञेषुमानुषः॥२९॥
नित्वायज्ञस्यसाधनमग्नेहोतारमृत्विजं।मनुष्वद्देवधीमहिप्रचेतसं

सं०प्र०
३९

जीरंदूतममर्त्यं।यद्देवानांमित्रमहःपुरोहितोंतरोयासिदूत्यं।सिंधो
रिवप्रस्वनितासऊर्मयोग्नेर्भ्राजंतेअर्चयः।श्रुधिश्रुत्कर्णवह्निभि
र्देवैरग्नेसयावभिः।आसीदंतुबर्हिषिमित्रोअर्यमाप्रातर्यावा
णोअध्वरं।शृण्वंतुस्तोमंमरुतःसुदानवोग्निजिह्वाऋतावृधः।
पिबतुसोमंवरुणोधृतव्रतोश्विभ्यामुषसासजूः।[illegible]॥३०॥त्वमग्ने
वसूँरिहरुद्राँआदित्याँउत।यजास्वध्वरंजनंमनुजातंघृतप्रुषं।
श्रुष्टीवानोहिदाशुषेदेवाअग्नेविचेतसः।तान्रोहिदश्वगिर्वणस्त्र
यस्त्रिंशतमावह।प्रियमेधवदत्रिवज्जातवेदोविरूपवत्।अंगि

राघव
३९

रस्वन्महिव्रत प्रस्कण्वस्य श्रुधी हवं ।महिकेरव ऊतये प्रियमेधा अहूष
त ।राजंतमध्वराणामग्निं शुक्रेण शोचिषा ।घृताहवन संत्येमा उषु
श्रुधी गिरः ।याभिः कण्वस्य सूनवो हवंते वसे त्वा ॥२३॥त्वां चित्रश्र
वस्तम हवंते विक्षु जंतवः ।शोचिष्केशं पुरुप्रियाग्ने हव्याय वोळ्हवे ।
नित्वा होतारमृत्विजं दधिरे वसुवित्तमं ।श्रुत्कर्णं सप्रथस्तमं विप्रा
अग्ने दिविष्टिषु ।आत्वा विप्रा अचुच्यवुः सुतसोमा अभि प्रयः ।बृ
हद्भा बिभ्रतो हविरग्ने मर्ताय दाशुषे ।प्रातर्याव्णः सहस्कृत सोमपे
याय संत्य ।इहाद्य दैव्यं जनं बर्हिरासादया वसो ।अर्वांचं दैव्यं जनमग्ने

यक्ष्वसहूतिभिः।अयंसोमःसुदानवस्तंपाततिरोअह्न्यं॥३२॥ए
षोउषाअपूर्व्याव्युच्छतिप्रियादिवः।स्तुषेवामश्विनाबृहत्।यादस्रा
सिंधुमातरामनोतरारयीणां।धियादेवावसुविदा।वच्यंतेवांककुहा
सोजूर्णायामधिविष्टपि।यद्वांरथोविभिष्पतात्।हविषाजारोअपांपि
पर्तिपपुरिर्नरा।पिताकुटस्यचर्षणिः।आदारोवांमतीनांनासत्यामत
वचसा।पातंसोमस्यधृष्णुया॥३३॥यानःपीपरदश्विनाज्योतिष्मती
तमस्तिरः।तामस्मेरासाथामिषं।आनोनावामतीनांयातंपारायगंत
वे।युंजाथामश्विनारथं।अरित्रंवांदिवस्पृथुतीर्थेसिंधूनांरथः।धिया
युयुज्रइंदवः।दिवस्कण्वासइंदवोवसुसिंधूनांपदे।स्वंवाव्रिंकुहधित्सथः।

अभूदु भा उ अंशवे हिरण्यं प्रति सूर्यः । व्यख्यज्जिह्वयासितः ।
॥३४॥ अभूदु पारमेतवे पंथा ऋतस्य साधुया । अदर्शि विस्रु
तिर्दिवः । तत्तदिदश्विनोरवो जरिता प्रति भूषति । मदे सोमस्य
पिप्रतोः । वावसाना विवस्वति सोमस्य पीत्या गिरा । मनुष्वच्छंभू
आगतं । युवोरुषा अनु श्रियं परिज्मनोरुपाचरत् । ऋता वन
थो अक्तुभिः । उभा पिबतमश्विनोभा नः शर्म यच्छतं । अविद्रि
याभिरूतिभिः ॥३५॥ इति प्रथमाष्टके तृतीयोध्यायः ॥ ॥ हरिः ॐ
अयं वां मधुमत्तमः सुतः सोम ऋतावृधा । तमश्विना पिबतं ति

रोअस्मेधत्तंरत्नानिदाशुषे।त्रिबंधुरेणत्रिवृतासुपेशसारथे
नायातमश्विना।कण्वासोवांब्रह्मकृण्वंत्यध्वरेतेषांसुश्रृणुतं
हवं।अश्विनामधुमत्तमंपातंसोममृतावृधा।अथाद्यदस्राव
सुबिभ्रतारथेदाश्वांसमुपगच्छतं।त्रिषधस्थेबर्हिषिविश्ववेद
सामध्वायज्ञंमिमिक्षतं।कण्वासोवांसुतसोमाअभिद्यवोयुवां
हवंतेअश्विना।।याभिःकण्वमभिष्टिभिःप्रावतंयुवमश्विना।
ताभिःष्व१स्माँअवतंशुभस्पतीपातंसोममृतावृधा।।१।।सुदा
सेदस्रावसुबिभ्रतारथेपृक्षोवहतमश्विना।रयिंसमुद्रादुतवा

दिवस्पर्यस्मेधत्तंपुरुस्पृहं।यन्नासत्यापरावतियद्वास्थोअधि
तुर्वशे।अतोरथेनसुवृतानआगतंसाकंसूर्यस्यरश्मिभिः।
अर्वांचावांसप्तयोध्वरश्रियोवहंतुसवनेदुप।इषंपृंचंतासुकृते
सुदानवआबर्हिःसीदतंनरा।तेननासत्यागतंरथेनसूर्यत्व
चा।येनशश्वदूहथुर्दाशुषेवसुमध्वःसोमस्यपीतये।उक्थेभि
रर्वागवसेपुरूवसूअर्कैश्चनिह्वयामहे॥शश्वत्कण्वानांसद
सिप्रियेहिकंसोमंपपथुरश्विना॥२॥सहवामेननउषोव्युच्छा
दुहितर्दिवः।सहद्युम्नेनबृहताविभावरिरायादेविदास्वती।

सं॰ प्र॰
५२

अश्वावतीर्गोमतीर्विश्वसुविदोभूरिच्यवंतवस्तवे।उदीरयप्र
तिमासूनृताउषश्चोदराधोमघोनां।उवासोषाउच्छाच्चनुदेवी
जीरारथानां।येअस्याआचरणेषुदध्रिरेसमुद्रेनश्रवस्यवः।
उषोयेतेप्रयामेषुयुंजतेमनोदानायसूरयः।अत्राहतत्क
ण्वएषांकण्वतमोनामगृणातिनृणां।आघायोषेवसूनर्यु
षायातिप्रभुंजती।जरयंतीवृजनंपद्वदीयतउत्पातयतिप
क्षिणः॥३॥वियासृजतिसमनंव्य१र्थिनःपदंनवेत्योदती।
वयोनकिष्टेपप्तिवाँसआसतेव्युष्टौवाजिनीवति।एषायुक्तप

रापव
५२

या
रावतः सूर्यस्योदयनादधि।शतंरथेभिःसुभगोषाइयंविँत्यभिमा
नुषान्।विश्वमस्यानानामचक्षसेजगज्ज्योतिष्कृणोतिसूनरी।अ
पद्वेषोमघोनीदुहितादिवउषाउछदपस्रिधः।उषआभाहिभानुना
चंद्रेणदुहितर्दिवः।आवहंतीभूर्यस्मभ्यंसोभगंव्युछंतीदिविष्टिषु।
विश्वस्यहिप्राणनंजीवनंत्वेवियदुछसिसूनरि।सानोरथेनबृहता
विभावरिश्रुधिचित्रामघेहवं।।४।।उषोवाजंहिंस्वयश्चित्रोमानुषे
जने।तेनावहसुकृतोअध्वराँउपयेत्वागृणंतिवह्नयः।विश्वांदे
वांआवहसोमपीतयेंतरिक्षादुषस्त्वं।सास्मासुधागोमदश्वावदुक्थ्य१

मुषोवाजंसुवीर्यं।यस्यारुशंतोअर्चयःप्रतिभद्राअदृक्षत।सानोरयिं
विश्ववारंसुपेशसमुषाददातुसुग्म्यं।येचिद्धित्वामृषयःपूर्वऊतयेजु
हूरेवसेमहि।सानःस्तोमाँअभिगृणीहिराधसोषःशुक्रेणशोचिषा।
उषोयदद्यभानुनाविद्वारावृणवोदिवः।प्रनोयच्छतादवृकंपृथुच्छ
र्दिःप्रदेविगोमतीरिषः।संनोरायाबृहताविश्वपेशसामिमिक्ष्वास
मिळाभिरा।संद्युम्नेनविश्वतुरोषोमहिसंवाजैर्वाजिनीवति॥५॥
उषोभद्रेभिरागहिदिवश्चिद्रोचनादधि।वहंत्वरुणप्सवउपत्वासो
मिनोगृहं।सुपेशसंरथंयमध्यस्थाउषस्त्वं।तेनासुश्रवसंजनंप्रा
सुखं

वाद्य दुहितर्दिवः।वयश्चित्तेपतत्रिणोद्विपच्चतुष्पदर्जुनि।
उषःप्रारन्नृतूँरनुदिवोअंतेभ्यस्परि।व्युछंतीहिराश्मिभिर्वि
श्वमाभासिरोचनं।तांत्वामुषर्वसूयवोगीर्भिःकण्वाअहूषत।
।।६।।उदुत्यंजातवेदसंदेवंवहंतिकेतवः।दृशेविश्वायसूर्यं।
अपत्येतायवोयथानक्षत्रायंत्यक्तुभिः।सूरायविश्वचक्षसे।
अदृश्रमस्यकेतवोविरश्मयोजनाँअनु।भ्राजंतोअग्नयोय
था।तरणिर्विश्वदर्शतोज्योतिष्कृदसिसूर्य।विश्वमाभासिरो
चनं।।प्रत्यङ्देवानांविशःप्रत्यङ्ङुदेषिमानुषान्।प्रत्यङ्विश्वं

सं॰ प्र॰
५८

स्वर्दृशे ।।७।। येनापावकचक्षसा। भुरण्यंतंजनाँ अनु। त्वंवरुण
पश्यसि। विद्यामेषिरजस्पृथ्वहा मिमानोअक्तुभिः। पश्यंजन्मा
निसूर्य। सप्तत्वाहरितोरथेवहंति देवसूर्य। शोचिष्केशंवि
चक्षण। अयुक्तसप्तशुंध्युवः सूरोरथस्यनप्त्यः। ताभिर्याति
स्वयुक्तिभिः। उद्वयंतमसस्परिज्योतिष्पश्यंतउत्तरं। देवंदेव
त्रासूर्यमगन्मज्योतिरुत्तमं। उद्यन्नद्यमित्रमहआरोहन्नुत्तरां
दिवं। हृद्रोगंममसूर्यहरिमाणंचनाशय। शुकेषुमेहरिमाणंरो
पणाकासुदध्मसि। अथोहारिद्रवेषुमेहरिमाणंनिदध्मसि।

राघव
५८

उद्गादयमादित्योविश्वेनसहसासह।द्विषंतंमह्यंरंधयन्[illegible]अहं
द्विषतेरधं॥८॥अभिसंमेषंपुरुहूतमृग्मियमिंद्रंगीर्भिर्मद
तावस्वोअर्णवं।यस्यद्यावोनविचरंतिमानुषाभुजेमंहिष्ठम
भिविप्रमर्चत।अभीमवन्वन्स्वभिष्टिमूतयोंतरिक्षप्रांतविषीभि
रावृतं।इंद्रंदक्षासऋभवोमदच्युतंशतक्रतुंजवनीसूनृतारुह
त्।त्वंगोत्रमंगिरोभ्योवृणोरपोतात्रयेशतदुरेषुगातुवित्।
ससेनचिद्विमदायावहोवस्वाजावद्रिंवावसानस्यनर्तयन्।त्व
मपामपिधानावृणोरपाधारयःपर्वतेदानुमद्वसु।वृत्रंयदिं

सं॰ अ॰
४५

द्रशवसावधीरहिमादित्सूर्यंदिव्यारोहयोदृशे।त्वंमायाभिरपमा
यिनोधमः स्वधाभिर्येअधिशुप्तावजुह्वत॥त्वंपिप्रोर्नृमणःप्रारु
जःपुरःप्रऋजिश्वानंदस्युहत्येष्वाविथ॥५॥त्वंशुष्णकुत्संहत्येष्वा
विथारंधयोतिथिग्वायशंबरं।महांतंचिदर्बुदंनिक्रमीःपदासना
देवदस्युहत्याय[illegible]ज्ञिषे।त्वेविश्वातविषीसध्र्यग्घितातवराधः
सोमपीथायहर्षते।तववज्रश्चिकितेबाह्वोर्हितोवृश्चाशत्रोरव
विश्वानिवृष्ण्या।विजानीह्यार्यान्येचदस्यवोबर्हिष्मतेरंधया
शासदव्रतान्।शाकीभवयजमानस्यचोदिताविश्वेत्तातेसध

राघव
४५

मादेषुचाकन।अनुव्रतारंधयन्नपव्रतानाभूभिरिंद्रःश्नथयन्न
नाभुवः।वृद्धस्यचिद्वर्धतोद्यामिनक्षतःस्तवानोवम्रोविजघा
नसंदिहः।तक्षद्यत्तउशनासहसासहोविरोदसीमज्मनाबाध
तेशवः।आत्वावातस्यनृमणोमनोयुजआपूर्यमाणमवहन्न
भिश्रवः॥१०॥मंदिष्टयदुशनेकाव्येसचाँइंद्रोवंकूवंकुतराधि
तिष्ठति।उग्रोययिंनिरपःस्रोतसासृजद्विशुष्णस्यदृंहिताऐर
यत्पुरः।आस्मारथंवृषपाणेषुतिष्ठशार्यातस्यप्रभृतायेषुमं सि
दसे।इंद्रयथासुतसोमेषुचाकनोनर्वाणंश्लोकमारोहसेदिवि।

सं०भ०
८६

अददा अर्भां महते वचस्यवे कक्षीव[illegible]ते वृचयामिंद्र सुन्वते। मेना
भवो वृषणश्वस्य सुक्रतो विश्वेत्ता ते सवनेषु प्रवाच्या। इंद्रो अश्रा
यि सुध्यो निरेके पज्रेषु स्तोमो दुर्यो न यूपः। अश्वयुर्गव्यू रथयु
र्वसूयुरिंद्र इद्रायः क्षयति प्रयंता। इदं नमो वृषभाय स्वराजे सत्य
शुष्माय तवसे वाचि। अस्मिन्निंद्र वृजने सर्ववीराः स्मत्सूरिभिस्त
व शर्मन्स्याम॥१३॥ त्यं सु मेषं महया स्वर्विदं शतं यस्य सुभ्वः सा
कमीरते। अत्यं न वाजं हवनस्यदं रथमेंद्रं ववृत्यामवसे सुवृक्ति
भिः। स पर्वतो न धरुणेष्वच्युतः सहस्रमूतिस्तविषीषु वावृधे। इं

राघव
८६

द्रायवृत्रमवधीन्नदीवृतमुज्जन्नर्णांसिजर्हृषाणोअंधसा।
सहिद्वरोद्वरिषुवव्रःऊधनिचंद्रबुध्नोमदवृद्धोमनीभिः।
इंद्रंतमह्वेस्वपस्ययाधियामंहिष्ठरातिंसाहिपप्रिरंधसः।आ
यंपृणंतिदिविसद्मबर्हिषःसमुद्रंनसुभ्वः१स्वाअभिष्टयः।
तंवृत्रहत्येअनुतस्थुरूतयःशुष्माइंद्रमवाताअहुतप्सवः।
अभिस्ववृष्टिंमदेअस्ययुध्यतोरघ्वीरिवप्रवणेसस्रुरूतयः।
इंद्रोयद्वज्रीधृषमाणोअंधसाभिनद्वलस्यपरिधीँरिवत्रितः।
॥१२॥परींघृणाचरतितित्विषेशवोपोवृत्वीरजसोबुध्नमाशयत्।

षि

वृत्रस्ययत्प्रवणेदुर्गृभिश्वनोनिजघंथहन्वोरिंद्रतन्यतुं ।
ह्रदंनहित्वान्यृषंत्यूर्मयोब्रह्माणींद्रतवयानिवर्धना ।त्वष्टा
चित्तेयुज्यंवावृधेशवस्ततक्षवज्रमभिभूत्योजसं ।जघन्वाँ
उहरिभिःसंभृतक्रतविंद्रवृत्रंमनुषेगातुयन्नपः ।अयच्छ
थाबाह्वोर्वज्रमायसमधारयोदिव्यासूर्यंदृशे ।बृहत्स्वश्चं
द्रममवद्यदुक्थ्य१मकृण्वतभियसारोहणंदिवः ।यन्मानु
षप्रधनाइंद्रमूतयःस्वर्नृषाचोमरुतोमदन्ननु ।द्यौश्चिद
स्यामवाँअहेःस्वनादयोयवीद्भियसावज्रइंद्रते ।वृत्रस्ययद्ब

द्बधानस्यरोदसीमदेसुतस्यशवसाभिनच्छिरः।।१०।।यदिन्
न्विंद्रपृथिवीदशभुजिरहानिविश्वाततनंतकृष्टयः।अत्राह
तेमघवन्विश्रुतंसहोद्यामनुशवसाबर्हणाभुवत्।त्वमस्य
पारेरजसोव्योमनः स्वभूत्योजाअवसेधृषन्मनः।चकृ
षेभूमिंप्रतिमानमोजसोपः स्वःपरिभूरेष्यादिवं।त्वंभुवः
प्रतिमानंपृथिव्याऋष्ववीरस्यबृहतःपतिर्भूः।विश्वमा
प्राअंतरिक्षंमहित्वासत्यमद्धानकिरन्यस्त्वावान्।नयस्यद्या य २
वापृथिवीअनुव्यचोनसिंधवोरजसोअंतमानशुः।नोतस्व

वृष्टिं मदे अस्य युध्यत एको अन्यच्चकृषे विश्वमानुषक् । आर्चन्न
त्र मरुतः सस्मिन्नाजौ विश्वे देवासो अमदन्ननु त्वा । वृत्रस्य यद्भृष्टिम य २
ता वधेन नि त्वमिंद्र प्रत्यानं जघंथ ॥१५॥ न्यू षु वाचं प्र महे भरा
महे गिर इंद्राय सदने विवस्वतः । नू चिद्धि रत्नं ससतामिवाविद
न्न दुष्टुतिर्द्रविणोदेषु शस्यते । दुरो अश्वस्य दुर इंद्र गोरसि दुरो
यवस्य वसुन इनस्पतिः ॥ शिक्षानरः प्रदिवो अकामकर्शनः
सखा सखिभ्यस्तमिदं गृणीमसि । शचीव इंद्र पुरुकृद्द्युमत्तम त
वेदिदमभितश्चेकिते वसु । अतः संगृभ्याभिभूत आ भर मा त्वाय

ष्मतः।यत्पर्वतेनसमशीतहर्यतइंद्रस्यवज्रःश्नथिताहिरण्ययः।अस्मैभी
मायनमसासमध्वरउषोनशुभ्रआभरापनीयसे।यस्यधामश्रवसेना
मेंद्रियंज्योतिरकारिहरितोनायसे।इमेतइंद्रतेवयंपुरुष्टुतयेत्वारभ्य
चरामसिप्रभूवसो।नहित्वदन्योगिर्वणोगिरःसघत्क्षोणीरिवप्रतिनो
हर्यतद्वचः।भूरितइंद्रवीर्यंऽतवस्मस्यस्यस्तोतुर्मघवन्काममापृण।
अनुतेद्यौर्बृहतीवीर्यंममइयंचतेपृथिवीनेमओजसे।त्वंतमिंद्रपर्वतं
महामुरुंवज्रेणवज्रिन्पर्वशश्चकर्तिथ।अवासृजोनिवृताःसर्तवाअ
पःसत्राविश्वंदधिषेकेवलंसहः॥२२॥नूचित्सहोजाअमृतोनितुंदते

होतायद्दूतोअभवद्विवस्वतः।विसाधिष्ठेभिःपथिभीरजोममआ
देवताताहविषाविवासति।आस्वमद्मयुवमानोअजरंस्तृष्ववि
ष्यन्नतसेषुतिष्ठति।अत्योनपृष्ठंप्रुषितस्यरोचतेदिवोनसानुस्त
नयन्नचिक्रदत्।क्राणारुद्रेभिर्वसुभिःपुरोहितोहोतानिषत्तोर
यिषाळमर्त्यः।रथोनविक्ष्वृंजसानआयुषुव्यानुषग्वार्यादेवऋ
ण्वति।विवातजूतोअतसेषुतिष्ठतेवृथाजुहूभिःसृण्यातु[illegible]षणिः।वि
तृषुयदग्नेवनिनोवृषायसेकृष्णंतएमरुशदूर्मेअजर।तपुर्जंभो
वनआवातचोदितोथेनसाह्वांअववातिवंसगः।अभिव्रजंनक्षि तापव
यू

तंपाजसारजःस्थातुश्चरथंभयतेपतत्रिणः॥२३॥दधुष्ट्वाभृगवो
न मानुषेष्वारयिंचारुंसुहवंजनेभ्यः।होतारमग्नेअतिथिंवरेण्यंमि
त्रंनशेवंदिव्यायजन्मने।होतारंस[illegible]सजुह्वो३यजिष्ठंयंवाघतोवृ
णतेअध्वरेषु।अग्निंविश्वेषामरतिंवसूनांसपर्यामिप्रयसायामिर
त्नं।अछिद्रासेहेस्रनोसोनोअद्यस्तोतृभ्योमित्रमहःशर्मयच्छ।अ
ग्नेगृणंतमंहसउरुष्योर्जोनपात्पूर्भिरायसीभिः।भवावरूथंगृण
तेविभावोभवामघवन्मघवद्भ्यःशर्म।उरुष्याग्नेअंहसोगृणंतंप्रात
र्मक्षूधियावसुर्जगम्यात्॥२४॥वयाइदग्नेअग्नयस्तेअन्येत्वेविश्वे

सं॰प्र॰ अमृतामादयंते।वैश्वानरनाभिरसिक्षितीनांस्थूणेवजनाँउपमिद्य
५४ यंथ।मूर्धादिवोनाभिरग्निःपृथिव्याअथाभवदरतीरोदस्योः।तंत्वा
देवासोजनयंतदेवंवैश्वानरज्योतिरिदार्याय।आसूर्येनरश्मयोध्रु
वासोवैश्वानरेदधिरेग्नावसूनि।यापर्वतेष्वोषधीष्वप्सुयामानुषे
ष्वसितस्यराजा।बृहतीइवसूनवेरोदसीगिरोहोतामनुष्योनद
क्षः।स्वर्वतेसत्यशुष्मायपूर्वीर्वैश्वानरायनृतमाययह्वीः।दिवश्चि
तेबृहतोजातवेदोवैश्वानरप्ररिरिचेमहित्वं।राजाकृष्टीनामसि
मानुषीणांयुधादेवेभ्योवरिवश्चकर्थ।प्रनूमहित्वंवृषभस्यवोचंयं राघव
५४

पूरवोवृत्रहणंसचंते।वैश्वानरोदस्युमग्निर्जघन्वाँअधूनोत्का
ष्ठाअवशंबरंभेत्।वैश्वानरोमहिम्नाविश्वकृष्टिर्भरद्वाजेषुयज
तोविभावा।शातवनेयेशतिनीभिरग्निःपुरुणीथेजरतेसूनृता
वान्॥२५॥वह्निंयशसंविदथस्यकेतुंसुप्राव्यंदूतंसद्योअर्थं।
द्विजन्मानंरयिमिवप्रशस्तंरातिंभरद्भृगवेमातरिश्वा।अस्यशा
सुरुभयासःसचंतेहविष्मंतउशिजोयेचमर्ताः।दिवश्चित्पूर्वोन्य
सादिहोतापृच्छ्योविश्पतिर्विक्षुवेधाः।तंनव्यसीहृदआजाय
मानमस्मत्सुकीर्तिर्मधुजिह्वमश्याः।यमृत्विजोवृजनेमानुषा

सः प्रयस्वंतआयवोजीजनंत। उशिक्पावकोवसुर्मानुषेषुव
रेण्योहोताधायिविक्षु। दमूनागृहपतिर्दमआँ अग्निर्भुव
द्रयिपतीरयीणां। तंत्वावयंपतिमग्नेरयीणांप्रशंसामोमति
भिर्गोतमासः। आशुंनवाजंभरंमर्जयंतः। प्रातर्मक्षू॰ ॥२६॥
अस्माइदुप्रतवसेतुरायप्रयोनहर्मिस्तोमंमाहिनाय। ऋची
षमायाध्रिगवओहमिंद्रायब्रह्माणिराततमा। अस्माइदु
प्रयइवप्रयंसिभराम्यांगूषंबाधेसुवृक्ति। इंद्रायहृदामन
सामनीषाप्रत्नायपत्येधियोमर्जयंत। अस्माइदुत्यमुपमं

स्वर्षांभराम्यांगूषमास्येन।मंहिष्ठमच्छोक्तिभिर्मतीनांसुवृक्ति
भिः सूरिंवावृधध्यै।अस्मा इदुस्तोमंसंहिनोमिरथंनतष्टेव
तत्सिनाय।गिरश्चगिर्वाहसेसुवृक्तींद्रायविश्वमिन्वंमेधि
राय।अस्मा इदुसप्तिमिवश्रवस्येंद्रायार्कंजुह्वा३समंजे।वी
रंदानौकसंवंदध्यैपुरांगूर्तश्रवसंदर्माणं॥२७॥अस्मा इदुत्व
ष्टातक्षद्वज्रंस्वपस्तमंस्वर्यं१रणाय।वृत्रस्यचिद्विदद्येनम
र्मतुजंनीशानस्तुजताकियेधाः।अस्येदुमातुःसवनेषुसद्यो
महः पितुंपपिवांचार्वन्ना।मुषायद्विष्णुःपचतंसहीयान्विध्य

सं० अ०
५६

द्वराहंतिरोअद्रिमस्ता।अस्माइदुग्नाश्चिद्देवपत्नीरिंद्रायार्क
महिहत्यऊवुःपरिद्यावापृथिवीजभ्रउर्वीनास्यतेमहिमानं
परिष्टः।अस्येदेवप्ररिरिचेमहित्वंदिवस्पृथिव्याःपर्यंतरिक्षा
त्।स्वराळिंद्रोदमआविश्वगूर्तःस्वरिरमत्रोववक्षेरणाय।अ
स्येदेवशवसाशुषंतंविवृश्चद्वज्रेणवृत्रमिंद्रः।गानव्राणा।अ
वनीरमुंचदभिश्रवोदावनेसचेताः॥२८॥अस्येदुत्वेषसारंत
सिंधवःपरियद्वज्रेणसीमयछत्।ईशानकृद्दाशुषेदशस्यन्तु
र्वीतयेगाधंतुर्वणिःकः।अस्माइदुप्रभरातूतुजानोवृत्रायवज्र

राघव
५६

णा

मीशानः। कियेधाः। गोर्नपर्वविरदातिरश्चेष्यन्नर्णांस्यपांचरध्यै। अस्ये
दुप्रब्रूहिपूर्व्याणितुरस्यकर्माणिनव्यउक्थैः। युधेयदिष्णानआयुधा
न्यृघायमाणोनिरिणातिशत्रून्। अस्येदुभियागिरयश्चदृळ्हाद्यावाचभू
माजनुषस्तुजेते। उपोवेनस्यजोगुवानओणिंसद्योभुवद्वीर्यायनोधाः।
अस्माइदुत्यदनुदाय्येषामेकोयद्वव्नेभूरेरीशानः। प्रैतशंसूर्येपस्पृ
धानंसौवश्व्येसुष्विमावदिंद्रः। एवातेहारियोजनासुवृक्तींद्रब्रह्माणि
गोतमासोअक्रन्। ऐषुविश्वपेशसंधियंधाः प्रातर्मक्षूधियावसुर्जग
म्यात्॥२९॥ इतिप्रथमाष्टकेचतुर्थोध्यायः। प्रमन्महेशवसानायशूष

मांगूषंगिर्वणसेअंगिरस्वत्।सुवृक्तिभिःस्तुवतऋग्मियायार्चामा
र्कंनरेविश्रुताय।प्रवोमहेमहिनमोभरध्वमांगूष्यंशवसानायसाम।
येनानःपूर्वेपितरःपदज्ञाअर्चंतोअंगिरसोगाअविंदन्।इंद्रस्यांगि
रसांचेष्टौविदत्सरमातनयायधासिं।बृहस्पतिर्भिनदद्रिंविदद्गाःसमु
स्रियाभिर्वावशंतनरः।ससुष्टुभासस्तुभासप्तविप्रैःस्वरेणाद्रिंस्वर्यो
नवग्वैः।सरण्युभिःफलिगमिंद्रशक्रवलंरवेणदरयोदशग्वैः।गृणानो
व अंगिरोभिर्दस्मविवरुषसासूर्येणगोभिरंधः।विभूम्याअप्रथयइंद्र
सानुदिवोरजउपरमस्तभायः॥१॥तदुप्रयक्षतममस्यकर्मदस्मस्यचा

रुतममस्तिदंसः।उपह्वरेयदुपराःअपिन्वन्मध्वर्णसोनद्य१श्चतस्रः।
द्विताविवव्रेसनजासनीळेअयास्यःस्तवमानेभिरर्कैः।भगोनमेनेप
रमेव्योमन्नधारयद्रोदसीसुदंसाः।सनाद्दिवंपरिभूमाविरूपेपुनर्भुवा
युवतीस्वेभिरेवैः।कृष्णेभिरक्तोषारुशद्भिर्वपुर्भिराचरितोअन्यान्या।
सनेमिसख्यंस्वपस्यमानःसूनुर्दाधारशवसासुदंसाः।आमासुचिद्दधि
षेपक्वमन्तःपयःकृष्णासुरुशद्रोहिणीषु।सनात्सनीळाअवनीरवाता
व्रतारक्षन्तेअमृताःसहोभिः।पुरुसहस्राजनयोनपत्नीर्दुवस्यन्तिस्वसा
रोअह्रयाणं॥२॥सनायुवोनमसानव्योअर्कैर्वसूयवोमतयोदस्मदद्रुः

पतिंनपत्नीरुशतीरुशंतंस्पृशंतित्वाशवसावन्मनीषाः।सनादेवतवरा
योगभस्तौनक्षीयंतेनोपदंस्यतिदस्म।द्युमाँअसिक्रतुमाँइंद्रधीरः।शि
क्षाशचीवस्तवनःशचीभिः।सनायतेगोतमइंद्रनव्यमतक्षद्ब्रह्महरि
योजनाय।सुनीथायनःशवसाननोधाःप्रातर्मक्षू०॥२॥त्वंमहाँइंद्रयो
हशुष्मैर्द्यावाजज्ञानःपृथिवीअमेधाः।यद्धतेविश्वागिरयश्चिदभ्वाभि
यादृळ्हासःकिरणानैजन्।आयद्धरीइंद्रविव्रतावेरातेवज्रंजरिता
बाह्वोर्धात्।येनाविहर्यतक्रतोअमित्रान्पुरइष्णासिपुरुहूतपूर्वीः।त्वं
सत्यइंद्रधृष्णुरेतांत्वमृभुक्षानर्यस्त्वंषाट्।[illegible]त्वंशुष्णंवृजनेपृक्षआणौ

यूने कुत्साय द्युमते सचाहन्। त्वंह त्यदिंद्र चोदीः सखा वृत्रं यद्वज्रिन्वृषक
र्मन्नुभ्नाः। यद्ध शूर वृषमणः पराचैर्वि दस्यूँर्योनावकृतो वृथाषाट्। त्वं
ह त्यदिंद्रारिषण्यन्दृळ्हस्य चिन्मर्तानामजुष्टौ। व्य१स्मदा काष्ठा अर्वते व
र्घनेव वज्रिञ्छ्नथिह्यमित्रान्॥५॥ त्वांह त्यदिंद्रार्णसातौ स्वर्मीळ्हे नर
आजा हवंते। तव स्वधाव इयमा समर्य ऊतिर्वाजेष्वतसाय्या भूत्। त्वंह
त्यदिंद्र सप्त युध्यन्पुरो वज्रिन्पुरुकुत्साय दर्दः। बर्हिर्न यत्सुदासे वृथा
वर्गंहो राजन्वरिवः पूरवे कः। त्वं त्यान्न इंद्र देव चित्रामिषमापो न पीप
यः परिज्मन्। यया शूर प्रत्यस्मभ्यं यंसि त्मनमूर्जं न विश्वध क्षरध्यै। अ

कारित इंद्रगोतमेभिर्ब्रह्माण्योक्ता नमसा हरिभ्यां।सुपेशसं वाजमा
भरा नः प्रातर्मक्षू धियावसुर्जगम्यात्॥५॥ वृष्णे शर्धाय सुमखाय
वेधसे नोधः सुवृक्तिं प्रभरा मरुद्भ्यः।अपो न धीरो मनसा सुहस्त्यो गि
रः समंजे विदथेष्वाभुवः।ते जज्ञिरे दिव ऋष्वास उक्षणो रुद्रस्य मर्या
असुरा अरेपसः।पावकासः शुचयः सूर्या इव सत्वानो न द्रप्सिनो घो
रवर्पसः।युवानो रुद्रा अजरा अभोग्घनो ववक्षुरध्रिगावः पर्वता इव।
दृळ्हा चिद्विश्वा भुवनानि पार्थिवा प्रच्यावयंति दिव्यानि मज्मना॥
चित्रैरंजिभिर्वपुषे व्यंजते वक्षःसु रुक्माँ अधियेतिरे शुभे अंसेष्वेषां राघव

नि मिमृक्षुरृष्टयः साकंजज्ञिरे स्वधया दिवो नरः। ईशानकृतो धुनयो
रिशादसो वातान्विद्युतस्तविषीभिरक्रत। दुहंत्यूधर्दिव्यानि धूतयो भू
मिंपिन्वंति पयसा परिज्रयः॥५॥ पिन्वंत्यपो मरुतः सुदानवः पयो घृ
तवद्विदथेष्वाभुवः। अत्यंनमिहे वि नयंति वाजिनमुत्सं दुहंति स्तनयं
तमक्षितं। महिषासो मायिनश्चित्रभानवो गिरयो न स्वतवसो रघुष्यदः
मृगा इव हस्तिनः खादथा वना यदारुणीषु तविषीरयुग्ध्वं। सिंहा इव ना
नदति प्रचेतसः पिशा इव सुपिशो विश्ववेदसः। क्षपो जिन्वंतः पृषती
भिरृष्टिभिः समित्सबाधः शवसाहिमन्यवः। रोदसी आ वदता गण

सं०प्र० श्रियोन्रषाचः भ्राः शवसाहिमन्यवः।आवंधुरेष्वमतिर्नदर्शताविद्युन्न
६० त~~स्थौ~~स्थौमरुतोरथेषुवः।विश्वेवेदसोरयिभिःसमोकसःसंमिश्लास
स्तविषीभिर्विरप्शिनः।अस्तारइषुंदधिरेगभस्त्योरनंतशुष्मावृष
खादयोनरः॥७॥हिरण्ययेभिःपविभिःपयोवृधउज्जिघ्नंतआपथ्यो
नपर्वतान्।मखाअयासःस्वसृतोध्रुवच्युतोदुध्रकृतोमरुतोभ्राजदृष्ट नौ
यः।घृषुंपावकंवनिनंविचर्षणिंरुद्रस्यसूनुंहवसागृणीमसि।रजस्तु
रंतवसंमारुतंगणमृजीषिणंवृषणंसश्चतश्रिये।प्रनूसमर्तःशवसा
जनाँअतितस्थौवऊतीमरुतोयमावत।अर्वद्भिर्वाजंभरतेधनानृ राघव
६०

भिरापृच्छ्यंक्रतुमाक्षेतिपुष्यति।चर्कृत्यंमरुतःपृत्सुदुष्टरंद्युमंतंशुष्मं
मघवत्सुधत्तन।धनस्पृतमुक्थ्यंविश्वचर्षणिंतोकंपुष्येमतनयंश
तंहिमाः।नूष्ठिरंमरुतोवीरवंतमृतीषाहंरयिमस्मासुधत्त।सहस्रि
णंशतिनंशूशुवांसंप्रातर्मक्षूधियावसुर्जगम्यात्॥८॥पश्वानता
युंगुहाचतंतंनमोयुजानंनमोवहंतं।सजोषाधीराःपदैरनुग्मन्नु
पत्वा।सीदन्विश्वेयजत्राः।ऋतस्यदेवाअनुव्रतागुर्भुवत्परिष्टिर्द्यौ
र्नभूम।वर्धंतीमापःपन्वासुशिश्विमृतस्ययोनागर्भेसुजातं।पुष्टि
र्नरण्वाक्षितिर्नपृथ्वीगिरिर्नभुज्मक्षोदोनशंभु।अत्योनाज्मन्सर्ग

प्रतक्तः सिंधुर्नक्षोदः कईंवराते। जामिः सिंधूनांभ्रातेवस्वस्रामिभ्यां
नराजावनान्यत्ति। यद्वातजूतोवनाव्यस्थादग्निर्हदातिरोमापृथिव्याः
श्वसित्यप्सुहंसोनसीदन्क्रत्वाचेतिष्ठोविशामुषर्भुत्। सोमोनवेधा
ऋतप्रजातः पशुर्नशिश्वाविभुर्दूरेभाः॥ २॥ रयिर्नचित्रासूरोन
संदृगायुर्नप्राणोनित्योनसूनुः। तक्वानभूर्णिर्वनासिषक्तिपयोन
धेनुः शुचिर्विभावा। दाधारक्षेममोको~~ष~~नरण्वोयवोनपक्वोवैंजे
ताजनानां। ऋषिर्नस्तुभ्वाविक्षुप्रशवोंस्तोजीनप्रीतोवाजीनप्रीतोव
योदधाति। दुरोकशोचिः क्रतुर्ननित्योजायेवयोनावरंविश्वस्मै। चित्रोय

दभ्राट्श्वेतोनविक्षुरथोनरुक्मीत्वेषःसमत्सु।सेनेवसृष्टामंदधात्यस्तु
र्नदिद्युत्त्वेषप्रतीका।यमोहजातोयमोजनित्वंजारःक[illegible]नीनांपतिर्ज
नीनां।तंवश्चराथावयंवसत्यास्तंनगावोनक्षंतइद्धं।सिंधुर्नक्षोदः
प्रनीचीरैनोन्नवंतगावःस्व१र्दृशीके।।१०।।वनेषुजायुर्मर्तेषुमित्रो
वृणीतेश्रुष्टिंराजेवाजुर्यं।क्षेमोनसाधुःक्रतुर्नभद्रोभुवत्स्वाधीर्होता
हव्यवाट्।हस्तेदधानोनृम्णा।विश्वान्यमेदेवान्धाद्गुहानिषीदन्।विदं
तीमत्रनरोधियंधाहृदायत्तष्टान्मंत्राँःअशंसन्।अजोनक्षांदाधारपृ
थिवींतस्तंभद्यांमंत्रेभिःसत्यैः।प्रियापदानिपाहिविश्वायुरग्नेगुहागुहंगाः

पुश्वोनि

रा

सं॰प्र॰
६२
अग्रय

यईंचिकेतगुहाभवंतमायःससादधारामृतस्य।वियेचृतंत्यृतासपंतआ
दिद्वसूनिप्रववाचास्मै।वियोवीरुत्सुरोधन्महित्वोतप्रजाउतप्रसूष्वंतः
चित्तिरपांदमेविश्वायुःसद्मेवधीसंमायचक्रुः।श्रीणन्नुपस्थाद्दिवंभुर
ण्युस्थातुंमक्तून्व्यूर्णोत्।परियदेषामेकोविश्वेषांभुवद्देवोदेवानांमहि
त्वा।आदित्तेविश्वेक्रतुंजुषंतशुष्काद्यद्देवजीवोजनिष्ठाः।भजंतविश्वे
देवत्वंनामऋतंसपंतोअमृतमेवैः।ऋतस्यप्रेषाऋतस्यधीतिर्विश्वायु
र्विश्वेअपांसिचक्रुः।यस्तुभ्यंदाशाद्योवातेशिक्षात्तस्मैचिकित्वान्रयिं
दयस्व।होतानिषत्तोमनोरपत्येसचिन्न्वासांपतीरयीणां।इच्छंतरेतोमि

राघव
६२

थस्तुर्नृषुसंजानतस्वैर्दक्षैरमृताः।पितुर्नपुत्राःक्रतुंजुषंतश्रोषन्येअस्य
शासंतुरासः।विरायऔर्णोद्दुरःपुरुक्षुःपिपेशनाकंस्तृभिर्दमूनाः।
।।१२।।शुक्रःशुशुक्वाँउषोनजारःपप्रासमीचीदिवोनज्योतिः।परि
प्रजातःक्रत्वाबभूथभुवोदेवानांपितापुत्रःसन्।वेधाअदृप्तोअग्नि
र्विजानन्नूधर्नगोनांस्वाद्मापितूनां।जनेनशेवआहूर्यःसन्मध्येनिष
त्तोरण्वोदुरोणे।पुत्रोनजातोरण्वोदुरोणेवाजीनप्रीतोविशोविता
रीत्।विशोयदह्वेनृभिःसनीळाअग्निर्देवत्वाविश्वान्यश्याः।नकिष्ट
एताव्रतामिनंतिनृभ्योयदेभ्यःश्रुष्टिंचकर्थ।तत्तुतेदंसोयदहन्समा

दुरो२

नेनृभिर्यद्युक्तो विवेरपांसि। उषो न जारो विभावोस्रः संज्ञातरूपश्चि
केतदस्मै। त्मना वहंतो व्यृण्वन्नवंत विश्वे स्व१र्दृशीके॥१३॥ वनेम पू
र्वीरर्यो मनीषा अग्निः सुशोको विश्वान्यश्याः। आ दैव्यानि व्रता चिकि
त्वानामानुषस्य जनस्य जन्म। गर्भो यो अपां गर्भो वनानां गर्भश्च स्थातां
गर्भश्चरथां॥ अद्रौ चिदस्मा अंतर्दुरोणे विशां न विश्वो अमृतः स्वाधीः
स हि क्षपावाँ अग्नी रयीणां दाशद्यो अस्मा अरं सूक्तैः। एता चिकित्वो
निपाहि देवानां जन्म मर्तांश्च विद्वान्। वर्धान्यं पूर्वीः क्षपो विरूपाः स्थातु
श्चरथमृतप्रवीतं। आराधि होता स्व१र्निषत्तः कृण्वन्विश्वान्यपांसि

सस्रा।गोषुप्रशस्तिंवनेषुधिषेभरंतविश्वेबलिंस्वर्णः।वित्वानरःपुरुत्रा
सपर्यन्पितुर्नजिव्रेर्विवेदोभरंत।साधुर्नगृध्नुरस्तेवशूरोयातेवभीम
स्त्वेषःसमत्सु॥१५॥उपप्रजिन्वन्नुशतीरुशंतंपतिंननित्यंजनयःसनी
ळाः।स्वसारःश्यावीमरुषीमजुष्रन्चित्रमुछंतीमुषसंनगावः।वीळुचि
दृळ्हापितरोनउक्थैरद्रिंरुजन्नंगिरसोरवेण।चक्रुर्दिवोबृहतोगातुम
स्मेअहःस्वर्विविदुःकेतुमुस्राः।दधन्नृतंधनयन्नस्यधीतिमादिदर्यो
दिधिष्वोविभृत्राः।अतृष्यंतीरपसोयंत्यछादेवाञ्जन्मप्रयसावर्धयं
तीः।मथीद्यदींविभृतोमातरिश्वागृहेगृहेश्येतोजेन्योभूत्।आदींरा

सं०ऋ० तेनसहीयसेसचासन्नादूत्यं१भृगवाणोविवाय।महेयत्पित्रईंर
६४ संदिवेकरवत्सरत्पृशन्यश्चिकित्वान्।सृजदस्ताधृषतादिद्युमस्मैस्वा
यांदेवोदुहितरित्विषिंधात्॥१५॥स्वआयस्तुभ्यंदमआविभातिन
मोवादाशादुशतोअनुद्यून्।वर्धोऽग्नेवयोअस्यद्विबर्हायासद्रा
यासरथंयंजुनासि।अग्निंविश्वाअभिपृक्षःसचंतेसमुद्रंनस्रवतः
सप्तयह्वीः।नजामिभिर्विचिकितेवयोनोविदादेवेषुप्रमतिंचिकि
त्वान्।आयदिषेनृपतिंतेजआनट्छुचिरेतोनिषिक्तंद्यौरभीके।
अग्निःशर्धमनवद्यंयुवानंस्वाध्यंजनयत्सूदयच्च।मनोनयोऽध्वनः

सद्य एत्येकः सत्रा सूरो वस्व ईशे । राजाना मित्रावरुणा सुपाणी गोषु
प्रियममृतं रक्षमाणा । मा नो अग्ने सख्या पित्र्याणि प्र मर्षिष्ठा अभि
विदुष्कविः सन् । नभो न रूपं जरिमा मिनाति पुरा तस्या अभिशस्तेरधी
हि ॥ १६ ॥ नि काव्या वेधसः शश्वतस्कर्हस्ते दधानो नर्या पुरूणि । अग्नि
र्भुवद्रयिपती रयीणां सत्रा चक्राणो अमृतानि विश्वा । अस्मे वत्सं परि
षंतं न विंदन्निच्छंतो विश्वे अमृता अमूराः । श्रमयुवः पदव्यो धियंधास्त
स्थुः पदे परमे चार्वग्नेः । तिस्रो यदग्ने शरदस्त्वामिच्छुचिं घृतेन शुचयः
सपर्यान् । नामानि चिद्दधिरे यज्ञियान्यसूदयंत तन्व१ सुजाताः । आरो

दसीबृहती वेविदानाः प्ररुद्रिया जभ्रिरे यज्ञियासः। विदन्मर्तो नेमधिता
विकित्वानग्निं पदे परमे तस्थिवांसं। संजानाना उप सीदन्नभिज्ञु पत्नीवंतो
नमस्यं नमस्यन्। रिरिक्वांसस्तन्वः कृण्वत स्वाः सखा सख्युर्निमिषि
रक्षमाणाः॥१७॥ त्रिः सप्त यद्गुह्यानि त्वे इत्पदाविदन्निहिता यज्ञिया
सः। तेभी रक्षंते अमृतं सजोषाः पशूंश्च स्थातॄं चरथं च पाहि। विद्वाँ अ
ग्ने वयुनानि क्षितीनां व्यानुषक्छुरुधो जीवसे धाः॥ अंतर्विद्वाँ अध्व
नो देवयानानतंद्रो दूतो अभवो हविर्वाट्। आ ये विश्वा स्वपत्यानि तस्थुः
कृण्वानासो अमृतत्वाय गातुं। मह्ना महद्भिः पृथिवी वि तस्थे माता पुत्रै
[illegible] आ[illegible] [illegible] अजानन्॥ विद[illegible]
[illegible] ॥४

रदितिर्धायसेवेः।अधिश्रियंनिदधुश्चारुमस्मिन्दिवोयदक्षीअमृताअ
कृण्वन्।अधक्षरंतिसिंधवोनसृष्टाःप्रनीचीरग्नेअरुषीरजानन्॥१०॥
रयिर्नयःपितृवित्तोवयोधाःसुप्रणीतिश्चिकितुषोनशासुः।स्योनशीर
तिथिर्नप्रीणानोहोतेवसद्मविधतोवितारीत्।देवोनयःसवितासत्यम
न्माक्रत्वानिपातिवृजनानिविश्वा।पुरुप्रशस्तोअमतिर्नसत्यआत्मेवशेवो
दिधिषाय्योभूत्।देवोनयःपृथिवींविश्वधाया।उपक्षेतिहितमित्रोनरा
जा।पुरःसदःशर्मसदोनवीरा[redacted]ऽनवद्यापतिजुष्टेवनारी।तंत्वानरोद
मआनित्यमिद्धमग्नेसचंतक्षितिषुध्रुवासु।अधिद्युम्नंनिदधुर्भूर्यस्मिन्न

वोविश्वायुर्धरुणोरयीणां।विपृक्षोअग्नेमघवानोअश्युर्विसूरयोददतो
विश्वमायुः।सनेमवाजंसमिथेष्वर्योभागंदेवेषुश्रवसेदधानाः।।१७।।ऋ
तस्यहिधेनवोवावशानाःस्मदूध्नीःपीपयंतद्युभक्ताः।परावतःसुमतिंभि
क्षमाणाविसिंधवःसमयासस्रुरद्रिं।त्वेअग्नेसुमतिंभिक्षमाणादिविश्र
वोदधिरेयज्ञियासः।नक्ताचचक्रुरुषसाविरूपेकृष्णंचवर्णमरुणंचसंधुः
यान्रायेमर्त्तान्सुषूदोअग्नेतेस्याममघवानोवयंच।।छायेवविश्वंभुवनं
सिसक्ष्यापप्रिवान्रोदसीअंतरिक्षं।अर्वद्भिरग्नेअर्वतोनृभिर्नॄन्वीरैर्वीरा
न्वनुयामात्वोताः।ईशानासःपितृवित्तस्यरायोविसूरयःशतहिमानोअ

श्युः। एतातेअग्नउचथानिवेधोजुष्टानिसंतुमनसेहृदेच। शकेमरायःसुधु
रोयमंतेधिश्रवोदेवभक्तंदधानाः॥२०॥ उपप्रयंतोअध्वरंमंत्रंवोचेमाग्न
ये। आरेअस्मेचशृण्वते। यःस्नीहितीषुपूर्व्यःसंजग्मानासुकृष्टिषु। अ
रक्षद्दाशुषेगयं। उतब्रुवंतुजंतवउदग्निर्वृत्रहाजनि। धनंजयोरणेरणे।
यस्यदूतोअसिक्षयेवेषिहव्यानिवीतये। दस्मत्कृणोष्यध्वरं। तमित्सुह
व्यमंगिरःसुदेवंसहसोयहो। जनाआहुःसुबर्हिषं॥२१॥ आचवहासितां
इहदेवांउपप्रशस्तये। हव्यासुश्चंद्रवीतये। नयोरुपब्दिबिश्व्यःशृण्वेरथस्य र
कच्चन। यदग्नेयासिदूत्यं। त्वोतोवाज्यह्रयोभिपूर्वस्मादपरः। प्रदाश्वांअग्ने

सं०७अ०
६६

अस्याता। उत द्युमत्सुवीर्यं बृहदग्ने विवाससि। देवेभ्यो देव दाशुषे॥२२॥ जु
षस्व सप्रथस्तमं वचो देवप्सरस्तमं। हव्या जुह्वान आसनि। अथा ते अंगिर
स्तमाग्ने वेधस्तम प्रियं। वोचेम ब्रह्म सानसि। कस्ते जामिर्जनानामग्ने को दा
श्वध्वरः। को ह कस्मिन्नसि श्रितः। त्वं जामिर्जनानामग्ने मित्रो असि प्रियः।
सखा सखिभ्य ईड्यः। यजा नो मित्रावरुणा यजा देवाँ ऋतं बृहत्। अग्ने य
क्षि स्वं दमं॥२३॥ का त उपेतिर्मनसो वराय भुवदग्ने शंतमा का मनीषा। को
वा यज्ञैः परि दक्षं त आप केन वा ते मनसा दाशेम। एह्यग्न इह होता नि षी
दादब्धः सु पुरएता भवा नः। अवतां त्वा रोदसी विश्वमिन्वे यजा महे सौ

राघव
६६

मनसायदेवान्। प्रसुविश्वान्रक्षसोधक्ष्यग्नेभवायज्ञानामभिशस्तिपावा। अथावहसोमपतिंहरिभ्यामातिथ्यमस्मैचकृमासुदाव्ने। प्रजावतावचसावह्निरासाचहुवेनिचसत्सीहदेवैः। वेषिहोत्रमुतपोत्रंयजत्रबोधिप्रयंतर्जनितर्वसूनां। यथाविप्रस्यमनुषोहविर्भिर्देवाँअयजःकविभिःकविःसन्। एवाहोतःसत्यतरत्वमद्याग्नेमंद्रयाजुह्वायजस्व।।२४।। कथादाशेमाग्नयेकास्मैदेवजुष्टोच्यतेभामिनेगीः। योमर्त्येष्वमृतऋतावाहोतायजिष्ठइत्कृणोतिदेवान्। योअध्वरेषुशंतमऋतावाहोतातमूनमोभिराकृणुध्वं। अग्निर्यद्वेमर्तायदेवान्त्सचाबोधातिमनसायजाति। सहिक्रतुःसमर्यः

ससाधुर्मित्रोनभूदद्भुतस्यरथीः।तंमेधेषुप्रथमंदेवयंतीर्विशउपब्रुव
तेदस्ममारीः।सनोनृणांनृतमोरिशादाअग्निर्गिरोवसावेतुधीतिं।त
नाचयेमघवानःशविष्ठावाजप्रसूताइषयंतमन्म।एवाग्निर्गोतमेभि
र्ऋतावाविप्रेभिरस्तोष्टजातवेदाः।सएषुद्युम्नंपीपयत्सवाजंसपुष्टिंया
तिजोषमाचिकित्वान्॥२५॥अभित्वागोतमागिराजातवेदोविचर्षणे।
द्युम्नैरभिप्रणोनुमः।तमुत्वागोतमोगिरारायस्कामोदुवस्यति।द्युम्नै०॥
तमुत्वावाजसातममंगिरस्वद्धवामहे।द्युम्नै०॥तमुत्वावृत्रहंतमंयोदस्यूँ
रवधूनुषे।द्युम्नै०।अवोचामरहूगणाअग्नयेमधुमद्वचः।द्युम्नै०॥२६॥

हिरण्यकेशोरजसोविसारेहिर्धुनिर्वातइवध्रजीमान्।शुचिभ्राजाउ
षसोनवेदायशस्वतीरपस्युवोनसत्याः।आतेसुपर्णाअमिनंतँएवैः
व कृष्णोनोनाववृषभोयदीदं।शिवाभिर्नस्मयमानाभिरागात्पतंतिमि
हःस्तनयंत्यभ्रा।यदीमृतस्यपयसापियानोनयन्नृतस्यपथिभीर
जिष्ठैः।अर्यमामित्रोवरुणःपरिज्मात्वचंपृंचंत्युपरस्ययोनौ।अग्नेवा
जस्यगोमतईशानःसहसोयहो।अस्मेधेहिजातवेदोमहिश्रवः।सइ
धानोवसुष्कविरग्निरीळेन्योगिरा।रेवदस्मभ्यंपुर्वणीकदीदिहि।क्षपो
राजन्नुतत्मनाग्नेवस्तोरुतोषसः।सतिग्मजंभरक्षसोदहप्रति॥२७॥

अवानोअग्नऊतिभिर्गायत्रस्यप्रभर्मणि।विश्वासुधीषुवंद्य।आनोअग्ने
रयिंभरसत्रासाहंवरेण्यं।विश्वासुपृत्सुदुष्टरं।आनोअग्नेसुचेतुनार
यिंविश्वायुपोषसं।मार्डीकंधेहिजीवसे।प्रपूतास्तिग्मशोचिषेवाचोगोत
माग्नये।भरस्वसुम्नयुर्गिरः।योनोअग्नेभिदासत्यंतिदूरेपदीष्टसः।अ
स्माकमिद्वृधेभव।सहस्राक्षोविचर्षणिरग्नीरक्षांसिसेधति।होतागृणी
तउक्थ्यः॥२८॥इत्थाहिसोमइन्मदेब्रह्माचकारवर्धनं।शविष्ठवज्रिन्नो
जसापृथिव्यानिःशशाअहिमर्चन्ननुस्वराज्यं॥सत्वामदद्वृषामदःसोमः
श्येनाभृतःसुतः।येनावृत्रंनिरद्भ्योजघंथवज्रिन्नोजसार्चन्ननुस्वराज्यं।

प्रेह्यभीहिधृष्णुहिनतेवज्रोनियंसते।इंद्रनृम्णंहितेशवोहनोवृत्रंजया
अपोर्चन्नं०।निरिंद्रभूम्याअधिवृत्रंजघंथनिर्दिवः।सृजामरुत्वतीरव
जीवधन्याइमाअपोर्चन्नं०।इंद्रोवृत्रस्यदोधतःसानुंवज्रेणहीळितः।
अभिक्रम्यावजिघ्नतेपःसर्मायचोदयन्नर्चन्नं०॥२८॥अधिसानौनि
जिघ्नतेवज्रेणशतपर्वणा।मंदानइंद्रोअंधसः।सखिभ्योगातुमिच्छत्यर्च
न्नं०।इंद्रतुभ्यमिदद्रिवोनुत्तंवज्रिन्वीर्यं।यद्धत्यंमायिनंमृगंतमुत्वंमा
ययावधीरर्चन्नं०।वितेवज्रासोअस्थिरन्नवतिंनाव्याऽअनु।महत्तइं
द्रवीर्यंबाह्वोस्तेबलंहितमर्चन्ननु०।सहस्रंसाकमर्चतपरिष्टोभतविंशतिः।

सं०अ०
६९॥

शतैनमन्वनोनुवुरिंद्रायब्रह्मोद्यतमर्चन्ननु०॥इंद्रोवृत्रस्यतविषीं
निरहन्त्सहसासहः।महत्तदस्यपौंस्यंवृत्रंजघन्वाँअसृजदर्चन्ननु०।
॥३०॥इमेचित्तवमन्यवेवेपेतेभियसामही।यदिंद्रवज्रिन्नोजसावृ
त्रंमरुत्वाँअवधीरर्चन्ननु०॥नवेपसानतन्यतेइंद्रंवृत्रोविबीभयत्।अ
भ्येनंवज्रआयसःसहस्रभृष्टिरायतार्चन्ननुस्व०॥यद्वृत्रंतवचाश
निंवज्रेणसमयोधयः।अहिमिंद्रजिघांसतोदिवितेबद्बधेशवोर्चन्न०।
अभिष्टनेतेअद्रिवोयत्स्थाजगच्चरेजते।त्वष्टाचित्तवमन्यवइंद्रवेवि
ज्यतेभियार्चन्ननु०॥नहिनुयादधीमसींद्रंकोवीर्यापरः।तस्मिन्नृ

राघव
६९

ण्यामुतक्रतुंदेवा ओजांसि सं दधुरर्चन्ननु॰। यामथर्वा मनुष्पिता दध्य
ङ्धियमत्नत। तस्मिन्ब्रह्माणि पूर्वथेंद्र उक्था समग्मतार्चन्ननु स्वरा
ज्यं॥ ३१॥ इति प्रथमाष्टके षष्ठोध्यायः॥ ॥ इंद्रो मदाय वावृधे शवसे
वृत्रहा नृभिः। तमिन्महत्स्वाजिषूतेमर्भे हवामहे स वाजेषु प्र नोविष
त्। असि हि वीर सेन्योसि भूरि परादादिः। असि दभ्रस्य चिद्वृधो यज
मानाय शिक्षसि सुन्वते भूरि ते वसु। यदुदीरत आजयो धृष्णवे धीय
ते धना। युक्ष्वा मदच्युता हरी कं हनः कं वसौ दधोस्माँ इंद्र वसौ दधः।
क्रत्वा महाँ अनुष्वधं भीम आ वावृधे शवः। श्रिय ऋष्व उपाकयोर्नि शि

प्रीहरिवान्दधेहस्तयोर्वज्रमायसं।आपप्रौपार्थिवंरजोबद्बधेरोचनादिवि
नत्वावाँइंद्रकश्चननजातोनजानिष्यतेतिविश्वंववक्षिथ॥१॥योअर्यो
मर्त्तभोजनंपरादादातिदाशुषे।इंद्रोअस्मभ्यंशिक्षतुविभजाभूरि
तेवसुभक्षीयतवराधसः।मदेमदेहिनोददिर्यूथागवामृजुक्रतुः।संगृ
या भायपुरूशतोभहस्त्यावसुशिशीहिरायआभर।मदायस्वसुतेसचाश
वेसेशूरराधसे।विद्माहित्वापुरूवसुमुपकामान्त्ससृज्महेथानोविताभ
वा।एतेतइंद्रजंतवोविश्वंपुष्यंतिवार्यं।अंतर्हिख्योजनानामर्योवेदोअ
दाशुषांतेषांनोवेदआभर॥२॥उपोषुशृणुहीगिरोमघवन्मातथा

इवा।यदानःसूनृतावतःकरआदर्थयासइद्योजान्विंद्रतेहरी।अक्षन्न
मीमदंतह्यवप्रियाअधूषत।अस्तोषतस्वभानवोविप्रानविष्ठयामती।
योजान्विंद्रतेहरी।सुसंदृशंत्वावयंमघवन्वंदिषीमहि।प्रनूनंपूर्णवं
धुरस्तुतोयाहिवशाँअनुयोजान्विंद्रते०।सघातंवृषणंरथमाधितिष्ठा
तिगोविदं।यःपात्रंहारियोजनंपूर्णमिंद्रचिकेततियोजान्विंद्रते०।
युक्तस्तेअस्तुदक्षिणउतसव्यःशतक्रतो।तेनजायामुपप्रियांमंदा
नोयाह्यंधसोयोजा०।युनज्मितेब्रह्मणाकेशिनाहरीउपप्रयाहिदधि
षेगभस्त्योः।उत्वासुतासोरभसाअमंदिषुःपूषण्वान्वज्रिन्त्समु

सं०प्र०
७१

पत्न्यामदः ॥३॥ अश्वावति प्रथमोगोषुगच्छति सुप्रावीरिंद्रमर्त्यस्तवो
तिभिः। तमित्पृणक्षिनाभवीयसा सिंधुमापो यथाभितोविचेतसः।
आपोनदेवीरुपयंतिहोत्रियमवः पश्यंतिविततंयथारजः। प्राचैर्देवा
सः प्रणयंतिदेवयुंब्रह्मप्रियंजोषयंतेवराइव। अधिद्वयोरदधाउक्थ्यं
वचोयतस्रुचामिथुनायासपर्यतः। असंयत्तोव्रतेतेक्षेतिपुष्यतिभद्रा
शक्तिर्यजमानायसुन्वते। आदंगिराः प्रथमंदधिरेवयइद्धाग्नयः श
म्यायेसुकृत्यया। सर्वंपणेः समविंदंतभोजनमश्वावंतंगोमंतमापशुं
नरः। यज्ञैरथर्वाप्रथमः पथस्तते ततः सूर्योव्रतपावेनआजनि। आगा

राघन
७१

आजदुशनाकाव्यः सचायमस्यजातममृतं यजामहे। बर्हिर्वायत्स्वपत्या
यवृज्यतेर्कोवाश्लोकमाघोषतेदिवि। ग्रावायत्रवदतिकारुरुक्थ्य१स्त
स्येदिंद्रोअभिपित्वेषुरण्यति॥६॥ असाविसोमइंद्रतेशविष्ठधृष्णवा
गहि। आत्वापृणक्त्विंद्रियंरजःसूर्योनरश्मिभिः॥ इंद्रमिद्धरीवहतो
प्रतिधृष्टशवसं। ऋषीणांचस्तुतीरुपयज्ञंचमानुषाणां। आतिष्ठवृत्रह
त्रथंयुक्तातेब्रह्मणाहरी। अर्वाचीनंसुतेमनोग्रावाकृणोतुवग्नुना। इ
ममिंद्रसुतंपिबज्येष्ठममर्त्यंमदं। शुक्रस्यत्वाभ्यक्षरन्धाराऋतस्यसाद
ने। इंद्रायनूनमर्चतोक्थानिचब्रवीतन। सुताअमत्सुरिंदवोज्येष्ठंनमस्य

तासहः ॥ ५ ॥ नकिष्ट्वद्रथीतरो हरी यदिंद्र यच्छसे । नकिष्ट्वानु मज्म
नानकिः स्वश्व आनशे । य एक इद्विदयते वसु मर्त्ताय दाशुषे । ईशा
नो अप्रतिष्कुत इंद्रो अंग । कदा मर्त्तमराधसं पदा क्षुंपमिव स्फुर
त् । कदा नः शुश्रुवद्गिर इंद्रो अंग । यश्चिद्धि त्वा बहुभ्य आ सुतावाँ
आविवासति । उग्रं तत्पत्यते शव इंद्रो अंग । स्वादोरित्था विषूवतो
मध्वः पिबंति गौर्यः । या इंद्रेण सयावरीर्वृष्णा मदंति शोभसे वस्वी
रनु स्वराज्यं ॥ १० ॥ ता अस्य पृशनायुवः सोमं श्रीणंति पृश्नयः । प्रि
या इंद्रस्य धेनवो वज्रं हिन्वंति सायकं वस्वीरनु० । ता अस्य नमसा

सहः सपर्यंतिप्रचेतसः।व्रतान्यस्यसश्चिरेपुरूणिपूर्वचित्तयेवस्वी
रनुस्वराज्यं।इंद्रोदधीचोअस्थिभिर्वृत्राण्यप्रतिष्कुतः।जघाननव
तीर्नव।इच्छन्नश्वस्ययच्छिरःपर्वतेष्वपश्रितं।तद्विदच्छर्यणावति।अ
त्राहगोरमन्वतनामत्वष्टुरपीच्यं।इत्थाचंद्रमसोगृहे।।७।।कोअद्ययुं
क्तेधुरिगाऋतस्यशिमीवतोभामिनोदुर्हृणायून्।आसन्निषून्हृत्स्व
सोमयोभून्यएषांभृत्यामृणधत्सजीवात्।कईषतेतुज्यतेकोबिभायको
मंसतेसंतु×ए×मिंद्रंकोअंति।कस्तोकायकइभायोतरायेधिब्रवत्तन्वेको
कोजनाय।कोअग्निमीट्टेहविषाघृतेनस्रुचायजाताऋतुभिर्ध्रुवेभिः।

सं०प्र०
७२

कस्मैदेवाआवहानाशुहोमकोमंसतेवीतिहोत्रःसुदेवः।त्वमंगप्रशंसिषोदेवः
शविष्ठमर्त्यं।नत्वदन्योमघवन्नस्तिमर्डितेंद्रब्रवीमितेवचः।मातेराधांसिमा
तऊतयोवसोस्मान्कदाचनादभन्।विश्वाचनउपमिमीहिमानुषवसूनिच
र्षणिभ्यआ॥८॥प्रयेशुंभंतेजनयोनसप्तयोयामन्रुद्रस्यसूनवःसुदंससः।
रोदसीहिमरुतश्चक्रिरेवृधेमदंतिवीराविदथेषुघृष्वयः।तउक्षितासोमहि
मानमाशतदिविरुद्रासोअधिचक्रिरेसदः।अर्चंतोअर्कंजनयंतइंद्रियम
धिश्रियोदधिरेपृश्निमातरः।गोमातरोयच्छुभयंतेअंजिभिस्तनूषुशुभ्राद
धिरेविरुक्मतः।बाधंतेविश्वमभिमातिनमपवर्त्मान्येषामनुरीयतेघृतं।वि

रापव
७२

२ प्रयद्रथेषुपृषतीरयु

येभ्राजंतेसुमखासऋष्टिभिः प्रच्यावयंतोअच्युताचिदोजसा।मनोजुवो
यन्मरुतोरथेष्वावृषव्रातासः पृषतीरयुग्ध्वंवाजेअद्रिंमरुतोरंहयंतः। ग्ध्वं॥
उतारुषस्यविष्यंतिधाराश्चर्मेवोदभिर्व्युंदंतिभूम।आवोवहंतुसप्तयोर
घुष्यदोरघुपत्वानः प्रजिगातबाहुभिः।सीदताबर्हिरुरुवः सदस्कृतंमा
दयध्वंमरुतोमध्वोअंधसः॥६॥तेवर्धंतस्वतवसोमहित्वनानाकंतस्थुरुरु
चक्रिरेसदः।विष्णुर्यद्धावद्वृषणंमदच्युतंवयोनसीदन्नधिबर्हिषिप्रिये।शू
राइवेद्युयुधयोनजग्मयः श्रवस्यवोनपृतनासुयेतिरे।भयंतेविश्वाभुवना
मरुद्भ्योराजानइवत्वेषसंदृशोनरः।त्वष्टायद्वज्रंसुकृतंहिरण्ययंसहस्रभृ

ष्टिं स्वपाः अवर्त्तयत्।धत्तइंद्रोनर्यपांसिकर्त्तवेहन्वृत्रंनिरपामोब्ज
दर्णवं।ऊर्ध्वंनुनुद्रेवतंतःओजसादादृहाणंचि।द्बिभिदुर्विपर्वतं।
धमंतोवाणंमरुतःसुदानवोमदेसोमस्यरण्यानिचक्रिरे।जिह्मंनु
नुद्रेवतंतयादिशासिंचन्नुत्संगोतमायतृष्णजे।आगच्छंतीमवसा
चित्रभानवःकामंविप्रस्यतर्पयंतधामभिः।यावःशर्मशशमाना
यसंतित्रिधातूनिदाशुषेयच्छताधि।अस्मभ्यंतानिमरुतोवियं
तरयिंनोधत्तवृषणःसुवीरं।१०।।मरुतोयस्यहिक्षयेपाथादि
वोविमहसः।सुगोपातमोजनः।यज्ञैर्वायज्ञवाहसोविप्रस्यवा

मत्तीनां॥मरुतःशृणुताहवं॥उतवायस्यवाजिनोनुविप्रमतक्ष
त॥सगंतागोमतिव्रजे॥अस्यवीरस्यबर्हिषिसुतःसोमोदिविष्टि
षु॥उक्थंमदश्चशास्यते॥अस्यश्रोषंत्वाभुवोविश्वायश्चर्षणीरभि॥
सूरंचित्सस्रुषीरिषः॥२१॥पूर्वीभिर्हिददाशिमशरद्भिर्मरुतोवयं॥
अवोभिश्चर्षणीनां॥सुभगःसप्रयज्यवोमरुतोअस्तुमर्त्यः॥य
स्यप्रयांसिपर्षथ॥शशमानस्ययानरःस्वेदस्यसत्यशवसः॥वि
दाकामस्यवेनतः॥यूयंतत्सत्य~~स~~स्वशावसआविष्कर्तमहित्वना॥

सं॰ प्र॰ विध्यता विद्युता रक्षः ॥ गूहता गुह्यं तमो वियात विश्वमत्रिणं ॥ ज्योति
७९ ष्कर्ता यदुश्मसि ॥१२॥ प्रत्वक्षसः प्रतवसो विरप्शिनोनानता अवि
थुरा ऋजीषिणः ॥ जुष्टतमासो नृतमासो अंजिभिर्व्यानज्रे केचिदु
स्रा इव स्तृभिः ॥ उपह्वरेषु यदचिध्वं ययिं वय इव मरुतः केन चि
त्पथा ॥ श्चोतंति कोशा उप वो रथेष्वा घृतमुक्षता मधुवर्णमर्चते ॥
प्रैषामज्मेषु विथुरेव रेजते भूमिर्यामेषु यद्ध युंजते शुभे ॥ ते क्रीळ
यो धुनयो भ्राजदृष्टयः स्वयं महित्वं पनयंत धूतयः ॥ स हि स्वसृ ७९
त्पृषदश्वो युवा गणोऽया ईशानस्तविषीभिरावृतः ॥ असि सत्य

ऋणयावानेद्योस्याधियःप्राविताथावृषागणः॥ पितुःप्रत्नस्यजन्मना
वदामसिसोमस्यजिह्वाप्रजिगातिचक्षसा॥ यदीमिंद्रंशम्यृक्वाणआशता
दिन्नामानियज्ञियानिदधिरे॥ श्रियसेकंभानुभिःसंमिमिक्षिरेतेरश्मिभि
स्तऋक्वभिःसुखादयः॥ तेवाशीमंतइष्मिणोअभीरवोविद्रेप्रियस्यमारु
तस्यधाम्नः॥१३॥ आविद्युन्मद्भिर्मरुतस्वर्कैरथेभिर्यातऋष्टिमद्भिरश्व
पर्णैः॥ आवर्षिष्ठयानइषावयोनपप्ततासुमायाः॥ तेरुणेभिर्वरमापिशं
गैःशुभेकंयांतिरथतूर्भिरश्वैः॥ रुक्मोनचित्रःस्वधितीवान्पव्यारथस्य
जंघनंतभूम॥ श्रियेकंवोअधितनूषुवाशीर्मेधावनानकृणवंतऊर्ध्वा॥

युष्मभ्यंकंमरुतःसुजातास्तुविद्युम्नासोधनयंतेअद्रिं॥अहानिगृध्राः
पर्यावआगुरिमांधियंवार्कार्यांचदेवीं॥ब्रह्मकृण्वंतोगोतमासोअर्कै
रूर्ध्वंनुनुद्रउत्सधिंपिबध्यै॥एतत्त्यंनयोजनमचेतिसस्वर्हयन्मरु
तोगोतमोवः॥पश्यन्हिरण्यचक्रानयोदंष्ट्रान्विधावतोवराहून्॥
एषास्यावोमरुतोनुभर्त्रीप्रतिष्टोभतिवाघतोनवाणी॥अस्तोभ
यद्वृथासामनुस्वधांगभस्त्योः॥१४॥आनोभद्राःक्रतवोयंतुवि
श्वतोदब्धासोऽपरीतासउद्भिदः॥देवानोयथासदमिद्वृधेअ
संनप्रायुवोरक्षितारोदिवेदिवे॥देवानांभद्रासुमतिर्ऋजूयतां

देवानांरातिरभिनोनिवर्ततां ।। देवानांसख्यमुपसेदिमावयंदेवानः
आयुःप्रतिरंतजीवसे ।। तान्पूर्वयानिविदाहूमहेवयंभगंमित्रमदितिं
दक्षमस्रिधं ।। अर्यमणंवरुणंसोममश्विनासरस्वतीनःसुभगामयस्क
रत् ।। तन्नोवातोमयोभुवातुभेषजंतन्मातापृथिवीतत्पिताद्यौः ।।
तद्ग्रावाणःसोमसुतोमयोभुवस्तदश्विनाशृणुतंधिष्ण्यायुवं ।। त
मीशानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयं ।। पूषानोय
थावेदसामसद्वृधेरक्षितापायुरदब्धःस्वस्तये ।। २५ ।। स्वस्तिनइंद्रो
वृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः ।। स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमि

सं॰ प्र॰ स्वस्ति नो बृहस्पतिर्दधातु ॥ पृषदश्वा मरुतः पृश्निमातरः शुभंयावा
नो विदथेषु जग्मयः ॥ अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा ऽ
८ छ॥ अवसागमन्निह ॥ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्य
जत्राः ॥ स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥ श
तमिन्नु शरदो अंति देवा यत्रा नश्चक्रा जरसं तनूनां ॥ पुत्रासो यत्र पि
तरो भवंति मा नो मध्या रीरिषतायुर्गंतोः ॥ अदितिर्द्यौरदितिरंत
रिक्षमदितिर्माता स पिता स पुत्रः ॥ विश्वे देवा अदितिः पंचजना अ ८
दितिर्जातमदितिर्जनित्वं ॥ १६ ॥ ऋजुनीती नो वरुणो मित्रो नयतु ७८

विद्वान्॥ अर्यमा देवैः सजोषाः॥ ते हि वस्वो वसवानास्ते अप्रमूरा महो
भिः॥ व्रता रक्षंते विश्वाहा॥ ते अस्मभ्यं शर्म यंसन्नमृता मर्त्येभ्यः॥ बाध
माना अप द्विषः॥ वि नः पथः सुविताय चियंत्विंद्रो मरुतः॥ पूषा भगो वंद्या
सः॥ उत नो धियो गो अग्राः पूषन्विष्णवेवयावः॥ कर्ता नः स्वस्तिमतः॥
॥१७॥ मधु वाता ऋतायते मधु क्षरंति सिंधवः॥ माध्वीर्नः संत्वोषधीः॥
मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः॥ मधु द्यौरस्तु नः पिता॥ मधुमान्नो
वनस्पतिर्मधुमांऽ अस्तु सूर्यः॥ माध्वीर्गावो भवंतु नः॥ शं नो मित्रः शं व
रुणः शं नो भवत्वर्यमा॥ शं न इंद्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः॥१८
त्वं सोम प्रचिकितो मनीषा त्वं रजिष्ठमनु नेषि पंथां॥ तव प्रणीती पितरो

सं० १ प०
७८

न इंदो देवेषु रत्नमभजंत धीराः ॥ त्वं सोम क्रतुभिः सुक्रतुर्भूस्त्वं दक्षैः
सुदक्षो विश्ववेदाः ॥ त्वं वृषा वृषत्वेभिर्महित्वा द्युम्नेभिर्द्युम्न्यभवो नृच
क्षाः ॥ राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम ॥ शुचिष्ट्वम
सि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ॥ या ते धामानि दिवि या पृ
थिव्यां या पर्वतेष्वोषधीष्वप्सु ॥ तेभिर्नो विश्वैः सुमना अहेळन्राजंत्सो
म प्रति हव्या गृभाय ॥ त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा ॥ त्वं भ
द्रो असि क्रतुः ॥ १६ ॥ त्वं च सोम नो वशो जीवातुं न मरामहे ॥ प्रियस्तो ७८
त्रो वनस्पतिः ॥ त्वं सोम महे भगं त्वं यून ऋतायते ॥ दक्षं दधासि जीव

से॥ त्वंनः सोमविश्वतोरक्षाराजन्नघायतः॥ नरिष्येत्वावतः सखा॥
सोमयास्तेमयोभुवऽऊतयः संति दाशुषे॥ ताभिर्नोविताभव॥ इ
मंयज्ञमिदंवचोजुजुषाणउपागहि॥ सोमत्वंनोवृधेभव॥ २०॥ सो
मगीर्भिष्ट्वावयंवर्धयामोवचोविदः॥ सुमृळीकोनऽआविश॥ ग
यस्फानोऽअमीवहावसुवित्पुष्टिवर्धनः॥ सुमित्रः सोमनोभव॥
सोमरारंधिनोहृदिगावोनयवसेष्वा॥ मर्यऽइवस्वऽओक्ये॥ यः
सोमसख्येतवरारणद्देवमर्त्यः॥ तंदक्षः सचतेकविः॥ उरुष्या
णोऽअभिशस्तेः सोमनिपाह्यंहसः॥ सखासुशेवऽएधिनः॥

॥२१॥ आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यं॥भवावाजस्यसंग
थे॥आप्यायस्वमदिंतमसोमविश्वेभिरंशुभिः॥भवानःसुश्रवस्त
मःसखावृधे॥संतेमयांसिसमुयंतुवाजाःसंवृष्ण्यान्यभिमातिषा
हः॥आप्यायमानोऽअमृत्तायसोमदिविश्रवांस्युत्तमानिधिष्व॥या
तेधामानिहविषायजंतिताताविश्वापरिभूरस्तुयज्ञं॥गयस्फानःप्र
तरणःसुवीरोवीरहाप्रचरासोमदुर्यान्॥सोमोधेनुंसोमोऽअर्वंतमा
शुंसोमोवीरंकर्मण्यंददाति॥सादन्यंविदथ्यंसभेयंपितृश्रवणंयोददा
शतस्मै॥२२॥अषाह्ळंयुत्सुपृतनासुपप्रिंस्वर्षामप्सांवृजनस्यगोपां॥

भरेषुजांसुक्षितिंसुश्रवसंजयंतंत्वामनुमदेमसोम।।त्वमिमाऽओषधीः
सोमविश्वास्त्वमपोऽअजनयस्त्वंगाः।।त्वमाततंथोर्वं१ंतरिक्षंत्वंज्यो
तिषावितमोववर्थ।।देवेननोमनसादेवसोमरायोभागंसहसावन्न
भिर्युध्य।।मात्वातनदीशिषेवीर्यस्योभयेभ्यःप्रचिकित्सागविष्टौ।।
।।२३।।एताउत्याऽउषसकेतुमक्रतपूर्वेऽअर्द्धेरजसोभानुमंजते।।नि
ष्कृण्वानाऽआयुधानीधृष्णवःप्रतिगावोरुषीर्युनुमातरः।।उदपप्त
न्नरुणाभानवोवृथास्वायुजोअरुषीर्गाऽअयुक्षत।।अक्रंनुषासो
वयुनानिपूर्वथारुशंतंभानुमरुषीरशिश्रयुः।।अर्चंतिनारीरपसोन

सं०प्र० विष्टिभिःसमानेनयोजनेनापरावतः॥इषंवहंतीःसुकृतेसुदानवेवि
६० श्वेदहयजमानायसुन्वते॥अधिपेशाँसिवपतेनृतूरिवापोर्णुतेवक्ष
उस्रेवबर्जहं॥ज्योतिर्विश्वस्मैभुवनायकृण्वतीगावोनव्रजंव्यु१षा
आवर्तमः॥प्रत्यर्चीरुशदस्याअदर्शिवितिष्ठतेबाधतेकृष्णमभ्वं।
स्वरुंनपेशोविदथेष्वंजंचित्रंदिवोदुहिताभानुमश्रेत्॥२४॥अता
रिष्मतमसस्पारमस्योषाऽउच्छंतीवयुनाकृणोति॥श्रियेछंदोन
स्मयतेविभातीसुप्रतीकासोमनसायाजीगः॥भास्वतीनेत्रीसूनृ ६०
तानांदिवस्तवेदुहितागोतमेभिः॥प्रजावतोनृवतोअश्वबुध्या

नुषोगोअग्राँ उपमासिवाजान्।उषस्तमश्यांयशासंसुवीरंदा
सप्रवर्गंरयिमश्वबुध्यं॥सुदंससाश्रवसायाविभासिवाजप्रसू
तासुभगेबृहंतं॥विश्वानिदेवीभुवनाभिचक्ष्याप्रतीचीचक्षुरुर्वि
याविभाति॥विश्वंजीवंचरसेबोधयंती।विश्वस्यवाचमविदन्मना
योः॥पुनःपुनर्जायमानापुराणीसमानंवर्णमभिशुंभमाना॥
श्वघ्नीवकृत्नुर्विजआमिनानामर्तस्यदेवीजरयंत्यायुः॥२५॥व्यूर्ण्व
तीदिवोअंतांअबोध्यपस्वसारंसनुतर्युयोति॥प्रमिनतीमनुष्यायु
गानियोषाजारस्यचक्षसाविभाति॥पशून्नचित्रासुभगाप्रथाना

सिंधुर्नक्षोदउर्वियाव्यश्वैत्।।अमिनतीदैव्यानिव्रतानिसूर्यस्यचेति
रश्मिभिर्दृशाना।।उषस्तच्चित्रमाभरास्मभ्यंवाजिनीवति।।येनतोकंच
तनयंचधामहे।।उषोअद्येहगोमत्यश्वावतिविभावरि।।रेवदस्मेव्यु
च्छसूनृतावति।।युक्ष्वाहिवाजिनीवत्यश्वांऽअद्यारुणांऽउषः।।अथा
नोविश्वासौभगान्यावह।।२६।।अश्विनावर्तिरस्मदागोमद्दस्राहिर
ण्यवत्।।अर्वाग्रथंसमनसानियच्छतं।।याविथ्थाश्लोकमादिवोज्यो
तिर्जनायचक्रथुः।।आनऊर्जंवहतमश्विनायुवं।।एहदेवामयोभु
वादस्राहिरण्यवर्तनी।।उषर्बुधोवहंतुसोमपीतये।।२७।।अग्नीषोमा

विमंसुमे॥ शृणुतं वृषणा हवं। प्रति सूक्तानि हर्यतं भवतं दाशुषे
मयः॥ अग्नीषोमा यो अद्य वामिदं वचः सपर्यति॥ तस्मै धत्तं सुवीर्यं
गवां पोषं स्वश्व्यं॥ अग्नीषोमा य आहुतिं यो वां दाशाद्धविष्कृतिं॥ स
प्रजया सुवीर्यं विश्वमायुर्व्यश्नवत्॥ अग्नीषोमा चेति तद्वीर्यं वां यद
मुष्णीतमवसं पणिं गाः॥ अवातिरतं बृसयस्य शेषोऽविंदतं ज्योति
रेकं बहुभ्यः॥ युवमेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अध
त्तं॥ युवमेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तं॥ यु
वं सिंधूंरभिशस्तेरवद्यादग्नीषोमावमुंचतं गृभीतान्॥

आन्यंदिवोमातरिश्वाजभारामथ्नादन्यंपरिश्येनोअद्रेः॥६अग्नी
षोमाब्रह्मणावावृधानोरुंयज्ञायचक्रथुरुलोकं॥२९॥अग्नीषो
माहविषःप्रस्थितस्यवीतंहर्यतंवृषणाजुषेथां॥सुशर्माणास्वव
साहिभूतमथाधत्तंयजमानायशंयोः॥योअग्नीषोमाहविषास
पर्याद्देवद्रीचामनसायोघृतेन॥तस्यव्रतंरक्षतंपातमंहसोविशे
जनायमहिशर्मयच्छतं॥अग्नीषोमासवेदसासहूतीवनतंगिरः॥
संदेवत्राबभूवथुः॥अग्नीषोमा~~सवेदसासहू~~नेनवांयोवांघृतेन
दाशति॥तस्मैदीदयतंबृहत्॥अग्नीषोमाविमानिनोयुवंहव्या

जुजोषतं ॥ आयातमुपनः सचा ॥ अग्नीषोमापिपृतमर्वतो न आ
प्यायंतामुस्त्रिया हव्यसूदः ॥ अस्मे बलानि मघवत्सु धत्तं कृणुतं
नो अध्वरं श्रुष्टिमंतं ॥ २९ ॥ इमं स्तोममर्हते जातवेदसे रथमिव सं
महेमा मनीषया ॥ भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषा
मा वयं तव ॥ यस्मै त्वमायजसे स साधत्यनर्वा क्षेति दधते सुवी
र्यं ॥ स तूताव नैनमश्नोत्यंहतिरग्ने० ॥ शकेम त्वा समिधं साधया
धियस्त्वे देवा हविरदंत्याहुतं ॥ त्वमादित्याँ आवह तान्ह्यु१श्मस्य
ग्ने० ॥ भरामेध्मं कृणवामा हवींषि ते चितयंतः पर्वणापर्वणा वयं ॥

सं॰प्र॰
८३

जीवातवे प्रतरं साधया धियो ग्ने०॥ विशां गोपा अस्य चरंति जंतवो द्वि
पच्च यदुत चतुष्पदक्तुभिः॥ चित्रः प्रकेत उषसो महाँ अस्यग्ने०॥ ३०
॥ त्वमध्वर्युरुत होतासि पूर्व्यः प्रशास्ता पोता जनुषा पुरोहितः॥ विश्वा
विद्वाँऽआर्त्विज्या धीर पुष्यस्यग्ने०॥ यो विश्वतः सुप्रतीकः सदृङ्ङसि दू
रे चित्सं तळिदिवाति रोचसे॥ रात्र्याश्चिदंधो अति देव पश्यस्यग्ने०॥ पू
र्वो देवा भवतु सुन्वतो रथोस्माकं शंसो अभ्यस्तु दूढ्यः॥ तदा जानीतोत
पुष्यता वचोग्ने०॥ वधैर्दुःशंसाँऽअप दूढ्यो जहि दूरे वा ये अंति वा के चि
दत्रिणः॥ अथा यज्ञाय गृणते सुगं कृध्यग्ने०॥ यदयुक्था अरुषा रो

राम
८३

हिता रथे वातजूता वृषभस्यत्ते रवः ॥ आदिन्वसि वनिनो धूमकेतुनाग्ने
सख्ये मारीषामा वयं तव ॥ ३१ ॥ अध स्वनादुत बिभ्युः पतत्रिणो द्रप्सा य
त्ते यवसादो व्यस्थिरन् ॥ सुगं तत्ते तावकेभ्यो रथेभ्योग्ने० ॥ अयं मित्रस्य
वरुणस्य धायसे वयातां मरुतां हेळोऽअद्भुतः ॥ मृळा सु नो भूत्वेषां मनः
पुनरग्ने० ॥ देवो देवानामसि मित्रो अद्भुतो वसुर्वसूनामसि चारुरध्वरे ॥
शर्मन्स्याम तव सप्रथस्तमेग्ने सख्ये मारिषामा वयं तव ॥ तत्ते भद्रं यत्स
मिद्धः स्वे दमे सोमाहुतो जरसे मृळयत्तमः ॥ दधासि रत्नं द्रविणं च दाशु
षेग्ने० ॥ यस्मै त्वं सुद्रविणो ददाशोनागास्त्वमदिते सर्वताता ॥ यं भद्रेण

वि

सं॰ऋ॰ शवसाचोदयासिप्रजावताराधसातेस्याम॥ सत्वमग्नेसौभगत्वस्यविद्वा
८४ नस्माकमायुःप्रतिरेहदेव॥ तन्नोमित्रोवरुणोमामहंतामदितिःसिंधुः
पृथिवीऽउतद्यौः॥३२॥ ॥इतिप्रथमाष्टकेषष्ठोध्यायः॥६॥ ॥ ॥
॥हरिःओम्॥ ॥द्वैरूपेचरतःस्वर्थेऽअन्यान्यावत्समुपधापयेते॥ हरिर
न्यस्यांभवतिस्वधावाञ्छुक्रोऽअन्यस्यांददृशेसुवर्चाः॥ दशेमंत्वष्टुर्जनय
न्तगर्भमतंद्रासोयुवतयोविभृत्रं॥ तिग्मानीकंस्वयशसंजनेषुविरोचमा
नंपरिषींनयंति॥ त्रीणिजानापरिभूषंत्यस्यसमुद्रऽएकंदिव्येकमप्सु॥ पू ८४
र्वामनुप्रदिशंपार्थिवानामृतून्प्रशासद्विदधावनुष्ठु॥ कःइमंवोनिण्य

माचिकेतवत्सोमातॄर्जनयतस्वधाभिः॥बह्वीनांगर्भोअपसामुपस्थान्महा
न्कविर्निश्चरतिस्वधावान्॥आविष्ट्योवर्धतेचारुरासुजिह्मानामूर्ध्वःस्वयशा
उपस्थे॥उभेत्वष्टुर्बिभ्यतुर्जायमानात्प्रतीचीसिंहंप्रतिजोषयते॥१॥भेउभद्रे
जोषयेतेनमेनेगावोनवाश्राउपतस्थुरेवैः॥सदक्षाणांदक्षपतिर्बभूवांजंति
यंदक्षिणतोहविर्भिः॥उद्यंयमीतिसवितेवबाहूउभेसिचौयततेभीमऋंज
न्॥उच्छुक्रमत्कमजतेसिमस्मान्नवामातृभ्योवसनाजहाति॥त्वेषंरूपंकृणु
तउत्तरंयत्संपृंचानःसदनेगोभिरद्भिः॥कविर्बुध्नंपरिमर्मृज्यतेधीःसादेव
तातासमितिर्बभूव॥उरुतेज्रयःपर्येतिबुध्नंविरोचमानंमहिषस्यधाम॥

सं॰प्र॰ विश्वेभिरग्नेस्वयशोभिरिद्धोदब्धेभिः पायुभिः पाह्यस्मान्॥ धन्वन्त्स्रो
८५ तः कृणुतेगातुमूर्मिंशुक्रैरूर्मिभिरभिनक्षतिक्ष्मां॥ विश्वासनानिजठर
षुधत्तेंतर्नवासुचरतिप्रसूषु॥ एवानोऽअग्नेसमिधोवृधानोरेवत्पा
वकश्रवसेविभाहि॥ तन्नो०॥२॥ सप्रत्नथासहसाजायमानः सद्यः का
व्यानिबलधत्तविश्वा॥ आपश्चमित्रंधिषणाचसाधन्देवाऽअग्निंधार
यद्द्रविणोदां॥ सपूर्वयानिविदाकव्यतायोरिमाः प्रजाऽअजनयन्मन
नां॥ विवस्वताचक्षसाद्यामपश्चदेवा०॥ तमीळतप्रथमंयज्ञसाधंविशः राम
आरीराहुतमृंजसानं॥ ऊर्जः पुत्रंभरतंसृप्रदानुंदेवा०॥ समातरिश्वापु ८५

रुवारपुष्टिर्विदद्गातुंतनयायस्वर्वित्॥ विशांगोपाजनितारोदस्यो
र्देवा०॥ नक्तोषासावर्णमामेम्यानेधापयेतेशिशुमेकंसमीची॥ द्या
वाक्षामारुक्मोऽअन्तर्विभातिदेवा०॥३॥ रायोबुध्नःसंगमनोवसूनां
यज्ञस्यकेतुर्मन्मसाधनोवेः॥ अमृतत्वंरक्षमाणासएनंदेवा०॥ नूच
पुराचसदनंरयीणांजातस्यचजायमानस्यचक्षां॥ सतश्चगोपांभवतश्च
भूरेर्देवा०॥ द्रविणोदाद्रविणसस्तुरस्यद्रविणोदाःसनरस्यप्रयंसत्॥
द्रविणोदावीरवतीमिषंनोद्रविणोदारासतेदीर्घमायुः॥ एवानोअग्ने०॥
तन्नो०॥४॥ अपनःशोशुचदघमग्नेशुशुग्ध्यारयिं॥ अपनःशोशुचदघं॥

सुक्षेत्रिया सुगातुया वसूया च यजामहे ॥ अप नः० ॥ प्र यद्भंदिष्ठ एषां प्रास्माकासश्च सूरयः ॥ अप नः० ॥ प्र यत्ते अग्ने सूरयो जायेमहि प्र ते वयं ॥ अप नः० ॥ प्र यदग्नेः सहस्वतो विश्वतो यंति भानवः ॥ अप नः० ॥ त्वं हि विश्वतोमुख विश्वतः परिभूरसि ॥ अप नः० ॥ द्विषो नो विश्वतोमुखाति नावेव पारय ॥ अप नः० ॥ स नः सिंधुमिव नावयाति पर्षा स्वस्तये ॥ अप नः० ॥ ५ ॥ वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः ॥ इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण ॥ पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश ॥ वैश्वानरः स

नु

हसापृष्टोअग्निः सनोदिवा सरिषः पातुनक्तं॥ वैश्वानर तव तत्सत्यम
स्त्वस्मान्रायोमघवानः सचंतां॥ तन्नो०॥६॥ जातवेदसेसुवाम सोमम
रातीयतोनिदहातिवेदः॥ सनः पर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरि
तात्यग्निः॥७॥ सयोवृषावृष्ण्येभिः समोकामहोदिवः पृथिव्याश्चसम्रा
ट्॥ सतीनसत्वाहव्योभरेषुमरुत्वान्नोभवत्विंद्रऊती॥ यस्यानाप्तः सूर्यस्ये
वयामोभरेभरेवृत्रहाशुष्मोऽअस्ति॥ वृषन्तमः सखिभिस्वेभिरेवैर्मरु
त्वां०॥ दिवोनयस्यरेतसोदुघानाः पंथासोयंतिशवसापरीताः॥ तरद्द्वेषाः
सासहिः पौंस्येर्मरुत्वां०॥ सोऽअंगिरोभिरंगिरस्तमोभूद्वृषावृषभिःस

भि

रिवभिःसरवासन्॥ऋग्मिभिऽऋग्मीगातुभिर्ज्येष्ठोमरुत्वां०॥ससूनुभिर्न
रुद्रेभिऽऋभ्वानृषाह्येसासह्वांऽअमित्रान्॥सनीळेभिःश्रवस्यानितू
र्वन्मरुत्वां०॥८॥समन्युमीःसमदनस्यकर्तास्माकेभिर्नृभिःसूर्यंसनत्॥अ
स्मिन्नहन्त्सत्पतिःपुरुहूतोमरुत्वां०॥तमूतयोरणयञ्छूरसातौतंक्षेम
स्यक्षितयःकृण्वतत्रां॥सविश्वस्यकरुणस्येशएकोमरुत्वां०॥तमप्संत
शवसऽउत्सवेषुनरोनरमवसेतंधनाय॥सोऽअंधेचित्तमसिज्योतिर्वि
दन्मरुत्वां०॥ससव्येनयमतिव्राधतश्चित्सदक्षिणेसंगृभिताकृतानि॥स
कीरिणाचित्सनिताधनानिमरुत्वां०॥सग्रामेभिःसनितासरथेभिर्विदे

विश्वाभिःकृष्टिभिर्न्वद्य।सपौंस्येभिरभिभूरशस्तीर्मरुत्वां०॥९॥सजा
मिभिर्यत्समजातिमीह्ळेजामिभिर्वापुरुहूतऽएवैः॥अपांतोकस्यतनयस्य
जेषेमरुत्वां०॥सवज्रभृद्दस्युहाभीमऽउग्रःसहस्रचेताःशतानीथऋभ्वा॥
चम्रीषोनशवसापांचजन्योमरुत्वां०॥तस्यवज्रःक्रंदतिस्मत्स्वर्षादिवो
नत्वेषोरवथःशिमीवान्॥तंसचंतेसनयस्तंधनानिमरुत्वां०॥यस्याज
स्रंशवसामानमुक्थंपरिभुजद्रोदसीविश्वतःसीं॥सपारिषत्क्रतुभिर्मं
दसानोमरुत्वां०॥नयस्यदेवादेवतानमर्त्ताआपश्चनसवसोअंतमापुः॥
सप्ररिक्वात्वक्षसाक्ष्मोदिवश्चमरुत्वां०॥२०॥रोहिच्छ्यावासुमदंशुर्ललाम

सं·प्र आयाह्यध्वरंनोअच्छात्वायाहविश्चकृमासत्यराधः॥ त्वायेंद्रसोमंसुषुमा
८९ सुदक्षत्वायाहविश्चकृमाब्रह्मवाहः॥ अथानियुत्वः सगणोमरुद्भिरस्मि
न्यज्ञेबर्हिषिमादयस्व॥ मादयस्वहरिभिर्येतइंद्रविष्यस्वशिप्रेविसृजस्व
धेने॥ आत्वासुशिप्रहरयोवहंतूशन्हव्यानिप्रतिनोजुषस्व॥ मरुत्स्तोत्रस्य
वृजनस्यगोपावयमिंद्रेणसनुयामवाजं॥ तन्नो०॥ ७३॥ इमांतेधियंप्रभरे
महोमहीमस्यस्तोत्रेधिषणायत्तआनजे॥ तमुत्सवेचप्रसवेचसासहिमिं
द्रंदेवासःशवसामदन्ननु॥ अस्यश्रवोनद्यः सप्तबिभ्रतिद्यावाक्षामापृथि ८९
वीदर्शतंवपुः॥ अस्मेसूर्याचंद्रमसाभिचक्षेश्रद्धेकमिंद्रचरतोवितर्तुरं॥

तंस्मारथंमघवन्प्रावसातयेजैत्रंयंतेऽअनुमदामसंगमे॥आजानुऽइंद्रमनसापुरु
ष्टुतत्वायद्भ्योमघवन्छर्मयछन्नः॥वयंजयेमत्वयायुजावृतमस्माकमंशमुद
वाभरेभरे॥अस्मभ्यमिंद्रवारिवःसुगंकृधिप्रशत्रूणांमघवन्वृष्ण्यारुज॥
नानाहित्वाहवमानाजनाऽइमेधनानांधर्तरवसाविपन्यवः॥अस्माकंस्मार
थमातिष्ठसातयेजैत्रंहींद्रनिभृतंमनस्तव॥५॥गोजिताबाहूऽअमितक्रतुःसि
मःकर्मन्कर्मन्छतमूतिःखजंकरः॥अकल्पऽइंद्रःप्रतिमानमोजसाथाजनावि
ह्वयंतेसिसासवः॥उत्तेशतान्मघवन्नुच्चभूयसऽउत्सहस्राद्रिरिचेकृष्टिषुश्र
वः॥अमात्रंत्वाधिषणातित्विषेमह्यधावृत्राणिजिघ्नसेपुरंदर॥त्रिविष्टिधातुप्रति
मानमोजसस्तिस्रोभूमीर्नृपतेत्रीणिरोचना॥अतीदंविश्वंभुवनंववक्षिथाशत्रुरि

तेतेस्यातांप्रवणेशिफायाः॥युयोपनाभिरुपरस्यायोःप्रपूर्वाभिस्तिरतेराष्टिशूरः
॥अंजसीकुलिशीवीरपत्नीपयोहिन्वानाउदभिर्भरंते॥प्रतियत्स्यानीथादर्शिदस्यो
राकोनाच्छासदनंजानतीगात्॥अधस्मानोमघवंचर्कृतादिन्मानोमघेव
निःष्षपीपरादाः॥६॥सत्वंनइंद्रसूर्येसोअप्स्वनागास्त्वआभजजीव
शंसे॥मांतरांभुजमारीरिषोनःश्रद्धितंतेमहतइंद्रियाय॥अधामन्येश्र
त्तेअस्माअधायिवृषाचोदस्वमहतेधनाय॥मानोअकृतेपुरुहूतयो
नाविंद्रःक्षुध्यद्भ्योवयआसुतिंदाः॥मानोवधीरिंद्रमापरादामानः
प्रियाभोजनानिप्रमोषीः॥आंडामानोमघवंछक्रनिर्भेन्मानःपा

याभिस्सहस्रात्तुषाणि॥ अवींऊँहि सोमकामं त्वाहुरयं सुतस्तस्य
पिबामदाय॥ उरुव्यचा जठर आवृषस्व पितेव नः शृणुहि हूयमानः॥
१८॥ चंद्रमा अप्स्वं१तरा सुपर्णो धावते दिवि॥ न वो हिरण्यनेमयः
पदं विंदंति विद्युतो वित्तं मे अस्य रोदसी॥ अर्थमिद्वा उ अर्थिन आ
जाया युवते पतिं॥ तुंजाते वृष्ण्यं पयः परिदाय रसं दुहे वि०॥ मो
षु देवा अदः स्व१रव पादि दिवस्परि॥ मा सोम्यस्य शंभुवः शूने भूम
कदाचन वि०॥ यज्ञं पृच्छाम्यवमं स तद्दूतो वि वोचति॥ क्व ऋतं पू
र्व्यं गतं कस्तद्बिभर्ति नूतनो वि०॥ अमी ये देवास्स्थन त्रिष्वा रोचने

दिवः॥ कद्वऽऋतंकदनृतंक्वप्रत्नावआहुतिर्वित्तंमे॥२०॥ कद्वऽऋतस्यधर्णसि
कद्वरुणस्यचक्षणं॥ कदर्यम्णोमहस्पथातिक्रामेमदूढ्योवित्तंमे॥ अहंसोअ
स्मियःपुरासुतेवदामिकानिचित्॥ तंमाव्यंत्याध्यो ३ वृकोनतृष्णजंमृगं
वित्तंमे॥ संमातपंत्यभितःसपत्नीरिवपर्शवः॥ मूषोनशिश्नाव्यदंतिमाध्यःस्तो
तारंतेशतक्रतोवित्तंमे॥ अमीयेसप्तरश्मयस्तत्रामेनाभिरातता॥ त्रितस्तद्वे
दाप्त्यःसजामित्वायरेभतिवित्तंमे॥ अमीयेपंचोक्षणोमध्येतस्थुर्महोदिवः॥
देवत्रानुप्रवाच्यंसध्रीचीनानिवावृतुर्वित्तंमे॥२१॥ सुपर्णाऽएतऽआसतेम
ध्यऽआरोधनेदिवः॥ तेसेधंतिपथोवृकंतरंतंयह्वतीरपोवित्तंमे॥ नव्यंतदु
क्थ्यंहितंदेवासःसुप्रवाचनं॥ ऋतमर्षंतिसिंधवःसत्यंतातानसूर्योवित्तंमे॥

अग्नेतवत्यदुक्थ्यंदेवेष्वस्त्याप्यं॥ सनःसत्तोमनुष्वदादेवान्यक्षिविदुष्ट
रोवित्तं०॥ सत्तोहोतामनुष्वदादेवाँअच्छाविदुष्टरः॥ अग्निर्हव्यासुषूदतिदे
वोदेवेषुमेधिरोवित्तं०॥ ब्रह्माकृणोतिवरुणोगातुविदंतमीमहे॥ व्यूर्णोति
हृदामतिंनव्योजायतामृतंवित्तं०॥२२॥ असौयःपंथाआदित्योदिविप्रवा
च्यंकृतः॥ नसदेवाअतिक्रमेतंमर्तासोनपश्यथवित्तं०॥ त्रितःकूपेवहि
तोदेवान्हवतऊतये॥ तच्छुश्रावबृहस्पतिःकृण्वन्नंहूरणादुरुवित्तं०॥
अरुणोमासकृद्वृकःपथायंतंददर्शहि॥ उज्जिहीतेनिचाय्यातष्टेवपृष्ट्या
मयीवित्तं०॥ एनांगूषेणवयमिंद्रवंतोभिष्यामवृजनेसर्ववीराः॥ तन्नो०॥

॥२३॥इंद्रंमित्रंवरुणमग्निमूतयेमारुतंशर्धोअदितिंहवामहे॥रथंनदुर्गा
द्वसवःसुदानवोविश्वस्मान्नोअंहसोनिष्पिपर्तन॥तआदित्याआगतासर्व
तातयेभूतदेवावृत्रतूर्येषुशंभुवः॥रथं॰॥अवंतुनःपितरःसुप्रवाचनाउत
देवीदेवपुत्रेऋतावृधा॥रथं॰॥नराशंसंवाजिनंवाजयन्निहक्षयद्वीरंपूष
णंसुम्नैरीमहे॥रथं॰॥बृहस्पतेसदमिन्नःसुगंकृधिशंयोर्यत्तेमनुर्हितंतत
दीमहे॥रथं॰॥इंद्रंकुत्सोवृत्रहणंशचीपतिंकाटेनिबाळ्हऋषिरह्वदूतये
॥रथं॰॥देवैर्नोदेव्यदितिर्निपातुदेवस्त्रातात्रायतामप्रयुच्छन्॥तन्नो॰॥
॥२४॥यज्ञोदेवानांप्रत्येतिसुम्नमादित्यासोभवतामृळयंतः॥आवोर्वाची

सुमतिर्ववृत्यादंहोश्चिद्यावरिवोवित्तरासत्॥ उपनोदेवाँ ऽअवसागमंत्वंगिर
सांसामभिस्तूयमानाः॥ इंद्र ऽइंद्रियैर्मरुतोमरुद्भिरादित्यैर्नो ऽअदितिःशर्मयंस
त्॥ तन्नइंद्रस्तद्वरुणस्तदग्निस्तदर्यमातत्सविताचनोधात्॥ तन्नो०॥ २५॥ य ऽ
इंद्राग्नीचित्रतमोरथोवामभिविश्वानिभुवनानिचष्टे॥ तेनायातंसरथंतस्थि
वांसाथासोमस्यपिबतंसुतस्य॥ यावदिदंभुवनंविश्वमस्त्युरुव्यचावरिमतागभी
रं॥ तावाँ ऽअयंपातवेसोमो ऽअस्त्वरमिंद्राग्नीमनसेयुवभ्यां॥ चक्राथेहिसध्र्य
ङ्नामभद्रंसध्रीचीनावृत्रहणाउतस्थः॥ ताविंद्राग्नीसध्र्यंचानिषद्यावृष्णःसोम
स्यवृषणावृषेथां॥ समिद्धेष्वग्निष्वानजानायतस्रुचाबर्हिरुतिस्तिराणा॥ तीव्रैःसो
मैःपरिषिक्तेभिरर्वागेंद्राग्नीसौमनसाययातं॥ यानींद्राग्नीचक्रथुर्वीर्याणियानि
रूपाण्युतवृष्ण्यानि॥ यावांप्रत्नानिसख्याशिवानितेभिःसोमस्यपिबतंसुतस्य॥ २६॥

स॰ प्र॰ यदब्रवंप्रथमंवांवृणानो३यंसोमोऽअसुरैर्नोविहव्यः॥ तांसत्यांश्रद्धामभ्याहि
१४ यातमथासोमस्यपिबतंसुतस्य॥ यदिंद्राग्नीमदथःस्वेदुरोणेयद्ब्रह्मणिराजनि
वायजत्रा॥ अतःपरिवृषणावाहियातं०॥ यदिंद्राग्नीयदुषुतुर्वशेषुयद्द्रुह्युष्वनु
षुपूरुषुस्थः॥ अतःपरि०॥ यदिंद्राग्नीअवमस्यांपृथिव्यांमध्यमस्यांपरमस्या
मुतस्थः॥ अतःपरि०॥ यदिंद्राग्नीपरमस्यांपृथिव्यांमध्यमस्यामवमस्यामुत
स्थः॥ अतःपरि०॥ यदींद्राग्नीदिविष्ठोयत्पृथिव्यांयत्पर्वतेष्वोषधीष्वप्सु॥ अतः
परि०॥ यदिंद्राग्नीऽउदितासूर्यस्यमध्येदिवःस्वधयामादयेथे॥ अतःपरि०॥ ए
वेंद्राग्नीपपिवांसासुतस्यविश्वास्मभ्यंसंजयतंधनानि॥ तन्नोमि०॥२७॥ वि राम
ह्यख्यंमनसावस्यऽइच्छन्निंद्राग्नीज्ञासऽउतवासजातान्॥ नान्यायुवत्प्रमति १४

×आधावतंमधुनापृंक्तमप्सु॥युवामिंद्राग्नीवसुनोविभागेतवस्तमाशुश्रववृत्रहत्ये॥
×तावासद्याबर्हिषियज्ञे ५

रस्तिमह्यंसवांधियंवाजयंतीमतक्षं॥अश्रवंहिभूरिदावत्तरावांविजामातुरु
तवास्याघाल्लात्॥अथासोमस्यप्रयतीयुवभ्यामिंद्राग्नीस्तोमंजनयामिन
व्यं॥माछेद्मरश्मीँरितिनाधमानाःपितृणांशक्तीरनुयछमानाः॥इंद्राग्नि
भ्यांकंवृषणोमदंतितांह्यद्रीधिषणायाऽउपस्थे॥युवाभ्यांदेवीधिषणामदायें
द्राग्नीसोममुशतीसुनोति॥ताव‍श्विनाभद्रहस्तासुपाणीऽअ[illegible]स्मिन्प्रच
र्षणीमादयेथांसुतस्य॥२८॥प्रचर्षणिभ्यःपृतनाहवेषुप्रपृथिव्यारिरिचाथे
दिवश्च॥प्रसिंधुभ्यःप्रगिरिभ्योमहित्वाप्रेंद्राग्नीविश्वाभुवनात्यन्या॥
आभरतंशिक्षतंवज्रबाहूअस्माँइंद्राग्नीऽअवतंशचीभिः॥इमेनुतेरश्म
यःसूर्यस्ययेभिःसपित्वंपितरोनआसन्॥पुरंदराशिक्षतंवज्रहस्तास्माँ

इंद्राग्नीअवतंभरेषु॥तन्नो०॥२९॥ततंमेअपस्तदुतायतेपुनःस्वादिष्ठाधीति
रुचथायशस्यते॥अयंसमुद्रऽइहविश्वदेव्यःस्वाहाकृतस्यसमुतृप्णुतऽऋभ
वः॥आभोगयंप्रयदिच्छंतऽऐतनापाकाःप्रांचोममकेचिदापयः॥सौधन्वनास
श्चरितस्यभूमनागच्छतसवितुर्दाशुषोगृहं॥तत्सवितावोमृतत्वमासुवदगो
ह्यंयच्छ्रवयंतऽऐतन॥त्यंचिच्चमसमसुरस्यभक्षणमेकंसंतमकृणुताचतुर्वयं॥
विष्ट्वीशमीतरणित्वेनवाघतोमर्तासःसंतोअमृतत्वमानशुः॥सौधन्वनाऽऋ
भवःसूरचक्षसःसंवत्सरेसमपृच्यंतधीतिभिः॥क्षेत्रमिवविममुस्तेजनेनँऽ
एकंपात्रमृभवोजेहमानं॥उपस्तुताऽउपमंनाधमानाऽअमर्त्येषुश्रवइच्छमा

नाः॥३०॥आमनीषामंतरिक्षस्यनृभ्यःस्रुचेवघृतंजुहवामविद्मना॥
तरणित्वायेपितुरस्यसश्चिरऋभवोवाजमरुहन्दिवोरजः॥ऋभुर्नऽइंद्रःश
वसानवीयानृभुर्वाजेभिर्वसुभिर्वसुर्ददिः॥युष्माकंदेवाऽअवसाहनिप्रियेऽ
भितिष्ठेमपृत्सुतीरसुन्वतां॥निश्चर्मणऽऋभवोगामपिंशतसंवत्सेनासृज
तामातरंपुनः॥सौधन्वनासःस्वपस्ययानरोजिव्रीयुवानापितराकृणोतन॥
वाजेभिर्नोवाजसातावविड्ढ्यृभुमाँऽइंद्रचित्रमादर्षिराधः॥तन्नो०॥३१॥त
क्षन्रथंसुवृतंविद्मनापसस्तक्षन्हरीऽइंद्रवाहावृषण्वसू॥तक्षन्पितृभ्यामृ
भवोयुवद्वयस्तक्षन्वत्सायमातरंसचाभुवं॥आनोयज्ञायतक्षतऋभु
मद्वयःक्रत्वेदक्षायसुप्रजावतीमिषं॥यथाक्षयामसर्ववीरयाविशातन्नः

सं०प्र०
३६

शर्धायधासथास्विंद्रियं॥आतक्षतसातिमस्मभ्यमृभवःसातिंरथायसा
तिमर्वेश्वेनरसवेः॥सातिंनोजैत्रींसंमहेतविश्वहाजामिमजामिंपृतनासु
सक्षणिं॥ऋभुक्षणमिंद्रमाहुवऊतयऋभून्वाजान्मरुतःसोमपीतये॥उ
भामित्रावरुणानूनमश्विनातेनोहिन्वंतुसातयेधियेजिषे॥ऋभुर्भरा
यसंशिशातुसातिंसमर्यजिद्वाजोअस्माँअविष्टु॥तन्नो०॥३२॥ईळेद्या
वापृथिवीपूर्वचित्तयेग्निंघर्मंसुरुचंयामन्निष्टये॥याभिर्भरेकारमंशा
यजिन्वथस्ताभिरूषुऊतिभिरश्विनागतं॥युवोर्दानायसुभराअसश्चतो
रथमातस्थुर्वचसंनमंतवे॥याभिर्धियोवथःकर्मन्निष्टयेताभि०॥युवं
तासांदिव्यस्यप्रशासनेविशांक्षयथोअमृतस्यमज्मना॥याभिर्धेनुमस्वं१

राम
३६

× याभिः शचीभिर्वृषणा परावृजं प्रांधं श्रोणं चक्षस एतवे कृथः॥ याभि ×
र्वर्तिकां ग्रसिताममुंचतं ताभि० ८

पिन्वथो नरा ताभि०॥ याभिः परिज्मा तनयस्य मज्मना द्विमाता तूर्षु तरणिर्वि
भूषति॥ याभिस्त्रिमंतुरभवद्विचक्षणस्ताभि०॥ याभी रेभं निवृतं सितमद्भ्य
उद्वंदनमैरयतं स्वर्दृशे॥ याभिः कण्वं प्रसिषासंतमावतं ताभि०॥ २३॥ याभि
रंतकं जसमानमारणे भुज्युं याभिरव्यथिभिर्जिजिन्वथुः॥ याभिः कर्कंधुं व
य्यं च जिन्वथस्ताभि०॥ याभिः शुचंतिं धनसां सुषंसदं तप्तं घर्ममोम्यावंत
मत्रये॥ याभिः पृश्निगुं पुरुकुत्समावतं ताभि०॥ याभिः सिंधुं मधुमंतम
सश्चतं वसिष्ठं याभिरजरावजिन्वतं॥ याभिः कुत्सं श्रुतर्यं नर्यमावतं ताभि
०॥ याभिर्विश्पलां धनसामथर्व्यं सहस्रमीळ्ह आजावजिन्वतं॥ याभिर्व
शमश्व्यं प्रेणिमावतं ताभि०॥ २४॥ याभिः सुदानू औशिजाय वणिजे दीर्घ

सं०प०
९५

श्रवसेमधुकोशोअक्षरत्॥कक्षीवंतंस्तोतारंयाभिरावतंता०॥याभी
रसांक्षोदसोद्नःपिपिन्वथुरनश्वंयाभीरथमावतंजिषे॥याभिस्त्रिशो
कउस्रियाउदाजतंताभि०॥याभिःसूर्यंपरियाथःपरावतिमंधातारंक्षै
त्रपत्येष्वावतं॥याभिर्विप्रंप्रभरद्वाजमावतंताभि०॥याभिर्महामतिथि
ग्वंकशोजुवंदिवोदासंशंबरहत्यआवतं॥याभिःपूर्भिद्येत्रसदस्युमाव
तंता०॥याभिर्वम्रंविपिपानमुपस्तुतंकलिंयाभिर्वित्तजानिंदुवस्यथः॥
याभिर्व्यश्वमुतपृथिमावतंता०॥२५॥याभिर्नराशयवेयाभिरत्रयेया ९८
भिःपुरामनवेगातुमीषथुः॥याभीशारीराजतंस्यूमरश्मयेताभि०॥
याभिःपठर्वाजठरस्यमज्मनाग्निर्नादीदेच्चितइद्धोअज्मन्ना॥याभिः

शर्यातमवथो महाधने ता० ॥ याभिरंगिरो मनसो निरण्यथोग्रं गछथो विव
रे उ गो अर्णसः ॥ याभिर्मनुं शूरमिषा समावतं ता० ॥ याभिः पत्नीर्विमदाय
न्यूहथुरा घ वा याभिररुणीरशिक्षतं ॥ याभिः सुदास ऊहथुः सुदेव्यं१ ताभि
रू० ॥ याभिः शंताती भवथो ददाशुषे भुज्युं याभिरवथो याभिरध्रिगुं ॥ ओ
म्यावतीं सुभरामृतस्तुभं ता० ॥ २० ॥ याभिः कृशानुमसने दुवस्यथो ज
वे याभिर्यूनो अर्वंतमावतं ॥ मधु प्रियं भरथो यत्सरड्भ्यस्ताभि० ॥ याभि
र्नरं गोषुयुधं नृषाह्ये क्षेत्रस्य साता तनयस्य जिन्वथः ॥ याभी रथाँ अव
थो याभिरर्वतस्ता० ॥ याभिः कुत्समार्जुनेयं शतक्रतू प्र तुर्वीतिं प्र च द
भीतिमावतं ॥ याभिर्ध्वसंतिं पुरुषंतिमावतं ताभिरू षु ऊतिभिरश्वि

नागतं॥ याभिः कुत्समार्जुंने अप्नस्वतीमश्विना वाचमस्मे कृतंन्नो दस्रा
वृषणामनीषां॥ अद्यूत्येवसेनिह्वयेवांवृधेचनोभवतंवाजसातौ॥ द्युभिर
क्तुभिः परिपातमस्मानरिष्टेभिरश्विनासौभगेभिः॥ तन्नोमित्रोवरुणोमा
महंतामदितिः सिंधुः पृथिवीउतद्यौः॥ ३७॥ ॥ इतिप्रथमाष्टकेसप्तमोध्या
यः॥ ७॥ ॥ ६८॥

॥हरिः ॐ॥इदंविंशतिरुषस्यंद्वितीयोर्धर्चोरात्र्यश्चेमाऽएकादशरोद्रंद्वित्रि
ष्टुबंतांचित्रंषट्सोर्यंनासत्याभ्यांपंचाधिकाकक्षीवांदैर्घतमसऽउशिक्स
सुतऽआश्विनंवैमध्वऽआवामेकादशावारथंदशजागतंकाराधद्द्वादश्या
त्यादुःस्वप्ननाशिन्याद्यागायत्रीद्वितीयाककुप्तृतीयाचतुर्थ्यौकाविराण्न
ष्टरूप्यौपंचमीतनुशिराषष्ठ्यपक्षरैरुष्णिग्विष्टारबृहतीकृतिर्विराट्तिस्रो
गायत्र्यःकदित्थापंचोनावैश्वदेवंवा॥८॥ हरिः ॐ॥ इदंश्रेष्ठंज्योतिषांज्यो
तिरागाच्चित्रःप्रकेतोऽअजनिष्टविभ्वा॥ यथाप्रसूतासवितुःसवायंऽ
एवारात्र्युषसेयोनिमारैक्॥रुशद्वत्सारुशतीश्वेत्यागादारैगुकृष्णासद
नान्यस्याः॥ समानबंधूऽअमृतेऽअनूचीद्यावावर्णंचरतऽआमिनाने॥स

सं॰प्र॰ समानोऽअध्वा स्वस्रोरनंतस्तमन्यान्या चरतोदेवशिष्टे॥नमेथेतेनतस्थतुः
९९ सुमेकेनक्तोषासासमनसाविरूपे॥भास्वतीनेत्रीसूनृतानामचेतिचि
त्राविदुरोनआवः॥प्रार्प्याजगद्व्युनोरायोऽअख्यदुषाअजीगर्भुवनानिवि
श्वा॥जिह्मश्येऽचरितवेमघोन्याभोगयइष्टयेरायऽउत्वं॥दभ्रंपश्यद्भ्यऽ
उर्विविचक्षेऽउषाऽअजीगर्भुवनानिविश्वा।१।।क्षत्रायत्वंश्रवसेत्वंमही
याऽइष्टयेत्वमर्थमिवत्वमित्यै॥विसदृशाजीविताभिप्रचक्षऽउषा॰॥एषा
दिवोदुहिताप्रत्यदर्शिव्युछंतीयुवतिःशुक्रवासाः॥विश्वस्येशानापार्थि
वस्यवस्वऽउषोऽअद्येहसुभगेव्युछ।परायतीनामन्वेतिपाथआयती ९९
नांप्रथमाशाश्वतीनां॥व्युछंतीजीवमुदीरयंत्युषामृतंकंचनबोधयंती॥

उषोयदग्निंसमिधेचकर्थवियदावश्चक्षसासूर्यस्य।।यन्मानुषान्यक्ष्यमाणाँऽअ
जीगस्तद्देवेषुचकृषेभद्रमप्नः।।कियात्यायत्समयाभवातियाव्यूषुर्याश्चनूनंव्युच्छा
न्।।अनुपूर्वाःकृपतेवावशानाप्रदीध्यानाजोषमन्याभिरेति।।२।।ईयुष्टेयेपूर्वत
रामपश्यन्व्युच्छंतीमुषसंमर्त्यासः।।अस्माभिरूनुप्रतिचक्ष्याभूदोतेयंतियेऽअ
परीषुपश्यान्।।यावयद्द्वेषाऋतपाऽऋतेजाःसुम्नावरीसूनृताऽईरयंती।।सुमं
गलीर्बिभ्रतीदेववीतिमिहाद्योषःश्रेष्ठतमाव्युच्छ।।शश्वत्पुरोषाव्युवासदेव्य
थोऽअद्येदंव्यावोमघोनी।।अथोव्युच्छादुत्तरांऽअनुद्यूनजरामृताचरतिस्वधा
भिः।।व्यंऽजिभिर्दिवआतास्वद्यौदपकृष्णांनिर्णिजंदेव्यावः।।प्रबोधयंत्यरुणे

भिरश्वैरोषायातिसुयुजारथेन॥आवहंतीपोष्यावार्याणिचित्रंकेतुंकृणु
तेचेकिताना॥ईयुषीणामुपमाशश्वतीनांविभातीनांप्रथमोषाव्यश्वैत्॥उ
दीर्ध्वंजीवोअसुर्नआगादपप्रागात्तमआज्योतिरेति॥आरैक्पंथांयात
वेसूर्यायागन्मयत्रप्रतिरंतआयुः॥स्यूमनावाचउदियर्तिवह्निस्तवानोरे
भउषसोविभातीः॥अद्यातदुच्छगृणतेमघोन्यस्मेआयुर्निदिदीहिप्रजावत्
॥यागोमतीरुषसःसर्ववीराव्युछंतिदाशुषेमर्त्याय॥वायोरिवसूनृताना
मुदर्केताअश्वदाअश्नवत्सोमसुत्वा॥मातादेवानामदितेरनीकंयज्ञस्य
केतुर्बृहतीविभाहि॥प्रशस्तिकृद्ब्रह्मणेनोव्युच्छानोजनेजनयविश्ववा

रे ॥ यच्चित्रमप्नउषसोवहंतीजानायशशमानायभद्रं ॥ तन्नो॰ ॥ ४ ॥
इमारुद्रायतवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमती: ॥ यथाशमसद्द्वि
पदेचतुष्पदेविश्वंपुष्टंग्रामेअस्मिन्ननातुरं ॥ मृळानोरुद्रोतनोमयस्कृधि
क्षयद्वीरायनमसाविधेमते ॥ यच्छंचयोश्चमनुरायेजेपितातदश्याम
तवरुद्रप्रणीतिषु ॥ अश्यामतेसुमतिंदेवयज्ययाक्षयद्वीरस्यतवरुद्र
मीढ्व: ॥ सुम्नायन्निद्विशोअस्माकमाचरारिष्टवीराजुहवामतेहवि: ॥ त्वे
षंवयंरुद्रंयज्ञसाधंवंकुंकविमवसेनिह्वयामहे ॥ आरेअस्मद्दैव्यंहेळो
अस्यतुसुमतिमिद्वयमस्यावृणीमहे ॥ दिवोवराहमरुषंकपर्दिनंत्वेषंरूप

सं·सं·प्र नमसाविह्वयामहे॥हस्तेबिभ्रद्भेषजावार्याणिशर्म·वर्मछर्दिरस्म
१०१ भ्यंयंसत्॥५॥इदंपित्रेमरुतामुच्यतेवचःस्वादोःस्वादीयोरुद्रायव
र्धनं॥रास्वाचनोअमृतमर्तभोजनंत्मनेतोकायतनयायमृळ॥
मानोमहान्तमुतमानोअर्भकंमाऽनउक्षंतमुतमानउक्षितं॥मा
नोवधीःपितरंमोतमातरंमानःप्रियास्तन्वोरुद्ररीरिषः॥मान
स्तोकेतनयेमानआयौमानोगोषुमानोअश्वेषुरीरिषः॥२वीरा
न्मानोरुद्रभामितोवधीर्हविष्मंतःसदमित्वाहवामहे॥उपते १०१
स्तोमान्पशुपाइवाकरंरास्वापितर्मरुतांसुम्नमस्मे॥भद्राहि

तेसुमतिर्मृळयत्तमाथावयमवऽइत्तेवृणीमहे॥आरेतेगोघ्नमुतपूरुषघ्नंक्ष ८०५
म यद्वीरसुम्नमस्मेतेऽअस्तु॥मृळाचनोऽअधिचब्रूहिदेवाधाचनःशर्मयच्छद्विब
र्हाः॥आवोचामनमोऽअस्माऽअवस्यवःशृणोतुनोहवंरुद्रोमरुत्वान्॥तन्नो॥
॥६॥चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः॥आप्राद्यावापृथिवीः
अंतरिक्षंसूर्यऽआत्माजगतस्तस्थुषश्च॥सूर्योदेवीमुषसंरोचमानांमर्योनयोषा
मभ्येतिपश्चात्॥यत्रानरोदेवयंतोयुगानिवितन्वतेप्रतिभद्रायभद्रं॥भद्राऽअ
८०५ श्वाहरितःसूर्यस्यचित्राऽएतग्वाऽअनुमाद्यासः॥नमस्यंतोदिवऽआपृष्ठमस्थुः
परिद्यावापृथिवीयंतिसद्यः॥तत्सूर्यस्यदेवत्वंतन्महित्वंमध्याकर्तोर्विततंसंज

भार॥यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै॥तन्मित्रस्य वरुण
स्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे॥अनंतमन्यद्रुशदस्य पाजः कृष्णमन्य
द्धरितः संभरंति॥अद्या देवा उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात्॥त
न्नो०॥७॥नासत्याभ्यां बर्हिरिव प्र वृंजे स्तोमाँ इयर्म्यभ्रियेव वातः॥यावर्भगा
य विमदाय जायां सेनाजुवा न्यूहतू रथेन॥वीळुपत्मभिराशुहेमभिर्वा देवानां वा
जूतिभिः शाशदाना॥तद्रासभो नासत्या सहस्रमाजा यमस्य प्रधने जिगाय॥तु
ग्रो ह भुज्युमश्विनोदमेघे रयिं न कश्चिन्ममृवाँ अवाहाः॥तमूहथुर्नौभिरात्म
न्वतीभिरंतरिक्षप्रुद्भिरपोदकाभिः॥तिस्रः क्षपस्त्रिरहातिव्रजद्भिर्नासत्या भु

ज्युमूहथुःपतंगैः॥समुद्रस्यधन्वन्नार्द्रस्यपारेत्रिभीरथैःशतपद्भिःषळश्वैः॥अ
नारंभणेतदवीरयेथामनास्थानेऽअग्रभणेसमुद्रे॥यदश्विनाऽऊहथुर्भुज्यु
मस्तंशतारित्रांनावमातस्थिवांसं॥५॥यमश्विनाददथुःश्वेतमश्वमघाश्वा
यस्यशश्वदित्स्वस्ति॥तद्वांदात्रंमहिकीर्तेन्यंभूत्पैद्वोवाजीसदमिद्धव्योऽअर्यः॥
युवंनरास्तुवतेपज्रियायकक्षीवतेऽअरदतंपुरंधिं॥कारोतराच्छफादश्व
स्यवृष्णःशतंकुंभाँऽअसिंचतंसुरायाः॥हिमेनाग्निंघ्रंसमवारयेथांपितु
मतीमूर्जमस्माऽअधत्तं॥ऋबीसेऽअत्रिमश्विनावनीतमुन्निन्यथुःसर्व
गणंस्वस्ति॥परावतंनासत्यानुदेथामुच्चाबुध्नंचक्रथुर्जिह्मबारं॥क्षरन्ना
पोनपायनायरायेसहस्रायतृष्यतेगोतमस्य॥जुजुरुषोनासत्योतवव्रिं

नं

प्रामुंचतंद्रापिमिवच्यवानात्॥ प्रातिरतंजहितस्यायुर्दस्रादित्पतिमकृणु
तंकनीनां॥९॥ तद्वांनराशंस्यंराध्यंचाभिष्टिमन्नासत्यावरूथं॥ यद्विद्वांसा
निधिमिवापगूळ्हमुद्दर्शतादूपथुर्वंदनाय॥ तद्वांनरासनयेदंसऽउग्रमावि
ष्कृणोमितन्यतुर्नवृष्टिं॥ दध्यङ्ह यन्मध्वाथर्वणोवामश्वस्यशीर्ष्णाप्रय
दीमुवाच॥ अजोहवीन्नासत्याकरावांमहेयामन्पुरुभुजापुरंधिः॥ श्रुतंतच्छा
सुरिववध्रिमत्याहिरण्यहस्तमश्विनावदत्तं॥ आस्नोवृकस्यवर्तिकामभी
केयुवंनरानासत्यामुमुक्तं॥ उतोकविंपुरुभुजायुवंहकृपमाणमकृणुतंवि
चक्षे॥ चरित्रंहिवेरिवाच्छेदिपर्णमाजाखेलस्यपरितक्म्यायां॥ सद्योजंघा
मायसींविश्पलायैधनेहितेसर्तवेप्रत्यधत्तं॥१०॥ शतंमेषान्वृक्येचक्ष

दानमृज्राश्वंतंपिताधंचकार॥तस्माअक्षीनासत्याविचक्षऽआधत्तंदस्राभि
षजावनर्वन्॥आवांरथंदुहितासूर्यस्यकार्ष्मेवातिष्ठदर्वताजयंती॥विश्वेदे
वाःअन्वमन्यंतहृद्भिःसमुश्रियानासत्यासचेथे॥यदयातंदिवोदासायवर्ति
र्भरद्वाजायाश्विनाहयंता॥रेवदुवाहसचनोरथोवांवृषभश्चशिंशुमारश्च
युक्ता॥रयिंसुक्षत्रंस्वपत्यमायुःसुवीर्यंनासत्यावहंता॥आजह्नावींसमन
सोपवाजैस्त्रिरह्नोभागंदधतीमयातं॥परिविष्टंजाहुषंविश्वतःसींसुगेभि
र्नक्तमूहथूरजोभिः॥विभिंदुनानासत्यारथेनविपर्वताँअजरयूऽअयातं
॥२१॥एकस्यावस्तोरावतंरणायवशमश्विनासनयेसहस्रा॥निरहतंदुच्छु
नाऽइंद्रवंतापृथुश्रवसोवृषणावरातीः॥शरस्यचिदार्चत्कस्यावतादानीचा

दुच्चाचक्रथुः पातवेवाः ॥ शयवेचिन्नासत्याशचीभिर्जसुरयेस्तर्यंपिप्यथु
र्गां ॥ अवस्यतेस्तुवतेकृष्णियायऽऋजूयतेनासतेशचीभिः ॥ पशुंननष्टमिव
दर्शनायविष्णाप्वंददथुर्विश्वकाय ॥ दशरात्रीरशिवेनानवद्यूनवनद्धंश्नथि
तमप्स्व१न्तः ॥ विप्रुतंरेभमुदनिप्रवृक्तमुन्निन्यथुः सोममिवस्रुवेण ॥ प्रवांदंसां
स्यश्विनाववोचमस्यपतिः स्यांसुगवः सुवीरः ॥ उतपश्यन्नश्नुवंदीर्घमायुरस्त
मिवेज्जरिमाणंजगम्यां ॥ १२ ॥ मध्वः सोमस्याश्विनामदायप्रत्नोहोताविवास
तेवां ॥ बर्हिष्मतीरातिर्विश्रितागीरिषायातंनासत्योपवाजैः ॥ योवामश्विना
मनसोजवीयान्रथः स्वश्वोविशआजिगाति ॥ येनगच्छथः सुकृतोदुरोणं
तेननरावर्तिरस्मभ्यंयातं ॥ ऋषिंनरावंहसः पांचजन्यमृबीसादत्रिंमुंचथो

गणेन॥मिनंतादस्योरशिवस्यमाया॥ऽअनुपूर्वंवृषणाचोदयंता॥अश्वंन्
नगूह्ळमश्विनादुरेवैःऽऋषिंनरावृषणारेभमप्सु॥संतंरिणीथोविप्रुतं
दंसोभिनवांजूर्यंतिपूर्व्याकृतानि॥सुषुप्वांसंननिर्ऋतेरुपस्थेसूर्यंनद
स्रातमसिक्षियंतं॥शुभेरुक्मंनदर्शतंनिखातमुदूपथुरश्विनावंदनाय॥
॥१३॥तद्वांनराशंस्यंपज्रियेणकक्षीवतानासत्यापरिज्मन्॥शफादश्व
स्यवाजिनोजनायशतंकुंभाँऽअसिंचतंमधूनां॥युवंनरास्तुवतेकृष्णि
यायविष्णाप्वंददथुर्विश्वकाय॥घोषायैचित्पितृषदेदुरोणेपतिंजूर्यं
त्याऽअश्विनावदत्तं॥युवंश्यावायरुशतीमदत्तंमहःक्षोणस्याश्विनाक
ण्वाय॥प्रवाच्यंतद्वृषणाकृतंवांयन्नार्षदायश्रवोऽअध्यधत्तं॥पुरुवर्पां

स्याश्विनादधानानिपेदवऊहथुराशुमश्वं॥सहस्रसांवाजिनमप्रतीतमहि
हनं~~महिहनं~~श्रवस्यंतरुत्रं॥एतानिवांश्रवस्यासुदानूब्रह्मांगूषंसदनंरो
दस्योः॥यद्वांपज्रासोअश्विनाहवंतेयातमिषाचविदुषेचवाजं॥१४॥सूनो
र्मानेनाश्विनागृणानावाजंविप्रायभुरणारदंता॥अगस्त्येब्रह्मणावावृधा
नासंविश्पलांनासत्यारिणीतं॥कुहयांतासुष्टुतिंकाव्यस्यदिवोनपातावृष
णाशयुत्रा॥हिरण्यस्येवकलशंनिखातमुदूपथुर्दशमेअश्विनाहन्॥
युवंच्यवानमश्विनाजरंतंपुनर्युवानंचक्रथुःशचीभिः॥युवोरथं
दुहितासूर्यस्यसहश्रियानासत्यावृणीत॥युवंतुग्रायपूर्व्येभिरे

वैःपुनर्मन्यावभवतंयुवाना॥युवंभुज्युमर्णसोनिःसमुद्राद्विभिरू
हथुर्ऋज्रेभिरश्वैः॥अजोहवीदश्विनातौग्र्योवांप्रोळ्हःसमुद्रमव्य
थिर्जगन्वान्॥निष्टमूहथुःसुयुजारथेनमनोजवसावृषणास्वस्ति
॥१५॥अजोहवीदश्विनावर्तिकावामास्नोयत्सीममुञ्चतंवृकस्य॥वि
जयुषाययथुःसान्वद्रेर्जातंविष्वाचोअहतंविषेण॥शतंमेषान्वृक्ये
मामहानंतमःप्रणीतमशिवेनपित्रा॥आक्षीऋज्राश्वेअश्विनावध
त्तंज्योतिरंधायचक्रथुर्विचक्षे॥शुनमंधायभरमह्वयत्सावृकीर
श्विनावृषणानरेति॥जारःकनीनइवचक्षदानऋज्राश्वःशत

१०६
ऋ.सं.

सं॰प्र॰ मेकंचमेषान्॥ महीवामूतिरश्विनामयोभूरुतस्त्राणंधिष्ण्यासंरिणीथः॥
१०६ अथायुवामिदह्वयत्पुरंधिरागच्छतंसींवृषणावबोभिः॥ अधेनुंदस्रास्त
अ र्यं॥ विषक्तामपिन्वतंशयवेऽश्विनागां॥ युवंशचीभिर्विमदायजायांन्यू
हथुःपुरुमित्रस्ययोषां॥२६॥ यवंवृकेणाश्विनावपंतेषंदुहंतामनुषायदस्रा॥
अभिदस्युंबकुरेणाधमंतोरुज्योतिश्चक्रथुरार्याय॥ आथर्वणायाश्विना
दधीचेऽश्व्यंशिरःप्रत्यैरयतं॥ सवांमधुप्रवोचदृतायन्त्वाष्ट्रंयद्दस्रावपिकक्ष्यं
वां॥ सदाकवीसुमतिमाचकेवां॥ विश्वाधियोऽअश्विनाप्रावतंमे॥ अस्मेरयिं १०६
न्नासत्याबृहंतमपत्यसाचंश्रुत्यंरराथां॥ हिरण्यहस्तमश्विनारराणापुत्रंन

रा॥वध्रिमत्याऽअदत्तं॥त्रिधाहश्यावमश्विनाविकस्तमुज्जीवसऽऐरयतंसुदा
नू॥एतानिवामश्विनावीर्याणिप्रपूर्व्याण्यायवोवोचन्॥ब्रह्मकृण्वंतोवृषणायुवभ्यां
सुवीरासोविदथमावदेम॥१७॥आवांरथोऽअश्विनाश्येनपत्वासुमृळीकःस्ववां
यात्वर्वाङ्॥योमर्त्यस्यमनसोजवीयान्त्रिबंधुरोवृषणावातरंहाः॥त्रिबंधुरेणत्रि
वृतारथेनत्रिचक्रेणसुवृतायातमर्वाक्॥पिन्वतंगाजिन्वतमर्वतोनोवर्धयतमश्वि
नावीरमस्मे॥प्रवद्यामनासुवृतारथेनदस्राविमंशृणुतंश्लोकमद्रेः॥किमंगवांप्र
त्यवर्तिंगमिष्ठाहुर्विप्रासोऽअश्विनापुराजाः॥अवांश्येनासोऽअश्विनावहंतुरथेयु
क्तासऽआशवःपतंगाः॥येऽअप्तुरोदिव्यासोनगृध्राऽअभिप्रयोनासत्यावहंति॥
अवांरथंयुवतिस्तिष्ठदत्रजुष्ट्वीनरादुहितासूर्यस्य॥परिवामश्वावपुषःपतंगाव

योवहंत्वरुषाऽअभीके॥१८॥उद्वंदनमैरतंदंसनाभिरुद्रेभंदस्रावृषणाशचीभिः॥नि
ष्टौग्र्यंपारयथःसमुद्रात्पुनश्च्यवानंचक्रथुर्युवानं॥युवमत्रयेवनीतायतप्तमूर्जमो
मानमश्विनावधत्तं॥युवंकण्वायापिरिप्तायचक्षुःप्रत्यधत्तंसुष्टुतिंजुजुषाणा॥यु
वंधेनुंशयवेनाधितायापिन्वतमश्विनापूर्व्याय॥अमुंचतंवर्तिकामंहसोनिःप्र
तिजंघांविश्पलायाऽअधत्तं॥युवंश्वेतंपेदवऽइंद्रजूतमहिहनमश्विनादत्तमश्वं॥
जोहूत्रमर्योऽअभिभूतिमुग्रंसहस्रसांवृषणंवीड्वंगं॥तावांनरास्ववसेसुजाताहवा
महेऽअश्विनानाधमानाः॥आनउपवसुमतारथेनगिरोजुषाणासुविताययातं॥
आश्येनस्यजवसानूतनेनास्मेयातंनासत्यासजोषाः॥हवेहिवामश्विनारातह
व्यःशश्वत्तमायाऽउषसोव्युष्टौ॥१९॥आवांरथंपुरुमायंमनोजुवंजीराश्वंयज्ञियं

जीवसे हुवे ।। सहस्रकेतुं वनिनं शतद्वसुं श्रुष्टीवानं वरिवोधामभि प्रयः ।।
ऊर्ध्वा धीतिः प्रत्यस्य प्रयामन्यधायि शस्मन्त्समयंत आ दिशः ।। स्व
दामि घर्मं प्रति यंत्यूतय आ वामूर्जानी रथमश्विनारुहत् ।। सं यन्मिथः
पस्पृधानासोऽअग्मत शुभे मखा अमिता जायवो रणे ।। युवोरह
प्रवणे चेकिते रथो यदश्विना वहथः सूरिमा वरं ।। युवं भुज्युं भुरमा
णं विभिर्गतं स्वयुक्तिभिर्निवहंता पितृभ्य आ ।। यासिष्टं वर्तिर्वृषणा
विजेन्यं१ दिवोदासाय महि चेति वामवः ।। युवोरश्विना वपुषे युवा
युजं रथं वाणी येमतुरस्य शर्ध्यं ।। आ वां पतित्वं सख्याय जग्मुषी

सं०प्र

१०६

योषावृणीतजेन्यायुवांपती॥२०॥युवंरेभंपरिषूतेरुरुष्यथोहिमेनघ
र्मंपरितप्तमत्रये॥युवंशयोरवसंपिप्यथुर्गविप्रदीर्घेणवंदनस्ता
र्यायुषा॥युवंवंदनंनिर्ऋतिंजरण्ययारथंनदस्राकरणासमिन्वथः॥
क्षेत्रादाविप्रंजनथोविपन्ययाप्रवामत्रविधतेदंसनाभुवत्॥अग
च्छतंकृपमाणंपरावतिपितुस्वस्यत्यजसानिबाधितं॥स्वर्वतीरि
तऊतीर्युवोरहचित्राअभीकेअभवन्नभिष्टयः॥उतस्यावांमधु
मन्मक्षिकारपन्मदेसोमस्यौशिजोहुवन्यति॥युवंदधीचोमन
आविवासथोथाशिरःप्रतिवामश्व्यंवदत्॥युवंपेदवेपुरुवार

१०६

मश्विनास्पृधांश्वेतंतरुतारंदुवस्यथः॥शर्यैरभिद्युंपृतनासुदुष्टरंच
र्कृत्यमिंद्रमिवचर्षणीसहं॥२१॥काराधद्धोत्राश्विनावांकोवांजोषउभ
योः॥कथाविधात्यप्रचेताः॥विद्वांसाविद्दुरःपृछेदविद्वानित्थापरो
अचेताः॥नूचिन्नुमर्त्तेअक्रौ॥ताविद्वांसाहवामहेवांतानोविद्वांसा
मन्मवोचेतमद्य॥प्रार्चद्दयमानोयुवाकुः॥विपृछामिपाक्यान
देवान्वषट्कृतस्याद्भुतस्यदस्रा॥पातंचसह्यसोयुवंचरभ्यसो
नः॥प्रयाघोषेभृगवाणेनशोभेययावाचायजतिपज्रियोवां॥
प्रैषयुर्नविद्वान्॥२२॥श्रुतंगायत्रंतकवानस्याहंचिद्धिरिरेभा

सं॰प्र॰ श्विनावां॥आक्षीभुभस्पतीदनू॥युवंह्यास्तंमहोरन्युवंवायंनिरततंसतं॥
१०९ त्तानोवसूसुगोपास्यात्तंपातंनोवृकादघायोः॥माकस्मैधातमभ्यमित्रिणे
नोमाकुत्रानोगृहभ्योधेनवोगुः॥स्तनाभुजोऽअशिश्वीः॥दुहीयन्मित्रधितये
युवाकुरायेचनोमिमीतंवाजवत्यै॥इषेचनोमिमीत्तंधेनुमत्यै॥अश्विनोरसनं
रथमनश्वंवाजिनीवतोः॥तेनाहंभूरिचाकन॥अयंसमहमातनूह्यातेज
नाँऽअनु॥सोमंपेयंसुखोरथः॥अधःस्वप्नस्यनिर्विदेऽभुंजतश्चरेवतः॥
उभाताबस्त्रिनश्यतः॥२३॥कदित्थानॄँःपात्रंदेवयतांश्रवद्गिरोऽअंगि १०९
रसांतुरण्यन्॥प्रयदानड्विशऽआहर्म्यस्योरुक्रंसतेऽअध्वरेयजत्रः॥४

स्तंभीद्धद्यांसधरुणंप्रुषायदृभुर्वाजाद्रविणंनरोगोः॥अनुस्वजांमहि
षश्चक्षतव्रामेनामश्चस्यपरिमातरंगोः॥नक्षद्धवमरुणीःपूर्व्यंराट्तुरो
विशामंगिरसामनुद्यून्॥तक्षद्वज्रंनियुतंतस्तंभद्यांचतुष्पदेनर्यायद्वि
पादे॥अस्यमदेस्वर्यंदाऽऋतायापीवृतमुस्रियाणामनीकं॥यद्धसर्गेत्रिक प्र
कुम्निवर्तदपद्रुहोमानुषस्यदुरोवः॥तुभ्यंपयोयात्पितरावनीतांराधःसु
रेतस्तुरणेभुरण्यू॥शुचियत्तेरेक्णआयजंतसबुर्दुघायाःपयउस्रिया
याः॥२४॥अधप्रजज्ञेतरणिममत्तुप्ररोच्यस्याऽउषसोनसूरः॥इंदुर्येभि सू ३
राष्ट्रःस्वेदुहव्यैःस्रुवेणसिंचंजरणाभिधाम॥स्विध्मायद्वनेधितिरपस्या
त्सूरोऽअध्वरपरिरोधनागोः॥यद्धप्रभासिकृत्व्यांऽअनुद्यूननर्विशोपाश्विष

षेतुराय॥अष्टामहोदिवआदोहरीइहद्युम्नासाहमभियोधानउत्सं॥
हरिंयत्तेमंदिनंदुक्षन्वृधेगोरभसमद्रिभिर्वाताप्यं॥त्वमायसंप्रतिवर्त
योगोर्दिवोअश्मानमुपनीतमृभ्वा॥कुत्साययत्रपुरुहूतवन्वञ्छुष्णम
नंतैःपरियासिवधैः॥पुरायत्सूरस्तमसोअपीतेस्तमद्रिवःफलिगंहे
तिमस्य॥शुष्णस्यचित्परिहितंयदोजोदिवस्परिसुग्रथितंतदादः॥
॥२५॥अनुत्वामहीपाजसीअचक्रेद्यावाक्षामामदतामिंद्रकर्मन्॥
त्वंवृत्रमाशयानंसिरासुमहोवज्रेणसिष्वपोवराहुं॥त्वमिंद्रनर्यो
यांःअवोनॄन्तिष्ठावातस्यसुयुजोवहिष्ठान्॥यंतेकाव्यउशनामंदि

नंदाद्वृत्रहणंपार्यंततक्षवज्रं ॥ त्वंसूरोहरितोरामयोनॄन्भरच्चक्र
मेतशोनायमिंद्र ॥ प्रास्यपारंनवतिंनाव्यानामपिकर्तमवर्तयोय
ज्यून् ॥ त्वंनोअस्याइंद्रदुर्हणायाः पाहिवज्रिवोदुरितादभीके ॥ प्रनो
वाजान्रथ्यो३अश्वबुध्यानिषेयंधिश्रवसेसूनृतायै ॥ मासातेअ
स्मत्सुमतिर्विदसद्वाजप्रमहः समिषोवरंत ॥ आनोभजमघवन्
गोष्वर्योमंहिष्ठास्तेसधमादः स्याम ॥ २६ ॥ इतिसंहिताप्रथमाष्टके
अष्टमोध्यायः ॥ ॥ शके १७६३ प्लवनामसंवत् मार्गशीर्षशुद्ध १०
समाप्तः ॥ अष्टपुत्रेबाळकाचार्येनलिखितं ॥ श्रीकृष्णप्रसन्न ॥ ॥

सं॰प्र॰
२११

॥संहिताप्रथमाष्टकसमाप्तः॥ छ॥

राम
२११

संहिताद्वितीयाष्टकप्रारंभः॥

सं·द्वि· श्रीगणेशायनमः॥ हरिः ओम्॥ वायव्यꣳश्वेतमालभेतभूतिकामोवायुर्वैक्षेपिष्ठादेवतावायुमेवस्वे
१ नभागधेयेनोपधावतिसएवैनंभूतिंगमयतिभवत्येवातिक्षिप्रादेवतेत्याहुः सैनमीश्वराप्रदहइत्ये
तमेवसंतंवायवेनियुत्वतआलभेतनियुद्वाअस्यधृतिर्धृतएवभूतिमुपैत्यप्रदाहायभवत्येव॥१॥
वायवेनियुत्वतआलभेतग्रामकामोवायुर्वाइमाःप्रजानस्योतानेनीयतेवायुमेवनियुत्वंतꣳस्वेन
भागधेयेनोपधावतिसएवास्मैप्रजानस्योतानियच्छतिग्राम्येवभवतिनियुत्वतेभवतिध्रुवाएवास्मा
अनपगाः करोतिवायवेनियुत्वतआलभेतप्रजाकामःप्राणोवैवायुरपानोनियुत्प्राणापानौखलु
वाएतस्यप्रजायाः॥२॥ अपक्रामतोयोऽलंप्रजायैसन्प्रजांनविंदतेवायुमेवनियुत्वंतꣳस्वेनभागधे
येनोपधावतिसएवास्मैप्राणापानाभ्यांप्रजांप्रजनयतिविंदतेप्रजांवायवेनियुत्वतआलभेतज्यो राम्
गामयावीप्राणोवैवायुरपानोनियुत्प्राणापानौखलुवाएतस्मादपक्रामतोयस्यज्योगामयतिवा १

युमेवनियुत्वंतꣳस्वेनभागधेयेनोप॥३॥धावतिसएवास्मिन्प्राणापानौदधात्युतयदीतासुर्भवतिजीव
त्येवप्रजापतिर्वाइदमेकआसीत्सोकामयतप्रजाःपशून्सृजेयेतिसआत्मनोवपामुदखिदत्तामग्नौ
प्रागृह्णात्ततोजस्तूपरःसमभवत्तꣳस्वायैदेवतायांआलभतततोवैसप्रजाःपशूनसृजतयःप्रजाका
मः॥४॥पशुकामस्स्यात्सएतंप्राजापत्यमजंतूपरमालभेतप्रजापतिमेवस्वेनभागधेयेनोपधावति
सएवास्मैप्रजांपशून्प्रजनयतियच्छ्मश्रुणस्तत्पुरुषाणाꣳरूपंयत्तूपरस्तदश्वानांयदन्यतोदंतद्गवांयदव्या
इवशफास्तदवीनांयदजस्तदजानामेतावंतोवैग्राम्याःपशवस्तान्॥५॥रूपेणैवावरुंधेसोमापौष्णं
चैत्रमालभेतपशुकामोद्वौवाअजायैस्तनौनानेवद्वावभिजायेतेऊर्जंपुष्टिंतृतीयःसोमापूषणावेव
स्वेनभागधेयेनोपधावतितावेवास्मैपशून्प्रजनयतःसोमोवैरेतोधाःपूषापशूनांप्रजनयितासोम
एवास्मैरेतोदधातिपूषापशून्प्रजनयत्यौदुंबरोयूपोभवत्यूर्ग्वाउदुंबरऊर्क्पशवऊर्जैवास्माऊर्जंपशू

सं॰द्विं
२

नवरुंधे॥६॥अग्नेदाह्वायुर्भवत्येवप्रजायाआमयतिवायुमेवनियुत्वंतꣳस्वेनभागधेयेनोपप्रजाकाम
स्तांन्यूपस्त्वयोदन्नाग्व॥१॥ ॥प्रजापतिःप्रजाअसृजततताअस्मात्सृष्टाःपराचीरायंतावरुणमगच्छंता
अन्वैत्ताःपुनरयाचततताअस्मैनपुनरददात्सोब्रवीद्वरंवृणीष्वाथमेपुनर्देहीतितासांवरमालभततस
कृष्णएकशितिपादभवद्योवरुणगृहीतःस्यात्सएतंवारुणंकृष्णमेकशितिपादमालभेतवरुणं॥१॥
एवस्वेनभागधेयेनोपधावतिसएवैनंवरुणपाशान्मुंचतिकृष्णएकशितिपाद्भवतिवारुणाह्येषदेव
तयासमृध्यैसुवर्भानुरासुरःसूर्यंतमसाविध्यत्तस्मैदेवाःप्रायश्चित्तिमैच्छंतस्ययत्प्रथमंतमोपा
घ्नंत्साकृष्णाविरभवद्यद्द्वितीयꣳसाफाल्गुनीयत्तृतीयꣳसाबलक्षीयदध्यस्थादपाकृंतंन्त्साविर्वशा
॥२॥समभवत्तेदेवाअब्रुवंदेवपशुर्वाअयꣳसमभूत्कस्माइममालप्स्यामहइत्यथवैतर्ह्यल्पापृथि
व्यासीदजाताओषधयस्तामविंवशामादित्येभ्यःकामायालभंततततोवाअप्रथतपृथिव्यजायंतौ

राम
२

षधयोयः कामयेतप्रथेयपशुभिः प्रप्रजयाजायेयेतिस एतामदिंवशामादित्येभ्यः कामाय॥ ३॥ आलभे
तादित्यानेवकामꣳस्वेनभागधेयेनोपधावतितएवैनंप्रथयंतिपशुभिः प्रप्रजयाजनयंत्यसावादित्यो
नव्यरोचततस्मैदेवाः प्रायश्चित्तिमैछंतस्माएतामल्हामालभंताग्नेयींकृष्णग्रीवीꣳसꣳहितामैंद्रीꣳ
श्वेतांबार्हस्पत्यांताभिरेवास्मिंरुचमदधुर्योब्रह्मवर्चसकामस्यात्तस्माएतामल्हामालभेत॥ ४॥ आ
ग्नेयींकृष्णग्रीवीꣳसꣳहितामैंद्रीꣳश्वेतांबार्हस्पत्यामेताएवदेवताःस्वेनभागधेयेनोपधावतिताएवा
स्मिन्ब्रह्मवर्चसंदधतिब्रह्मवर्चस्येवभवतिवसंताप्रातराग्नेयींकृष्णग्रीवीमालभेतग्रीष्मेमध्यंदिनेसꣳ
हितामैंद्रीꣳशरद्यपराह्णेश्वेतांबार्हस्पत्यांत्रीणिवाआदित्यस्यतेजाꣳसिवसंताप्रातर्ग्रीष्मेमध्यंदिने
शरद्यपराह्णेयावंत्येवतेजाꣳसितान्येव॥ ५॥ अवरुंधेसंवत्सरंपर्यालभ्यंतेसंवत्सरोवैब्रह्मवर्चसस्य
प्रदातासंवत्सरएवास्मैब्रह्मवर्चसंप्रयच्छतिब्रह्मवर्चस्येवभवतिगर्भिणयोभवंतींद्रियंवैगर्भइंद्रि

सं॰द्वि॰
३

यंमेवास्मिंदधतिसारस्वतींमेषीमालभेतयईश्वरोवाचोवदितोःसंन्वाचंनवदेद्वाग्वैसरस्वतीसरस्वती
मेवस्वेनभागधेयेनोपधावतिसैवास्मिन्॥६॥वाचंदधातिप्रवदितावाचोभवत्यपंनदतीभवतितस्मान्म
नुष्याःसर्वांवाचंवदंत्याग्नेयंकृष्णग्रीवमालभेतसौम्यंबभ्रुंज्योगामयाव्यग्निंवाएतस्यशरीरंगच्छति
सोमꣳसोयस्यज्योगामयत्यग्नेरेवास्यशरीरंनिष्क्रीणातिसोमाद्रसमुतयदीतासुर्भवतिजीवत्ये
वसौम्यंबभ्रुमालभेताग्नेयंकृष्णग्रीवंप्रजाकामःसोमः॥७॥वैरेतोधाअग्निःप्रजानांप्रजनयितासो
मएवास्मैरेतोदधात्यग्निःप्रजांप्रजनयतिविंदतेप्रजामाग्नेयंकृष्णग्रीवमालभेतसौम्यंबभ्रुंयोब्राह्म
णोविद्यामनूच्यनविरोचेतयदाग्नेयोभवतितेजएवास्मिंतेनदधातियत्सौम्योब्रह्मवर्चसंतेनकृष्णग्री
वआग्नेयोभवतितमएवास्मादपहंतिश्वेतोभवति॥८॥रुचमेवास्मिंदधातिबभ्रुःसौम्योभवतिब्रह्म
वर्चसमेवास्मिंत्विषिंदधात्याग्नेयंकृष्णग्रीवमालभेतसौम्यंबभ्रुमाग्नेयंकृष्णग्रीवंपुरोधायाꣳस्पर्ध

र

राम
३

मानआग्नेयोवैब्राह्मणः सौम्योराजन्योभितः सौम्यमाग्नेयौभवतस्तेजस्येवब्रह्मणोभयतोराष्ट्रंपरि
गृह्णात्येकधासमावृङ्क्तेपुरएनंदधते॥१॥ लभेतवरुणंवशैतामविंदन्नामादित्येभ्यः कामायमल्हा
आलभेततान्येवस्वेवास्मिंन्त्सोमस्यतोभवतित्रिवत्सारिङ्गाव्व॥२॥ ॥देवासुराएषुलोकेष्वस्पर्धंततस
एतंविष्णुर्वामनमपश्यत्तꣳस्वायैदेवतायाआलभततततोवैसइमान्लोकानभ्यजयद्वैष्णवंवामनमा
लभेतस्पर्धमानोविष्णुरेवभूत्वेमान्लोकानभिजयतिविषमआलभेतविषमाइवहीमेलोकाः समृ
ध्याइंद्रायमन्युमतेमनस्वतेललामंप्राशृंगमालभेतसंग्रामे॥१॥ संयत्तइंद्रियेणवैमन्युनामन
सासंग्रामंजयतींद्रमेवमन्युमंतंमनस्वंतꣳस्वेनभागधेयेनोपधावतिसएवास्मिंनिंद्रियंमन्युंम
नोदधातिजयतितꣳसंग्राममिंद्रायमरुत्वतेपृश्निसक्थमालभेतग्रामकाममिंद्रमेवमरुत्वंतꣳ
स्वेनभागधेयेनोपधावतिसएवास्मैसजातान्प्रयच्छतिग्राम्येवभवतियदृषभस्तेन॥२॥ ऐंद्रोयत्पृश्नि

सं॰द्वि॰
४

स्त्वेनमारुतः समृध्यैपश्चात्स्वित्रिसक्थोभवतिपश्चादन्ववसायिनीमेवास्मैविशंकरोतिसौम्यंबभ्रुमाल
भेतान्नकामः सौम्यंवा अन्नꣳ सोममेवस्वेनभागधेयेनोपधावतिसएवास्माअन्नंप्रयच्छत्यन्नादए
वभवतिबभ्रुर्भवत्येतद्वा अन्नस्यरूपꣳ समृध्यैसौम्यंबभ्रुमालभेतयमलं ॥३॥ राज्यायसंतꣳ राज्यंनोप
नमेत्सौम्यंवैराज्यꣳ सोममेवस्वेनभागधेयेनोपधावतिसएवास्मैराज्यंप्रयच्छत्युपैनꣳ राज्यंनमतिबभ्रु
र्भवत्येतद्वैसोमस्यरूपꣳ समृध्याइंद्रायवृत्रतुरेललामंप्राशृंगमालभेतगतश्रीः प्रतिष्ठाकामः पाप्मा
नमेववृत्रंतीर्त्वाप्रतिष्ठांगच्छतींद्रायाभिमातिघ्नेललामंप्राशृंगमा ॥४॥ लभेतयः पाप्मनागृहीतः स्या
त्पाप्मावाअभिमातिरिंद्रमेवाभिमातिहनꣳ स्वेनभागधेयेनोपधावतिसएवास्मात्पाप्मानमभिमातिं
प्रणुदतइंद्रायवज्रिणेललामंप्राशृंगमालभेतयमलꣳ राज्यायसंतꣳ राज्यंनोपनमेदिंद्रमेववज्रिणꣳ
स्वेनभागधेयेनोपधावतिसएवास्मैवज्रंप्रयच्छतिसएनंवज्रोभूत्याइंधउपैनꣳ राज्यंनमतिललामः

राम
४

प्राशृंगोभवत्येतद्वैवज्रस्यरूपꣳसमृध्यै॥५॥संग्रामेतेनालमभिमातिघ्नेललामंप्राशृंगमैनंपुंवद
शव॥३॥ ॥असावादित्योनव्यरोचततस्मैदेवाःप्रायश्चित्तिमैछंतस्माएतांदशर्षभामालभंततयैवा
स्मिंन्रुचमदधुर्योब्रह्मवर्चसकामस्यात्तस्माएतांदशर्षभामालभेतामुमेवादित्यꣳस्वेनभागधेये
नोपधावतिसएवास्मिन्ब्रह्मवर्चसंदधातिब्रह्मवर्चस्येवभवतिवसंताप्रातस्त्रींल्ललामानालभेतग्री
ष्मेमध्यंदिने॥१॥त्रींछितिपृष्ठांछरद्यपराह्णेत्रींछितिवारांत्रीणिवाआदित्यस्यतेजाꣳसिवसंता×न्ते×
प्रातर्ग्रीष्मेमध्यंदिनेशरद्यपराह्णेयावंत्येवतेजाꣳसितान्येवावरुंधेत्रयस्त्रयआलभ्यंतेभिपूर्वमेवा
स्मिंतेजोदधातिसंवत्सरंपर्यालभ्यंतेसंवत्सरोवैब्रह्मवर्चसस्यप्रदातासंवत्सरएवास्मैब्रह्मवर्चसं
प्रयच्छतिब्रह्मवर्चस्येवभवतिसंवत्सरस्यपरस्तात्प्राजापत्यंकद्रुं॥२॥आलभेतप्रजापतिःसर्वादेव
तादेवतास्वेवप्रतितिष्ठतियदिबिभीयाद्दुश्चर्माभविष्यामीतिसोमापौष्णꣳश्याममालभेतसौम्यो

वैदेवतयापुरुषःपोष्णाःपशवस्स्वयैवास्मैदेवतयापशुभिस्त्वचंकरोतिनदुश्चर्माभवतिदेवाश्चवैयमश्चास्मिं
ल्लोकेस्पर्धंतसयमोदेवानामिंद्रियंवीर्यमयुवततद्यमस्य॥३॥यमत्वंतेदेवाअमन्यंतयमोवाइदमभू
द्यद्वयꣳस्मइतितेप्रजापतिमुपाधावन्सएतौप्रजापतिरात्मनउक्षवशौनिरमिमीततेदेवावैष्णावरुणीं
वशामालभंतैंद्रमुक्षाणंतंवरुणेनैवग्राहयित्वाविष्णुनायज्ञेनप्राणुदंतैंद्रेणैवास्येंद्रियमवृंजतयो
भ्रातृव्यवान्स्यात्सस्पर्धमानोवैष्णावरुणीं॥४॥वशामालभेतैंद्रमुक्षाणंवरुणेनैवभ्रातृव्यंग्राहयित्वा
विष्णुनायज्ञेनप्रणुदतऐंद्रेणैवास्येंद्रियंवृंक्तेभवत्यात्मनापरास्यभ्रातृव्योभवतींद्रोवृत्रमहंतंवृत्रोह
तःषोडशभिर्भोगैरसिनात्तस्यवृत्रस्यशीर्षतोगावउदायंतावैदेह्योभवंतासामृषभोजघनेनूदैत्तमिं
द्रः॥५॥अचायत्सोमन्यतयोवाइममालभेतमुच्येतास्मात्पाप्मनइतिसआग्नेयंकृष्णग्रीवमालभतैं
द्रमृषभंतस्याग्निरेवस्वेनभागधेयेनोपसृतःषोडशधावृत्रस्यभोगानप्यदहदैंद्रेणेंद्रियमात्मन्नध

त्तयःपाप्मनागृहीतःस्यात्सआग्नेयंकृष्णग्रीवमालभेतैंद्रमृषभमग्निरेवास्यस्वेनभागधेयेनोपसृतः
॥६॥ पाप्मानमपिदहत्यैंद्रेणेंद्रियमात्मंधत्तेमुच्यतेपाप्मनोभवत्येवद्यावापृथिव्यांधेनुमालभेतज्यो
गपरुद्धोनयोर्हिवाएषोप्रतिष्ठितोथैषज्योगपरुद्धोद्यावापृथिवीएवस्वेनभागधेयेनोपधावतितेएवैनं
प्रतिष्ठांगमयतःप्रत्येवतिष्ठतिपर्यारिणीभवतिपर्यारीह्येतस्यराष्ट्रंयोज्योगपरुद्धःसमृध्यैवायव्यं
॥७॥ वत्समालभेतवायुर्वाअनयोर्वत्सइमेवाएतस्मैलोकाअपशुष्काविडपशुष्काथैषज्योगपरुद्धोवा
युमेवस्वेनभागधेयेनोपधावतिसएवास्माइमान्लोकान्विन्नांप्रदापयतिप्रास्माइमेलोकास्नुवंति
भुंजत्येनंविडुपतिष्ठते॥८॥ ॥मध्यंदिनेकंडूयमस्यस्पर्धमानोवैश्लावरुपींतमिंद्रोस्यस्वेनभागधे
येनोपसृतोवायव्यंद्विचत्वारिंशच्च॥९॥ ॥इंद्रोवलस्यबिलमपौर्णोत्सयउत्तमःपशुरासीत्तंपृष्ठं
प्रतिसंगृह्योदखिदत्तंसहस्रंपशवोनूदायन्सउन्नतोभवद्यःपशुकामःस्यात्सएतमैंद्रमुन्नतमाल

सं॰द्वि॰
६

भेतेंद्रमेवस्वेनभागधेयेनोपधावतिसएवास्मैपशून्प्रयच्छतिपशुमानेवभवत्युन्नतः॥१॥भवतिसाह
स्रीवाएषालक्ष्मीयदुन्नतोलक्ष्म्यैवपशूनवरुंधेयदासहस्रंपशून्प्राप्नुयादथवैष्णवंवामनमालभेत
तस्मिन्वैतत्सहस्रमध्यतिष्ठत्तस्मादेषवामनःसमीषितःपशुभ्यएवप्रजातेभ्यःप्रतिष्ठांदधातिकोर्ह
तिसहस्रंपशून्प्राप्तुमित्याहुरहोरात्राण्येवसहस्रꣳसंपाद्यालभेतपशवः॥२॥वाअहोरात्राणिपशू
नेवप्रजातान्प्रतिष्ठांगमयत्योषधीभ्योवेहतमालभेतप्रजाकामओषधयोवाएतंप्रजायैपरिबाधंतेयो
लंप्रजायैसन्प्रजांनविंदतओषधयःखलुवाएतस्यैसूतुमपिघ्नंतियावेहद्भवत्योषधीरेवस्वेनभागधे
येनोपधावतिताएवास्मैस्वाद्योनेःप्रजांप्रजनयंतिविंदते॥३॥प्रजामापोवाओषधयोसत्पुरुषआप
एवास्माअसतःसद्ददतितस्मादाहुर्यश्चैवंवेदयश्चनापस्त्वावासतःसद्ददतीत्यैंद्रीꣳसूतवशामालभे
तभूतिकामोजातोवाएषयोलंभूत्यैसन्भूतिंनप्राप्नोतींद्रंखलुवाएषासूत्वावशाभवत्॥४॥इंद्रमेवस्वे

राम
६

न

नभागधेयेनोपधावतिसएवैनंभूतिंगमयतिभवत्येवयꣳसुत्वाव्ऋगास्यात्तमैंद्रमेवालभेतैतद्वावतदिंद्रि
यꣳसाक्षादेवेंद्रियमवरुंधऐंद्राग्नंपुरुत्सृष्टमालभेतयआतृतीयात्पुरुषात्सोमंन्नपिबेद्विच्छिन्नोवाएतस्य
सोमपीथोयोब्राह्मणःसंन्ना॥५॥तृतीयात्पुरुषात्सोमंनपिबतींद्राग्नीएवस्वेनभागधेयेनोपधावति
तावेवास्मैसोमपीथंप्रयच्छतउपैनꣳसोमपीथोनमतियदैंद्रोभवतींद्रियंवैसोमपीथइंद्रियमेवसोम
पीथमवरुंधेयदाग्नेयोभवत्याग्नेयोवैब्राह्मणस्वामेवदेवतामनुसंतनोतिपुनरुत्सृष्टोभवतिपुनरु
त्सृष्टइवह्येतस्य॥६॥सोमपीथःसमृद्ध्येब्राह्मणस्पत्यंतूपरमालभेताभिचरन्ब्रह्मणस्पतिमेवस्वे
नभागधेयेनोपधावतितस्माएवैनमावृश्चतिताजगार्तिमार्छतितूपरोभवतिक्षुरपविर्वाएषालक्ष्मी
यत्तूपरःसमृद्ध्यैस्फ्यायूपोभवतिवज्रोवैस्फ्योवज्रमेवास्मैप्रहरतिशरमयंबर्हिःशृणात्येवैनंवैभीदक
इध्मोभिनत्त्येवैनं॥७॥भवत्युन्नतःपशवोजनयंतिविंदतेभवत्संनैतस्यधमस्त्रीणिव॥५॥ ॥बार्हस्प

सं·द्विं
७

त्यꣳशितिपृष्ठमालभेतग्रामकामोयःकामयेतपृष्ठꣳसमानानाꣳस्यामितिबृहस्पतिमेवस्वेनभागधेये
नोपधावतिसएवैनंपृष्ठꣳसमानानांकरोतिग्राम्येवभवतिशितिपृष्ठोभवतिबार्हस्पत्योह्येषदेवतयासमृद्
ध्यैपौष्णꣳश्याममालभेतान्नकामोन्नंवैपूषापूषणमेवस्वेनभागधेयेनोपधावतिसएवास्मै॥१॥अन्नंप्रय
च्छत्यन्नादेभवतिश्यामोभवत्येतद्वाअन्नस्यरूपꣳसमृद्ध्यैमारुतंपृश्निमालभेतान्नकामोन्नंवैमरुतोमरुत
एवस्वेनभागधेयेनोपधावतितएवास्माअन्नंप्रयच्छत्यन्नादएवभवतिपृश्निर्भवत्येतद्वाअन्नस्यरूपꣳ
समृद्ध्याऐंद्रमरुणमालभेतेंद्रियकामइंद्रमेव॥२॥स्वेनभागधेयेनोपधावतिसएवास्मिन्निंद्रियंदधा
तींद्रियाव्येवभवत्यरुणोभ्रूमान्भवत्येतद्वाइंद्रस्यरूपꣳसमृद्ध्यैसावित्रमुपध्वस्तमालभेतसनिका
मःसवितावैप्रसवानामीशेसवितारमेवस्वेनभागधेयेनोपधावतिसएवास्मैसनिंप्रसुवतिदानका
माअस्मैप्रजाभवंत्युपध्वस्तोभवतिसावित्रोह्येषः॥३॥देवतयासमृद्ध्यैवैश्वदेवंबहुरूपमालभेता

एव

राम
७

न्नकामोवैश्वदेवंवाअन्नंविश्वानेवदेवान्त्स्वेनभागधेयेनोपधावतितएवास्माअन्नंप्रयछंत्यन्नादएव
भवतिबहुरूपोभवतिबहुरूपꣳह्यन्नꣳसमृध्यैवैश्वदेवंबहुरूपमालभेतग्रामकामोवैश्वदेवावैसजा
ताविश्वानेवदेवान्त्स्वेनभागधेयेनोपधावतितएवास्मै॥४॥सजातान्प्रयछंतिग्राम्येवभवतिबहुरू
पोभवतिबहुदेवत्योह्येषसमृध्यैप्राजापत्यंतूपरमालभेतयस्यानाज्ञातमिवज्योगामयेत्प्राजाप
त्योवैपुरुषःप्रजापतिःखलुवैतस्यवेदयस्यानाज्ञातमिवज्योगामयतिप्रजापतिमेवस्वेनभागधेयेनो
पधावतिसएवैनंतस्मात्स्रामान्मुंचतितूपरोभवतिप्राजापत्योह्येषदेवतयासमृध्यै॥५॥अस्मादंद्रुमे
वैषसजाताविश्वानेवदेवान्त्स्वेनभागधेयेनोपधावतितएवास्मैप्राजापत्योह्रित्रीणिच॥६॥ ॥वषट्का
रोवैगायत्रियैशिरोछिनत्तस्यैरसःपरापतत्तंबृहस्पतिरुपागृह्णात्साशितिपृष्ठावशाभवद्योद्वितीयः
परापतत्तंमित्रावरुणावुपागृह्णीताꣳसाद्विरूपावशाभवद्यस्तृतीयःपरापतत्तंविश्वेदेवाउपागृह्णन्त्सा

बहुरूपावशाभवद्यःश्चतुर्थःपरापतत्सपृथिवींप्राविशत्तंबृहस्पतिरभि॥१॥अगृह्णादसावेवायंभोगाये
तिसउक्षवशाःसमभवद्यल्लोहितंपरापतत्तद्रुद्रउपागृह्णात्सारौद्रीरोहिणीवशाभवद्बार्हस्पत्यांशि
तिपृष्ठामालभेतब्रह्मवर्चसकामोबृहस्पतिमेवस्वेनभागधेयेनोपधावतिसएवास्मिन्ब्रह्मवर्चसंदधा
तिब्रह्मवर्चस्येवभवतिछंदसांवाएषरसोयद्वशारसइवखलु॥२॥वैब्रह्मवर्चसंछंदसामेवरसेनरसंब्रह्म
वर्चसमवरुंधेमैत्रावरुणींद्विरूपामालभेतवृष्टिकामोमैत्रंवाअहर्वारुणीरात्रिरहोरात्राभ्यांखलुवैपर्जं
न्योवर्षतिमित्रावरुणावेवस्वेनभागधेयेनोपधावतितावेवास्माअहोरात्राभ्यांपर्जन्यंवर्षयतश्छंदसां
वाएषरसोयद्वशारसइवखलुवैवृष्टिश्छंदसामेवरसेन॥३॥रसंवृष्टिमवरुंधेमैत्रावरुणींद्विरूपामा
लभेतप्रजाकामोमैत्रंवाअहर्वारुणीरात्रिरहोरात्राभ्यांखलुवैप्रजाःप्रजायंतेमित्रावरुणावेवस्वे
नभागधेयेनोपधावतितावेवास्माअहोरात्राभ्यांप्रजांप्रजनयतश्छंदसांवाएषरसोयद्वशारसइवख

लुवैप्रजाश्छंदसामेवरसेनरसंप्रजामव ॥४॥ रुंधेवैश्वदेवींबहुरूपामालभेतान्नकामोवैश्वदेवंवाअन्नंवि
श्वानेवदेवान्त्स्वेनभागधेयेनोपधावतितएवास्माअन्नंप्रयच्छंत्यन्नादएवभवतिछंदसांवाएषरसोयद्व
शारसइवखलुवाअन्नंछंदसामेवरसेनरसमन्नमवरुंधेवैश्वदेवींबहुरूपामालभेतग्रामकामोवैश्वदे
वावै ॥५॥ सजाताविश्वानेवदेवान्त्स्वेनभागधेयेनोपधावतितएवास्मैसजातान्प्रयच्छंतिग्राम्येवभवति
छंदसांवाएषरसोयद्वशारसइवखलुवैसजाताश्छंदसामेवरसेनरसꣳसजातानवरुंधेबार्हस्पत्यमुक्ष
वशामालभेतब्रह्मवर्चसकामोबृहस्पतिमेवस्वेनभागधेयेनोपधावतिसएवास्मिन्ब्रह्मवर्चसं ॥६॥
दधातिब्रह्मवर्चस्येवभवतिवशंवाएषचरतियदुक्षावशेवखलुवैब्रह्मवर्चसंवशेनैववशंब्रह्मवर्च
समवरुंधेरौद्रीꣳरोहिणीमालभेताभिचरन्रुद्रमेवस्वेनभागधेयेनोपधावतितस्माएवैनमावृश्च
तिताजगार्तिमार्छतिरोहिणीभवतिरौद्रीह्येषादेवतयासमृद्ध्यैस्फ्योयूपोभवतिवज्रोवैस्फ्योवज्रमे

सं॰द्वि॰
१

वास्मैप्रहरतिशरमयंबर्हिःशृणात्येवैनंवैभीदकइध्मोभिनत्त्येवैनं॥७॥अग्निरवलुवष्टिश्छंदसामेवर
सेनरसंप्रजामवरुंधेविश्वेदेवावैब्रह्मवर्चसंयूपएकान्नविंःशतिस्त्रि॥७॥ ॥असावादित्योनव्यरोचतत
स्मैदेवाःप्रायश्चित्तिमैछंतस्माएताःसौरीःश्वेतांवशामालभेतयएवास्मिन्रुचमदधुर्योब्रह्मवर्चसका
मस्यात्तस्माएताःसौरीःश्वेतांवशामालभेतामुमेवादित्यः×त×स्वेनभागधेयेनोपधावतिसए
स्मिन्ब्रह्मवर्चसंदधातिब्रह्मवर्चस्येवभवतिबैल्वोयूपोभवत्यसौ॥१॥वाआदित्योयतोजायततते
बिल्वउदतिष्ठत्तस्योन्यवब्रह्मवर्चसमवरुंधेब्राह्मणस्पत्यांबभ्रुकर्णीमालभेताभिचरंत्वारुणंदशकपा
लंपुरस्तान्निर्वपेद्वरुणेनैवभ्रातृव्यंग्राहयित्वाब्रह्मणास्तृणुतेबभ्रुकर्णीभवत्येतद्वैब्रह्मणोरूपःस
मृध्येस्फ्योयूपोभवतिवज्रोवैस्फ्योवज्रमेवास्मैप्रहरतिशरमयंबर्हिःशृणाति॥२॥एवैनंवैभीदक
इध्मोभिनत्येवैनंवैष्णवंवामनमालभेतयंयज्ञोनापनमेद्विष्णुर्वैयज्ञोविष्णुमेवस्वेनभागधेयेनोपधा

वा

राम
१

वतिसएवास्मैयज्ञंप्रयच्छत्युपैनंयज्ञोनमतिवामनोभवतिवैष्णवोह्येषदेवतयासमृद्ध्यैत्वाष्ट्रंवडबमाल
भेतपशुकामस्त्वष्टावैपशूनांमिथुनानां॥३॥प्रजनयितात्वष्टारमेवस्वेनभागधेयेनोपधावतिसएवा
स्मैपशून्मिथुनान्प्रजनयतिप्रजाह्विवाएतस्मिन्पशवःप्रविष्टाअथैषपुमांत्सन्वडबःसाक्षादेवप्रजां
पशूनवरुंधेमैत्रꣳश्वेतमालभेतसंग्रामेसंयत्तेसमयकामोमित्रमेवस्वेनभागधेयेनोपधावतिसए
वैनंमित्रेणसन्नयति॥४॥विशालोभवतिव्यवसाययत्येवैनंप्राजापत्यंकृष्णमालभेतवृष्टिकामःप्र
जापतिर्वैवृष्ट्याईशेप्रजापतिमेवस्वेनभागधेयेनोपधावतिसएवास्मैपर्जन्यंवर्षयतिकृष्णोभवत्ये
तद्वैवृष्ट्यैरूपꣳरूपेणैववृष्टिमवरुंधेशबलोभवतिविद्युतमेवास्मैजनयित्वावर्षयत्यवाशृंगोभवति
वृष्टिमेवास्मैनियच्छति॥५॥असौश्रृणातिमिथुनानांनयतियच्छति॥८॥ ॥वरुणꣳसुषुवाणमन्ना
द्यन्नोपानमत्सएतांवारुणींकृष्णांवशामपश्यत्ताꣳस्वायैदेवतायाआलभतततोवैतमन्नाद्यमुपानम

सं·द्वि
१०

द्यमलमन्नाद्यायसंतमन्नाद्यंनोपनमेत्सएतांवारुणींकृष्णांवशामालभेतवरुणमेवस्वेनभागधेयेनोप
धावतिसएवास्माअन्नंप्रयच्छत्यन्नादः॥१॥एवभवतिकृष्णाभवतिवारुणीह्येषादेवतयासमृध्यैमैत्रꣳ
श्वेतमालभेतवारुणंकृष्णमपांचौषधीनांचसंधावन्नकामोमैत्रीर्वाओषधयोवारुणीरापोपांचखलु
वाओषधीनांचरसमुपजीवामोमित्रावरुणावेवस्वेनभागधेयेनोपधावतितावेवास्माअन्नंप्रयच्छतो
न्नादएवभवति॥२॥अपांचौषधीनांचसंधावालभेतउभयस्यावरुध्यैविशाखोयूपोभवतिद्वेह्येतेदेव
तेसमृध्यैमैत्रꣳश्वेतमालभेतवारुणंकृष्णंज्योगामयावीयन्मैत्रोभवतिमित्रेणैवास्मैवरुणꣳशमय
तियद्वारुणःसाक्षादेवैनंवरुणपाशान्मुंचत्युतयदीतासुर्भवतिजीवत्येवदेवावैपुष्टिंनाविंदन्॥३॥तां
मिथुनेपश्यंतस्यांनसमराधयंतावश्विनावब्रूतामावयोर्वाएषामैतस्यांवदध्वमितिसाश्विनोरेवाभ
वद्यःपुष्टिकामस्यात्सएतामाश्विनींयमींवशामालभेताश्विनावेवस्वेनभागधेयेनोपधावतितावेवा

राम्
१०

स्मिन्पुष्टिंधत्तःपुष्यतिप्रजयापशुभिः ॥ ५ ॥ अन्नादोन्नादएवभवत्यविंदंन्पंचचत्वारिꣳशच्च ॥ १० ॥ आ
श्विनंधूम्रललाममालभेतयोदुर्ब्राह्मणःसोमंपिपासेदश्विनौवैदेवानामसोमपावास्तांतौपश्चासो
मपीथंप्राप्नुतामश्विनावेतस्यदेवतायोदुर्ब्राह्मणःसोमंपिपासत्यश्विनावेवस्वेनभागधेयेनोपधा
वतितावेवास्मैसोमपीथंप्रयच्छतउपैनꣳसोमपीथोनमतियद्धूम्रोभवतिधूम्रिमाणमेवास्मादपह
तिललामः ॥ १ ॥ भवतिमुखतएवास्मिंतेजोदधातिवायव्यंगोमृगमालभेतयमजघ्निवाꣳसमभिशꣳ
सेयुरपूतावाएतंवागृच्छतियमजघ्निवाꣳसमभिशꣳसंतिनैषग्राम्यःपशुर्नारण्योयद्गोमृगोनेवैष
ग्रामेनारण्येयमजघ्निवाꣳसमभिशꣳसंतिवायुर्वैदेवानांपवित्रंवायुमेवस्वेनभागधेयेनोपधाव
तिसएव ॥ २ ॥ एनंपवयतिपरावाएतस्मैव्युच्छंतीव्युच्छतितमःपाप्मानंप्रविशतियस्याश्विनेशस्य
मानेसूर्योनाविर्भवतिसौर्यंबहुरूपमालभेतामुमेवादित्यꣳस्वेनभागधेयेनोपधावतिसएवास्मात्त

सं·द्वि·
११

मः पाप्मानमपहंतिप्रतीच्यस्मैव्युछंतीव्युछत्यपूतमः पाप्मानंहते॥३॥ ललामुः सएवषड्ढलारिंग्वा
ग्र॥१०॥ ॥ इंद्रंवोविश्वतस्परींद्रंनरोमरुतोयद्ववोदिवोयावःशर्म॥ भरेष्विंद्रंसुहवंहवामहेंहोमुचं
सुकृतंदैव्यंजनं। अग्निंमित्रंवरुणंसातयेभगंद्यावापृथिवीमरुतःस्वस्तये। ममत्तुनःपरिज्मावसर्हा
ममत्तुवातोअपांवृषण्वान्। शिशीतमिंद्रापर्वतायुवन्नःस्तन्नोविश्वेवरिवःस्यंतुदेवाः। प्रियावोनाम
॥१॥ हुवेतुराणां। आयत्तृपन्मरुतोवावशानाः। श्रियसेकंभानुभिःसंमिमिक्षिरेतेरश्मिभिःस्तऋकभिः
सुखादयः। तेवाशीमंतइष्मिणोअभीरवोविद्रेप्रियस्यमारुतस्यधाम्नः॥ अग्निःप्रथमोवसुभिर्नोअव्या
त्सोमोरुद्रेभिरभिरक्षतुत्मना। इंद्रोमरुद्भिर्ऋतुथाकृणोत्वादित्यैर्नोवरुणःसंशिशातु। सन्नोदेवोवसु
भिरग्निःसं॥२॥ सोमस्तनूभीरुद्रियाभिः। समिंद्रोमरुद्भिर्यज्ञियैःसमादित्यैर्नोवरुणोअजिज्ञिपत्। य
थादित्यावसुभिःसंबभूवुर्मरुद्भीरुद्राःसमजानताभि। एवात्रिणामन्नहृणीयमानाविश्वेदेवाःसमनसो।

राम
११

भवंतु।कुत्राच्चिद्यस्यसमृतौरण्वानरोनृषदने।अर्हंतश्चिद्यमिंधतेसंजनयंतिजंतवः।संयदिषोवनामहे
सꣳहव्यामानुषाणां।उतद्युम्नस्यशवसः॥३॥ऋतस्यरश्मिमाददे।यज्ञोदेवानांप्रत्येतिसुम्नमादित्या
सोभवतामृडयंतः।आवोर्वाचीसुमतिर्ववृत्यादꣳहोश्चिद्यावरिवोवित्तरासत्।शुचिरपःसूयवसाअद
ब्धउपक्षेतिवृद्धवयाःसुवीरः।नकिष्टंघ्नंत्यंतितोनदूराद्यआदित्यानांभवतिप्रणीतौ।धारयंतआदित्या
सोजगत्स्थादेवाविश्वस्यभुवनस्यगोपाः।दीर्घाधियोरक्षमाणाः॥४॥असुर्यमृतावानश्चयमानाऋ
णानि।तिस्रोभूमीर्धारयंत्रीꣳरुतद्यूंत्रीणिव्रताविदथेअंतरेषां।ऋतेनादित्यामहिवोमहित्वंतदर्यमन्व
रुणमित्रचारु।त्यांवुसुश्रियाꣳअवआदित्यान्याचिषामहे।सुमृडीकाꣳअभिष्टये।नदक्षिणाविचिकि
तेनसव्यानप्राचीनमादित्यानोतपश्चा।पाक्याचिद्वसवोधीर्याचित्॥५॥युष्मानीतोअभयंज्योतिरश्यां।
आदित्यानामवसानूतनेनसक्षीमहिशर्मणाशंतमेन।अनागास्त्वेअदितित्वेतुरासइमंयज्ञंदधतुश्रोषं

सं·द्वि:
१२

माणाः। इमंमेवरुणश्रुधीहवमद्याचमृडय। त्वामवस्युराचके। तत्वायामिब्रह्मणावंदमानस्तदाशा
स्तेयजमानोहविर्भिः। अहेडमानोवरुणेहबोध्युरुशꣳसमानआयुःप्रमोषीः॥ ६॥ नामाग्निः सꣳघा
वसोरक्षमाणाधीर्यांविदिकान्नपर्वाणाञ्च॥११॥ ॥ वायव्यंप्रजापतिस्त्वावरुणंदेवासुराएष्वसावादि
त्योदशर्षभमिंद्रोवलस्यबार्हस्पत्यंवषट्कारोसौसौरींवरुणमाश्विनमिंद्रंवोनरएकादश॥११॥ ॥
वायव्यमाग्नेयींकृष्णग्रीवीमसावादित्योवाअहोरात्राणिवषट्कारःप्रजनयिताध्रुवतुराणांपंचषष्टिः
॥६५॥ ॥ हरिःओम्॥ प्रजापतिःप्रजाअसृजतताःसृष्टाइंद्राग्नीअपागूहताꣳसोचायत्प्रजापतिरिं
द्राग्नीवैमेप्रजाअपाघुक्षतामितिसएतमैंद्राग्नमेकादशकपालमपश्यत्तंनिरवपत्तावस्मैप्रजाःप्रासा
धयतामिंद्राग्नीवाएतस्यप्रजामपगूहतोयोलंप्रजायैसन्प्रजांनविंदतऐंद्राग्नमेकादशकपालंनि
र्वपेत्प्रजाकामइंद्राग्नी॥१॥ एवस्वेनभागधेयेनोपधावतितावेवास्मैप्रजांप्रसाधयतोविंदतेप्रजामै

राम्
१२

ग्नमेकादशकपालंनिर्वपेत्स्पर्धमानःक्षेत्रेवासजातेषुवैंद्राग्नीएवस्वेनभागधेयेनोपधावतिताभ्या
मेवेंद्रियंवीर्यंभ्रातृव्यस्यवृंक्तेविपाप्मनाभ्रातृव्येणजयतेपवाएतस्मादिंद्रियंवीर्यंक्रामतियःसंग्राम
मुपप्रयात्यैंद्राग्नमेकादशकपालंनिः॥२॥वपेत्संग्राममुपप्रयास्यन्निंद्राग्नीएवस्वेनभागधेयेनोप
धावतितावेवास्मिन्निंद्रियंवीर्यंधत्तःसहेंद्रियेणवीर्येणोपप्रयातिजयतितꣳसंग्रामंविवाएषइंद्रिये
णवीर्येणर्ध्यतेयःसंग्रामंजयत्यैंद्राग्नमेकादशकपालंनिर्वपेत्संग्रामंजित्वेंद्राग्नीएवस्वेनभागधेये
नोपधावतितावेवास्मिन्निंद्रियंवीर्यं॥३॥धत्तोनेंद्रियेणवीर्येणव्यृध्यतेपवाएतस्मादिंद्रियंवीर्यं
क्रामतियएतिजनतामैंद्राग्नमेकादशकपालंनिर्वपेज्जनतामेष्यन्निंद्राग्नीएवस्वेनभागधेयेनो
पधावतितावेवास्मिन्निंद्रियंवीर्यंधत्तःसहेंद्रियेणवीर्येणजनतामेतिपौष्णंचरुमनुनिर्वपेत्पूषावा
इंद्रियस्यवीर्यस्यानुप्रदातापूषणमेव॥४॥स्वेनभागधेयेनोपधावतिसएवास्माइंद्रियंवीर्यमनुप्र

सं॰द्वि॰
१२

यत्तिक्षैत्रपत्यंचरुंनिर्वपेज्जनतामागत्येयंवैक्षेत्रस्यपतिरस्यामेवप्रतितिष्ठत्यैंद्राग्नमेकादशकपा
लमुपरिष्टान्निर्वपेदस्यामेवप्रतिष्ठायेंद्रियंवीर्यमुपरिष्टादात्मन्धत्ते॥५॥प्रजाकाममैंद्राग्नीउपद्रुया
त्यैंद्राग्नमेकादशकपालंनिर्वपेत्पूषणमेवैकान्नचत्वारिंशच्च॥१॥ ॥अग्नयेपथिकृतेपुरोडाशम
ष्टाकपालंनिर्वपेद्योदर्शपूर्णमासयाजीसन्नमावास्यांवापौर्णमासींवातिपादयेत्पथोवाएषोध्यप
थ्यैतियोदर्शपूर्णमासयाजीसन्नमावास्यांवापौर्णमासींवातिपादयत्यग्निमेवपथिकृतंस्वेनभागधे
येनोपधावतिसएवैनमपथात्पंथामपिनयत्यनड्वान्दक्षिणावहीह्येषसमृध्या॥पथि॥अग्नयेव्रत
पतये॥१॥पुरोडाशमष्टाकपालंनिर्वपेद्यआहिताग्निःसन्नव्रत्यमिवचरेदग्निमेवव्रतपतिंस्वेन
भागधेयेनोपधावतिसएवैनंव्रतमालंभयतिव्रत्योभवत्यग्नयेरक्षोघ्नेपुरोडाशमष्टाकपालंनिर्व
पेद्यंरक्षांसिसचेरन्नग्निमेवरक्षोहणंस्वेनभागधेयेनोपधावतिसएवास्माद्रक्षांस्यपहंति

राम
१२

निशितायांन्निर्वपेत्॥२॥निशितायाꣳहिरक्षाꣳसिप्रेरतेसंप्रेर्णान्येवैनानिहंतिपरिश्रितेयाजयेद्रक्ष
सामनंन्ववचारायरक्षोघ्नीयाज्यानुवाक्येभवतोरक्षसाꣳस्तृत्याअग्नयेरुद्रवतेपुरोडाशमष्टाकपालं
न्निर्वपेदभिचरंन्नेषावाअस्यघोरातनूर्यद्रुद्रस्तस्माएवैनमावृश्चतिताजगार्तिमार्छत्यग्नयेसुरभिम
तेपुरोडाशमष्टाकपालंनिर्वपेद्यस्यगावोवापुरुषाः॥३॥वाप्रमीयेरन्योवाबिभीयादेषावाअस्यभे
षज्यातनूर्यत्सुरभिमतीतयैवास्मैभेषजंकरोतिसुरभिमतेभवतिपूतीगंधस्यापहत्याअग्नयेक्षाम
वतेपुरोडाशमष्टाकपालंनिर्वपेत्संग्रामेसंयत्तेभागधेयेनैवैनꣳशमयित्वापरानभिनिर्दिशतिय
मवरेषांविध्यंतिजीवतिसयंपरेषांप्रसमीयतेजयतितꣳसंग्रामं॥४॥अभिवाएषएतानुच्यतियेषां
पूर्वापुराअन्वंचःप्रमीयंतेपुरुषाहुतिर्ह्यस्यप्रियतमाअग्नयेक्षामवतेपुरोडाशमष्टाकपालंनिर्वपे
द्भागधेयेनैवैनꣳशमयतिनैषांपुरायुषोपरःप्रमीयतेभिवाएषएतस्यगृहानुच्यतियस्यगृहांद

हत्यग्नयेक्षामवतेपुरोडाशमष्टाकपालंनिर्वपेद्भागधेयेनैवैनꣳशमयतिनास्यापरंगृहंदहति॥५॥
व्रतपतयेनिशितायांनिर्वपेत्पुरुषाःसंग्रामंन्लवुत्वारिव्र॥२॥ ॥अग्नयेकामायपुरोडाशमष्टाकपा
लंनिर्वपेद्यंकामोनोपनमेदग्निमेवकामꣳस्वेनभागधेयेनोपधावतिसएवैनंकामेनसमर्धयत्युपैनं
कामोनमत्यग्नयेयविष्ठायपुरोडाशमष्टाकपालंनिर्वपेत्स्पर्धमानःक्षेत्रेवासजातेषुवाग्निमेवयवि
ष्ठꣳस्वेनभागधेयेनोपधावतितेनैवेंद्रियंवीर्यंभ्रातृव्यस्य॥१॥युवतेविपाप्मनाभ्रातृव्येणजयतेग्न
येयविष्ठायपुरोडाशमष्टाकपालंनिर्वपेदभिचर्यमाणोग्निमेवयविष्ठꣳस्वेनभागधेयेनोपधावति
सएवास्माद्रक्षाꣳसियवयतिनैनमभिचरन्स्तृणुतेग्नयआयुष्मतेपुरोडाशमष्टाकपालंनिर्वपेद्यः
कामयेतसर्वमायुरियामित्यग्निमेवायुष्मंतꣳस्वेनभागधेयेनोपधावतिसएवास्मिन्न्॥२॥आयु
र्दधातिसर्वमायुरेत्यग्नयेजातवेदसेपुरोडाशमष्टाकपालंनिर्वपेद्भूतिकामोग्निमेवजातवेदसꣳस्वे

नेभागधेयेनोपधावतिसएवैनंभूतिंगमयतिभवत्येवाग्नयेरुक्मतेपुरोडाशमष्टाकपालंनिर्वपेद्रु
क्कामोग्निमेवरुक्मंतꣳस्वेनभागधेयेनोपधावतिसएवास्मिन्रुचंदधातिरोचतएवाग्नयेतेजस्वते
पुरोडाशं॥३॥अष्टाकपालंनिर्वपेत्तेजस्कामोग्निमेवतेजस्वंतꣳस्वेनभागधेयेनोपधावतिसएवा
स्मिंतेजोदधातितेजस्व्येवभवत्यग्नयेसाहंत्यायपुरोडाशमष्टाकपालंनिर्वपेत्सीक्षमाणोग्निमे
वसाहंत्यꣳस्वेनभागधेयेनोपधावतितेनैवसहतेयꣳसीक्षते॥४॥भ्रातृव्यस्यास्मिंतेजस्वतेपुरोडा
शमष्टाविꣳशश्च॥३॥ ॥अग्नयेन्नवतेपुरोडाशमष्टाकपालंनिर्वपेद्यःकामयेतान्नवान्त्स्यामित्य
ग्निमेवान्नवंतꣳस्वेनभागधेयेनोपधावतिसएवैनमन्नवंतंकरोत्यन्नवानेवभवत्यग्नयेन्नादायपु
रोडाशमष्टाकपालंनिर्वपेद्यःकामयेतान्नादस्यामित्यग्निमेवान्नादꣳस्वेनभागधेयेनोपधावति
सएवैनमन्नादंकरोत्यन्नादः॥१॥एवभवत्यग्नयेन्नपतयेपुरोडाशमष्टाकपालंनिर्वपेद्यःकामये

सं॰द्वि॰
१५

तान्नपतिः स्यामित्यग्निमेवान्नपतिꣳस्वेनभागधेयेनोपधावतिसएवैनमन्नपतिंकरोत्यन्नपतिरेवभव
त्यग्नयेपवमानायपुरोडाशमष्टाकपालंनिर्वपेदग्नयेपावकायाग्नयेशुचयेज्योगामयावीयदग्नयेप
वमानायनिर्वपतिप्राणमेवास्मिंतेनदधातियदग्नये॥२॥पावकायवाचमेवास्मिंतेनदधातियदग्नये
शुचयआयुरेवास्मिंतेनदधात्युतयदीतासुर्भवतिजीवत्येवैतामेवनिर्वपेच्चक्षुष्कामोयदग्नयेपवमा
नायनिर्वपतिप्राणमेवास्मिंतेनदधातियदग्नयेपावकायवाचमेवास्मिंतेनदधातियदग्नयेशुचयेच
क्षुरेवास्मिंतेनदधाति॥३॥उतयद्यंधोभवतिप्रैवपश्यत्यग्नयेपुत्रवतेपुरोडाशमष्टाकपालंनिर्वपे
दिंद्रायपुत्रिणेपुरोडाशमेकादशकपालंप्रजाकामोग्निरेवास्मैप्रजांप्रजनयतिवृद्धामिंद्रःप्रयच्छत्य
ग्नयेरसवतेजक्षीरेचरुंनिर्वपेद्यःकामयेतरसवान्त्स्यामित्यग्निमेवरसवन्तꣳस्वेनभागधेयेनोपधा
वतिसएवैनꣳरसवंतंकरोति॥४॥रसवानेवभवत्यजक्षीरेभवत्याग्नेयीवाएषायदजासाक्षादेवरस

राम
१५

मवरुंधेग्नयेवसुमतेपुरोडाशमष्टाकपालंनिर्वपेद्यःकामयेतवसुमान्त्स्यामित्यग्निमेववसुमंतꣳस्वेन
भागधेयेनोपधावतिसऽवैनंवसुमंतंकरोतिवसुमानेवभवत्यग्नयेवाजसृतेपुरोडाशमष्टाकपा
लंनिर्वपेत्संग्रामेसंयत्तेवाजं॥५॥वाएषसिसीर्षतियःसंग्रामंजिगीषत्यग्निःखलुवैदेवानांवाजसृ
दग्निमेववाजसृतꣳस्वेनभागधेयेनोपधावतिधावतिवाजꣳहंतिवृत्रंजयतितꣳसंग्राममथोअग्नि
रिवनप्रतिधृषेभवत्यग्नयेग्निवतेपुरोडाशमष्टाकपालंनिर्वपेद्यस्याग्नावग्निमभ्युद्धरेयुर्निर्दिष्टभा
गोवाएतयोरन्योनिर्दिष्टभागोन्यस्तौसंभवंतौयजमानं॥६॥अभिसंभवतःसईश्वरआर्तिमार्तोर्य
दग्नयेग्निवतेनिर्वपतिभागधेयेनैवैनौशमयतिनार्तिमार्छतियजमानोग्नयेज्योतिष्मतेपुरोडाशम
ष्टाकपालंनिर्वपेद्यस्याग्निरुद्धृतोहुतेग्निहोत्रउद्वायेदपरआदीप्यानूद्धृत्यइत्याहुस्तत्तथानकार्यं
यद्भागधेयमभिपूर्वउद्ध्रियतेकिमपरोभ्युत्॥७॥द्ध्रियेतेतितान्येवावक्षाणानिसंनिधायमंथेदितःप्र

सं·द्विं
१६

थुमंजन्तेअग्निः स्वाध्योनिरधिजातवेदाः । सगायत्रियात्रिष्टुभाजगत्यादेवेभ्योहव्यंवहतुप्रजानंनिति
छंदोभिरेवैनꣳ स्वाद्योनेः प्रजनयत्येषवावसोग्निरित्याहुर्ज्योतिस्त्वाअस्यपरापतितमितियदग्नयेज्यो
तिष्मतेनिर्वपतियदेवास्यज्योतिः परापतितंतदेवावरुंधे ॥ ८ ॥ करोत्यंन्नादोदधातियदग्नयेस्तुवयेव
क्षुरेवास्मिंतेनदधातिकरोतिवाजंयजमानमुदेवास्यषड्द्व ॥ ४ ॥ ॥ वैश्वानरंद्वादशकपालंनिर्वपेद्वा
रुणंचरुंदधिक्राव्णेचरुमभिशस्यमानोयद्वैश्वानरोद्वादशकपालोभवतिसंवत्सरोवाअग्निर्वैश्वा
नरः संवत्सरेणैवैनꣳ स्वदयत्यपपापंवर्णꣳ हतेवारुणेनैवैनंवरुणपाशान्मुंचतिदधिक्राव्णापुना
तिहिरण्यंदक्षिणापवित्रंवैहिरण्यंपुनात्येवैनमाद्यमस्यान्नंभवत्येतामेवनिर्वपेत्प्रजाकामः संव
त्सरः ॥ १ ॥ वाएतस्याशांतोयोनिंप्रजायैपशूनांनिर्दहतियोलंप्रजायैसन्प्रजांनविंदतेयद्वैश्वानरो
द्वादशकपालोभवतिसंवत्सरोवाअग्निर्वैश्वानरः संवत्सरमेवभागधेयेनशमयतिसोस्मैशांतः स्वा

राम
१६

धोनेःप्रजांप्रजनयतिवारुणेनैवैनंवरुणपाशान्मुंचतिदधिक्राव्णापुनातिहिरण्यंदक्षिणापवित्रंवै
हिरण्यंपुनात्यैवैनं॥२॥विंदतेप्रजांवैश्वानरंद्वादशकपालंनिर्वपेत्पुत्रेजातेयदष्टाकपालोभवतिगायत्रि
यैवैनंब्रह्मवर्चसेनपुनातियन्नवकपालस्त्रिवृतैवास्मिंतेजोदधातियद्दशकपालोविराजैवास्मिन्नन्नाद्यं
दधातियदेकादशकपालस्त्रिष्टुभैवास्मिन्निंद्रियंदधातियद्द्वादशकपालोजगत्यैवास्मिन्पशून्दधातिय
स्मिंजातएतामिष्टिंनिर्वपतिपूतः॥३॥एवतेजस्व्यन्नादइंद्रियावीपशुमान्भवत्यववाएषसुवर्गाल्लोका
च्छिद्यतेयोदर्शपूर्णयाजीसन्नमावास्यांवापौर्णमासींवातिपादयतिसुवर्गायहिलोकायदर्शपूर्णमासा
विज्यतेवैश्वानरंद्वा।मास×दशकपालंनिर्वपेदमावास्यांवापौर्णमासींवातिपाद्यसंवत्सरोवाअग्निर्वैश्वा
नरःसंवत्सरमेवप्रीणात्यथोसंवत्सरमेवास्माउपदधातिसुवर्गस्यलोकस्यसमष्ट्यै॥४॥अथोदेवता
एवान्वारभ्यसुवर्गंलोकमेतिवीरहावाएषदेवानांयोग्निमुद्वासयतेनवाएतस्यब्राह्मणाऋतायवःपुरा

सं॰द्वि॰
१७

न्नमस्मिंनाग्नेयमष्टाकपालंनिर्वपेद्वैश्वानरंद्वादशकपालमग्निमुद्वासयिष्यन्यदष्टाकपालोभवत्यष्टाक्ष
रागायत्रीगायत्रोऽग्निर्यावानेवाग्निस्तस्मा आतिथ्यंकरोत्यथोयथाजनंयतेवसंकरोतितादृक्॥५॥एव
श्री तद्द्वादशकपालोवैश्वानरोभवतिद्वादशमासाःसंवत्सरःसंवत्सरःखलुवाअग्नेर्योनिःस्वादेवैनंयोनेर्निर्गम
यत्याद्यमस्यान्नंभवतिवैश्वानरंद्वादशकपालंनिर्वपेन्मारुतꣳसप्तकपालंग्रामकाम आहवनीयेवैश्वान
रमधिश्रयतिगार्हपत्येमारुतंपापवस्यसस्यविधृत्यैद्वादशकपालोवैश्वानरोभवतिद्वादशमासाःसंवत्स
रःसंवत्सरेणैवास्मैसजाताꣳ४प४श्च्यावयतिमारुतोभवति॥६॥मारुतोवैदेवानांविड्देवविशेनैवास्मै
मनुष्यविशमवरुंधेसप्तकपालोभवतिसप्तगणावैमरुतोगणशएवास्मैसजातानवरुंधेनूच्यमानआ
सादयतिविशमेवास्माअनुवर्त्मानंकरोति॥७॥प्रजाकामःसंवत्सरःपुनात्येवैनंपूतःसमृध्यैतादृङ्मा
रुतोभवत्येकान्नत्रिꣳशच्च॥५॥ ॥आदित्यंचरुंनिर्वपेत्संग्राममुपप्रयास्यन्नियंवाअदितिरस्यामेवपू

राम
१७

वैप्रतितिष्ठतिवैश्वानरंद्वादशकपालंनिर्वपेदायतनंगत्वासंवत्सरोवाअग्निर्वैश्वानरःसंवत्सरःख
लुवैदेवानामायतनमेतस्माद्वाआयतनाद्देवाअसुरानजयन्यद्वैश्वानरंद्वादशकपालंनिर्वपतिदेवा
नामेवायतनेयततेजयतितंसंग्राममेतस्मिन्वाएतौमृजाते॥१॥योविद्विषाणयोरन्नमत्तिवैश्वान
रंद्वादशकपालंनिर्वपेद्विद्विषाणयोरन्नंजग्ध्वासंवत्सरोवाअग्निर्वैश्वानरःसंवत्सरःस्वदितमेवात्ति
नास्मिन्मृजातेसंवत्सरायवाएतौसममातेयौसममातेतयोर्यःपूर्वोभिद्रुह्यतितंवरुणोगृह्णातिवै
श्वानरंद्वादशकपालंनिर्वपेत्सममानयोःपूर्वोभिद्रुह्यसंवत्सरोवाअग्निर्वैश्वानरःसंवत्सरमेवाप्त्वा
निर्वरुणं॥२॥परस्तादभिद्रुह्यतिनैनंवरुणोगृह्णात्याव्यंवाएषप्रतिगृह्णातियोविंप्रतिगृह्णातिवै
श्वानरंद्वादशकपालंनिर्वपेदविंप्रतिगृह्यसंवत्सरोवाअग्निर्वैश्वानरःसंवत्सरःस्वदितामेवप्रतिगृ
ह्णातिनाव्यंप्रतिगृह्णात्यात्मनोवाएषमात्रामाप्नोतियउभयादत्प्रतिगृह्णात्यश्वंवापुरुषंवावैश्वानरं

द्वादशकपालंनिर्वपेदुभयाँत॥३॥प्रतिगृह्यसंवत्सरोवाअग्निर्वैश्वानरःसंवत्सरःस्वदितमेवप्रतिगृह्णाति
नात्मनोमात्रामामीतिवैश्वानरंद्वादशकपालंनिर्वपेत्सनिमेष्यन्त्संवत्सरोवाअग्निर्वैश्वानरोयदाखलुवै
संवत्सरंजनतायांचरत्यथसधनार्घोभवतियद्वैश्वानरंद्वादशकपालंनिर्वपतिसंवत्सरसातामेवसनिं
मभिप्रच्यवतेदानकामाअस्मैप्रजाभवन्तियोवैसंवत्सरं॥४॥प्रयुज्यनविमुञ्चत्यप्रतिष्ठानोवैसभवत्येत
मेववैश्वानरंपुनरागत्यनिर्वपेद्यमेवप्रयुङ्क्तेतंभागधेयेनविमुञ्चतिप्रतिष्ठित्यैयथारज्ज्वोत्तमांगामाजे
तांभ्रातृव्यायप्रहिणुयान्निर्ऋतिमेवास्मैप्रहिणोति॥५॥मृज्ञातेनिर्वरुणंवपेदुभयादद्योवैसंवत्सरः
षड्भिर्ग्राह्य॥६॥ ॥ऐन्द्रंचरुंनिर्वपेत्पशुकामऐन्द्रावैपशवइन्द्रमेवस्वेनभागधेयेनोपधावतिसएवास्मै
पशून्प्रयच्छतिपशुमानेवभवतिचरुर्भवतिस्वादेवास्मैयोनेःपशून्प्रजनयतीन्द्रायेन्द्रियावतेपुरोडाश
मेकादशकपालंनिर्वपेत्पशुकामइन्द्रियंवैपशवइन्द्रमेवेन्द्रियावन्तंस्वेनभागधेयेनोपधावतिसः॥१॥

एवास्मांइंद्रियंपशून्प्रयछतिपशुमानेवभवतींद्रायघर्मवतेपुरोडाशमेकादशकपालंनिर्वपेब्रह्मवर्च्चस
कामोब्रह्मवर्च्चसंवैघर्मइंद्रमेवघर्मवंतꣳस्वेनभागधेयेनोपधावतिसएवास्मिन्ब्रह्मवर्च्चसंदधातिब्र
ह्मवर्च्चस्येवभवतींद्रायार्कवतेपुरोडाशमेकादशकपालंनिर्वपेदन्नकामोर्कोवैदेवानामन्नमिंद्रमेवा
र्कवंतꣳस्वेनभागधेयेन॥२॥उपधावतिसएवास्माअन्नंप्रयछत्यन्नादएवभवतींद्रायघर्मवतेपुरोडा
शमेकादशकपालंनिर्वपेदिंद्रायेंद्रियावतइंद्रायार्कवतेभूतिकामोयदिंद्रायघर्मवतेनिर्वपतिशिरए
वास्यतेनकरोतियदिंद्रायेंद्रियावतआत्मानमेवास्यतेनकरोतियदिंद्रायार्कवतेभूतएवान्नाद्येप्रति
तिष्ठतिभवत्येवेंद्राय॥३॥अꣳहोमुचेपुरोडाशमेकादशकपालंनिर्वपेद्यःपाप्मनागृहीतःस्यात्पा
प्मावाअꣳहइंद्रमेवाꣳहोमुचꣳस्वेनभागधेयेनोपधावतिसएवैनंपाप्मनोꣳहसोमुंचतींद्रायवैमृधा
यपुरोडाशमेकादशकपालंनिर्वपेद्यंमृधोभिप्रवेपेरन्राष्ट्राणिवाभिसमीयुरिंद्रमेववैमृधꣳस्वेनभाग

सं॰द्वि॰
१९

धेयेनोपधावतिसएवास्मान्मृधः॥४॥अपहंतींद्रायत्रात्रेपुरोडाशमेकादशकपालंनिर्वपेद्बद्धोवापरि
यत्तोवेंद्रमेवत्रातारꣳस्वेनभागधेयेनोपधावतिसएवैनंत्रायतइंद्रायार्काश्वमेधवतेपुरोडाशमेकादश
कपालंनिर्वपेद्यंमहायज्ञोनोपनमेदेतेवैमहायज्ञस्यांत्येतनूयदर्काश्वमेधाविंद्रमेवार्काश्वमेधवंतꣳ
स्वेनभागधेयेनोपधावतिसएवास्माअंततोमहायज्ञंच्यावयत्युपैनंमहायज्ञोनमति॥५॥इंद्रिया
वंतꣳस्वेनभागधेयेनोपधावतिसोर्कवंतꣳस्वेनभागधेयेनैवेंद्रायास्मान्मृधोस्मैसत्तव॥७॥ ॥इंद्रा
यान्वृजवेपुरोडाशमेकादशकपालंनिर्वपेद्ग्रामकामइंद्रमेवान्वृजुꣳस्वेनभागधेयेनोपधावतिसए
वास्मैसजाताननुकान्करोतिग्राम्येवभवतींद्राण्यैचरुंनिर्वपेद्यस्यसेनासꣳशितेवस्यादिंद्राणीवैसे
नायैदेवतेंद्राणीमेवस्वेनभागधेयेनोपधावतिसैवास्यसेनाꣳसꣳश्यतिबल्बजानपि॥१॥इध्मेसंन
ह्येद्गौर्यत्राधिष्कन्नान्यमेहत्ततोबल्बजाउदतिष्ठन्गवामेवैनंन्यायमपिनीयगावेदयतींद्रायमन्युमते

राम
१९

मनस्वतेपुरोडाशमेकादशकपालंनिर्वपेत्संग्रामेसंयत्तइंद्रियेणवैमन्युनामनसासंग्रामंजयतींद्रमेव
मन्युमंतंमनस्वतꣳस्वेनभागधेयेनोपधावतिसएवास्मिन्निंद्रियंमन्युंमनोदधातिजयतितं॥२॥संग्रा
ममेतामेवनिर्वपेद्योहृतमनास्वयंपापइवस्यादेतानिहिवाएतस्मादपक्रांतान्यथैषहृतमनास्वयंपापइं
द्रमेवमन्युमंतंमनस्वंतꣳस्वेनभागधेयेनोपधावतिसएवास्मिन्निंद्रियंमैमन्युंनोदधातिनहृतमनास्व
यंपापोभवतींद्रायदात्रेपुरोडाशमेकादशकपालंनिर्वपेद्यःकामयेतदानकामामेप्रजास्युः॥३॥इतीं
द्रमेवदातारꣳस्वेनभागधेयेनोपधावतिसएवास्मैदानकामाःप्रजाःकरोतिदानकामाअस्मैप्रजाभवं
तींद्रायप्रदात्रेपुरोडाशमेकादशकपालंनिर्वपेद्यस्मैप्रत्तमिवसंन्नप्रदीयेतेंद्रमेवप्रदातारꣳस्वेनभा
गधेयेनोपधावतिसएवास्मैप्रदापयतींद्रायसुत्राम्णेपुरोडाशमेकादशकपालंनिर्वपेदपरुद्धोवा
॥४॥अपरुध्यमानोवेंद्रमेवसुत्रामाणꣳस्वेनभागधेयेनोपधावतिसएवैनंत्रायतेनपरुध्योभवतींद्रो

वैसुदृङ्देवताभिरासीत्सनव्यावृतमगच्छत्सप्रजापतिमुपाधावत्तस्मा एतमैंद्रमेकादशकपालंनिरवपत्ते
नैवास्मिन्निंद्रियमदधाच्छक्करीयाज्यानुवाक्ये अकरोद्वज्रोवैशक्करीसएनंवज्रोभूत्वाऐंध॥५॥ सो
भवत्सोबिभेद्भूतःप्रमाधक्ष्यतीतिसप्रजापतिंपुनरुपाधावत्सप्रजापतिःशक्कर्याअधिरेवतींनिरमिमी
तशांत्याअप्रदाहाययोलंश्रियैसंत्सदृङ्समानैस्यात्तस्मा एतमैंद्रमेकादशकपालंनिर्वपेदिंद्रमेव
स्वेनभागधेयेनोपधावतिसएवास्मिन्निंद्रियंदधातिरेवतीपुरोनुवाक्याभवतिशांत्याअप्रदाहायशक्क
रीयाज्यावज्रोवैशक्करीसएनंवज्रोभूत्वाइधेभवत्येव॥६॥अपितंःस्युर्वैधंभवतिचतुर्दशच॥८॥ ॥आ
ग्नावैष्णवमेकादशकपालंनिर्वपेदभिचरंत्सरस्वत्याज्यभागास्याद्बार्हस्पत्यःश्चरुर्यदाग्नावैष्णवएका
दशकपालोभवत्यग्निःसर्वादेवताविष्णुर्यज्ञोदेवताभिश्चैवैनंयज्ञेनचाभिचरतिसरस्वत्याज्यभागाभ
वतिवाग्वैसरस्वतीवाचैवैनमभिचरतिबार्हस्पत्यश्चरुर्भवतिब्रह्मवैदेवानांबृहस्पतिर्ब्रह्मणैवैनमभि

चरति॥१॥प्रतिर्वैपुरस्तादभिचरंतमभिचरतिद्वेद्वेपुरोनुवाक्येकुर्यादतिप्रयुक्त्याएतयैवयजेताभिचर्यमा
णोदेवताभिरेवदेवताःप्रतिचरतियज्ञेनयज्ञंवाचावाचंब्रह्मणाब्रह्मसदेवताश्चैवयज्ञंचमध्यतोव्यवस
र्पतितस्यनकुतश्चनोपाव्याधोभवतिनैनमभिचरन्स्तृणुतआग्नावैष्णवमेकादशकपालंनिर्वपेद्यंय
ज्ञोन॥२॥उपनमेदग्निःसर्वादेवताविष्णुर्यज्ञोग्निंचैवविष्णुंचस्वेनभागधेयेनोपधावतितावेवास्मैयज्ञं
प्रय[illegible]तउपैनंयज्ञोनमत्याग्नावैष्णवंघृतेचरुंनिर्वपेच्चक्षुष्कामोग्नेर्वैचक्षुषामनुष्याविपश्यंतियज्ञस्य
देवाअग्निंचैवविष्णुंचस्वेनभागधेयेनोपधावतितावेव॥३॥अस्मिंचक्षुर्धत्तश्चक्षुष्मानेवभवतिधेन्वै
वाएतद्रेतोयदाज्यमनडुहस्तंडुलामिथुनादेवास्मैचक्षुःप्रजनयतिघृतेभवतितेजोवैघृतंतेजश्चक्षुस्ते
जसैवास्मैतेजश्चक्षुरवरुंधइंद्रियंवैवीर्यंवृंक्तेभ्रातृव्योयजमानोयजमानस्याध्वरकल्पांप्रतिनिर्वपेद्भ्रातृ
व्येयजमानेनास्येंद्रियं॥४॥वीर्यंवृंक्तेपुरावाचःप्रवदितोर्निर्वपेद्यावत्येववाक्तामप्रोदितांभ्रातृव्यस्य

सं॰द्वि॰
२१

रंक्तेतामस्यवाचंप्रवदंतीमन्यावाचोनुप्रवदंतितांइंद्रियंवीर्यंयजमानेदधत्याग्नावैष्णवमष्टाकपालंनिर्व
पेत्प्रातःसवनस्याकालेसरस्वत्याज्यभागास्याद्बार्हस्पत्यश्चरुर्यदष्टाकपालोभवत्यष्टाक्षरागायत्रीगा
यत्रंप्रातःसवनंप्रातःसवनमेवतेनाप्नोति॥५॥आग्नावैष्णवमेकादशकपालंनिर्वपेन्माध्यंदिनस्यसवन
स्याकालेसरस्वत्याज्यभागास्याद्बार्हस्पत्यश्चरुर्यदेकादशकपालोभवत्येकादशाक्षरात्रिष्टुप्त्रैष्टुभंमा
ध्यंदिनꣳसवनंमाध्यंदिनमेवसवनंतेनाप्नोत्याग्नावैष्णवंद्वादशकपालंनिर्वपेत्तृतीयसवनस्याकाले
सरस्वत्याज्यभागास्याद्बार्हस्पत्यश्चरुर्यद्द्वादशकपालोभवतिद्वादशाक्षराजगतीजागतंतृतीयस
वनंतृतीयसवनमेवतेनाप्नोतिदेवताभिरेवदेवताः॥६॥प्रतिचरतियज्ञेनयज्ञंवाचावाचंब्रह्मणाब्रह्म
कपालैरेवछंदाꣳस्याप्नोतिपुरोडाशैःसवनानिमैत्रावरुणमेककपालंनिर्वपेद्वशायैकालेयैवासौभ्रा
तृव्यस्यवशान्वबंध्यासाएवैषैतस्यैककपालोभवतिनहिकपालैःपशुमर्हत्याप्तुं॥७॥ब्रह्मणैवेनम्

राम
२१

भिचरतिप्रज्ञोनतावेवास्यैंद्ध्रियमाणोतिदेवताःसप्तत्रिंᳪशच्च॥ ९ ॥ ॥असावादित्योनव्यरोचततस्मैदेवाः
प्रायश्चित्तिमैछंस्तस्माएतᳪंसोमारौद्रंचरुंनिरवपंतेनैवास्मिंरुचमदधुर्योब्रह्मवर्चसकामःस्यात्त
स्माएतᳪंसोमारौद्रंचरुंनिर्वपेत्सोमंचैवरुद्रंचस्वेनभागधेयेनोपधावतितावेवास्मिन्ब्रह्मवर्चसंध
त्तोब्रह्मवर्चस्येवभवतितिष्यापूर्णमासेनिर्वपेद्रुद्रः॥ १ ॥ वैतिष्यःसोमःपूर्णमासःसाक्षादेवब्रह्मव
र्चसमवरुंधेपरिश्रितेयाजयतिब्रह्मवर्चसस्यपरिगृहीत्यैश्वेतायैश्वेतवत्सायैदुग्धंमथितमाज्यंभवत्याज्यं
प्रोक्षणमाज्येनमार्जयंतेयावदेवब्रह्मवर्चसंतत्सर्वंकरोत्यतिब्रह्मवर्चसंक्रियतइत्याहुरीश्वरोदुश्चर्माभ
वितोरितिमानवीऋचौधाय्येकुर्याद्यद्वैकिंचमनुरवदत्तद्भेषजं॥ २ ॥ भेषजमेवास्मैकरोतियदिबिभीयाद्दु
श्चर्माभविष्यामीतिसोमापौष्णंचरुंनिर्वपेत्सौम्योवैदेवतयापुरुषःपौष्णाःपशवःस्वयैवास्मैदेवतयापशु
भिःस्त्वचंकरोतिनदुश्चर्माभवतिसोमारौद्रंचरुंनिर्वपेत्प्रजाकामःसोमोवैरेतोधाअग्निःप्रजानांप्रजनयि

सं॰द्वि॰
२२

तासोममेवास्मैरेतोदधात्यग्निःप्रजांप्रजनयतिविंदते॥३॥प्रजाꣳसौमारौद्रंचरुंनिर्वपेदभिचरन्सौम्योवै
देवतयापुरुषएषरुद्रोयदग्निस्स्वादेवैनंदेवतायैनिष्क्रीयरुद्रायापिदधातिताजगार्तिमार्छतिसोमारौद्रं
चरुंनिर्वपेज्ज्योगामयावीसोमंवाएतस्यरसोगच्छत्यग्निꣳशरीरंयस्यज्योगामयतिसोमादेवास्यरसंनिष्क्री
णात्यग्नेःशरीरमुतयदि॥४॥इतासुर्भवतिजीवत्येवसोमारुद्रयोर्वाएतंग्रसितꣳहोतानिष्खिदतिसईश्व
रआर्तिमार्तोरनड्वान्होत्रादेयोवह्निर्वाअनड्वान्वह्निर्होतावह्निनैववह्निमात्मानꣳस्पृणोतिसोमारौद्रं
चरुंनिर्वपेद्यःकामयेतस्वेस्माआयतनेभ्रातृव्यंजनयेयमितिवेदिंपरिगृह्यार्धमुद्धन्यादर्धंनार्धंबर्हिषः
स्स्तृणीयादर्धंनार्धमिध्मस्याभ्यादध्यादर्धंनस्वएवास्माआयतनेभ्रातृव्यंजनयति॥५॥रुद्रोभेषजंविं
दंतेयदिस्तृणीयादर्धंद्वादन्नान्व॥१०॥ ॥ऐंद्रमेकादशकपालंनिर्वपेन्मारुतꣳसप्तकपालंग्रामकामइंद्रं
चैवमरुतश्चस्वेनभागधेयेनोपधावतितएवास्मैसजातान्प्रयच्छंतिग्राम्येवभवत्याहवनीयऐंद्रमधिश्र

राम
२२

यतिगार्हपत्येमारुतंपांवैपस्युसस्युविष्टत्यैसप्तकपालोमारुतोभवतिसप्तगणावैमरुतोगणशएवास्मै
सजातानवरुंधेनूच्यमानमासादयतिविशमेव॥१॥अस्माअनुवर्त्मानंकरोत्येतामेवनिर्वपेद्यःकाम
येतक्षत्रायचविशेचसमदंदध्यामित्यैंद्रस्यावद्यन्ब्रूयादिंद्रायानुब्रूहीत्याश्राव्यब्रूयान्मरुतोयजेतिमा
रुतस्यावद्यन्ब्रूयान्मरुद्भ्योनुब्रूहीत्याश्राव्यब्रूयादिंद्रंयजेतिस्वएवैभ्योभागधेयेसमदंदधातिवितृंहा
णास्तिष्ठंत्येतामेव॥२॥निर्वपेद्यःकामयेतकल्पेरन्नितियथादेवतमवदायययथादेवतंयजेद्भागधेयेनैवै
नान्यथायथंकल्पयतिकल्पंतएवैंद्रमेकादशकपालंनिर्वपेद्वैश्वदेवंद्वादशकपालंग्रामकामइंद्रंचैववि
श्वांश्चदेवान्त्स्वेनभागधेयेनोपधावतितएवास्मैसजातान्प्रयच्छंतिग्राम्येवभवत्यैंद्रस्यावदायवैश्वदेवस्या
वद्येदैंद्रस्य॥३॥उपरिष्टादिंद्रियेणैवास्माउभयतःसजातान्परिगृह्णात्युपाधाय्यपूर्वयंवासोदक्षिणा
सजातानामुपहित्यैपृश्नियैदुग्धेप्रैयंगवंचरुंनिर्वपेन्मरुद्भ्योग्रामकामःपृश्नियैवैपयसोमरुतोजाताः

पृश्नियैप्रियंगवामारुताःखलुवैदेवतयासजातामरुतएवस्वेनभागधेयेनोपधावतितएवास्मैसजातान्प्रय
छंतिग्राम्येवभवतिप्रियवतीयाज्यानुवाक्ये॥४॥भवतःप्रियमेवैनंसमानानांकरोतिद्विपदापुरोनुवाक्या
भवतिद्विपदएवावरुंधेचतुष्पदाज्यायाःचतुष्पदएवपशूनवरुंधेदेवासुराःसंयत्ताआसंतेदेवामिथोवि
प्रियाआसंतेऽन्योन्यस्मैज्यैष्ठ्यायातिष्ठमानाश्चतुर्धाव्यक्रामंनग्निर्वसुभिःसोमोरुद्रैरिंद्रोमरुद्भिर्वरु पा
आदित्यैःसइंद्रःप्रजापतिमुपाधावत्तं॥५॥एतयासंज्ञान्यायाजयदग्नयेवसुमतेपुरोडाशमष्टाकपालंनि
रवपत्सोमायरुद्रवतेचरुमिंद्रायमरुत्वतेपुरोडाशमेकादशकपालंवरुणायादित्यवतेचरुंततोवाइंद्रदे
वाज्यैष्ठ्यायाभिसमजानतयःसमानैर्मिथोविप्रियःस्यात्तमेतयासंज्ञान्यायाजयेदग्नयेवसुमतेपुरोडाश
मष्टाकपालंनिर्वपेत्सोमायरुद्रवतेचरुमिंद्रायमरुत्वतेपुरोडाशमेकादशकपालंवरुणायादित्यवतेचरु
मिंद्रमेवैनंभूतंज्यैष्ठ्यायसमानाअभिसंज्ञानतेवसिष्ठःसमानानांभवति॥६॥वित्रामेवतिष्ठंत्येतामेवा

थेंद्रस्ययाज्यानुवाक्येतंवरुणायुवतुर्देवाव ॥११॥ ॥ हिरण्यगर्भेआपोहृयत्प्रजापते। सवेदपुत्रः पित
रं समातरं सस्रनुर्भुवत्सभुवत्पुनर्मघः। सद्यामौर्णोदंतरिक्षं ससुवः सविश्वाभुवोअभवत्सआ
भवत्। उदुत्यंचित्रं। सप्रत्नवन्नवीयसाग्नेद्युम्नेनसंयता। बृहत्ततंथभानुना। निकाव्यावेधसः शश्वत
स्कर्हस्तेदधानः ॥१॥ नर्यापुरूणि। अग्निर्भुवद्रयिपतीरयीणां सत्रावक्राणोअमृतानिविश्वा। हिरण्य
पाणिमूतयेसवितारमुपह्वये। सचेत्तादेवतापदं। वाममद्यसवितर्वाममुश्वोदिवेदिवेवाममस्मभ्यं सा
वीः। वामस्यहिक्षयस्यदेवभूरेरयाधियावामभाजस्याम। बडित्थापर्वतानांखिद्रंबिभर्षिपृथिवि। प्रया
भूमिंप्रवत्वतिमह्नाजिनोषि ॥३॥ महिनि। स्तोमासस्त्वाविचारिणिप्रतिष्टोभंत्यक्तुभिः। प्रयावाजंन
हेषंतंपेरुमस्यस्यर्जुनि। ऋदूदरेणसख्यासचेययोमानरिष्येद्धर्यश्वपीतः। अयंयः सोमोन्यधाय्यस्मे
तस्माइंद्रंप्रतिरमेम्यच्छ। आपांतमन्युस्तृपलप्रभर्माधुनिः शिमीवांछरुमां ऋजीषी। सोमोविश्वान्य

सं·द्वि
२४ तसावनानिनार्वाग्गिरिंद्रंप्रतिमानानिदेभुः॥प्र॥३॥सुवानःसोमंक्रतुसुश्चिकेतेंद्रायुब्रह्मजमदग्निरर्चन्।
वृषायंतासिशवसस्तुरस्यांतर्यच्छगृणतेधर्त्रंदृंह।सबाधस्तेमदंचशुष्मयंचब्रह्मनरोब्रह्मकृतःसपर्य
म न्।अर्कोवायत्तुरतेसोमचक्षास्तत्रेदिंद्रोदधतेपृत्सुतुर्यां।वषट्तेविष्णवासआकृणोमितन्मेजुषस्वशि
पिविष्टहव्यं॥४॥वर्धंतुत्वासुष्टुतयोगिरोमेयूयंपातस्वस्तिभिःसदानः।प्रतत्तेअद्यशिपिविष्टनामा
र्यःशंसामिवयुनानिविद्वान्।तंत्वागृणामितवसमतव्यान्क्षयंतमस्यरजसःपराके।किमित्तेवि
ष्णोपरिचक्ष्यंभूत्प्रयद्ववक्षेशिपिविष्टोअस्मि।मावर्पोअस्मदपगूहएतद्यदन्यरूपःसमिथेबभूथ॥५॥
अग्नेदादाशुषेरयिंवीरवंतंपरीणसं।शिशीहिनःसूनुमतः।दानोअग्नेशतिनोदाःसहस्त्रिणोदुरोन राम
वाजंश्रुत्याअपावृधि।प्राचीद्यावापृथिवीब्रह्मणाकृधिसुवर्णशुक्रमुषसोविदिद्युतुः।अग्निर्दाद्द्रवि २४
णंवीरपेशाअग्निरृषिंयःसहस्रासनोति।अग्निर्दिविहव्यमाततानाग्नेर्धामानिविभृतापुरुत्रा।मा॥६॥

नोमधीरात्[illegible]भर। घृतंनपूतंतनूररेपाःशुचिहिरण्यं।तत्तेरुक्मोनरोचतस्वधावः।उभेसुश्चंद्रसर्पिषोद
र्वीश्रीणीषआसनि।उतोनउत्पुपूर्याः।उक्थेषुशवसस्पतइषꣳस्तोतृभ्यआभर।वायोशतꣳहरीणांयुव
स्वपोष्याणां।उतवातेसहस्रिणोरथआयातुपाजसा।प्रयाभिः॥७॥यासिदाश्वाꣳसमच्छानियुद्भिर्वा
युविष्टयेदुरोणे।निनोरयिꣳसुभोजसंयुवेहनिवीरवद्गव्यमश्वियंचराधः।रेवतीर्नःसधमादइंद्रेसंतुतु
विवाजाः।क्षुमंतोयाभिर्मदेम।रेवाꣳइद्रेवतःस्तोतास्यात्त्वावतोमघोनः।प्रेदुहरिवश्रुतस्य॥८॥दधानो
जिनोषिदेमुःप्रहव्यंब्रह्मस्थमायाभिश्चत्वारिꣳशच्च॥१२॥ ॥प्रजापतिरग्नयेपथिकृतेग्नयेकामायाग्न
येन्नवतेवैश्वानरमादित्यंचरुमैंद्रंचरुमिंद्रायान्वृजवआग्नावैष्णवमसौसोमारौद्रमैंद्रमेकादशकपाल
ꣳहिरण्यगर्भोद्वादश॥१२॥ ॥प्रजापतिरग्नयेकामायाभिसंभवतोयोविद्विषाणयोरिध्मेसंनह्येदाम्ना
वैष्णवमेकादशकपालमुपरिष्टाद्यासिदाश्वाꣳसमेकसप्ततिः॥७१॥ ॥हरिःओम्॥आदित्येभ्योभुव

सं·द्वि:
२५

द्भ्यःश्चरुंनिर्वपेद्भूतिकाम आदित्यावाएतंभूत्यैप्रतिनुदंतेयोलंभूत्यैसन्भूतिंन्नप्राप्नोत्यादित्यानेवभुवद्वतः
स्वेनभागधेयेनोपधावतितएवैनंभूतिंगमयंतिभवत्येवादित्येभ्योधारयद्वद्भ्यश्चरुंनिर्वपेदपरुद्धोवापरु
ध्यमानोवादित्यावाअपरोद्धारआदित्याअवगमयितारआदित्यानेवधारयद्वतः॥१॥स्वेनभागधेयेनो
पधावतितएवैनंविशिदाध्रत्यनपरुध्योभवत्यदितेनुमन्यस्वेत्यपरुध्यमानोस्यपदमाददीतेयंवाअदि
तिरियमेवास्मैराज्यमनुमन्यतेसत्याशीरित्याहसत्यामेवाशिषंकुरुतइहमनइत्याहप्रजाएवास्मै
समनसःकरोत्युपप्रेतमरुतः॥२॥सुदानवएनाविश्पतिनाभ्यमुꣳराजानमित्याहमारुतीवैविड्ज्येष्ठो
विश्पतिर्विशैवैनꣳराष्ट्रेणसमर्धयतियःपरस्ताद्ग्राम्यवादीस्यात्तस्यगृहाद्व्रीहीनाहरेछुक्लाꣳश्चकृष्णाꣳ
श्चविचिनुयाद्येशुक्लाःस्युस्तमादित्यंचरुंनिर्वपेदादित्यावैदेवतयाविड्विशमेवावगच्छति॥३॥अवगता
स्यविडनवगतꣳराष्ट्रमित्याहुर्येकृष्णाःस्युस्तंवारुणंचरुंनिर्वपेद्वारुणंवैराष्ट्रमुभेएवविशंचराष्ट्रंचावगच्छ

राम
२५

तियद्विनावगच्छेदिदमहमादित्येभ्योभागंनिर्वपाम्यामुष्मादमुष्यैविशोवगंतोरितिनिर्वपेदादित्याएवैनं
भागधेयंप्रेप्संतोविशमव॥४॥गमयंतियदिनावगच्छेदाश्वत्थान्मयूखान्सप्तमध्यमेषायामुपहन्या
दिदमहमादित्यान्बध्नाम्यामुष्मादमुष्यैविशोवगंतोरित्यादित्याएवैनंबद्धवीराविशमवगमयंतियदिना
वगच्छेदेतमेवादित्यंचरुंनिर्वपेदिध्मेपिमयूखान्संनह्येदनपरुध्यमेवावगच्छत्याश्वत्थाभवंतिमरुतांवाए
तदोजोयदश्वत्थओजसैवविशमवगच्छतिसप्तभवंतिसप्तगणावैमरुतोगणशएवविशमवगच्छति॥५॥
धारयेद्दूतामरुतोगच्छतिविशामेवैतदध्यादन्नाव॥१॥ ॥देवावैमृत्योरबिभयुस्तेप्रजापतिमुपाधावंते
भ्यएतांप्राजापत्याꣳशतकृष्णलांन्निरवपत्तयैवेष्वमृतमदधाद्योमृत्योर्बिभीयात्तस्माएतांप्राजापत्याꣳ
शतकृष्णलांनिर्वपेत्प्रजापतिमेवस्वेनभागधेयेनोपधावतिसएवास्मिन्नायुर्दधातिसर्वमायुरेतिशत
कृष्णलाभवतिशतायुःपुरुषःशतेंद्रियआयुष्येवेंद्रिये॥१॥प्रतितिष्ठतिघृतेभवत्यायुर्वैघृतममृतꣳहि

सं·द्वि·
२६

रण्यमायुश्चैवास्माअमृतंचसमीचीदधातिचत्वारिचत्वारिकृष्णलान्यवद्यतिचतुरवत्तस्याप्त्याएकधाब्र
ह्मणउपहरत्येकधैवयजमानआयुर्दधात्यसावादित्योनव्यरोचततस्मैदेवाःप्रायश्चित्तिमैच्छंतस्माएतꣳ
सौर्यंचरुंनिरवपंतेनैवास्मिन् ॥२॥ रुचमदधुर्योब्रह्मवर्चसकामस्यात्तस्माएतꣳसौर्यंचरुंनिर्वपेदमुमेवादि
त्यꣳस्वेनभागधेयेनोपधावतिसएवास्मिन्ब्रह्मवर्चसंदधातिब्रह्मवर्चस्येवभवत्युभयतोरुक्मौभवतउभ
यतएवास्मिन्रुचंदधातिप्रयाजेप्रयाजेकृष्णलंजुहोतिदिग्भ्यएवास्मैब्रह्मवर्चसमवरुंधआग्नेयमष्टा
कपालंनिर्वपेत्सावित्रंद्वादशकपालंभूम्यै ॥३॥ चरुंयःकामयेतहिरण्यंविंदेयहिरण्यंमोपनमेदितियदा
ग्नेयोभवत्याग्नेयंवैहिरण्यंयस्यैवहिरण्यंतेनैवैनद्विंदतेसावित्रोभवतिसवितृप्रसूतएवैनद्विंदतेभूम्यै
चरुर्भवत्यस्यामेवैनद्विंदतउपैनꣳहिरण्यंनमतिविवाएषइंद्रियेणवीर्येणर्ध्यतेयोहिरण्यंविंदतएतां
॥४॥ एवनिर्वपेद्धिरण्यंवित्वानेंद्रियेणवीर्येणव्यृध्यतएतामेवनिर्वपेद्यस्यहिरण्यंनश्येद्यदाग्नेयोभ

राम
२६

वत्याग्नेयंवैहिरण्यंयस्यैवहिरण्यंतेनैवैनद्विंदतिसावित्रोभवतिसवितृप्रसूतएवैनद्विंदतिभूम्यैचरुर्भ
वत्यस्यावाएतन्नश्यतियन्नश्यत्यस्यामेवैनद्विंदतींद्रः॥५॥त्वष्टुःसोममभीषहापिबत्सविष्वङ्व्या
र्छत्सइंद्रियेणसोमपीथेनव्यार्ध्यतसयदूर्ध्वमुदवमीत्तेश्यामाकाअभवन्त्सप्रजापतिमुपाधावत्तस्माए
तंसौमेंद्रंश्यामाकंचरुंनिरवपत्तेनैवास्मिन्निंद्रियंसोमपीथमदधाद्विवाएषइंद्रियेणसोमपीथेनर्ध्य
तेयःसोमंवमितियःसोमवामीस्यात्तस्मै॥६॥एतंसौमेंद्रंश्यामाकंचरुंनिर्वपेत्सोमंचैवेंद्रंचस्वेन
भागधेयेनोपधावतितावेवास्मिन्निंद्रियंसोमपीथंधत्तोनेंद्रियेणसोमपीथेनव्यृध्यतेयत्सौम्योभव
तिसोमपीथमेवावरुंधेयदैंद्रोभवतींद्रियंवैसोमपीथइंद्रियमेवसोमपीथमवरुंधेश्यामाकोभवत्येष
वावससोमः॥७॥साक्षादेवसोमपीथमवरुंधेऽग्नयेदात्रेपुरोडाशमष्टाकपालंनिर्वपेदिंद्रायप्रदात्रेपुरो
डाशमेकादशकपालंपशुकामोऽग्निरेवास्मैपशून्प्रजनयतिवृद्धानिंद्रःप्रयच्छतिदधिमधुघृतमापोधा

नाभवंत्येतद्वैपशूनाꣳरूपꣳरूपेणैवपशूनवरुंधेपंचगृहीतंभवतिपांक्ताहिपशवोबहुरूपंभवतिबहुरूपा
हिपशवः॥८॥समृध्यैप्राजापत्यंभवतिप्राजापत्यावैपशवःप्रजापतिरेवास्मैपशून्प्रजनयत्यात्मावैपु
रुषस्यमधुयन्मध्वग्नौजुहोत्यात्मानमेवतद्यजमानोग्नौप्रदधातिपंक्तौयाज्यानुवाक्येभवतःपांक्तःपु
रुषःपांक्ताःपशवआत्मानमेवमृत्योर्निष्क्रीयपशूनवरुंधे॥९॥इंद्रियेस्मिन्भूम्याएतामिंद्रस्यात्तस्मैसो
मौबहुरूपाहिपशवएकचत्वारिꣳशच्च॥२॥ ॥देवावैसत्रमासतर्धिपरिमितंयशस्कामास्तेषाꣳसोमꣳ
राजानंयशआर्छत्सगिरिमुदैत्तमग्निरनूदैत्तावग्नीषोमौसमभवतांताविंद्रोयज्ञविभ्रष्टोनुपरैत्तावब्र
वीद्याजयतंनेतितस्माएतामिष्टिंनिरवपतामाग्नेयमष्टाकपालमैंद्रमेकादशकपालꣳसौम्यंचरुंतेनै
वास्मिंतेजः॥१॥इंद्रियंब्रह्मवर्चसमधत्तांयोयज्ञविभ्रष्टस्यात्तस्माएतामिष्टिंनिर्वपेदाग्नेयमष्टाक
पालमैंद्रमेकादशकपालꣳसौम्यंचरुंयदाग्नेयोभवतितेजएवास्मिंतेनदधातियदैंद्रोभवतींद्रियमेवा

स्मिंतेनदधातियत्सौम्योब्रह्मवर्चसंतेनाग्नेयस्यान्वसौम्यस्यैवेंद्रसमाश्लेषयेत्तेजश्चैवास्मिंन्ब्रह्मवर्च
संचसमीची॥२॥दधात्यग्नीषोमीयमेकादशकपालंनिर्वपेद्यंकामोनोपनमेदाग्नेयोवैब्राह्मणःससो
मंपिबतिस्वामेवदेवताꣳस्वेनभागधेयेनोपधावतिसैवैनंकामेनसमर्धयत्युपैनंकामोनमत्यग्नीषोमी
यमष्टाकपालंनिर्वपेद्ब्रह्मवर्चसकामोग्नीषोमावेवस्वेनभागधेयेनोपधावतितावेवास्मिन्ब्रह्मवर्चसंध
त्तोब्रह्मवर्चस्येव॥३॥भवतियदष्टाकपालस्तेनाग्नेयोयच्छ्यामाकस्तेनसौम्यःसमृध्यैसोमायवाजिने
श्यामाकंचरुंनिर्वपेद्यःक्लैब्याद्बिभीयाद्रेतोहिवाएतस्माद्वाजिनमपक्रामत्यथैषक्लैब्याद्बिभायसोममे
ववाजिनꣳस्वेनभागधेयेनोपधावतिसएवास्मिन्रेतोदधातिनक्लीबोभवतिब्राह्मणस्पत्यमेकादशा
कपालंनिर्वपेद्ग्रामकामः॥४॥ब्रह्मणस्पतिमेवस्वेन×वाजिनं×भागधेयेनोपधावतिसएवास्मैसजा
तान्प्रयच्छतिग्राम्येवभवतिगणवतीयाज्यानुवाक्येभवतःसजातैरेवैनंगणवंतंकरोत्येतामेवनिर्वपे

सं·द्वि·
२८

द्यःकामयेतब्रह्मन्विन्नौंविनाशयेयमितिमारुतीयाज्यानुवाक्येकुर्याद्ब्रह्मन्नेवविन्नौंविनाशयति॥५॥ते
जःसुमीचीब्रह्मवर्चस्येवग्रामकामस्त्रिचत्वारिंशच्च॥३॥ ॥अर्यम्णेचरुंनिर्वपेत्सुवर्गकामोसौवाआदि
त्योर्यमार्यमणमेवस्वेनभागधेयेनोपधावतिसएवैनꣳसुवर्गंलोकंगमयत्यर्यम्णेचरुंनिर्वपेद्यःकामयेतदा
नकामामेप्रजास्युरित्यसौवाआदित्योर्यमायःखलुवैददातिसोर्यमार्यमणमेवस्वेनभागधेयेनोपधा
वतिसएव॥१॥अस्मैदानकामाःप्रजाःकरोतिदानकामाअस्मैप्रजाभवन्त्यर्यम्णेचरुंनिर्वपेद्यःकामये
तस्वस्तिजनतामियामित्यसौवाआदित्योर्यमार्यमणमेवस्वेनभागधेयेनोपधावतिसएवैनंतद्गमयति
यत्रजिगमिषतीन्द्रोवैदेवानामानुजावरआसीत्सप्रजापतिमुपाधावत्तस्माएतमैन्द्रमानुषूकमेकादशक
पालंनिः॥२॥अवपत्तेनैवैनमग्रंदेवतानांपर्यणयद्बुध्नवतीअग्रवतीयाज्यानुवाक्येअकरोद्बुध्नादे
वैनमग्रंपर्यणयद्योराजन्यआनुजावरःस्यात्तस्माएतमैन्द्रमानुषूकमेकादशकपालंनिर्वपेदिन्द्रमेवस्वे

राम
२८

नभागधेयेनोपधावतिसएवैनमग्रꣳसमानानांपरिणयतिबुध्नवतीअग्रवतीयाज्यानुवाक्येभवतोबु
ध्नादेवैनमग्रं ॥३॥ परिणयत्यानुषूकोभवत्येषाह्येतस्यदेवतायआनुजावरःसमृद्ध्यैयाब्राह्मणआ
नुजावरस्यात्तस्माएतंबार्हस्पत्यमानुषूकंचरुंनिर्वपेद्बृहस्पतिमेवस्वेनभागधेयेनोपधावतिसएवैनम
ग्रꣳसमानानांपरिणयतिबुध्नवतीअग्रवतीयाज्यानुवाक्येभवतोबुध्नादेवैनमग्रंपरिणयत्यानुषूको
भवत्येषाह्येतस्यदेवतायआनुजावरःसमृद्ध्यै ॥४॥ एवनिरग्रमेतस्यबलारिव ॥४॥ ॥प्रजापतेस्त्रयस्त्रिꣳ
श ×त्सुषा× दुहितरआसंताःसोमायराज्ञेददात्तासाꣳरोहिणीमुपैत्ताईर्ष्यंतीःपुनरगच्छंताअन्वैत्ताःपु
नरयाचततोअस्मैनपुनरददात्सोऽब्रवीदृतममीष्वयथासमावच्छउपैष्याम्यथतेपुनर्दास्यामीतिसऋ
तमामीत्ताअस्मैपुनरददात्तासाꣳरोहिणीमेवोप ॥१॥ ऐत्तंयक्ष्मआर्छद्राजानंयक्ष्मआरदितितद्रा
जयक्ष्मस्यजन्मयत्पापीयानभवत्तत्पापयक्ष्मस्ययज्जायाभ्योविंदत्तज्जायेन्यस्ययएवमेतेषांयक्ष्मा

सं·द्वि·
२९

णांजन्मवेदनैनमेतेयक्ष्माविंदंतिसएताएवनमस्यन्नुपाधावत्ताअब्रुवन्वरंवृणामहैसमावच्छएवनउपा
यदितितस्माएतं॥२॥आदित्यंचरुंनिरवपत्तेनैवैनंपापात्स्रामादमुंचन्यःपापयक्ष्मगृहीतःस्यात्तस्मा
एतमादित्यंचरुंनिर्वपेदादित्यानेवस्वेनभागधेयेनोपधावतितएवैनंपापात्स्रामान्मुंचंत्यमावास्यायां
निर्वपेदमुमेवैनमाप्यायमानमन्वाप्याययतिनवोनवोभवतिजायमानइतिपुरोनुवाक्याभवत्यायुरेवा
स्मिंतयादधातियमादित्याअंꣳशुमाप्याययंतीतियाज्यैवैनमेतयाप्याययति॥३॥एवापैत्तमस्मिंत्रयो
दृशाव॥५॥ ॥प्रजापतिर्देवेभ्योन्नाद्यंव्यादिशत्सोब्रवीद्यदिमान्लोकानभ्यतिरिच्यातैतन्ममासदि
तितदिमान्लोकानभ्यत्यरिच्यतेंद्रꣳराजानमिंद्रमधिराजमिंद्रꣳस्वराजानंततोवैसइमान्लोकाꣳस्त्रे
धादुहेतत्त्रिधातोस्त्रिधातुत्वंयंकामयेतांनादःस्यादितितस्माएतंत्रिधातुंनिर्वपेदिंद्रायराज्ञेपुरोडा
शं॥१॥एकादशकपालमिंद्रायाधिराजायेंद्रायस्वराज्ञेयंवाइंद्रोराजायमिंद्रोधिराजोसाविंद्रःस्व

राम
२९

राडिमानेवलोकान्त्स्वेनभागधेयेनोपधावतित एवास्मा अन्नंप्रयछंत्यन्नाद एवभवतियथावत्सेनप्रत्तांगां
दुहएवमेवेमांल्लोकांप्रत्तान्काममन्नाद्यंदुहउत्तानेषुकपालेष्वधिश्रयत्ययातयामत्वायत्रयःपुरोडा
शाभवंतित्रयइमेलोकाएषांल्लोकानामाप्त्याउत्तरउत्तरोज्यायान्भवत्येवमिवहीमेलोकाःसमृद्ध्यैस
र्वेषामभिगमयन्नवद्यत्यछंबट्कारंव्यत्यासमन्वाहानिर्दाहाय॥२॥पुरोडाशांत्रयःषड्विंशतिश्च॥६॥
देवासुराःसंयत्ताआसंतांदेवानसुराअजयंतेदेवाःपराजिग्यानाअसुराणांवैश्यमुपायंतेभ्यइंद्रियं
वीर्यमपाक्रामत्तदिंद्रोचायत्तदन्वपाक्रामत्तदवरुधंनाशक्नोत्तदस्मादभ्यर्धोचरत्सप्रजापतिमुपाधा
वत्तमेतयासर्वपृष्ठयायाजयत्तयैवास्मिन्निंद्रियंवीर्यमदधाद्यइंद्रियकामः॥१॥वीर्यकामस्यात्तमे
तयासर्वपृष्ठयायाजयेदेताएवदेवताःस्वेनभागधेयेनोपधावतिताएवास्मिन्निंद्रियंवीर्यंदधतिय
दिंद्रायराथंतरायनिर्वपतियदेवाग्नेस्तेजस्तदेवावरुंधेयदिंद्रायबार्हतायर्यदेवेंद्रस्यतेजस्तदेवावरुं

सं·द्वि·
३०

धेयदिंद्रायवैरूपायुयदेवसवितुःस्तेजस्तत॥२॥ ॥एवावरुंधेयदिंद्रायवैराजायुयदेवधातुस्तेजःस्तदेवा
वरुंधेयदिंद्रायशाक्वरायुयदेवमरुतांतेजस्तदेवावरुंधेयदिंद्रायरैवतायुयदेवबृहस्पतेस्तेजस्तदेवावरुं
धएतावैतिस्रिवंतेजाꣳसितान्येवावरुंधउत्तानेषुकपालेष्वधिश्रयत्ययातयामत्वायद्वादशकपालःपुरोडा
न्नाः॥३॥भवतिवैश्वदेवत्वायसमंतंपर्यवद्यतिसमंतमेवेंद्रियंवीर्यंयजमानेदधातिव्यत्यासमन्वाहानि
दीहायाश्वऋषभोवृष्णिर्बस्तःसादक्षिणावृषत्वायैतयैवयजेताभिशस्यमानएताश्चेद्वाअस्यदेवताअ
न्नमदंत्यदंत्युवेवास्यमनुष्याः॥४॥इंद्रियकामःसवितुःस्तेजस्तत्पुरोडानोष्टाविꣳशात्र॥५॥ ॥रजनोवै
कौणेयःक्रतुजितंजानकिंवचक्षुर्वन्यमयात्तस्माएतामिष्टिंनिरवपदग्नयेभ्राजस्वतेपुरोडाशमष्टाकपा
लꣳसौर्यंचरुमग्नयेभ्राजस्वतेपुरोडाशमष्टाकपालंतयैवास्मिंश्चक्षुरदधाद्यःचक्षुष्कामःस्यात्तस्माए
तामिष्टिंनिर्वपेदग्नयेभ्राजस्वतेपुरोडाशमष्टाकपालꣳसौर्यंचरुमग्नयेभ्राजस्वतेपुरोडाशमष्टाकपाल

राम
३०

मग्नेर्वैचक्षुषामनुष्यावि ॥ १ ॥ पश्यंतिसूर्यस्यदेवा अग्निंचैवसूर्यंचस्वेनभागधेयेनोपधावतितावेवा
स्मिंचक्षुर्धत्तःचक्षुष्मानेवभवतियदाग्नेयोभवतःचक्षुषीएवास्मिंतत्प्रतिदधातियत्सौर्योनासिकंते
नाभितःसौर्यमाग्नेयोभवतःतस्मादभितोनासिकांचक्षुषीतस्मान्नासिकयाचक्षुषीविधृतेसमानी
योज्यानुवाक्येभवतःसमानꣳहिचक्षुःसमृध्याउदुत्यंजातवेदसꣳसप्तत्वाहरितोरथेचित्रंदेवानामुद
गादनीकमितिपिंडान्प्रयछतिचक्षुरेवास्मैप्रयछतियदेवतस्यतत् ॥ २ ॥ बृहिष्पाविꣳशतिश्च ॥ ८ ॥ ॥
ध्रुवोसिध्रुवोहꣳसजातेषुभूयासंधीरश्चेत्तावसुविध्रुवोसिध्रुवोहꣳसजातेषुभूयासमुग्रश्चेत्तावसुविध्रुवोसि
ध्रुवोहꣳसजातेषुभूयासमभिभूश्चेत्तावसुविदामनमस्यामनस्यदेवायेसजाताःकुमाराःसमनसःस्ता
नहंकामयेहृदातेमांकामयंताꣳहृदातान्मआमनसःकृधिस्वाहावैश्वदेवीꣳसांग्रहणींनिर्वपेद्ग्रामकामो
वैश्वदेवावैसजाताविश्वानेवदेवान्स्वेनभागधेयेनोपधावतितए×मन्नमसि ॥ १ ॥ आमनस्यदेवायास्त्रियः
समनसःस्ताअहंकामयेहृदानामांकामयंताꣳहृदानामआमनसःकृधिस्वाहा×वास्मैसजातान्प्र

सं·द्वि
३१

यच्छंतियाम्यैवभवतिसांग्रहणीभवतिमनोग्रहणंवैसंग्रहणंमनएवसजातानां॥२॥गृह्णातिध्रुवोसिध्रुवो
हंसजातेषुभूयासमितिपरिधीन्परिदधात्याशिषमेवैतामाशास्तेथोएतेदेवसर्वंसजातेष्वधिभवतिय
स्यैवंविदुषएतेपरिधयःपरिधीयंतआमनमस्यामनस्यदेवाइतितिस्रआहुतीर्जुहोत्येतावंतोवैसजाता
येमहांतोयेक्षुल्लकायास्त्रियःस्तानेवावरुंधेतएनमवरुद्धाउपतिष्ठंते॥३॥स्वाहामनमसिसजातानां
रुंधेपंचच॥१॥ ॥यन्नवमैत्तन्नवनीतमभवद्यदसर्पत्तत्सर्पिरभवद्यदध्रियततद्घृतमभवदश्विनोःप्राणो
सितस्यतेदत्तांययोःप्राणोसिस्वाहेंद्रस्यप्राणोसितस्यतेददातुयस्यप्राणोसिस्वाहामित्रावरुणयोःप्रा
णोसितस्यतेदत्तांययोःप्राणोसिस्वाहाविश्वेषांदेवानांप्राणोसि॥१॥तस्यतेददतुयेषांप्राणोसिस्वा
हाघृतस्यधारामम्रतस्यपंथामिंद्रेणदत्तांप्रयतांमरुद्भिः।तत्वाविष्णुःपर्यपश्यत्तत्वेडागव्यैरयत।पाव
मानेनत्वास्तोमेनगायत्रस्यवर्तन्योपांशोर्वीर्येणदेवस्त्वासवितोत्सृजतुजीवातवेजीवनस्यायैबृहद्र

राम
३१

थंतुरयोस्त्वास्तोमेनत्रिष्टुभोवर्तन्याशुक्रस्यवीर्येणदेवस्त्वासवितोत्॥२॥स्टजतुजीवातवेजिवनुस्याय।
अग्नेस्त्वामात्रयाजगत्यैवर्तन्याययुणस्यवीर्येणदेवस्त्वासवितोत्स्टजतुजीवातवेजीवनुस्यायायादुमम
ग्नुआयुषुवर्चसेकृधिप्रियꣳरेतोवरुणसोमराजन्।मातेवास्माअदितेशर्मयच्छविश्वेदेवाजरदष्टिर्य
यासत्।अग्निरायुष्मांत्सवनस्पतिभिरायुष्मांतेनत्वायुषायुष्मंतंकरोमिसोमआयुष्मान्त्सओषधी
भिर्यज्ञआयुष्मान्त्सदक्षिणाभिर्ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मद्देवाआयुष्मंतस्तेमृतेनपितरआयुष्मं
तस्तेस्वधयायुष्मंतस्तेनत्वायुषायुष्मंतंकरोमि॥३॥विश्वेषांदेवानांप्राणोसित्रिष्टुभोवर्तन्याशुक्रस्य
वीर्येणदेवस्त्वासवितोत्सोमआयुष्मान्संवविꣳशातिश्च॥१०॥ ॥अग्निर्वाएतस्यशरीरंगच्छतिसोमꣳ
रसोवरुणएनंवरुणपाशेनगृह्णातिसरस्वतींवागग्नाविन्द्रआत्मायस्यज्योगामयतियोज्योगामया
वीस्याद्योवाकामयेतसर्वमायुरियामितितस्माएतामिष्टिंनिर्वपेदाग्नेयमष्टाकपालꣳसौम्यंचरुं

सं·द्वि
३२

वारुणंदशकपालं॰सारस्वतंचरुमाग्नावैष्णवमेकादशकपालमग्नेरेवास्यशरीरंनिष्क्रीणातिसोमाद्रसं॥१॥
वारुणेनैवैनंवरुणपाशान्मुञ्चतिसारस्वतेनवाचंदधात्यग्निः सर्वादेवताविष्णुर्यज्ञोदेवताभिश्चैवैनंयज्ञे
नचभिषज्यत्युतयदीतासुर्भवतिजीवत्येवयन्नवमैत्तन्नवनीतमभवदित्याज्यमवेक्षतेरूपमेवास्यैतन्म
हिमानंव्याचष्टेश्विनोः प्राणोसीत्याहाश्विनौवैदेवानां॥२॥भिषजौताभ्यामेवास्मैभेषजंकरोतींद्रस्यप्रा
णोसीत्याहेंद्रियमेवास्मिन्नेतेनदधातिमित्रावरुणयोः प्राणोसीत्याहप्राणापानावेवास्मिन्नेतेनदधा
तिविश्वेषांदेवानांप्राणोसीत्याहवीर्यमेवास्मिन्नेतेनदधातिघृतस्यधारामम्मृतस्यपंथामित्याहय
थायजुरेवैतत्पावमानेनलास्तोमेनेति॥३॥आहप्राणमेवास्मिन्नेतेनदधातिबृहद्रथंतरयोस्त्वास्तो
मेनेत्याहौजएवास्मिन्नेतेनदधात्यग्नेस्त्वामात्रयेत्याहात्मानमेवास्मिन्नेतेनदधात्यृत्विजः पर्याहुर्या
वंतएवर्त्विजस्तएनंभिषज्यंतिब्रह्मणोहस्तमन्वारभ्यपर्याहुरेकधैवयजमानआयुर्दधतियदेवतस्य

राम
३२

तद्धिरण्यात् ॥४॥ घृतंनिष्पिबत्यायुर्वैघृतममृतꣳहिरण्यममृतादेवायुर्निष्पिबतिशतमानंभवतिश
तायुःपुरुषःशतेंद्रियआयुष्येवेंद्रियेप्रतितिष्ठत्यथोखलुयावतीःसमाऽशेष्यन्मन्येततावन्मानꣳ
स्यात्समृध्याइमम्मग्नआयुषेवर्चसेकृधीत्याहायुरेवास्मिन्वर्चोदधातिविश्वैर्देवैर्जरदष्टिर्यथासदि
त्याहजरदष्टिमेवैनंकरोत्यग्निरायुष्मानितिहस्तंगृह्णात्येतेवैदेवाआयुष्मंतस्तएवास्मिन्नायुर्दधा
तिसर्वमायुरेति ॥५॥ रसंदेवानाꣳसोमनेत्रिहिरण्यादसदितिद्वाविꣳशतिश्च ॥११॥ ॥प्रजापतिर्व
रुणायाश्वमनयत्सस्वांदेवतामार्छत्सपर्यदीर्यतसएतंवारुणंचतुष्कपालमपश्यत्तन्निरवपत्ततोवै
सवरुणपाशादमुच्यतवरुणोवाएतंगृह्णातियोऽश्वंप्रतिगृह्णातियावतोऽश्वान्प्रतिगृह्णीयात्तावतो
वारुणांश्चतुष्कपालान्निर्वपेद्वरुणमेवस्वेनभागधेयेनोपधावतिसएवैनंवरुणपाशान्मुंचति ॥१॥
चतुष्कपालाभवंतिचतुष्पाद्ध्यश्वःसमृध्याएकमतिरिक्तंन्निर्वपेद्यमेवप्रतिग्राहीभवतियंवानाध्ये

तितस्मादेववरुणपाशान्मुच्यतेयद्यपरंप्रतिग्राहीस्यात्सौर्यमेककपालमनुनिर्वपेदमुमेवादित्यमुद्वारं
कुरुतेऽवभृथमेवैत्याप्सुवैवरुणःसाक्षादेववरुणमवयजतेपोनप्त्रीयंचरुंपुनरेत्यनिर्वपेदप्सुयोनिर्वा
अश्वःस्वामेवैनंयोनिंगमयतिसएनꣳशान्तउपतिष्ठते॥२॥मुंचतिवरुꣳसप्तदशच॥१२॥ ॥यावामिं
द्रावरुणायतव्यातनूस्तयेममꣳहसोमुंचतंयावामिंद्रावरुणासहस्यारक्षस्यातेजस्यातनूस्तयेममꣳ
हसोमुंचतंयोवामिंद्रावरुणावग्नौस्रामस्तंवामेतेनावयजेयोवामिंद्रावरुणाद्विपात्सुपशुषुचतुष्पा
त्सुगोष्ठेगृहेष्वप्स्वोषधीषुवनस्पतिषुस्रामस्तंवामेतेनावयजइंद्रोवाएतस्य॥१॥इंद्रियेणापक्रामति
वरुणएनंवरुणपाशेनगृह्णातियःपाप्मनागृहीतोभवतियःपाप्मनागृहीतःस्यात्तस्माएतामैंद्राव
रुणींपयस्यांनिर्वपेदिंद्रएवास्मिन्निंद्रियंदधातिवरुणएनंवरुणपाशान्मुंचतिपयस्याभवतियोपे
हिवाएतस्मादपक्रामत्यथैषपाप्मनागृहीतोयत्पयस्याभवतिपयएवास्मिंतयादधातिपयस्या

राम
३२

यां॥२॥पुरोडाशमवद्यत्यात्मन्वंतमेवैनंकरोत्यथोआयतनवंतमेवचतुर्धाव्यूहतिदिक्ष्वेवप्रतिति
ष्ठतिपुनःसमूहतिदिग्भ्यएवास्मैभेषजंकरोतिसमूह्यावद्यतियथाविद्धंनिष्कृंततितादृगेवतद्यो
वामिंद्रावरुणावग्नौस्रामस्तंवामेतेनावयजइत्याहदुरिष्ट्याएवैनंपातियोवामिंद्रावरुणाद्विपात्सुप
शुषुस्रामस्तंवामेतेनावयजइत्याहैतावतीर्वाआपओषधयोवनस्पतयःप्रजाःपशवउपजीवनीया
स्ताएवास्मैवरुणपाशान्मुंचति॥३॥एतस्यपयस्यायांपातिषड्विꣳशतिश्च॥१३॥ ॥सप्रत्नवन्निका
व्येंद्रंवोविश्वतस्परीद्रंनरः।त्वंनःसोमविश्वतोरक्षाराजन्नघायतः।नरिष्येत्त्वावतःसखा।यातेधामानि
दिवियापृथिव्यांयापर्वतेष्वोषधीष्वप्सु।तेभिर्नोविश्वैःसुमनाअहेडन्राजन्त्सोमप्रतिहव्यागृभाय।अ
ग्नीषोमासवेदसासहूतीवनतंगिरः।संदेवत्राबभूवथुः।युवं॥१॥एतानिदिविरोचनान्यग्निश्चसोमस
क्रतूअधत्तं।युवꣳसिंधूꣳरभिशस्तेरवद्यादग्नीषोमावमुंचतंगृभीतान्।अग्नीषोमाविमꣳसुमेशृणु

सं·द्वि·
३४
ग॥

तंवृषणाहवं।प्रतिस्रुत्कानिहर्यतंभवतंदाशुषेमयः।आन्यंदिवोमातरिश्वाजभारामथ्नादन्यंपरिश्येनो
अद्रेः।अग्नीषोमाब्रह्मणावावृधानोरुंयज्ञायचक्रथुरुलोकं।अग्नीषोमाहविषःप्रस्थितस्यवीतं॥२॥हर्य
तंवृषणाजुषेथां।सुशर्माणास्ववसाहिभूतमथाधत्तंयजमानायशंयोः।आप्यायस्वसमेतुते।गणानां
त्वागणपतिंहवामहेकविंकवीनामुपमश्रवस्तमं।ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनःशृण्वन्नूति
भिःसीदसादनं।सइज्जनेनसविशासजन्मनासपुत्रैर्वाजंभरतेधनानृभिः।देवानांयःपितरमाविवा
सति॥३॥श्रद्धामनाहविषाब्रह्मणस्पतिं।ससुष्टुभासऋक्वतागणेनवलंरुरोजफलिगंरवेण।
बृहस्पतिरुस्रियाहव्यसूदःकनिक्रदद्वावशतीरुदाजत्।मरुतोयद्वोदिवोयावःशर्म।अर्यमायातिवृष
भस्तुविष्मांदातावसूनांपुरुहूतोअर्हन्।सहस्राक्षोगोत्रभिद्वज्रबाहुरस्मासुदेवोद्रविणंदधातु।येतेर्य
मन्बहवोदेवयानाःपंथानः॥४॥राजंदिवआचरंतितेभिर्नोदेवमहिशर्मयच्छशन्नएधिद्विपदेशंचतुष्प

राम
३४

दे॰ बुध्नादग्रमंगिरोभिर्गृणानोविपर्वतस्यदृꣳहितान्यैरत।रुजद्रोधाꣳसिकृत्रिमाण्येषाꣳसोमस्यताम
दृ॰इंद्रश्चकार।बुध्नाद्येणविमिमायमानैर्वज्रेणखान्यतृणन्नदीनां।वृथासृजत्पथिभिर्दीर्घयाथैःसो
मस्यतामदृ॰इंद्रश्चकार॥५॥प्रयोजज्ञेविद्वाꣳअस्यबंधुंविश्वानिदेवोजनिमाविवक्ति।ब्रह्मब्रह्मण
उज्जभारमध्यान्नीचादुच्चास्वधयाभिप्रतस्थौ।महान्महोअस्तभायद्विजातोद्याꣳसद्मपार्थिवंचरजः।
सबुध्नादाष्टजनुषाभ्यग्रंबृहस्पतिर्देवतायस्यसम्राट्।बुध्नाद्योअग्रमभ्यर्त्योजसाबृहस्पतिमाविवा
संतिदेवाः।भिनद्वलंपुरोदर्दरीतिकनिक्रदत्सुवरपोजिगाय॥६॥युवंवीतमाविवासतिपंथानोदीर्घ
याथैःसोमस्यतामदृ॰वि॰इंद्रश्चकारादेवानवच॥१४॥ ॥आदित्येभ्योदेवावैमृत्योर्देवावैसत्रमासत।
यंप्रजापतेस्त्रयस्त्रिꣳशद्राःप्रजापतिर्देवेभ्योन्नाद्यंदेवासुरास्तान्प्रजनोध्रुवोसियन्नवुमेदग्निंवैश्व
जापतिर्वरुणायप्रयावाꣳसप्तलवच्चतुर्दश॥१४॥ ॥आदित्येभ्यस्त्वष्टुरस्मैदानकामाएवावरुंधेग्निं

सं· द्वि·
३५

वैसप्रत्नवत्षट्पैवाज्ञात्॥५६॥ ॥हरिःओम्॥देवामनुष्याःपितरःस्तेन्यतआसन्नसुरारक्षाꣳसिपिशाचास्ते
न्यतस्तेषांदेवानामुतयदल्पंलोहितमकुर्वंतद्रक्षाꣳसिरात्रीभिरसुभ्नंतांत्सुब्धान्मृतानभिव्यौछंतेदेवा
अविदुर्योवैनोयंम्रियतेरक्षाꣳसिवाइमंघ्नंतीतितेरक्षाꣳस्युपामंत्रयंततान्यब्रुवन्वरंवृणामहैयत्॥१॥
असुरांजयामतन्नःसहासदितिततोवैदेवाअसुरानजयंतेसुरांजित्वारक्षाꣳस्यपानुदंततानिरक्षाꣳस्य
नृतमकर्तेतिसमंतंदेवान्पर्यविन्वंतेदेवाअग्नावनाथंततेग्नयेप्रवतेपुरोडाशमष्टाकपालंनिरवपन्नग्न
येविबाधवतेग्नयेप्रतीकवतेयदग्नयेप्रवतेनिरवपन्यान्येवपुरस्ताद्रक्षाꣳसि॥२॥आसंतानितेनप्राणु
दंतयदग्नयेविबाधवतेयान्येवाभितोरक्षाꣳस्यासंतानितेनव्यबाधंतयदग्नयेप्रतीकवतेयान्येवपश्चा
द्रक्षाꣳस्यासंतानितेनापानुदंततततोदेवाअभवन्परासुरायोभ्रातृव्यवान्त्स्यात्सस्पर्धमानएतयेष्ट्या
यजेताग्नयेप्रवतेपुरोडाशमष्टाकपालंनिर्वपेदग्नयेविबाधवते॥३॥अग्नयेप्रतीकवतेयदग्नयेप्रवते

ज

राम
३५

निर्वपतियएवास्माच्छ्रेयान्भ्रातृव्यस्तंतेनप्रणुदतेयदग्नयेविबाधवतेयएवैनेनसदृङ्तंतेनविबाधतेयद
ग्नयेप्रतीकवतेयएवास्मात्पापीयांतंतेनापनुदतेप्रश्रेयाꣳसंभ्रातृव्यंनुदतेतिसदृशंक्रामतिनैनंपापी
यानाप्नोतियएवंविद्वानेतयेष्ट्यायजते॥४॥वृणामुद्दृयसुरस्ताद्रक्षाꣳसिवपेदग्नयेविबाधवतएवंव्र
तारित्र॥२॥ ॥देवासुराःसंयत्ताआसंतेदेवाअब्रुवंन्यानोवीर्यावत्तमस्तमनुसमारभामहाइतितइंद्र
मब्रुवंस्त्वंवैनोवीर्यावत्तमोसित्वामनुसमारभामहाइतिसोब्रवीत्तिस्रोमइमास्तनुवोवीर्यावतीस्ताःप्री
णीताथासुरानभिभविष्यथेतितावैब्रूहीत्यब्रुवंनियमꣳहोमुगियंविमृधेयमिंद्रियावती॥१॥इत्यब्र
वीत्तइंद्रायाꣳहोमुचेपुरोडाशमेकादशकपालंनिरवपन्निंद्रायवैमृधायेंद्रायेंद्रियावतेयदिंद्रायाꣳहो
मुचेनिरवपन्नꣳहसएवतेनामुच्यंतयदिंद्रायवैमृधायमृधएवतेनापाघ्नतयदिंद्रायेंद्रियावतइंद्रि
यमेवतेनात्मन्नदधतत्रयस्त्रिꣳशत्कपालंपुरोडाशंनिरवपंत्रयस्त्रिꣳशद्वैदेवतास्ताइंद्रआत्मन

नुसुमारंभयतम्भूत्यै॥२॥तांवावदेवाविजितिमुत्तमामसुरैर्व्यजयंतयोभ्रातृव्यवान्त्स्यात्सस्पर्धमानए
तयेष्ट्यायजेतेंद्रायाꣳहोमुचेपुरोडाशमेकादशकपालंनिर्वपेदिंद्रायवैमृधायेंद्रायेंद्रियावतेꣳहसा
वाएषगृहीतोयस्माच्छ्रेयान्भ्रातृव्योयदिंद्रायाꣳहोमुचेनिर्वपत्यꣳहसएवैनेनमुच्यतेमृधावाएषोभि
षण्णोयस्मात्समानेष्वन्यःश्रेयानुत॥३॥अभ्रातृव्योयदिंद्रायवैमृधायमृधएवैनेनापहतेयदिंद्रायेंद्रि
यावतइंद्रियमेवैनेनात्मंधत्तेत्रयस्त्रिꣳशत्कपालंपुरोडाशंनिर्वपतित्रयस्त्रिꣳशद्वैदेवतास्ताएवयज
मानआत्मन्नुसमारंभयतेभूत्यैसावाएषाविजितिर्नामेष्टिर्यएवंविद्वानेतयेष्ट्यायजतउत्तमामेववि
जितिंभ्रातृव्येणविजयते॥४॥इंद्रियावतीभूत्याउतैकान्नपंचाशच्च॥२॥ ॥देवासुराःसंयत्ताआसंतेषां
गायत्र्योजोबलमिंद्रियंवीर्यंप्रजांपशून्त्संगृह्यादायापक्रम्यातिष्ठत्तेमन्यंतयतरान्वाइयमुपावर्त्स्यति
तइदंभविष्यंतीतितांव्यह्वयंतविश्वकर्मन्नितिदेवादाभीत्यसुराःसानान्यतराꣳश्चनोपावर्तततेदेवा

एतद्यजुरपश्यन्नोजोसिसहोसिबलमसि॥१॥भ्राजोसिदेवानांधामनामासिविश्वमसिविश्वायुःसर्वम
सिसर्वायुरभिभूरितिवावदेवाअसुराणामोजोबलमिंद्रियंवीर्यंप्रजांपशूनवृंजतयद्गायत्र्यपक्रम्याति
ष्ठत्तस्मादेतांगायत्रीतीष्टिमाहुःसंवत्सरोवैगायत्रीसंवत्सरोवैतदपक्रम्यातिष्ठद्यदेतयादेवाअसुराणा
मोजोबलमिंद्रियंवीर्यं॥२॥प्रजांपशूनवृंजततस्मादेताꣳसंवर्गइतीष्टिमाहुर्योभ्रातृव्यवान्त्स्यात्सस्प
र्धमानएतयेष्ट्यायजेताग्नयेसंवर्गायपुरोडाशमष्टाकपालंनिर्वपेत्तꣳशृतमासन्नमेतेनयजुषाभि
मृशेदोजएवबलमिंद्रियंवीर्यंप्रजांपशून्भ्रातृव्यस्यवृंक्तेभवत्यात्मनापरास्यभ्रातृव्योभवति॥३॥बल
मस्यैतयादेवाअसुराणामोजोबलमिंद्रियंवीर्यंपंचचत्वारिꣳशच्च॥३॥ ॥प्रजापतिःप्रजाअसृजतता
अस्मात्सृष्टाःपराचीरायंतायत्रावसंततोगर्मुदुदतिष्ठत्ताबृहस्पतिश्चान्ववैत्ताꣳसोब्रवीद्बृहस्पतिर
नयात्वाप्रतिष्ठान्यथत्वाप्रजाउपावर्त्स्यंतीतितंप्रातिष्ठततोवैप्रजापतिंप्रजाउपावर्तंतयःप्रजाका

सं·द्वि·
३७
मस्यात्तस्मा एतंप्राजापत्यंगार्मुतंचरुंनिर्वपेत्प्रजापतिं॥१॥ एवस्वेनभागधेयेनोपधावतिसएवास्मैप्र
स्मा जांप्रजनयतिप्रजापतिःपशूनसृजततेस्मात्सृष्टाःपरांचआयंतेयत्रावसंततोगर्मुदुदतिष्ठत्तान्पूषाचा
न्वैतांऽसोब्रवीत्पूषानयामाप्रतिष्ठायत्वापुनरावउपावर्त्स्यतीतिमांप्रतिष्ठेतिसोमोब्रवीन्ममैव॥२॥
अकृष्टपच्यमित्युभौवांप्रतिष्ठानीत्यब्रवीत्तौप्रात्तिष्ठत्ततोवैप्रजापतिंपशवउपावर्तंतयःपशुकामःस्यात्त
स्माएतंऽसोमापौष्णंगार्मुतंचरुंनिर्वपेत्सोमापूषणावेवस्वेनभागधेयेनोपधावतितावेवास्मैपशून्प्र
जनयतःसोमोवैरेतोधाःपूषापशूनांप्रजनयितासोमएवास्मैरेतोदधातिपूषापशून्प्रजनयति॥३॥
वपेत्प्रजापतिंवैदधातिपूषात्रीणिच॥४॥ ॥अग्नेगोभिर्नआगहींदोपुष्ट्याजुषस्वनः।इंद्रोधर्तागृहे
षुनः।सवितायःसहस्रियःसनोगृहेषुरारणत्।आपूषाएत्वावसु।धातादददातुनोरयिमीशानोज राम
गतस्पतिः।सनःपूर्णेनवावनत्।त्वष्टायोवृषभोवृषासनोगृहेषुरारणत्।सहस्रेणायुतेनच।येनदे ३७

वृश्च्यतेयोयक्ष्यइत्युक्त्वानयजतेत्रैधातवीयेनयजेतसर्वोवाएषयज्ञः॥४॥यत्त्रैधातवीयꣳसर्वेणैवय
ज्ञेनयजतेनदेवताभ्यआवृश्च्यतेद्वादशकपालःपुरोडाशोभवतितेत्रयःश्चतुष्कपालास्त्रिषमृद्धत्वाय
त्रयःपुरोडाशाभवंतित्रयइमेलोकाएषांलोकानामाप्त्याउत्तरउत्तरोज्यायान्भवत्येवमिवहीमेलोका
यवमयोमध्यएतद्वाअंतरिक्षस्यरूपꣳसमृद्ध्यैसर्वेषामभिगमयंनवद्यत्यछंबट्कारꣳहिरण्यंददाति
तेजएव॥५॥अवरुंधेतार्प्यंददातिपशूनेवावरुंधेधेनुंददात्याशिषएवावरुंधेसाम्नोवाएषवर्णोयद्धि
रण्यंयजुषांतार्प्यमुक्थामदानांधेनुरेतानेवसर्वान्वर्णानवरुंधे॥६॥जगत्याभिचरन्त्सर्वोवैगच्छति
यज्ञस्तेजएवत्रिꣳशाच्च॥११॥ ॥त्वष्टाहतपुत्रोवींद्रꣳसोममाहरत्तस्मिंनिंद्रउपहवमैच्छततंनोपाह्वय
तपुत्रंमेवधीरितिसयज्ञवेशसंकृत्वाप्रासहासोममपिबत्तस्ययदत्यशिष्यततत्त्वष्टाहवनीयमु
पप्रावर्त्तयत्स्वाहेंद्रशत्रुर्वर्धस्वेतिसयावदूर्ध्वःपराविध्यतितावतिस्वयमेवव्यरमतयदिवातावत्प्र

वृणं॥१॥आसीद्यावद्वि वातावदध्यग्नेरासीत्ससंभवन्नग्नीषोमावभिसमभवत्सइषुमात्रमिषुमात्रंविष्वं
ङ्ङवर्धतसइमांल्लोकानवृणोद्यदिमांल्लोकानवृणोत्तद्वृत्रस्यवृत्रत्वंतस्मादिंद्रोबिभेदपित्वष्टातस्मैत्वष्टा
वज्रमसिंचत्तपोवैसवज्रआसीत्तमुद्यंतुंनाशक्नोदथवैतर्हिविष्णुः॥२॥अन्यादेवतासीत्सोब्रवीद्वि
ष्णवेहीदमाहरिष्यावोयेनायमिदमितिसविष्णुस्त्रेधात्मानंविन्यधत्तपृथिव्यांतृतीयमंतरिक्षेतृतीयंदि
वितृतीयमभिपर्यावर्ताध्यबिभेद्यत्पृथिव्यांतृतीयमासीत्तेनेंद्रोवज्रमुदयच्छद्विष्ण्वनुस्थितःसोब्रवी
न्मामेप्रहारस्तिवाइदं॥३॥मयिवीर्यंतत्तेप्रदास्यामीतितदस्मैप्रायच्छत्तत्प्रत्यगृह्णादधामेतितद्विष्ण
वेतिप्रायच्छत्तद्विष्णुःप्रत्यगृह्णादस्मास्विंद्रइंद्रियंदधात्वितियदंतरिक्षेतृतीयमासीत्तेनेंद्रोवज्रमुद
यच्छद्विष्ण्वनुस्थितःसोब्रवीन्मामेप्रहारस्तिवाइदं॥४॥मयिवीर्यंतत्तेप्रदास्यामीतितदस्मैप्रायच्छ
त्तत्प्रत्यगृह्णाद्द्विर्मोधाइतितद्विष्णवेतिप्रायच्छत्तद्विष्णुःप्रत्यगृह्णादस्मास्विंद्रइंद्रियंदधात्वितियद्दिवि

तृतीयमासीत्तेनेन्द्रोवज्रमुदयच्छद्विष्णुनुस्थितःसोब्रवीन्मामेप्रहार्येनाहं॥५॥इदमस्मितत्तेप्रदास्या
मीतित्वी३इत्यब्रवीत्संधांतुसंदधावहैत्वामेवप्रविशानीतियन्मांप्रविशेःकिंमाभुंज्यादित्यब्रवीत्त्वा
मेवेंधीयतवभोगायत्वांप्रविशेयमित्यब्रवीत्तंवृत्रःप्राविशदुदरंवैवृत्रःक्षुत्खलुवैमनुष्यस्यभ्रातृव्या
यः॥६॥एवंवेदहंतिक्षुधंभ्रातृव्यंतदस्मैप्रायच्छत्तत्प्रत्यगृह्णात्त्रिर्माधाइतितद्विष्णवेतिप्रायच्छत्तद्वि
ष्णुःप्रत्यगृह्णादस्मास्विंद्रइंद्रियंदधात्वितियत्त्रिःप्रायच्छत्त्रिःप्रत्यगृह्णात्तत्त्रिधातोस्त्रिधातुत्वंयद्विष्णु
रन्वतिष्ठतविष्णवेतिप्रायच्छत्तस्मादैंद्रावैष्णवंहविर्भवतियद्वाइदंकिंचतदस्मैतत्प्रायच्छदृचःसामा
नियजूंषिसहस्रंवाअस्मैतत्प्रायच्छत्तस्मात्सहस्रदक्षिणं॥७॥प्रवृणंविष्णुर्वाइदमिदमहंयोमे
वृत्येकविंशतिश्च॥१२॥ ॥देवावैराजन्याज्जायमानादबिभयुस्तमंतरेवसंतंदाम्नापौभन्त्सवा
एषोपोब्धोजायतेयद्राजन्योयद्वाएषोनपोब्धोजायेतवृत्रान्घ्नंश्चरेद्यंकामयेतराजन्यमनपोब्धों

जा

येतद्वृत्राघ्नꣳश्चैरितिदितस्माऐंद्राबार्हस्पत्यंचरुंनिर्वपेदिंद्रोवैराजन्योब्रह्मबृहस्पतिर्ब्रह्मणैवैनंदाम्नो।
पोंभनान्मुंचतिहिरुण्मयंदा×एत×मुदक्षिणासाक्षादेवैनंदाम्नोपोंभनान्मुंचति॥१॥एनंद्वादशच॥
॥१३॥ ॥नवोनवोभवतिजायमानोन्हांकेतुरुषसामेत्यग्रे।भागंदेवेभ्योविदधात्यायन्प्रचंद्रमास्तिर
तिदीर्घमायुः।यमादित्याअꣳशुमाप्याययंतियमक्षितमक्षितयःपिबंति।तेननोराजावरुणोबृह
स्पतिराप्याययंतुभुवनस्यगोपाः।प्राच्यांदिशित्वमिंद्रासिराजोतोदीच्यांवृत्रहन्वृत्रहासि।यत्रयंति
स्रोत्यास्तत्॥१॥त्रितंतेदक्षिणतोवृषभएधिहव्यः।इंद्रोजयातिनपराजयाता।अधिराजोराजसुराजया
ति।विश्वाहिभूयाःपृतनाअभिष्टीरुपसद्योनमस्योयथासत्।अस्येदेवप्ररिरिचेमहित्वंदिवःपृथिव्याःप
र्यंतरिक्षात्।स्वराडिंद्रोदमआविश्वगूर्तःस्वरिरमंत्रोववक्षेरणाय।अभित्वाशूरनोनुमोदुग्धाइवधेन
वः।ईशानं॥२॥अस्यजगतःसुवर्दृशमीशानमिंद्रतस्थुषः।त्वामिद्धिहवामहेसातावाजस्यकारवः।त्वां

त्रेष्विंद्रसत्पतिंनरस्त्वांकाष्ठास्ववेतः। यद्यावइंद्रतेशतꣳ शतंभूमीरुतस्युः। नत्वावज्रिन्सहस्रꣳ
सूर्याअनुनजातमष्टरोदसी। पिबासोममिंद्रमंदतुत्वायंतेसुषावहर्यश्वाद्रिः॥३॥ सोतुर्बाहुभ्याꣳ
सुयतोनार्वा। रेवतीर्नःसधमादइंद्रेसंतुतुविवाजाः। क्षुमंतोयाभिर्मदेम। उदग्नेशुचयस्तवविज्यो
तिषोदुत्यंजातवेदसꣳ सप्तत्वाहरितोरथेवहंतिदेवसूर्य। शोचिष्केशंविचक्षण। चित्रंदेवानामुद
गादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः। आप्राद्यावापृथिवीअंतरिक्षꣳ सूर्यआत्माजगतस्तस्थुषः
॥४॥ च। विश्वेदेवाऋतावृधऋतुभिर्हवनश्रुतः। जुषंतांयुज्यंपयः। विश्वेदेवाःशृणुतेमꣳ हवंमेये
अंतरिक्षेयउपद्यविष्ठ। येअग्निजिह्वाउतवायजत्राआसद्यास्मिन्बर्हिषिमादयध्वं॥५॥ तदीशान
मद्रिस्तस्थुषस्त्रिꣳ शाच्च॥१४॥ ॥ देवामनुष्यादेवासुराअब्रुवंदेवासुरास्तेषांगायत्रीप्रजापतिरग्नि
गोभिस्त्रिवृयामारुतदेवावसव्याअग्नेमारुतंदेवावसव्यादेवाःशर्मण्यासर्वाणित्वष्टादेवाबैराजन्या

सं·द्विं
४३

नवोनवश्चतुर्दश॥१४॥ ॥देवामनुष्याः प्रजांपश्वंदेवावसव्याः परिदध्यादिदमस्मप्रष्टावचत्वारिꣳशत्
॥४८॥ ॥हरिःओम्॥ विश्वरूपोवैत्वाष्ट्रःपुरोहितोदेवानामासीत्स्वस्रीयोसुराणांतस्यत्रीणिशीर्षाण्या
सन्सोमपानꣳसुरापानमन्नादनꣳसप्रत्यक्षंदेवेभ्योभागमवदत्परोक्षमसुरेभ्यः सर्वस्मैवैप्रत्यक्षंभा
गंवदंतियस्माएवपरोक्षंवदंतितस्यभागउदितस्तस्मादिंद्रोबिभेदीदृꣳवैराष्ट्रंविपर्यावर्तयतीतितस्य
वज्रमादायशीर्षाण्यछिनद्यत्सोमपानं॥१॥ आसीत्सकपिंजलोभवद्यत्सुरापानꣳसकलविंकोय
दन्नादनꣳसतित्तिरिस्तस्यांजलिनाब्रह्महत्यामुपागृह्णात्ताꣳसंवत्सरमा[illegible]भस्तंभूतान्यभ्यक्रोशं
ब्रह्मन्हन्नितिसपृथिवीमुपासीदस्यैब्रह्महत्यायैतृतीयंप्रतिगृहाणेतिसाब्रवीद्वरंवृणैखातात्परा
भविष्यंतीमन्येततोमापराभूवमितिपुराते॥२॥संवत्सरादपिरोहादित्यब्रवीत्तस्मात्पुरासंवत्सरा
त्पृथिव्यैखातमपिरोहतिवारेवृतꣳह्यस्यैतृतीयंब्रह्महत्यायैप्रत्यगृह्णात्तत्स्वकृतमिरिणमभवत्तस्मा

राम
४३

दाहिताग्निश्श्रद्धादेवस्खलुतदिरिणेनावस्येद्ब्रह्महत्यायैह्येषवर्णः सवनस्पतीनुपासीददस्यैब्रह्महत्या
यैतृतीयंप्रतिगृह्णीतेतितेब्रुवन्वरंवृणामहैवृक्णात्॥३॥पराभविष्यंतोमन्यामहेततोमापराभूमे
त्याव्रश्चनाद्वोभूयाꣳसउत्तिष्ठानित्यब्रवीत्तस्मादाव्रश्चनाद्वृक्षाणांभूयाꣳसउत्तिष्ठंतिवारेवृतꣳ
ह्येषांतृतीयंब्रह्महत्यायैप्रत्यगृह्णन्त्सनिर्यासोभवत्तस्मान्निर्यासस्यनाश्यंब्रह्महत्यायैह्येषवर्णो
थोखलुयएवलोहितोयोवाव्रश्चनान्निर्येषतितस्यनाश्यं॥४॥काममन्यस्यसस्त्रीषꣳसादमुपा
सीददस्यैब्रह्महत्यायैतृतीयंप्रतिगृह्णीतेतिताअब्रुवन्वरंवृणामहाऋत्वियात्प्रजांविंदामहैकामꣳ
माविजनितोःसंभवामेतितस्मादृत्वियात्स्त्रियःप्रजांविंदंतेकाममाविजनितोःसंभवंतिवारेवृतꣳह्या
सांतृतीयंब्रह्महत्यायैप्रत्यगृह्णन्त्सामलवद्वासाअभवत्तस्मान्मलवद्वाससानसंवदेत॥५॥नसहा
सीतनास्याअन्नमद्याद्ब्रह्महत्यायैह्येषावर्णंप्रतिमुच्यास्तेथोखल्वाहुरभ्यंजनंवावस्त्रियाअन्नमभ्यं

ऽनमेवनप्रतिगृह्यंकाममन्यदितियांमलवद्वाससꣳ संभवंतियस्ततोजायतेसोभिशस्तोयामरण्ये
तस्यैस्तेनोयांपराचीं तस्यैह्रीतमुख्यपगल्भोयास्नातितस्याअप्सुमारुकोया॥ ६॥ अभ्यंक्तेतस्यै
दुश्चर्मायाप्रलिखतेतस्यैखलतिरपमारीयांक्तेतस्यैकाणोयादतोधावतेतस्यैश्यावदंन्यानखानि
निकृंततेतस्यैकुनखीयाकृणत्तितस्यैक्लीबोयारज्जुꣳ सृजतितस्याउद्बंधुकोयापर्णेनपिबतितस्याउ
न्मादुकोयाखर्वेणपिबतितस्यैखर्वस्तिस्रोरात्रीर्व्रतंचरेदंजलिनावापिबेदखर्वेणवापात्रेणप्रजायैगो
पीथाय॥ ७॥ यत्सामपानेतद्रक्षणात्तस्यनानुपंवदेतमारुकोयाखर्वेणवात्रीणिच॥ १॥ ॥ त्वष्टाहतपु
त्रोवींद्रꣳ सोममाहरत्तस्मिंनिंद्रउपहवमैछततंनोपाह्वयतपुत्रंमेवधीरितिसयज्ञवेशसंकृत्वाप्रास
हासोममपिबत्तस्ययदत्यशिष्यततत्त्वष्टाहवनीयमुपप्रावर्तयत्स्वाहेंद्रशत्रुर्वर्धस्वेतियदवर्तयत्तद्वृ
त्रस्यवृत्रत्वंयदब्रवीत्स्वाहेंद्रशत्रुर्वर्धस्वेतितस्मादस्य॥ १॥ इंद्रःशत्रुरभवत्ससंभवंनग्नीषोमावभि

समभवत्सइषुमात्रमिषुमात्रंविष्वंङ्ङवर्धतसइमांलोकानवृणोद्यदिमांलोकानवृणोत्तद्वृत्रस्यवृ
त्रत्वंतस्मादिंद्रोबिभेत्सप्रजापतिमुपाधावच्छत्रुर्मेजनीतितस्मैवज्रꣳसिक्त्वाप्रायच्छदेतेनजहीतितेना
भ्यायतताववब्रूतामग्नीषोमौमा ॥२॥ प्रहारावमंतस्वइतिममवैयुवꣳस्थइत्यब्रवीन्मामभ्येतमिति
तौभागधेयमैच्छेतांताभ्यामेतमग्नीषोमीयमेकादशकपालंपूर्णामासेप्रायच्छत्तावब्रूतामभिसंदष्टौ
वैस्वोनशक्नुवऐतुमितिसइंद्रआत्मनःशीतरूरावजनयत्तच्छीतरूरयोर्जन्मयएवꣳशीतरूरयोर्ज
न्मवेद ॥३॥ नैनꣳशीतरूरौहतस्ताभ्यामेनमभ्यनयत्तस्माज्जंजभ्यमानादग्नीषोमौनिरक्रामतांप्रा
णापानौवाएनंतदजहितांप्राणोवैदक्षोपानःक्रतुस्तस्माज्जंजभ्यमानोब्रूयान्मयिदक्षक्रतूइति
प्राणापानावेवात्मंधत्तेसर्वमायुरेतिसदेवतावृत्रान्निर्हूयवार्त्रघ्नꣳहविःपूर्णमासेनिरवप[illegible]तिवा
एनंपूर्णमासआ ॥४॥ अमावास्यायांप्याययंतितस्माद्वार्त्रघ्नीपूर्णमासेनूच्येतेवृधन्वतीअमावा

सं॰हि॰
४५

स्यायांतत्सꣳस्थाप्यवार्त्रघ्नꣳहविर्वज्रमादायपुनरभ्यायतते अब्रूतांद्यावापृथिवीमाप्रहारावयोर्वैश्रि
तइतितेअब्रूतांवरंवृणावहैनक्षत्रविहिताहमसानीत्यसावब्रवीच्चित्रविहिताहमितीयंतस्मान्नक्ष
त्रविहितासौचित्रविहितेयंयएवंद्यावापृथिव्योः॥५॥ वरंवेदैनंवरोगच्छतिसआभ्यामेवप्रसूतइंद्रो
वृत्रमहंतेदेवावृत्रꣳहत्वाग्नीषोमावब्रुवन्हव्यंनोवहतमितितावब्रूतामपतेजसौवैत्योवृत्रेवैत्ययो
स्तेजइतितेब्रुवन्कइदमच्छैतीतिगौरित्यब्रुवन्गौर्वावसर्वस्यमित्रमितिसाब्रवीत॥६॥ वरंवृणैमय्ये
वसतोभयेनभुनजाध्वाइतितद्गौराहरत्तस्माद्गविसतोभयेनभुंजतएतद्वाअग्नेस्तेजोयद्घृतमेतत्सो
मस्ययत्पयोयएवमग्नीषोमयोस्तेजोवेदतेजस्व्येवभवतिब्रह्मवादिनोवदंतिकिंदेवत्यंपौर्णमासमिति मि॰
प्राजापत्यमितिब्रूयात्तेनेंद्रंज्येष्ठंपुत्रंनिरवासाययदितितस्माज्ज्येष्ठंपुत्रंधनेननिरवसाययंति॥७॥
अस्यमावेदाद्यावापृथिव्योरब्रवीदितितस्माच्चत्वारिच॥२॥ ॥इंद्रंवृत्रंजघ्निवाꣳसंमृधोभिप्रावेपं

राम॰
४५

तसएतंवैमृधंपूर्णमासेनुनिर्वाप्यमपश्यत्तंनिरवपत्तेनवैसमृधोपाहतयद्वैमृधःपूर्णमासेनुनि
र्वाप्योभवतिमृधएवतेनयजमानोपहतइंद्रोवृत्रꣳहत्वादेवताभिश्चेंद्रियेणचव्यार्ध्यततसएतमाग्नेय
मष्टाकपालममावास्यायामपश्यदैंद्रंदधि॥१॥तंनिरवपत्तेनवैसदेवताश्चेंद्रियंचावारुंधयदाग्नेयो
ष्टाकपालोमावास्यायांभवत्यैंद्रंदधिदेवताश्चैवतेनेंद्रियंचयजमानोवरुंधइंद्रस्यवृत्रंजघ्नुषइंद्रियं
वीर्यंपृथिवीमनुव्यार्छत्तदोषधयोवीरुधोभवन्त्सप्रजापतिमुपाधावद्वृत्रंमेजघ्नुषइंद्रियंवीर्यं॥२॥
पृथिवीमनुव्यारत्तदोषधयोवीरुधोभवन्नितिसप्रजापतिःपशूनब्रवीदेतदस्मैसन्नयतेतितत्प
शवओषधीभ्योध्यात्मन्त्समनयंतत्प्रत्यदुहन्यत्समनयंतत्सान्नाय्यस्यसान्नाय्यत्वंयत्प्रत्यदुहंत
९ त्प्रतिधुषःप्रतिधुक्त्वंसमनैषुःप्रत्यधुक्षन्नतुमयिश्रयतइत्यब्रवीदेतदस्मै॥३॥शृतंकुरुतेत्यब्रवी
त्तदस्मैशृतमकुर्वन्निंद्रियंवावास्मिन्वीर्यंतदश्रयंतच्छृतस्यशृतत्वꣳसमनैषुःप्रत्यधुक्षञ्छृतमक्रं

नतुमाधिनोतीत्यब्रवीदेतदस्मैदधिकुरुतेत्यब्रवीत्तदस्मैदध्यकुर्वंतदेनमधिनोत्तद्दध्नोदधित्वंब्रह्म
वादिनोवदंतिदध्नः पूर्वस्यावदेयं॥४॥दधिहिपूर्वंक्रियतइत्यनादृत्यतच्छृतस्यैवपूर्वस्यावद्येदिंद्रिय
मेवास्मिन्वीर्यंश्रित्वादध्नोपरिष्टाद्धिनोतियथापूर्वमुपैतियत्पूतीकैर्वापर्णवल्कैर्वातंच्यात्सौम्यंत
द्यत्क्वलैराक्षसंतद्यत्तंडुलैर्वैश्वदेवंतद्यदातंचनेनमानुषंतद्यद्दध्नातत्सेंद्रंदध्नातनक्ति॥६॥सेंद्रत्वाया
ग्निहोत्रोच्छेषणमभ्यातनक्तियज्ञस्यसंतत्याइंद्रोवृत्रंहत्वापरांपरावतमगछदपाराधमितिम
न्यमानस्तंदेवताःप्रैषमैछंत्सोब्रवीत्प्रजापतिर्यःप्रथमोनुविंदतितस्यप्रथमंभागधेयमितितंपि
तरोन्वविंदंतस्मात्पितृभ्यःपूर्वेद्युःक्रियतेसोमावास्यांप्रत्यागछत्तंदेवाअभिसमगछंतामावैनः
॥६॥अद्यवसुवसतीतींद्रोहिदेवानांवसुतदमावास्यायाअमावास्यत्वंब्रह्मवादिनोवदंतिकिंदे
वत्यंसान्नाय्यमितिवैश्वदेवमितिब्रूयाद्विश्वेहिदेवाभागधेयमभिसमगछंतत्यथोखल्वैंद्रमि

त्येवब्रूयादिंद्रंवावतेतद्भिषज्यंतोभिसमगछंतेति॥७॥ दधिमेजुहुषद्दिंद्रियंवीर्यमित्यब्रवीदेत
दस्माअवद्यंतनक्किनोद्धिबलारिःशाञ्च॥३॥ ॥ब्रह्मवादिनोवदंतिसत्वैदर्शपूर्णमासौयजेतयएनौसें
द्रौयजेतेतिवैमृधःपूर्णमासेनुनिर्वाप्योभवतितेनपूर्णमासःसेंद्रःसेंद्रंदध्यमावास्यायांतेनामावास्या
सेंद्रायएवंविद्वान्दर्शपूर्णमासौयजतेसेंद्रावेवैनौयजतेश्वःश्वोस्मादिज्ञानायवसीयाभवतिदेवावैयद्य
ज्ञेकुर्वततदसुराअकुर्वततेदेवाएतां॥१॥ इष्टिमपश्यन्नाग्नावैष्णवमेकादशकपालꣳ सरस्वत्यैचरुꣳ
सरस्वतेचरुंतांपौर्णमासꣳसꣳस्थाप्यानुनिरवपंस्ततोदेवाअभवन्परासुरायोभ्रातृव्यवान्स्यात्स
पौर्णमासꣳसꣳस्थाप्यैतामिष्टिमनुनिर्वपेत्पौर्णमासेनैववज्रंभ्रातृव्यायप्रहृत्याग्नावैष्णवेनदेवता
श्चयज्ञंचभ्रातृव्यस्यवृंक्तेमिथुनान्पशून्सारस्वताभ्यांयावदेवास्यास्तितत्॥२॥ सर्वंवृंक्तेपौर्णमासी
मेवयजेतभ्रातृव्यवान्नामावास्याꣳहत्वाभ्रातृव्यंनाप्यायतिसाकंप्रस्थाय्येनयजेतपशुकामोय

सं॰द्वि॰
४७

स्मैवाअल्पेनाहरंतिनात्मनाप्यैतोतिनान्यस्मैददातियस्मैमहुतातप्यत्यात्मनाददात्यन्यस्मैमहुता।
पूर्णꣳहोतव्यंतृप्तएवैनमिंद्रःप्रजयापशुभिःस्तर्पयतिदारुपात्रेणजुहोतिनहिमृन्मयमाहुतिमा
नन्नाऔदुंबरं॥३॥अश्वत्थर्ग्वाउदुंबरऊर्कपशवऊर्जैवास्माऊर्जंपशूनवरुंधेनागतश्रीर्महेंद्रंयजेतत्र
योवैगतश्रियःशुश्रुवान्ग्रामणीराजन्यस्तेषांमहेंद्रोदेवतायोवैस्वांदेवतामतियजतेप्रस्वायैदेवतायै
च्यवतेनपरांप्राप्नोतिपापीयान्भवतिसंवत्सरमिंद्रंयजेतसंवत्सरꣳहिव्रतंनातिस्वा॥४॥एवैनंदेवते
ज्यमानाभूत्यांदधेवसीयान्भवतिसंवत्सरस्यपरस्तादग्नयेव्रतपतयेपुरोडाशमष्टाकपालंनिर्वपेत्सं
वत्सरमेवैनंवृत्रंजघ्निवाꣳसमग्निर्व्रतपतिर्व्रतमालंभयतिततोधिकामंयजेत॥५॥एतांतदौदुंबरꣳ
स्वात्रिꣳशच्च॥४॥ ॥नासोमयाजीसंनयेदनागतंवाएतस्यपयोयोसोमयाजीयदसोमयाजीसंन
येत्परिमोषएवसोऽनृतंकरोत्यथोपरैवसिच्यतेसोमयाज्येवसंनयेत्पयोवैसोमःपयःसांनाय्यंपयसै

राम
४७

वपयआत्मंधत्तेविवाएतंप्रजयापशुभिरर्धयतिवर्धयत्यस्यभ्रातृव्यंयस्यहविर्निरुप्तंपुरस्ताच्चंद्रमाः
॥१॥अभ्युदेतित्रेधातंडुलान्विभजेद्येमध्यमास्युस्तानग्नयेदात्रेपुरोडाशमष्टाकपालंकुर्याद्येस्थवि
ष्ठास्तानिंद्रायप्रदात्रेदधंश्चरुंयेणिष्ठास्तान्विष्णवेशिपिविष्टायशृतेचरुमग्निरेवास्मैप्रजांप्रजनय
तिवृद्धामिंद्रःप्रयच्छतियज्ञोवैविष्णुःपशवःशिपिर्यज्ञएवपशुषुप्रतितिष्ठतिनद्वे॥२॥यजेतयत्पूर्वया
संप्रतियजेतोत्तरयाछंबट्कुर्याद्यदुत्तरयासंप्रतियजेतपूर्वयाछंबट्कुर्यान्नेष्टिर्भवतिनयज्ञस्तदनु
ह्रीतमुख्यपगल्भोजायतएकामेवयजेतप्रगल्भोस्यजायतेनादृत्यतद्द्वेएवयजेतयज्ञमुखमेवपू
र्वयालभतेयजतउत्तरयादेवताएवपूर्वयावरुंधइंद्रियमुत्तरयादेवलोकमेव॥३॥पूर्वयाभिजयतिम
नुष्यलोकमुत्तरयाभूयसोयज्ञक्रतूनुपैत्येषावैसुमनानामेष्टिर्यमद्येजानंपश्चाच्चंद्रमाअभ्युदेत्य
स्मिंन्नेवास्मैलोकऋधुकंभवतिदाक्षायणयज्ञेनसुवर्गकामोयजेतपूर्णमासेसंनयेन्मैत्रावरुण्या

सं·द्वि·
४८

मिक्षयामावास्यायांयजेतपूर्णमासेवैदेवानाꣳसुतस्तेषामेतमर्धमासंप्रसुतस्तेषांमैत्रावरुणीवृ
त्रामावास्यायामनूबंध्यायत॥४॥पूर्वेद्युर्यजतेवेदिमेवतत्करोतियद्वत्सानपाकुरोतिसदोहविर्धा
नेएवसंमिनोतियद्यजतेदेवैरेवसुत्याꣳसंपादयतिसएतमर्धमासꣳसधमादंदेवैःसोमंपिबतिय
न्मैत्रावरुण्यामिक्षयामावास्यायांयजतेयेवासौदेवानांवृत्रान्नबंध्यासोएवैषतस्यसासाद्वाएषदे
वानभ्यारोहतियएषांयज्ञं॥५॥अभ्यारोहतियथाखलुवैश्रेयानभ्यारूढःकामयतेतथाकरोतिय
द्यवविध्यतिपापीयान्भवतियदिनावविध्यतिसदृङ्व्यावृत्कामएतेनयज्ञेनयजेतक्षुरपविर्ह्येषयज्ञस्ता
जक्पुण्योवाभवतिप्रवामीयतेतस्यैतद्व्रतंनानृतंवदेन्नमाꣳसमश्नीयान्नस्त्रियमुपेयान्नास्यपल्पूल
नेनवासःपल्पूलयेयुरेतद्धिदेवाःसर्वंनकुर्वंति॥६॥चंद्रमाद्वैदेवलोकमेवतद्यज्ञंपल्पूलयेयुःषट्त्वं॥
॥७॥ ॥एषवैदेवरथोयद्दर्शपूर्णमासौयोदर्शपूर्णमासाविष्ट्वासोमेनयजतेरथस्पष्टएवावसानेवरेदे

राम
४८

वानामवस्यत्येतानिवाअंगापरूꣳषिसंवत्सरस्ययद्दर्शपूर्णमासौयएवंविद्वांदर्शपूर्णमासौयजतेंगा
परूꣳष्येवसंवत्सरस्यप्रतिदधात्येतेवैसंवत्सरस्यचक्षुषीयद्दर्शपूर्णमासौयएवंविद्वांदर्शपूर्णमासौय
जतेताभ्यामेवसुवर्गंलोकमनुपश्यति॥१॥एषावैदेवानांविक्रांतिर्यद्दर्शपूर्णमासौयएवंविद्वांदर्शपू
र्णमासौयजतेदेवानामेवविक्रांतिमनुविक्रमतएषवैदेवयानःपंथायद्दर्शपूर्णमासौयएवंविद्वांदर्श
पूर्णमासौयजतेयएवदेवयानःपंथास्तꣳसमारोहत्येतौवैदेवानाꣳहरीयद्दर्शपूर्णमासौयएवंविद्वांद
र्शपूर्णमासौयजतेयावेवदेवानाꣳहरीताभ्यां॥२॥एवैभ्योहव्यंवहत्येतौवैदेवानामास्यंयद्दर्शपूर्णमा
सौयएवंविद्वांदर्शपूर्णमासौयजतेसाक्षादेवदेवानामास्येजुहोत्येषवैहविर्धानीयोदर्शपूर्णमासया
जीसायंप्रातरग्निहोत्रंजुहोतियजतेदर्शपूर्णमासावहरहर्हविर्धानिनाꣳसुतोयएवंविद्वांदर्शपूर्णमा
सौयजतेहविर्धान्यस्मीतिसर्वमेवास्यबर्हिष्यंदत्तंभवतिदेवावाअहः॥३॥यज्ञियन्नाविंदंतेदर्शपूर्ण

मासावपुनंतौवाएतौपूतौमेध्यौयद्दर्शपूर्णमासौयएवंविद्वान्दर्शपूर्णमासौयजतेपूतावेवैनौमेध्यौयज
तेनामावास्यायांचपौर्णमास्यांचस्त्रियमुपेयाद्यदुपेयान्निरिंद्रियस्यात्सोमस्यवैराज्ञोर्धमासस्यरात्रयः
पत्नयआसंतासाममावास्यांचपौर्णमासींचनोपैत्॥४॥तेएनमभिसमनह्येतांतंयक्ष्मआर्छद्राजानं
यक्ष्मआरदितितद्राजयक्ष्मस्यजन्मयत्पापीयानभवत्तत्पापयक्ष्मस्ययज्जायाभ्यामविंदत्तज्जायेन्य
स्ययएवमेतेषांयक्ष्माणांजन्मवेदनैनमेतेयक्ष्माविंदंतिसएतेएवनमस्यन्नुपाधावत्तेअब्रूतांवरंवृणाव
हाआवंदेवानांभागधेअसावा॥५॥आवदधिदेवाइज्यांताइतितस्मात्सदृशीनांरात्रीणाममावास्या
यांचपौर्णमास्यांचदेवाइज्यंतएतेहिदेवानांभागधेभागधाअस्मैमनुष्याभवंतियएवंवेदभूतानिक्षु
धमघ्नंत्सद्योमनुष्याअर्धमासेदेवामासिपितरःसंवत्सरेवनस्पतयःस्तस्मादहरहर्मनुष्याअशनमि
च्छंतेर्धमासेदेवाइज्यंतेमासिपितृभ्यःक्रियतेसंवत्सरेवनस्पतयःफलंगृह्णंतियएवंवेदहंतिक्षुधंभ्रात

यं ॥ ६ ॥ पनूयतिताभ्यामहरेदसावुफलꣳ सुम्नवं ॥ ६ ॥ ॥ देवावैनर्विंनयुञ्जुष्यश्वयंततेसामंनैवाश्वयंतद्धिं
करोतिसामैवाकर्हिंकरोतियत्रैवदेवाअश्वयंततत एवैनान्प्रयुंक्ते हिंकरोतिवाचएवैषयोगोहिंकरोति
प्रजाएवतद्यजमानःसृजतेत्रिःप्रथमामन्वाहत्रिरुत्तमांयज्ञस्यैवतद्धुर्सं ॥ १ ॥ नह्युत्यप्रस्त्वꣳ सायुसंतत
मन्वाहप्राणापानानामंनाद्यस्यसंतत्याअथोरक्षसामपहत्यैराथंतरींप्रथमामन्वाहराथंतरोवाअयंलोक
इममेवलोकमभिजयतित्रिर्विगृह्णातित्रयइमेलोकाइमानेवलोकानभिजयतिबार्हतीमुत्तमामन्वाह
बार्हतोवाअसौलोकोऽमुमेवलोकमभिजयतिप्रवः ॥ २ ॥ वाजाइत्यनिरुक्तांप्राजापत्यामन्वाहयज्ञोवैप्र
जापतिर्यज्ञमेवप्रजापतिमारभंतेप्रवोवाजाइत्यन्वाहान्नंवैवाजोऽन्नमेवावरुंधेप्रवोवाजाइत्यन्वाहतस्मा
प्राचीनꣳ रेतोधीयतेऽग्नआयाहिवीतयइत्याहतस्मात्प्रतीचीः प्रजाजायंतेप्रवोवाजाः ॥ ३ ॥ इत्यन्वाह
मासावैवाजाअर्धमासाअभिद्यवोदेवाहविष्मंतोगावोघृताचीर्यज्ञोदेवांजिगातीयजमानःसुम्नयुरिदम्

सं·द्विं
५०

सीदमसीत्येवयज्ञस्यप्रियंधामावरुंधेयंकामयेतसर्वमायुरियादितिप्रवोवाजाइतितस्यानूच्याग्नआ
याहिवीतयइतिसंततमुत्तरमर्धर्चमालभेत॥४॥प्राणेनैवास्यापानंदाधारसर्वमायुरेतियोवाअरत्निꣳ
सामिधेनीनांवेदारत्नावेवभ्रातृव्यंकुरुतेर्धर्चौसंदधात्येषवाअरत्निःसामिधेनीनांयएवंवेदारत्नावेव
भ्रातृव्यंकुरुतऋषेऋषेर्वाएतानिर्मितायत्सामिधेन्यःस्तायदसंयुक्तास्युःप्रजयापशुभिर्यजमानस्य
वितिष्ठेरन्नर्धर्चौसंदधातिसंयुनक्त्येवैनास्ताअस्मैसंयुक्ताअवरुद्धाःसर्वामाशिषंदुह्रे॥५॥बुर्सवोजा
यंतेप्रवोवाजाअलभेतदधातिसंदशाच्च॥७॥ ॥अयज्ञोवाएषयोसामाग्नआयाहिवीतयइत्याहरथंतर
स्यैषवर्णस्तंत्वासमिद्भिरंगिरइत्याहवामदेव्यस्यैषवर्णोबृहदग्नेसुवीर्यमित्याहबृहतएषवर्णोयदेतं
तृचमन्वाहयज्ञमेवतत्सामन्वंतंकरोत्यग्निरमुष्मिन्लोकआसीदादित्योस्मिंताविमौलोकावशांतौ॥१॥
आस्तांतेदेवाअब्रुवंनेतेमौविपर्यूहामेत्यग्नआयाहिवीतयइत्यस्मिन्लोकेग्निमदधुर्बृहदग्नेसुवीर्यमि

रामः
५०

स्यमुष्मिन्लोकआदित्यंततोवाइमौलोकावश्राम्यतांयदेवमन्वाहानयोर्लोकयोःशांत्यैशांम्यतोस्मा
इमौलोकौयएवंवेदपंचदशसामिधेनीरन्वाहपंचदश॥२॥वाअर्धमासस्यरात्रयोर्धमासशःसंव
त्सरआप्यतेतासांत्रीणिचशतानिषष्टिश्चाक्षराणितावतीःसंवत्सरस्यरात्रयोक्षरशएवसंवत्सर
माप्नोतिनृमेधश्चपरुछेपश्चब्रह्मण्युद्यमवदेतामस्मिंदारावार्द्रेग्निंजनयावयतरोनौब्रह्मीयानिति
नृमेधोभ्यवदत्सधूममजनयत्परुछेपोभ्यवदत्सोग्निमजनयदृषइत्यब्रवीत्॥३॥यत्समावद्विद्वक
थात्वमग्निमजीजनोनाहमितिसामिधेनीनामेवाहंवर्णंवेदेत्यब्रवीद्यद्घृतवत्पदमनूच्यतेसआ
सांवर्णःस्तंत्वासमिद्भिरंगिरइत्याहसामिधेनीष्वेवतज्ज्योतिर्जनयतिस्त्रियस्तेनयदृचस्त्रियस्ते
नयद्रौत्रियस्त्रियस्तेनयत्सामिधेन्योवृषण्वतीमन्वाह॥४॥तेनपुंस्वतीःस्तेनसेंद्रास्तेनमिथु
नाअ~~यु~~ग्निर्देवानांदूतआसीदुशनाकाव्योसुराणांतौप्रजापतिंप्रश्नमैतांसप्रजापतिरग्निंदू

तंवृणामहइत्यग्निपर्यावर्तंततोदेवाअभवन्परासुरायस्यैवंविदुषोग्निंदूतंवृणीमहइत्यन्वाँभवत्यात्मना
परास्यभ्रातृव्योभवत्यध्वरवतीमन्वाहभ्रातृव्यमेवैतया॥५॥ ध्वरतिर्वाग्नेविकेतास्तमीमह॰ह॰इत्याहप
वित्रमेवैतद्यजमानमेवैतयापवयतिसमिद्धोअग्नआहुतेत्याहपरिधिमेवैतंपरिदधात्यस्कंदाययदत
ऊर्ध्वमभ्यादध्याद्यथाबहिःपरिधिस्कंदतितादृगेवतत्त्रयोवाअग्नयोहव्यवाहनोदेवानांकव्यवाहनःपि
तृणाꣳसहरक्षाअसुराणांतएतर्ह्याशꣳसंतेमांवरिष्यंतेमां॥६॥ इतिवृणीध्वꣳहव्यवाहनमित्याहयए
वदेवानांतंवृणीतआर्षेयंवृणीतेबंधोरेवनैत्यथोसंतत्यैपरस्तादर्वाचोवृणीतेतस्मात्परस्तादर्वांचोमनु
ष्यान्पितरोनुप्रपिपते॥७॥ अग्नौतावाहुपंत्रवृद्धगब्रवीदन्वाहितयावरिष्यतेमामेकात्रिꣳशच्च॥८॥॥
अग्नेमहाꣳअसीत्याहमहान्ह्येषयदग्निर्ब्राह्मणेत्याहब्राह्मणोह्येषभारतेत्याहेषहिदेवेभ्योहव्यंभर
तिदेवेद्धइत्याहदेवाह्येतमैंधतमन्विधइत्याहमनुर्ह्येतमुत्तरोदेवेभ्यऐंधर्षिष्टुतइत्याहर्षयोह्येतमस्तु

वन्विप्रानुमदितइत्याह ॥१॥ विप्राह्येतेयच्छुश्रुवाꣳसः कविशस्तइत्याहकवयोह्येतेयच्छुश्रुवाꣳसोब्रह्म
सꣳशितइत्याहब्रह्मसꣳशितोह्येषघृताहवनइत्याहघृताहुतिर्ह्यस्यप्रियतमाप्रणीर्यज्ञानामित्याह
प्रणीर्ह्येषयज्ञानाꣳरथीरध्वराणामित्याहैषहिदेवरथोतूर्तोहोतेत्याहनह्येतंकश्चन ॥२॥ तरतितूर्णिर्ह
व्यवाडित्याहसर्वꣳह्येषतरत्यास्पात्रंजुहूर्देवानामित्याहजुहूर्ह्येषदेवानांचमसोदेवपानइत्याहचमसो
ह्येषदेवपानोराꣳइवाग्नेनेमिर्देवाꣳस्त्वंपरिभूरसीत्याहदेवान्ह्येषपरिभूर्यद्ब्रूयादावहदेवान्देवयतेयज
मानायेतिभ्रातृव्यमस्मै ॥३॥ जनयेदावहदेवान्यजमानायेत्याहयजमानमेवैतेनवर्धयत्यग्निमग्न
आवहसोममावहेत्याहदेवताएवतद्यथापूर्वमुपह्वयतआचाग्नेदेवान्वहसुयजाचयजजातवेदइत्या
हाग्निमेवतत्सꣳश्यतिसोस्यसꣳशितोदेवेभ्योहव्यंवहत्यग्निर्होता ॥४॥ इत्याहाग्निर्वैदेवानाꣳहोताय
एवदेवानाꣳहोतारंवृणीतेस्मोवयमित्याहात्मानमेवसत्वंगमयतिसाधुतेयजमानदेवतेत्याहाशिष

मेवैनामाशास्तेयद्ब्रूयाद्योग्निꣳहोतारमवृथाइत्यग्निनोभयतोयजमानंपरिगृह्णीयात्प्रमायुकस्याद्यज
मानदेवत्यावैजुहूर्भ्रातृव्यदेवत्योपभृत्॥५॥यद्द्वेइवब्रूयाद्भ्रातृव्यमस्मैजनयेद्घृतवतीमध्वर्योस्रुचमास्य
स्वेत्याहयजमानमेवैतेनवर्धयतिदेवायुवमित्याहदेवान्ह्येषावतिविश्ववारामित्याहविश्वꣳह्येषावतीडा
महैदेवाꣳईडेन्याँनमस्यामनमस्यान्यजामयज्ञियानित्याहमनुष्यावाईडेन्याःपितरोनमस्यादेवाय
ज्ञियादेवताएवतद्यथाभागंयजति॥६॥विप्रानुमदितइत्याहनह्येतंकश्चनास्मिंहोताप्रभेद्देवताएवत्री
णिव॥७॥ ॥त्रीꣳस्तृवाननुब्रूयाद्राजन्यस्यत्रयोवाअन्येराजन्यात्पुरुषाब्राह्मणोवैश्यःशूद्रस्तानेवास्मा
अनुकान्करोतिपंचदशानुब्रूयाद्राजन्यस्यपंचदशोवैराजन्यःस्वएवैनꣳस्तोमेप्रतिष्ठापयतित्रिष्टुभा
परिदध्यादिंद्रियंवैत्रिष्टुगिंद्रियकामःखलुवैराजन्योयजतेत्रिष्टुभैवास्माइंद्रियंपरिगृह्णातियदिका
मयेत॥८॥ब्रह्मवर्चसमस्त्वितिगायत्रियापरिदध्याद्ब्रह्मवर्चसंवैगायत्रीब्रह्मवर्चसमेवभवतिसप्तदशा

नुब्रूयाद्वैश्यस्यसप्तदशोवैवैश्यःस्वएवैनꣳस्तोमेप्रतिष्ठापयतिजगत्यापरिदध्याज्जागतावैपशवः
पशुकामःखलुवैवैश्योयजतेजगत्यैवास्मैपशून्परिगृह्णात्येकविꣳशतिमनुब्रूयात्प्रतिष्ठाकामस्यै
कविꣳशस्तोमानांप्रतिष्ठाप्रतिष्ठित्यै॥२॥चतुर्विꣳशतिमनुब्रूयाद्ब्रह्मवर्चसकामस्यचतुर्विꣳशत्यक्षरा
गायत्रीगायत्रीब्रह्मवर्चसंगायत्रियैवास्मैब्रह्मवर्चसमवरुंधेत्रिꣳशतमनुब्रूयादन्नकामस्यत्रिꣳशद
क्षराविराडन्नंविराड्विराजैवास्माअन्नाद्यमवरुंधेद्वात्रिꣳशतमनुब्रूयात्प्रतिष्ठाकामस्यद्वात्रिꣳशदक्ष
रानुष्टुगनुष्टुप्छंदसांप्रतिष्ठाप्रतिष्ठित्यैषट्त्रिꣳशतमनुब्रूयात्पशुकामस्यषट्त्रिꣳशदक्षराबृहतीबा
र्हताःपशवोबृहत्यैवास्मैपशून्॥३॥अवरुंधेचतुश्चत्वारिꣳशतमनुब्रूयादिंद्रियकामस्यचतुश्चत्वा
रिꣳशदक्षरात्रिष्टुगिंद्रियंत्रिष्टुप्त्रिष्टुभैवास्मादिंद्रियमवरुंधेष्टाचत्वारिꣳशतमनुब्रूयात्पशुकामस्या
ष्टाचत्वारिꣳशदक्षराजगतीजागताःपशवोजगत्यैवास्मैपशूनवरुंधेसर्वाणिछंदाꣳस्यनुब्रूयाद्दु

याजिनः सर्वाणिवा एतस्यछंदाꣳस्यवरुद्धानियोबहुयाज्यपरिमितमनुब्रूयादपरिमितस्यावरुध्यै॥९॥
कामयेतप्रतिष्ठित्यैपृश्नीन्त्सप्तचत्वारिꣳशच्च॥१०॥ ॥निवीतंमनुष्याणांप्राचीनावीतंपितृणामुपवीतंदेवा
नामुपव्ययतेदेवलक्ष्ममेवतत्कुरुतेतिष्ठन्नन्वाहतिष्ठंन्त्याश्रुततरंवदतितिष्ठंनन्वाहसुवर्गस्यलोकस्या
भिजित्याआसीनोयजत्यस्मिन्नेवलोकेप्रतितिष्ठतियत्क्रौंचमन्वाहासुरंतद्यन्मंद्रंमानुषंतद्यदंतरात
त्सदेवमंतरानूच्यꣳसदेवत्वायविद्वाꣳसोवै॥१॥पुराहोतारोभूवंतस्माद्विधृताअध्वानोभूवंनपंथानः
समरुक्षंनंतर्वेद्यन्यःपादोभवतिबहिर्वेद्यन्योथान्वाहाध्वनांविधृत्यैपथामसꣳरोहायाथोभूतंचैवभ
विष्यच्चावरुंधेथोपरिमितंचैवापरिमितंचावरुंधेथोग्राम्याꣳश्चैवपशूनारण्याꣳश्चावरुंधेथो॥२॥देव
लोकंचैवमनुष्यलोकंचाभिजयतिदेवावैसामिधेनीरनूच्ययज्ञंनान्वपश्यंन्सप्रजापतिस्तूष्णीमाघा
रमाघारयत्ततोवैदेवायज्ञमन्वपश्यंन्यत्तूष्णीमाघारमाघारयतियज्ञस्यानुख्यात्याअथोसामिधे

म

नीरेवाभ्यनस्यरूक्षोभवतियएवंवेदाथोतर्पयत्येवैनास्तृप्यतिप्रजयापशुभिः॥३॥यएवंवेदयदेकया
घारयेदेकांप्रीणीयाद्यद्द्वाभ्यांद्वेप्रीणीयाद्यत्तिसृभिरितितद्वैक्येन्मनसाघारयतिमनसाह्यना[illegible]माहृ
तेतिर्यञ्चमाघारयत्यसंबद्धकारंवाक्चमनश्चार्तीयेतामहंदेवेभ्योहव्यंवहामीतिवागब्रवीदहंदेवेभ्यइ
तिमनस्तौप्रजापतिंप्रश्नमैताꣳसोऽब्रवीत॥४॥प्रजापतिर्दूतीरेवत्वंमनसोऽसियद्धिमनसाध्यायतित
द्वाचावदतीतितत्त्वसुतुभ्यंनवाचाजुहवन्नित्यब्रवीत्तस्मान्मनसाप्रजापतयेजुह्वतिमनइवहिप्रजाप
तिःप्रजापतेराप्त्यैपरिधीन्त्संमार्ष्टिपुनात्येवैनांत्रिर्मध्यमंत्रयोवैप्राणाःनेवाभिजयतित्रिर्दक्षिणा
र्धंत्रयः॥५॥इमेलोकाइमानेवलोकानभिजयतित्रिरुत्तरार्धंत्रयोवै×प्राणा×देवयानाःपंथानस्ता
नेवाभिजयतित्रिरुपवाजयतित्रयोवैदेवलोकादेवलोकानेवाभिजयतिद्वादशसंपद्यंतेद्वादशमासाः
संवत्सरःसंवत्सरमेवप्रीणात्यथोसंवत्सरमेवास्माउपदधातिसुवर्गस्यलोकस्यसमष्ट्याआघारमा

घारयतितिरइव॥६॥वैसुवर्गोलोकः सुवर्गमेवास्मैलोकंप्ररोचयत्यृजुमाघारयत्यृजुरिवहिप्राणः संतत
माघारयतिप्राणानामन्नाद्यस्यसंतत्याअथोरक्षसामपहत्यैयंकामयेतप्रमायुकस्यादितिजिह्मंतस्या
घारयेत्प्राणमेवास्माज्जिह्मंनयतिताजक्प्रमीयतेशिरोवाएतद्यज्ञस्ययदाघारआत्माध्रुवा॥७॥आ
घारमाघार्यध्रुवाᳪसमनक्त्यात्मन्नेवयज्ञस्यशिरः प्रतिदधात्यग्निर्देवानांदूतआसीद्दैव्योसुराणांतौ
प्रजापतिंप्रश्नमैताᳪसप्रजापतिर्ब्राह्मणमब्रवीदेतद्विब्रूहीत्याश्रावयेतीदंदेवाः शृणुतेतिवावतदब्र
वीदग्निर्देवोहोतेतितयएवदेवानांतमवृणीततोदेवाः॥८॥अभवन्परासुरायस्यैवंविदुषः प्रवरंप्रवृ
णतेभवत्यात्मनापरास्यभ्रातृव्योभवतियद्ब्राह्मणश्चाब्राह्मणश्चप्रश्नमेयातांब्राह्मणायाधिब्रूया
यद्ब्राह्मणायाध्याहात्मनेध्याहयद्ब्राह्मणंपराहात्मानंपराहतस्माद्ब्राह्मणोनपरोच्यः॥९॥वा
आरण्याᳪश्चावरुन्धेयोपशुभिः सोब्रवीद्दक्षिणार्धंत्रयद्रवध्रुवादेवाश्चत्वारिᳪशच्च॥११॥ ॥आ

युष्वआयुर्दाअग्नआप्यायस्वसंतेवतेहेडउदुत्तमंअपोदिव्यानोदिवोअग्नाविष्णूअग्नाविष्णूइमंमेवरुणतत्
त्वायामिसुदुत्यंवित्रं।अपांनपादाह्यस्थादुपस्थंजिह्मानामूर्ध्वोविद्युतंवसानः॥तस्यज्येष्ठंमहिमानंवहं
तीर्हिरण्यवर्णाःपरियंतियह्वीः॥सं॥१॥अन्यायंत्युपयंत्यन्याःसमानमूर्वंनद्यःपृणंति।तमूशुचिं
शुचयोदीदिवांसमपांनपातंपरितस्थुरापः।तमस्मेरायुवतयोयुवानंमर्मृज्यमानाःपरियंत्यापः।सशु
क्रेणशिक्वनारेवदग्निर्दीदायानिध्मोघृतनिर्णिगप्सु।इंद्रावरुणयोरहंसम्राजोरवआवृणे।तानोमृ
डातईदृशे।इंद्रावरुणायुवमध्वरायनः॥२॥विशेजनायमहिशर्मयच्छतं।दीर्घप्रयज्युमतियोवनुष्यति
वयंजयेमपृतनासुदूढ्यः।आनोमित्रावरुणाप्रबाहवा।त्वंनोअग्नेवरुणस्यविद्वांदेवस्यहेडोवयासिसी
ष्ठाः।यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्।सत्वंनोअग्नेवमोभवोतीनेदिष्ठोअ
स्याउषसोव्युष्टौ।अवयक्ष्वनोवरुणं॥३॥रराणोवीहिमृडीकंसुहवोनएधि।प्रप्रायमग्निर्भरतस्यशृ

ण्वेवियत्त्सूर्योनरोचतेबृहद्भाः। अग्नियःपुरुस्पृतनासुतस्थौदीदायदैव्योअतिथिःशिवोनः। प्रतेयक्षिप्रत
इयर्मिमन्मभुवोयथावंद्योनोहवेषु। धन्वन्निवप्रपाअसित्वमग्नइयक्षवेपूरवेप्रत्नराजन्॥४॥ विपाज
साविज्योतिषा। सत्वमग्नेप्रतीकेनप्रत्योषयातुधान्यः। उरुक्षयेषुदीद्यत्। तꣳसुप्रतीकꣳसुदृशꣳस्वंच
मविद्वाꣳसोविदुष्टरꣳसपेम। सयक्षद्विश्वावयुनानिविद्वान्प्रहव्यमग्निरमृतेषुवोचत्। अꣳहोमुचे
विवेषयन्माविनइंद्रइंद्रक्षत्रमभिंद्रियाणिशतक्रतोनुतेदायि॥५॥ युक्ष्वीःसमर्यरायनोवरुणꣳराजꣳ
श्चतुश्चत्वारिꣳशच्च॥१२॥ ॥ विश्वरूपस्त्वेष्टंइंद्रंवृत्रंब्रह्मवादिनःसत्वैनासोमयाज्येषवैदेवरथोदेवावैनर्विना
यज्ञोग्नेमहात्रींनिवीतमायुष्टेद्वादश॥१२॥ ॥ विश्वरूपोनैनꣳश्रीतरूरावृधवसुपर्वैद्युवाजादूत्यग्नेम
हांनिवीतमन्यायंतिचतुःसप्ततिः॥७४॥ ॥ हरिःओम्॥ समिधोयजतिवसंतमेवर्तूनामवरुंधेतनून
पातंयजतिग्रीष्ममेवावरुंधइडोयजतिवर्षाएवावरुंधेबर्हिर्यजतिशरदमेवावरुंधेस्वाहाकारंयजतिहेमं

तमेवावरुंधेतस्मात्स्वाहाहुत्ताहेमन्पश्वोवसीदंतिसमिधोयजत्युषसएवदेवतानामवरुंधेतनूनपा
तंयजतियज्ञमेवावरुंधे॥१॥इडोयजतिपशूनेवावरुंधेबर्हिर्यजतिप्रजामेवावरुंधेसमानयतउपभृ
तस्तेजोवाआज्यंप्रजाबर्हिःप्रजास्वेवतेजोदधातिस्वाहाकारंयजतिवाचमेवावरुंधेदशसंपद्यंतेदशा।
क्षराविराडंनंविराड्विराजैवांनाद्यमवरुंधेसमिधोयजत्यस्मिंनेवलोकेप्रतितिष्ठतितनूनपातंयजति
॥२॥यज्ञएवांतरिक्षेप्रतितिष्ठतीडोयजतिपशुष्वेवप्रतितिष्ठतिबर्हिर्यजतियएवदेवयानाःपंथानः
स्तेष्वेवप्रतितिष्ठतिस्वाहाकारंयजतिसुवर्गएवलोकेप्रतितिष्ठत्येतावंतोवैदेवलोकास्तेष्वेवयथापूर्वं
प्रतितिष्ठतिदेवासुराएषुलोकेष्वस्पर्धंततेदेवाःप्रयाजैरेभ्योलोकेभ्योसुरान्प्राणुदंततत्प्रयाजानां॥
॥३॥प्रयाजत्वंयस्यैवंविदुषःप्रयाजाइज्यंतेप्रैभ्योलोकेभ्योभ्रातृव्यांनुदतेनिक्रामंजुहोत्यभिजित्यै
योवैप्रयाजानांमिथुनंवेदप्रप्रजयापशुभिर्मिथुनैर्जायतेसमिधोबह्वीरिवयजतितनूनपातमेकमि

वमिथुनंतदिडोबह्वीरिवयजतिबर्हिरेकमिवमिथुनंतद्वेतद्वैप्रयाजानांमिथुनंयएवंवेद॥४॥प्रजया
पशुभिर्मिथुनैर्जायतेदेवानांवाअनिष्टादेवताआसंनथासुरायज्ञमजिघांसंतेदेवागायत्रींव्यौहंपं
चाक्षराणिप्राचीनानित्रीणिप्रतीचीनानिततोवर्मयज्ञायाभवद्वर्मयजमानाययत्प्रयाजानूयाजाहू
ज्यंतेवर्मैवतद्यज्ञायक्रियतेवर्मयजमानायभ्रातृव्याभिभूत्यैतस्माद्वरूथंपुरस्ताद्वर्षीयःपश्चाद्ध्रसीयो
देवावैपुरारक्षोभ्यः॥५॥इतिस्वाहाकारेणप्रयाजेषुयज्ञꣳसꣳस्थाप्यमपश्यंतꣳस्वाहाकारेणप्रयाजेषु
समस्थापयन्निवाएतद्यज्ञंछिंदंतियत्स्वाहाकारेणप्रयाजेषुसꣳस्थापयंतिप्रयाजानिष्ट्वाहवीꣳष्यभिघा
रयतियज्ञस्यसंतत्याअथोहविरेवाकस्योन्यथापूर्वमुपैतिपितावैप्रयाजाःप्रयाजानूयाजायत्प्रयाजा
निष्ट्वाहवीꣳष्यभिघारयतिपितेवतत्पुत्रेणसाधारणं॥६॥कुरुतेतस्मादाहुर्यश्चैवंवेदयश्चनकथापुत्र
स्यकेवलंकथासाधारणंपितुरित्यस्कन्नमेवतद्यत्प्रयाजेष्विष्टेषुस्कंदतिगायत्र्येवतेनगर्भंधत्तेसाप्र

जांपशून्यजमानायप्रजनयति॥ ७॥ यज्ञमेवावरुंधेतनूनपातंयजतिप्रयाजानामेवंवेदप्ररसोभ्युःसा
धारणंपंचत्रिंशच्च॥१॥ ॥ चक्षुषीवाएतेयज्ञस्ययदाज्यभागौयदाज्यभागौयजतिचक्षुषीएवतद्यज्ञस्य
प्रतिदधातिपूर्वार्धेजुहोतितस्मात्पूर्वार्धेचक्षुषीप्रबाहुग्जुहोतितस्मात्प्रबाहुक्चक्षुषीदेवलोकंवाअग्नि
नायजमानोनुपश्यतिपितृलोकꣳसोमेनोत्तरार्धेग्नयेजुहोतिदक्षिणार्धेसोमायैवमिवहीमौलोकाव
नयोर्लोकयोरनुख्यात्यैराजानौवाएतौदेवतानां॥१॥ यदग्नीषोमावंतरादेवताइज्येतेदेवतानांविधृत्यै
तस्माद्राजामनुष्याविधृताब्रह्मवादिनोवदंतिकिंतद्यज्ञेयजमानःकुरुतेयेनान्यतोदतश्चपशून्दाधारो
भयतोदतश्चेत्यृचमनूच्याज्यभागस्यजुषाणेनयजतितेनान्यतोदतोदाधारर्चमनूच्यहविषऋचाय
जतितेनोभयतोदतोदाधारमूर्धन्वतीपुरोनुवाक्याभवतिमूर्धानमेवैनꣳसमानानांकरोति॥२॥ नि
युत्वत्यायजतिभ्रातृव्यस्यैवपशून्नियुवतेकेशिनꣳहदार्भ्यंकेशीसात्यकामिरुवाचसप्तपदांतेशाक

रीः श्रेयोयुङ्क्तेप्रयोक्तासेयस्यैवीर्येणप्रजातान्भ्रातृव्यान्नुदतेप्रतिजनिष्यमाणान्यस्यैवीर्येणोभयोर्लो
कयोर्ज्योतिर्धत्तेयस्यैवीर्येणपूर्वार्धेनानड्वान्भुनक्तिजघनार्धेनधेनुरितिपुरस्ताल्लक्ष्मापुरोनुवाक्याभ
वतिजातानेवभ्रातृव्यान्प्रणुदतउपरिष्टाल्लक्ष्मा॥३॥याज्याजनिष्यमाणानेवप्रतिनुदतेपुरस्ताल्लक्ष्मा
पुरोनुवाक्याभवत्यस्मिन्नेवलोकेज्योतिर्धत्तउपरिष्टाल्लक्ष्मायाज्यामुष्मिन्नेवलोकेज्योतिर्धत्तेज्योति
ष्मंतावस्माइमौलोकौभवतोयएवंवेदपुरस्ताल्लक्ष्मापुरोनुवाक्याभवतितस्मात्पूर्वार्धेनानड्वान्भुनक्त्यु
परिष्टाल्लक्ष्मायाज्यातस्माज्जघनार्धेनधेनुर्यएवंवेदभुंक्तएनमेतौवज्रआज्यंवज्रआज्यभागौ॥४॥
वज्रोवषट्कारास्थिरतमेववज्रꣳसंभृत्यभ्रातृव्यायप्रहरत्यच्छंबट्कारमपगूर्यवषट्करोतिस्तृत्यैगाय
त्रीपुरोनुवाक्याभवतित्रिष्टुब्याज्याब्रह्मणैवक्षत्रमन्वारंभयतितस्माद्ब्राह्मणोमुख्योमुख्योभवतिय
एवंवेदप्रैवैनंपुरोनुवाक्ययाहुप्रणयतियाज्ययागमयतिवषट्कारेणैवैनंपुरोनुवाक्यया दत्तेप्रयच्छ

तियाज्ययाप्रति॥५॥वषङ्कारेणास्थापयतित्रिपदापुरोनुवाक्याभवतित्रयइमेलोकाएष्वेवलोकेषुप्रति
तिष्ठतिचतुष्पदायाज्याचतुष्पदएवपशूनवरुंधेद्व्यक्षरोवषङ्कारोद्विपाद्यजमानःपशुष्वेवोपरिष्टात्प्रति
तिष्ठतिगायत्रीपुरोनुवाक्याभवतित्रिष्टुग्याज्यैषावैसप्तपदाशक्वरीयद्वाएतयादेवाअशिक्षंस्तदशक्नु
वन्यएवंवेदशक्नोत्येवयच्छिक्षति॥६॥देवतानांकरोत्युपरिष्टाल्लक्ष्माज्यभागौप्रतिशक्नोत्येवद्वेच॥२॥ ॥
प्रजापतिर्देवेभ्योयज्ञान्व्यादिशत्सआत्मंनाज्यमधत्ततंदेवाअब्रुवंनेषवावयज्ञोयदाज्यमप्येवनोत्रास्त्वि
तिसोब्रवीद्यजान्वआज्यभागावुपस्तृणानभिघारयानितितस्माद्यजंत्याज्यभागावुपस्तृणंत्यभिघार
यंतिब्रह्मवादिनोवदंतिकस्मात्सत्याद्यातयामान्यन्यानिहवींष्ययातयाममाज्यमितिप्राजापत्यं॥१॥
इतिब्रूयादयातयामाहिदेवानांप्रजापतिरितिछंदांसिदेवेभ्योपाक्रामंनवोभागानिहव्यंवक्ष्यामइति
तेभ्यएतच्चतुरवत्तमधारयन्पुरोनुवाक्यायैयाज्यायैदेवतायैवषङ्काराययच्चतुरवत्तंजुहोतिछंदांस्य

वतत्रीणातितान्यस्यप्रीतानिदेवेभ्योहव्यंवहंत्यंगिरसोवाइतउत्तमाः सुवर्गंलोकमायंतदृषयोयज्ञवास्त्वभ्यवा
यंते॥२॥अपश्यन्पुरोडाशंकूर्मंभूतꣳसर्पंतंतमब्रुवन्निंद्रायध्रियस्वबृहस्पतयेध्रियस्वविश्वेभ्योदेवेभ्योध्रि
यस्वेतिसनाध्रियततमब्रुवन्नग्नयेध्रियस्वेतिसोग्नयेध्रियततयदाग्नेयोष्टाकपालोमावास्यायांचपौर्णमा
स्यांचाच्युतोभवतिसुवर्गस्यलोकस्याभिजित्यैतमब्रुवन्कथादास्थाइत्यनुपाक्तोऽभवमित्यब्रवीद्यथाक्षोनु
पाक्तः॥३॥अवार्छत्येवमवारमित्युपरिष्टादभ्यज्याधस्तादुपानक्तिसुवर्गस्यलोकस्यसमष्ट्यैसर्वाणिकपा
लान्यभिप्रथयतितावतःपुरोडाशानमुष्मिंल्लोकेभिजयतियोविदग्धःसनैर्ऋतोयोशृतःसरौद्रोयःशृतः
ससदेवस्तस्मादविदहताशृतंकृत्यःसदेवत्वायभस्मनाभिवासयतितस्मान्माꣳसेनास्थिछन्नंवेदेनाभिवा
सयतितस्मात्॥४॥केशैःशिरःछन्नंप्रच्युतंवाएतदस्माल्लोकादगतंदेवलोकंयच्छृतꣳहविरनभिघारितम
भिघार्योद्वासयतिदेवत्रैवैनद्गमयतियद्येकंकपालंनश्येदेकोमासःसंवत्सरस्यानवेतस्यादथयजमानः

प्रमीयेतयद्वेनन्नयेतांद्वौमासौसंवत्सरस्यानेतोस्यातामथयजमानःप्रमीयेतसंख्यायोद्वासयतियजमा
नस्य॥५॥गोपीथायायदिनन्नयेदाश्विनंद्विकपालंनिर्वपेद्यावापृथिव्यमेककपालमश्विनौवैदेवानांभिषजौ
ताभ्यामेवास्मैभेषजंकरोतिद्यावापृथिव्यएककपालोभवत्यनयोर्वाएतंनश्यतियन्नन्नयत्यनयोरेवैनंविंद
तिप्रतिष्ठित्यै॥६॥प्राजापत्यंतेक्षोनुपाक्तोवेदेनाभिवासयतितस्माद्यजमानस्युद्धात्रिंःशाञ्च॥७॥ ॥देव
स्यत्वासवितुःसैप्रेवद्रुतिस्फ्यमादत्तेप्रसूत्याअश्विनोर्बाहुभ्यामित्याहाश्विनौहिदेवानामध्वर्यूआस्तांपू
ष्णोहस्ताभ्यामित्याहयत्यैशतभृष्टिरसिवानस्पत्योद्विषतोवधइत्याहवज्रमेवतत्संश्यतिभ्रातृव्यायप्र
हरिष्यन्स्तंबयजुर्हरत्येतावतीवैपृथिवीयावतीवेदिस्तस्याएतावतएवभ्रातृव्यंनिर्भजति॥१॥तस्मान्नाभा
गंनिर्भजंतित्रिर्हरतित्रयइमेलोकाएभ्यएवैनंलोकेभ्योनिर्भजतितूष्णींचतुर्थं[illegible]त्यपरिमितादेवैनंनिर्भ
जत्युद्धंतियदेवास्याअमेध्यंतदपहंत्युद्धंतितस्मादोषधयःपराभवंतिमूलंछिनत्तिभ्रातृव्यस्यैवमूलंछिन

त्तिपितृदेवत्यातिखातेयतींखनत्तिप्रजापतिना॥२॥यज्ञमुखेनसंमितामाप्रतिष्ठायैखनतियजमानमेवप्र
तिष्ठांगमयतिदक्षिणतोवर्षीयसींकरोतिदेवयजनस्यैवरूपमकःपुरीषवतींकरोतिप्रजावैपशवःपुरीषंप्रज
यैवैनंपशुभिःपुरीषवंतंकरोत्युत्तरंपरिग्राहंपरिगृह्णात्येतावतीवैपृथिवीयावतीवेदिस्तस्याएतावतएवभ्रा
तृव्यंनिर्भज्यात्मनउत्तरंपरिग्राहंपरिगृह्णातिक्रूरमिववै॥३॥एतत्करोतियद्वेदिंकरोतिधाअसिखधाअ
सीतियोसुप्यतेशांत्यैप्रोक्षणीरासादयत्यापोवैरक्षोघ्नीर्भपहत्यैस्फ्यस्यवर्त्मन्सादयतियज्ञस्यसंतत्यै
यंद्विष्यात्तंध्यायेच्छुचैवैनमर्पयति॥४॥मज्ञातिप्रजापतिने×रक्षसा×वैवैत्रयस्त्रिꣳशच्च॥४॥ ॥ब्रह्मवादि
नोवदंत्यद्भिर्हवीꣳषिप्रौक्षीःकेनापइतिब्रह्मणेतिब्रूयादद्भिर्ह्येवहवीꣳषिप्रोक्षतिब्रह्मणापइध्माबर्हिःप्रो
क्षतिमेध्यमेवैनत्करोतिवेदिंप्रोक्षत्यृक्षावाएषालोमकामेध्यायद्वेदिर्मेध्यामेवैनांकरोतिदिवेत्वांतरिक्षाय
त्वापृथिव्यैत्वेतिबर्हिरासाद्यप्र॥१॥उक्षत्येभ्यएवैनल्लोकेभ्यःप्रोक्षतिक्रूरमिववाएतत्करोतियत्खनत्यपोनि

नयतिशांत्यैपुरस्तात्प्रस्तरंगृह्णातिमुख्यमेवैनंकरोतियंतंगृह्णातिप्रजापतिनायज्ञमुखेनसंमितंबर्हिस्तृणा
तिप्रजावैबर्हिःपृथिवीवेदिःप्रजाएवपृथिव्यांप्रतिष्ठापयत्यनतिदृश्नꣳस्तृणातिप्रजयैवैनंपशुभिरनतिदृ
श्नंकरोति॥२॥उत्तरंबर्हिषःप्रस्तरꣳसादयतिप्रजावैबर्हिर्यजमानःप्रस्तरोयजमानमेवायजमानादुत्त
रंकरोतितस्माद्यजमानोयजमानादुत्तरोंतर्दधातिव्यावृत्त्याअनक्तिहविष्कृतमेवैनꣳसुवर्गंलोकंगमय
तित्रेधानक्तित्रयइमेलोकाएभ्यएवैनंलोकेभ्योनक्तिनप्रतिशृणातियत्प्रतिशृणीयादनूर्ध्वभावुकंयज
स्यसू८ मानस्यस्यादुपरीवप्रहरति॥३॥उपरीवहिसुवर्गोलोकोनियच्छतिवृष्टिमेवास्मैनियच्छतिनात्यग्रंप्रहरेद्यद
त्यग्रंप्रहरेदत्यासारिण्यध्वर्योर्नाशुकास्यान्नपुरस्तात्प्रत्यस्येद्यत्पुरस्तात्प्रत्यस्येत्सुवर्गालोकाद्यजमा
नंप्रतिनुदेत्प्रांचंप्रहरतियजमानमेवसुवर्गंलोकंगमयतिनविष्वंचंवियुयाद्यद्विष्वंचंवियुयात्॥४॥
स्त्र्यस्यजायेतोर्ध्वमुद्यौत्यूर्ध्वमिवहिपुꣳसःपुमानेवास्यजायतेयत्स्फ्येनवोपवेषेणवायोयुप्येतस्तृतिरे

वास्यसाव्हस्तेनयोयुप्यंतेयजमानस्यगोपीथायब्रह्मवादिनोवदंतिकिंयज्ञस्ययजमानइतिप्रस्तरइतितस्य
क्वसुवर्गोलोकइत्याहवनीयइतिब्रूयाद्यत्प्रस्तरमाहवनीयेप्रहरतियजमानमेव॥५॥सुवर्गंलोकंगमय
तिविवाएतद्यजमानोलिशतेयत्प्रस्तरंयोयुप्यंतेबर्हिरनुप्रहरतिशांत्याअनारंभणइववाएतर्हिध्व
र्युःसईश्वरोवेपनोभवितोर्ध्रुवासीतीमामभिमृशतीयंवैध्रुवास्यामेवप्रतितिष्ठतिनवेपनोभवत्य
गा३नग्नीदित्याहयद्ब्रूयादगन्नग्निरित्यग्नावग्निंगमयेन्निर्यजमानꣳसुवर्गाल्लोकाद्गच्छेदगन्नित्ये
वब्रूयाद्यजमानमेवसुवर्गंलोकंगमयति॥६॥आसाद्यप्रानतिदृश्मंकरोतिहरतिविसुयाद्यजमान
मेवाग्निरितिसप्तदशाच॥५॥ ॥अग्नेस्त्रयोज्यायाꣳसोभ्रातरआसंतेदेवेभ्योहव्यंवहंतःप्रामीयंतसो
ग्निरबिभेदित्थंवावस्यआर्तिमारिष्यतीतिसनिलायतसोपःप्राविशत्तंदेवताःप्रैषमैच्छंतंमत्स्यःप्रा
ब्रवीत्तमशपद्धियाधियात्वावध्यासुर्योमाप्रावोचइतितस्मान्मत्स्यंधियाधियाघ्नंतिशप्तः॥१॥द्वि

तमन्वविंदंतमब्रुवन्नुपन आवर्तस्वहव्यंनोवहेतिसोब्रवीद्वरंवृणैयदेवगृहीतस्याहुतस्यबहिःपरिधिस्कं
दात्तन्मेभ्रातॄणांभागधेयमसदितितस्माद्यद्गृहीतस्याहुतस्यबहिःपरिधिस्कंदतितेषांतद्भागधेयं
तानेवतेनप्रीणातिपरिधीन्परिदधातिरक्षसामपहत्यैसꣳस्पर्शयति ॥ २ ॥ रक्षसामनन्ववचारायन
पुरस्तात्परिदधात्यादित्योह्येवोद्यन्पुरस्ताद्रक्षाꣳस्यपहंत्यूर्ध्वेसमिधावादधात्युपरिष्टादेवरक्षाꣳस्य
पहंतियजुषान्यांतूष्णीमन्यांमिथुनत्वायद्वेआदधातिद्विपाद्यजमानःप्रतिष्ठित्यैब्रह्मवादिनोवदंति
सत्वैयजेतयोयज्ञस्यार्त्यावसीयान्स्यादितिभूपतयेस्वाहाभुवनपतयेस्वाहाभूतानां ॥ ३ ॥ पतयेस्वा
हेतिस्कन्नमनुमंत्रयेतयज्ञस्यैवतदार्त्यायजमानोवसीयान्भवतिभूयसीर्हिदेवताःप्रीणातिजामि
वाएतद्यज्ञस्यक्रियतेयदन्वंचौपुरोडाशावुपाꣳशुयाजमंतरायजत्यजामित्वायाथोमिथुनत्वायाग्निर
मुष्मिंल्लोकआसीद्यमोस्मिंतेदेवाअब्रुवन्नेतेमौविपर्यूहामेत्यन्नाद्येनदेवाअग्निं ॥ ४ ॥ उपामंत्रयंत

राज्येनपितरोयुमंतस्मादग्निर्देवानामंनादोयमःपितृणाꣳराजायएवंवेदप्रराज्यमंनाद्यमाप्नोतितस्मा
एतद्भागधेयंप्रायच्छन्यदग्नयेस्विष्टकृतेवद्यंतियदग्नयेस्विष्टकृतेवद्यतिभागधेयेनैवतद्रुद्रꣳसमर्धय
तिसकृत्सकृदवद्यतिसकृदिवहिरुद्रउत्तरार्धादवद्यत्येषावैरुद्रस्य॥५॥दिक्स्वायामेवदिशिरुद्रंनिर
वदयतेद्विरभिघारयतिचतुरवत्तस्याप्त्यैपशवोवैपूर्वाआहुतयएषरुद्रोयदग्निर्यत्पूर्वाआहुतीरभि
जुहुयाद्रुद्रायपशूनपिदध्यादपशुर्यजमानस्यादतिहायपूर्वाआहुतीर्जुहोतिपशूनांगोपीथाय॥६॥
शाप्तस्पर्द्धयतिभूतानामग्निꣳरुद्रस्यसप्तत्रिꣳशच्च॥६॥ ॥मनुःपृथिव्यायज्ञियमैच्छत्सघृतंनिषिक्त
मविंदत्सोब्रवीत्कोस्येश्वरोयज्ञेपिकर्तोरितितावब्रूतांमित्रावरुणौगोरेवावमीश्वरौकर्तौस्वइतितौततो
गाꣳसमैरयताꣳसायत्रयत्रन्यक्रामत्ततोघृतमपीड्यततस्माद्घृतपद्युच्यतेतदस्यैजन्मोपहूतꣳर
थंतरꣳसहपृथिव्येत्याह॥१॥इयंवैरथंतरमिमामेवसहान्नाद्येनोपह्वयतउपहूतंवामदेव्यꣳसहांतरि

क्षेणेत्याहपशवोवैवामदेव्यंपशूनेवसहांतरिक्षेणोपह्वयतउपहूतंबृहत्सहदिवेत्याहैरंवैबृहदिरामे
वसहदिवोपह्वयतउपहूताःसप्तहोत्राइत्याहहोत्राएवोपह्वयतउपहूताधेनुः॥२॥सहर्षभेत्याहमि
थुनमेवोपह्वयतउपहूतोभक्षःसखेत्याहसोमपीथमेवोपह्वयतउपहूता३होइत्याहात्मानमेवोप
ह्वयतआत्माह्युपहूतानांवसिष्ठइडामुपह्वयतेपशवोवाइडापशूनेवोपह्वयतेचतुरुपह्वयतेचतुष्पा
दोहिपशवोमानवीत्याहमनुर्ह्येतां॥३॥अग्रेपश्यद्घृतपदीत्याहयदेवास्यैपदाद्घृतमपीड्यततस्मा
देवमाहमैत्रावरुणीत्याहमित्रावरुणौह्येनाꣳसमैरयतांब्रह्मदेवकृतमुपहूतमित्याहब्रह्मैवोप
ह्वयतेदैव्याअध्वर्यवउपहूताउपहूतामनुष्याइत्याहदेवमनुष्यानेवोपह्वयतेयइमंयज्ञमवान्येय
ज्ञपतिंवर्धानित्याह॥४॥यज्ञायचैवयजमानायचाशिषमाशास्तउपहूतेद्यावापृथिवीइत्याहद्या
वापृथिवीएवोपह्वयतेपूर्वजेऋतावरीइत्याहपूर्वजेह्येतेऋतावरीदेवीदेवपुत्रेइत्याहदेवीह्येतेदेवपुत्रे

सं·द्वि
६२

उपहूतोयंयजमानइत्याहयजमानमेवोपह्वयतउत्तरस्यांदेवयज्यायामुपहूतोभूयसिहविष्करणउपहूतो
दिव्येधामन्नुपहूतः॥५॥इत्याहप्रजावाउत्तरादेवयज्यापशवोभूयोहविष्करणꣳसुवर्गोलोकोदिव्यंधा
मेदमसीदमसीत्येवयज्ञस्यप्रियंधामोपह्वयतेविश्वमस्यप्रियमुपहूतमित्याहाछंबट्कारमेवोपह्वय
ते॥६॥आहुधेनुरेतांवर्धीनित्याहधामन्नुपहूतस्वतुस्त्रिꣳशाश्च॥७॥ ॥पशवोवाइडास्वयमादत्तेका
ममेवात्मनापशूनामादत्तेनह्यन्यःकामंपशूनांप्रयच्छतिवाचस्पतयेत्वाहुतंप्राश्नामीत्याहवाचमेवभा
गधेयेनप्रीणातिसदसस्पतयेत्वाहुतंप्राश्नामीत्याहस्वगाकृत्यैचतुरवत्तंभवतिहविर्वैचतुरवत्तंपश
वश्चतुर वत्तंयद्धोताप्राश्नीयाद्धोता॥१॥आर्तिमार्छेद्यदग्नौजुहुयाद्रुद्रायपशूनपिदध्यादपशुर्यज
मानस्याद्वाचस्पतयेत्वाहुतंप्राश्नामीत्याहपरोक्षमेवैनज्जुहोतिसदसस्पतयेत्वाहुतंप्राश्नामीत्याह
स्वगाकृत्यैप्राश्नंतितीर्थएवप्राश्नंतिदक्षिणांददातितीर्थएवदक्षिणांददातिविवाएतद्यज्ञं॥२॥छिं

राम
६२

दंतियन्मध्यतः प्राश्नंत्युद्भिर्मार्जयंतआपोवैसर्वादेवतादेवताभिरेवयज्ञꣳ संतन्वंतिदेवावैयज्ञाद्रुद्रमं
तरायंस्सयज्ञमविध्यत्तंदेवाअभिसमगछंतकल्पतांनइदमितितेब्रुवन्स्विष्टंवैनइदंभविष्यतियदि
मꣳराधयिष्यामइतितत्स्विष्टकृतःस्विष्टकृत्वंतस्याविधंनिः॥३॥अकृंतन्यवेनसंमितंतस्माद्यवमा
त्रमवद्येद्यज्ज्यायोवद्येद्रोपयेत्तद्यज्ञस्ययदुपस्तृणीयादभिघारयेदुभयतःसꣳश्वायिकुर्यादवदा
याभिघारयतिद्विःसंपद्यतेद्विपाद्यजमानःप्रतिष्ठित्यैयत्तिरश्चीनमतिहरेदनभिविद्धंयज्ञस्याभिवि
ध्येद्यदग्रेणपरिहरतितीर्थेनैवपरिहरतितत्पूष्णेपर्यहरंतत्॥४॥पूषाप्राशयदतोऽरुणत्तस्मात्पूषाप्रपि
ष्टभागोदंतकोहितंदेवाअब्रुवन्विवाअयमार्ध्यप्राशित्रियोवाअयमभूदितितद्बृहस्पतयेपर्यहरन्त्सो
बिभेद्बृहस्पतिरित्थंवावस्याआर्तिमारिष्यतीतिसएतंमंत्रमपश्यत्सूर्यस्यत्वाचक्षुषाप्रतिपश्यामी
त्यब्रवीन्नहिसूर्यस्यचक्षुः॥५॥किंचनहिनस्तिसोऽबिभेत्प्रतिगृह्णंतंमाहिꣳसिष्यतीतिदेवस्यत्वा

सवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामीत्यब्रवीत्सवितृप्रसूतऽएवैनद्ब्रह्मणादेवताभिः
प्रत्यगृह्णात्सोबिभेत्प्राश्नंतंमाहिंसिष्यतीत्यग्नेस्त्वास्येनप्राश्नामीत्यब्रवीन्नह्यग्नेरास्यंकिंचनहि
नस्तिसोबिभेत्॥६॥प्राशितंमाहिंसिष्यतीतिब्राह्मणस्योदरेणेत्यब्रवीन्नहिब्राह्मणस्योदरंकिंच
नहिनस्तिबृहस्पतेर्ब्रह्मणेतिसहिब्रह्मिष्ठोपवाएतस्मात्प्राणाःक्रामंतियःप्राशित्रंप्राश्नात्यद्भिर्मा
र्जयित्वाप्राणांत्संमृशतेमृतंवैप्राणाअमृतमापःप्राणानेवयथास्थानमुपह्वयते॥७॥प्राश्नीयाद्वे
तायुक्तंनिरुहंतब्रह्मसुरास्यंकिंचनहिनस्तिसोबिभेच्चतुश्चत्वारिंशाद्व॥८॥ ॥अग्नीधुआदधात्यग्नि
मुखानेवर्तून्प्रीणातिसमिधमादधात्युत्तरासामाहुतीनांप्रतिष्ठित्याअथोसमिद्वत्येवजुहोतिपरिधीं
त्संमार्ष्टिपुनात्येवैनांत्सकृत्सकृत्संमार्ष्टिपराङिवह्येतर्हियज्ञश्चतुःसंपद्यतेचतुष्पादःपशवःपशू
नेवावरुंधेब्रह्मन्प्रस्थास्यामइत्याहात्रवाएतर्हियज्ञश्रितः॥९॥यत्रब्रह्मायत्रैवयज्ञश्रितःस्ततए

वेनुमारभंतेयद्धस्तेनप्रमीवेद्धपुनस्याद्यच्छीर्ष्णाशीर्षक्तिमांत्स्याद्यत्तूष्णीमासीतासंप्रत्तोयज्ञस्यात्यति
ष्ठेत्येवब्रूयाद्धाविवैयज्ञश्रितायत्रैवयज्ञश्रितस्ततएवैनं संप्रयच्छति देवसवितरेतत्तेप्र॥२॥आहेत्या
हप्रसूत्यैबृहस्पतिर्ब्रह्मेत्याहसहिब्रह्मिष्ठःसयज्ञंपाहिसयज्ञपतिंपाहिसमांपाहीत्याहयज्ञायय
जमानायात्मनेतेभ्यएवाशिषमाशास्तेनार्त्याआश्राव्याहदेवान्यजेतिब्रह्मवादिनोवदंतीष्टादेवता
अथकतमएतेदेवाइतिछंदांसीतिब्रूयाद्गायत्रींत्रिष्टुभं॥३॥जगतीमित्यथोखल्वाहुर्ब्राह्मणावैछं
दांसीतितानेवतद्यजतिदेवानांवाइष्टादेवताआसंनथाग्निर्नोदज्वलत्तंदेवाआहुतीभिरनूयाजेष्व
न्वविंदंयदनूयाजान्यजत्यग्निमेवतत्समिंधएतदुवैनामासुरआसीत्सएतर्हियज्ञस्याशिषमवृं
क्तयद्ब्रूयादेतत्॥४॥उद्द्यावापृथिवीभद्रमभूदित्येतदुमेवासुरंयज्ञस्याशिषंगमयेदिदंद्यावापृथि
वीभद्रमभूदित्येवब्रूयाद्यजमानमेवयज्ञस्याशिषंगमयत्यार्ध्मसूक्तवाकमुतनमोवाकमित्याह

दमरात्स्मेतिवावैतदाहोपश्रितोदिवःपृथिव्योरित्याहद्यावापृथिव्योर्ह्ययज्ञउपश्रितओमन्वतीतेस्मिन्य
ज्ञेयजमानद्यावापृथिवी॥५॥स्तामित्याहाशिषमेवैतामाशास्तेयद्ब्रूयात्सूपावसानाचस्वध्यवसाना
चेतिप्रमायुकोयजमानस्याद्यदाहिप्रमीयतेथेमामुपावस्यतिसूपचरणाचस्वधिचरणाचेत्येवब्रूया
द्वरीयसीमेवास्मैगव्यूतिमाशास्तेनप्रमायुकोभवतितयोराविद्यग्निरिदꣳहविरजुषतेत्याहयाअया
क्ष्म॥६॥देवतास्ताअरीरधामेतिवावैतदाहयंननिर्दिशेत्प्रतिवेशंयज्ञस्याशीर्गच्छेदाशास्तेयंयजमानोसा
वित्याहनिर्दिश्यैवैनꣳसुवर्गंलोकंगमयत्यायुराशास्तेसुप्रजास्त्वमाशास्तइत्याहाशिषमेवैतामाशा
स्तेसजातवनस्यामाशास्तइत्याहप्राणावैसजाताःप्राणानेव॥७॥नांतरेतितदग्निर्दैवोदेवेभ्योवनते
वयमग्नेर्मानुषाइत्याहाग्निर्देवेभ्योवनुतेवयंमनुष्येभ्यइतिवावैतदाहेहगतिर्वामस्येदंचनमोदेवेभ्य
इत्याहयाश्चैवदेवतायजतियाश्चनताभ्यएवोभभ्योनमस्करोत्यात्मनोनार्त्यै॥८॥श्रितस्तेप्रत्रिष्टुभे

यी

मेतद्यावापृथिवीयाअयाक्ष्मप्राणानेवषट्त्वत्वारिꣳशञ्च ॥९॥ ॥देवावैयज्ञस्यस्वगाकर्तारंनाविंदंतेशं
युंबार्हस्पत्यमब्रुवन्निमंनोयज्ञꣳस्वगाकुर्वितिसोब्रवीद्वरंवृणैयदेवाब्राह्मणोक्तोश्रद्दधानोयजातै
सामेयज्ञस्याशीरसदितितस्माद्यदब्राह्मणोक्तोश्रद्दधानोयजतेशंयुमेवतस्यबार्हस्पत्यंयज्ञस्याशी
र्गच्छत्येतन्ममेत्यब्रवीत्किंमेप्रजायाः ॥१॥ इतियोपगुरातैतꣳशतेनयातयाद्योनिहनत्सहस्रेणयातया
द्योलोहितंकरवद्यावतःप्रस्कद्यपाꣳसून्संगृह्णात्तावतःसंवत्सरान्पितृलोकंनप्रजानादितितस्माद्ब्रा
ह्मणायनापगुरेतननिहन्यान्नलोहितंकुर्यादेतावताहैनसाभवतितच्छंयोरावृणीमहइत्याहयज्ञमेवत
त्स्वगाकरोतितत् ॥२॥ तच्छंयोरावृणीमहइत्याहशंयुमेवबार्हस्पत्यंभागधेयेनसमर्धयतिगातुंयज्ञा
यगातुंयज्ञपतयइत्याहाशिषमेवैतामाशास्तेसोमंयजतिरेतएवतद्दधातित्वष्टारंयजतिरेतएवहितं
त्वष्टारूपाणिविकरोतिदेवानांपत्नीर्यजतिमिथुनत्वायाग्निंगृहपतिंयजतिप्रतिष्ठित्यैजामिवाएत

सं॰द्वि॰
६९

यज्ञस्यक्रियते॥३॥ यदाज्येनप्रयाजाइज्यंतआज्येनपत्नीसंयाजाऋचमनूच्यपत्नीसंयाजानामृ
चायजत्यजामित्वायाथोमिथुनत्वायपंक्तिप्रायणोवैयज्ञःपंक्त्युदयनःपंचप्रयाजाइज्यंतेचत्वारः
पत्नीसंयाजाःसमिष्टयजुःपंचमंपंक्तिमेवानुप्रयंतिपंक्तिमनूद्यंति॥४॥ प्रयाजाःकरोति तत्क्रिय
तेत्वमस्त्रिँशच्चाज्ञ॥१०॥ ॥ युक्ष्वाहिदेवहूतमाँ अश्वाँ अग्नेरथीरिव॥ निहोतापूर्व्यःसदः॥ उतनो
देवदेवाँ अच्छावोचोविदुष्टरः॥ श्रद्विश्वावार्याकृधि॥ त्वँ हयद्यविष्ठ्यसहसःसूनवाहुत॥ ऋतावा
यज्ञियोभुवः॥ अयमग्निःसहस्रिणोवाजस्यशतिनस्पतिः॥ मूर्धाकवीरयीणां॥ तंनेमिमृभवोय
थानमस्वसहूतिभिः॥ नेदीयोयज्ञं॥१॥ अंगिरः॥ तस्मैनूनमभिद्यवेवाचाविरूपनित्यया॥ वृष्णेचोद
स्वसुष्टुतिं॥ कमुष्विदस्यसेनयाग्नेरपाकचक्षसः॥ पणिंगोषुस्तरामहे॥ मानोदेवानांविशःप्रस्नातीरि
वोस्राः॥ कृशंनहासुरघ्नियाः॥ मानःसमस्यदूढ्यःपरिद्वेषसोअंहतिः॥ ऊर्मिर्ननावमावधीत्॥ न

राम
६९

मस्तेअग्नओजसेगृणंतिदेवकृष्टयः॥ अमैः॥ २॥ अमित्रमर्दय॥ कुवित्सुनोगविष्टयेग्नेसंवेषिषोरयिं॥
उरुकृदुरुणस्कृधि॥ मानोअस्मिन्महाधनेपराक्वर्भारभृद्यथा॥ संवर्गꣳ सꣳरयिंजय॥ अन्यमस्म
द्भियाइयमग्नेसिषक्तुदुछुना॥ वर्धानोअमवच्छवः॥ यस्याजुषंनमस्विनः शमीमदुर्मखस्यवा॥ तंघे
दग्निर्वृधावति॥ परस्याअधि॥ ३॥ संवतोवराꣳ अभ्यातर॥ यत्राहमस्मिताꣳ अव॥ विद्माहितेपुराव
यमग्नेपितुर्यथावसः॥ अधातेसुम्नमीमहे॥ यउग्रइवशर्यहातिग्मशृंगोनवꣳसगः॥ अग्नेपुरोरुरोजि
थ॥ सखायःसंवःसम्यंचमिषꣳस्तोमंचाग्नये॥ वर्षिष्ठायक्षितीनामूर्जोनप्त्रेसहस्वते॥ सꣳसमिद्यु
वसेवृषन्नग्नेविश्वान्यर्यआ॥ इडस्पदेसमिध्यसेसनोवसून्याभर॥ प्रजापतेसवेदसोमापूषणेमोद
वो॥ ४॥ युञ्जमभैरधिवृषन्लेकानविꣳशतिश्च॥ ११॥ ॥ उशंतस्त्वाहवामहउशंतःसमिधीमहि॥
उशन्नुशतआवहपितॄन्हविषेअत्तवे॥ त्वꣳसोमप्रचिकितोमनीषात्वꣳरजिष्ठमनुनेषिपंथां॥ तव

प्रणीतीपितरोनइंदोदेवेषुरत्नमभजंतधीराः॥ त्वयाहिनःपितरःसोमपूर्वेकर्माणिचक्रुःपवमानधीराः॥
वन्वंनवातःपरिधीꣳ॒रपोर्णुवीरेभिरश्वैर्मघवाभव॥१॥नः॥ त्वꣳ॒सोमपितृभिःसंविदानोनुद्यावापृथिवी
आततंथ॥ तस्मैतइंदोहविषाविधेमवयꣳ॒स्यामपतयोरयीणां॥ अग्निष्वात्ताःपितरएहगच्छतसदःसदः
सदतसुप्रणीतयः॥ अत्ताहवीꣳ॒षिप्रयतानिबर्हिष्यथारयिꣳ॒सर्ववीरंदधातन॥ बर्हिषदःपितरऊत्यर्वागि
मावोहव्याचकृमाजुषध्वं॥ तआगतावसाशंतमेनाथास्मभ्यं॥२॥ शंयोररपोदधात॥ आहंपितृन्सुविद
त्राꣳ॒अविवित्सिनपातंचविक्रमणंचविष्णोः॥ बर्हिषदोयेस्वधयासुतस्यभजंतपित्वस्तइहागमिष्ठाः॥ उप
हूताःपितरःसोम्यासोबर्हिष्येषुनिधिषुप्रियेषु॥ तआगमंतुतइहश्रुवंत्वधिब्रुवंतुतेवंत्वस्मान्॥ उदीर
तामवरउत्परासउन्मध्यमाःपितरःसोम्यासः॥ असुं॥३॥ यईयुरवृकाऋतज्ञास्तेनोवंतुपितरोहवेषु॥
इदंपितृभ्योनमोअस्त्वद्ययेपूर्वासोयउपरासईयुः॥ येपार्थिवेरजस्यानिषत्तायेवानूनꣳ॒सुवृजनासुवि

क्षु॥अधायथानःपितरःपरासःप्रत्नासोअग्नऋतमाशुषाणाः॥शुचीदयंदीधितिमुक्थशासःक्षामाभिं
दंतोअरुणीरपव्रन्॥ यदग्ने॥४॥ कव्यवाहनपितॄन्यक्ष्यृताँवृधः॥ प्रचहव्यानिवक्ष्यसिदेवेभ्यश्चपितृभ्य
आ॥ त्वमग्नईडितोजातवेदोवाड्ढव्यानिसुरभीणिकृत्वा॥ प्रादाःपितृभ्यःस्वधयातेअक्षंनद्धित्वंदेव
प्रयताहवींषि॥ मातलीकव्यैर्यमोअंगिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः॥ यांश्चदेवावावृधुर्येच
देवान्स्वाहान्येस्वधयान्येमदंति॥५॥ इमंयमप्रस्तरमाहिसीदांगिरोभिःपितृभिःसंविदानः॥ आत्वा
मंत्राःकविशस्तावहंत्वेनाराजन्हविषामादयस्व॥ अंगिरोभिरागहियज्ञियेभिर्यमवैरूपैरिहमादयस्व॥
विवस्वंतंहुवेयःपितातेस्मिन्यज्ञेबर्हिष्यानिषद्य॥ अंगिरसोनःपितरोनवग्वाअथर्वाणोभृगवःसो
म्यासः॥ तेषांवयंसुमतौयज्ञियानामपिभद्रेसौमनसेस्याम॥६॥ भवास्मभ्यमसुंयदग्नेमदंतिसो
मनसएकैव॥१२॥ ॥ समिधश्चस्रुषीप्रजापतिराज्यंदेवस्यस्फ्यंब्रह्मवादिनोङ्गिरग्नेस्त्रयोमनुःपथि

सं·ह्नि
६७

व्याः पुराावोग्नीधेदेवावैपुरुस्वोशांतस्त्वाद्वादश ॥१२॥ ॥ समिधौयाज्यातस्मान्नाभागः हितमन्वित्याहस्र
जावाउत्तराआहेत्याहपुरुस्वसप्ततिः ॥७०॥ ॥ हरिः ओम् ॥ ॥ शाके १६९२ विकृतिनामसंवत्सरेज्येष्ठ
शुद्धसप्तमिगुरुवासरेइदंपुस्तकंसमाप्तं ॥ ॥ भग्नपृष्ठिकटिग्रीवस्तब्धदृष्टिरधोमुखं ॥ कष्टेनलिखितं
ग्रंथंयत्नेनप्रतिपालयेत् ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥

राम
६७

R.A.Joshi.

सं।द्वि
६८

इतिसंहिताद्वितीयाष्टकसमाप्तः॥

राम
६८

अथतृतीयाष्टकसंहिताप्रारंभः॥

सं·त·
१

श्रीगणेशायनमः॥ हरिः ओम्॥ ॥प्रजापतिरकामयतप्रजाः सृजेयेतिसतपोतप्यतससर्पानसृज
तसोकामयतप्रजाः सृजेयेतिसद्वितीयमतप्यतसवयां[illegible]सृजतसोकामयतप्रजाः सृजेयेतिसतृ
तीयमतप्यतसएतंदीक्षितवादमपश्यत्तमवदत्ततोवैसप्रजाअसृजतयत्तपस्तत्वादीक्षितवादंवद
तिप्रजाएवतद्यजमानः॥१॥ सृजतेयद्वैदीक्षितोमेध्यंपश्यत्यपास्माद्दीक्षाक्रामतिनीलमस्यहरो
ध्येत्यबद्धंमनोदरिद्रंचक्षुः सूर्योज्योतिषांश्रेष्ठोदीक्षेमामाहासीरित्याहनास्माद्दीक्षापक्रामतिना
स्यनीलंन्नहरोव्येतियद्वैदीक्षितमभिवर्षतिदिव्याआपोशांताओजोबलंदीक्षां॥२॥ तपोस्यनिर्घ्न
न्त्युंदतीर्बलंधत्तौजोधत्तबलंधत्तमामेदीक्षांमातपोनिर्वधिष्टेत्याहैतदेवसर्वमात्मंधत्तेनास्यौजोब
लंन्नदीक्षांन्नतपोनिर्घ्नंत्यग्निर्वैदीक्षितस्यदेवतासोस्मादेतर्हितिरइवयर्हियातितमीश्वरंरक्षां
सिहंताः॥३॥ भद्रादभिश्रेयःप्रेहिबृहस्पतिःपुरएताते अस्त्वित्याहब्रह्मवैदेवानांबृहस्पतिस्तमेवा

राम्
१

न्वारभंतेसएनꣳसंपारयत्येदमगन्मदेवयजनंपृथिव्याइत्याहदेवयजनꣳह्येषपृथिव्याआगच्छतियो
यजेतविश्वेदेवायदजुषंतपूर्वइत्याहविश्वेह्येतद्देवाजोषयंतेयद्ब्राह्मणाऋक्सामाभ्यांयजुषासंतरत
इत्याहऋक्सामाभ्याꣳह्येषयजुषासंतरतियोयजतेरायस्पोषेणसमिषामदेमेत्याहाशिषमेवैतामा
शास्ते॥४॥ यजमानोदीक्षाꣳदंतोब्राह्मणाश्चतुर्विꣳशतिश्च॥१॥ ॥एषतेगायत्रोभागइतिमेसोमा
यब्रूतादेषतेत्रैष्टुभोजागतोभागइतिमेसोमायब्रूताच्छंदोमानाꣳसाम्राज्यंगच्छेतिमेसोमायब्रूताद्यो
वैसोमꣳराजानꣳसाम्राज्यंलोकंगमयित्वाक्रीणातिगच्छतिस्वानाꣳसाम्राज्यंछंदाꣳसिखलुवैसोम
स्यराज्ञःसाम्राज्योलोकःपुरस्तात्सोमस्यक्रयादेवमभिमंत्रयेतसाम्राज्यमेव॥१॥ एनंलोकंगमयित्वा
क्रीणातिगच्छतिस्वानाꣳसाम्राज्यंयोवैतानूनप्त्रस्यप्रतिष्ठांवेदप्रत्येवतिष्ठतिब्रह्मवादिनोवदंतिन
प्राश्नंतिनजुह्वत्यथक्वतानूनप्त्रंप्रतितिष्ठतीतिप्रजापतौमनसीतिब्रूयात्त्रिरवजिघ्रेत्प्रजापतौत्वाम

सं.त.
२

नसिजुहोमीत्येषावैतान्नूनमस्यप्रतिष्ठायएवंवेदप्रत्येवतिष्ठतियः॥२॥वाअध्वर्योःप्रतिष्ठांवेदप्रत्येवप्रति
ष्ठतियतोमन्येततानभिक्रम्यहोष्यामीतितत्तिष्ठन्नाश्रावयेदेषावाअध्वर्योःप्रतिष्ठायएवंवेदप्रत्येवतिष्ठ
तियदभिक्रम्यजुहुयात्प्रतिष्ठायाइयात्तस्मात्समानत्रतिष्ठताहोतव्यंप्रतिष्ठित्यैयोवाअध्वर्योःस्वंवेदस्व
वानिवभवतिस्रुग्वाअस्यस्वंवायव्यमस्य॥३॥स्वंचमसोस्यस्वंयद्वायव्यंवाचमसंवानंन्वारभ्याश्रावये
त्स्वादियात्तस्मादन्वारभ्याश्राव्यंस्वादेवनैतियोवैसोममप्रतिष्ठाप्यस्तोत्रमुपाकरोत्यप्रतिष्ठितःसोमो
भवत्यप्रतिष्ठितस्तोमोऽप्रतिष्ठितान्युक्थान्यप्रतिष्ठितोयजमानोऽप्रतिष्ठितोऽध्वर्युर्वायव्यंवैसोमस्यप्रति
ष्ठाचमस्यैसोऽप्रतिष्ठासोमस्तोमस्यस्तोमउक्थानांग्रहंवागृहीत्वाचमसंवान्वीयस्तोत्रमुपाकुर्यात्प्रत्ये
वसोमंस्थापयतिप्रतिस्तोमंप्रत्युक्थानिप्रतियजमानस्तिष्ठतिप्रत्यध्वर्युः॥४॥एवतिष्ठतियोवावायव्य
मस्यग्रहंवैकान्नविंशतिश्च॥२॥ ॥यज्ञंवाएतत्संभरंतियत्सोमक्रयण्यैपदंयज्ञमुखंहविर्धानेय

राम
२

ह्निहविर्धानेप्राञ्चौप्रवर्तयेयुस्तर्हितेमाक्षमुपांश्याघज्ञमुखएवयज्ञमनुसंतनोतिप्राञ्चमग्निंप्रहरंस्तु
तल्लीमानयंत्यन्वनाः सिप्रवर्तयंत्यथयुवाजस्येषधिगृह्णियोहीयतेसोनुध्यायतिसईश्वरोरुद्रोभूत्वा ॥१॥
प्रजापशून्यजमानस्यशमयितोर्यर्हिपशुमाप्रीतमुदंचनयंतितर्हितस्यपशुश्रपणः हरेत्तेनैवेनंभा
गिनंकरोतियजमानोवाआहवनीयोयजमानंवाएतद्विकर्षतेयदाहवनीयात्पशुश्रपणःहरंतिसंवैव
स्यांन्निर्मथ्यंवाकुर्याद्यजमानस्यसात्मत्वायुयदिपशोरवदानंनक्रियेदाज्यस्यप्रत्याख्यायमवद्यत्सैव
ततःप्रायश्चित्तिर्यपशुंविमथ्नीरन्यस्तान्कामयेतार्तिमार्च्छेयुरितिकुविदंगेतिनमोवृक्तिवत्यर्चाग्नीध्रे
जुहुयान्नमोवृक्तिमेवैषांवृंक्तेताजगार्तिमार्छंति ॥२॥ भूत्वाततःषड्विःशतिश्च ॥३॥ ॥प्रजापतेर्जा
यमानाःप्रजाजाताश्चयाइमाः।तस्मैप्रतिप्रवेदयचिकित्वाः अनुमन्यतां।इमंपशुंपशुपतेतेअद्यब
ध्नाम्यग्नेसुकृतस्यमध्ये।अनुमन्यस्वसुयजायजामजुष्टंदेवानामिदमस्तुहव्यं।प्रजानंतःप्रतिगृह्ण

सं॰तै॰
३

तिहृर्वेप्राणमंगेभ्यःपर्याचरंतं।सुवर्गंयाहिपथिभिर्देवयानैरोषधीषुप्रतितिष्ठाशरीरैः॥येषामीशे॥१॥
पशुपतिःपशूनांचतुष्पदामुतचद्विपदां।निष्क्रीतोयंयज्ञियंभागमेतुरायस्पोषायजमानस्यसंतु।येब
ध्यमानमनुबध्यमानाअभ्यैक्षंतमनसाचक्षुषाच।अग्निस्ताꣳअग्रेप्रमुमोक्तुदेवःप्रजापतिःप्रजया
संविदानः।यआरण्याःपशवोविश्वरूपाविरूपाःसंतोबहुधैकरूपाः।वायुस्ताꣳअग्रेप्रमुमोक्तुदेवःप्र
जापतिःप्रजयासंविदानः।प्रमुंचमानाः॥२॥भुवनस्यरेतोगातुंधत्तयजमानायदेवाः।उपाकृतꣳशा
शमानंयदस्थाज्जीवंदेवानामप्येतुपाथः।नानाप्राणोयजमानस्यपशुनायज्ञोदेवेभिःसहदेवयानः।
जीवंदेवानामप्येतुपाथःसत्याःसंतुयजमानस्यकामाः।यत्पशुर्मायुमकृतोरोवापद्भिराहते।अग्निर्मा
तस्मादेनसोविश्वान्मुंचत्वꣳहसः।शमितारउपेतनयज्ञं॥३॥देवेभिरिन्वितं।पाशात्पशुंप्रमुंचतबं
धाद्यज्ञपतिंपरि।अदितिःपाशंप्रमुमोक्त्वेतन्नमःपशुभ्यःपशुपतयेकरोमि।अरातीयंतमधरंकृणो

राम
३

मियंद्विष्मस्तस्मिन्प्रतिमुंचामिपाशं।त्वामुतेदधिरेहव्यवाहंशृतंकर्तारमुतयज्ञियंच।अग्नेसद
क्षःसतनुर्हिभूत्वाथहव्याजातवेदोजुषस्व।जातवेदोवपयागच्छदेवांत्वंहिहोताप्रथमोबभूथ।घृ
प तेनत्वंतनुवोवर्धयस्वस्वाहाकृतंहविरदंतुदेवाः।स्वाहादेवेभ्योदेवेभ्यःस्वाहा॥४॥द्विरोमनुवमाना
यज्ञंत्वंषोडशच॥४॥ ॥प्राजापत्यावैपशवस्तेषांरुद्रोधिपतिर्यदेताभ्यामुपाकरोतिताभ्यामेवै
नंप्रतिप्रोच्यालभतआत्मनोनाव्रस्कायद्वाभ्यामुपाकरोतिद्विपाद्यजमानःप्रतिष्ठित्याउपाकृत्यपंच
जुहोतिपांक्ताःपशवःपशूनेवावरुंधेमृत्यवेवाएषनीयतेयत्पशुस्तंयदन्वारभेतप्रमायुकोयजमा
नस्यान्नानाप्राणोयजमानस्यपशुनेत्याहव्यावृत्त्यै॥१॥ यत्पशुर्मायुमकृतेतिजुहोतिशांत्यैशमि
तारउपेतनेत्याहयथायजुरेवैतद्वपायांवाआह्रियमाणायामग्नेर्मेधोपक्रामतित्वामुतेदधिरेहव्यवा
हमितिवपामभिजुहोत्यग्नेरेवमेधमवरुंधेथोशृतत्वायपुरस्तात्स्वाहाकृतयोवाअन्येदेवाउपरि

ष्टात्स्वाहाकृतयोन्येस्वाहादेवेभ्योदेवेभ्यःस्वाहेत्यभितोवपांजुहोतितानेवोभयान्प्रीणाति ॥ २ ॥ व्याहृत्याअभि
तोवपांपचन्ति ॥ ५ ॥ ॥ योवाअयथादेवतंयज्ञमुपचरत्यादेवताभ्योवृश्च्यतेपापीयान्भवतियोयथादेवतन्न
देवताभ्यआवृश्च्यतेवसीयान्भवत्याग्नेय्यर्चाग्नीध्रमभिमृशेद्वैष्णव्याहविर्धानमाग्नेय्यास्रुचोवायव्ययावा
यव्यान्यैंद्र्यासदोयथादेवतंयज्ञमुपचरतिनदेवताभ्यआवृश्च्यतेवसीयान्भवतियुनज्मितेपृथिवींज्योति
षासहयुनज्मिवायुमंतरिक्षेमेवण ॥ १ ॥ तेसहयुनज्मिवाचंसहसूर्येणतेयुनज्मितिस्रोविपृचःसू
र्यस्यते। अग्निर्देवतागायत्रीछंदउपांशोःपात्रमसिसोमोदेवतात्रिष्टुप्छंदोंतर्यामस्यपात्रमसींद्रोदेवता
जगतीछंदइंद्रवायुवोःपात्रमसिबृहस्पतिर्देवतानुष्टुप्छंदोमित्रावरुणयोःपात्रमस्यश्विनौदेवतापंक्ति
श्छंदोऽश्विनोःपात्रमसिसूर्योदेवताबृहती ॥ २ ॥ छंदःशुक्रस्यपात्रमसिचंद्रमादेवतासतोबृहतीछंदो
मंथिनःपात्रमसिविश्वेदेवादेवताद्विपदाछंदआग्रयणस्यपात्रमसींद्रोदेवताककुप्छंदउक्थानांपात्रम

सिपृथिवीदेवताविराट्छंदोध्रुवस्यपात्रमसि॥३॥अंतरिक्षेणबृहतीत्रयस्त्रिंऽशाश्च॥६॥ ॥स्वर्गोवा
अध्वर्युर्यजमानस्यस्वर्गःखलुवैपूर्वोर्धुःक्षीयतआसन्यान्मामंत्रात्पाहिकस्याश्चिदभिशस्त्याइतिपु
राप्रातरनुवाकाज्जुहुयादात्मनएवतदध्वर्युःपुरस्ताच्छर्मनह्यतेनार्त्यैसंवेशायत्वोपवेशायत्वागाय
त्रियास्त्रिष्टुभोजगत्याअभिभूत्यैस्वाहाप्राणापानौमृत्योर्मापातंप्राणापानौमामाहासिष्टंदेवतासु
वाएतेप्राणापानयोः॥१॥व्यायच्छंतेयषांऽसोमःसमृच्छंतेसंवेशायत्वोपवेशायत्वेत्याहछंदांऽसिवैसं
९ वेशाउपवेशाश्छंदोभिरेवास्यछंदांसिवृंक्तेप्रतिवंत्याड्यानिभवंत्यभिजित्यैमरुत्वतीःप्रतिपदोविजित्या
उभेबृहद्रथंतरेभवतइयंवावरथंतरमसौबृहदाभ्यामेवैनमंतरेत्यद्यवावरथंतरंऽश्वोबृहदद्याश्वादेवै
नमंतरेतिभूतं॥२॥वावरथंतरंभविष्यद्बृहद्भूताच्चैवैनंभविष्यतश्चांतरेतिपरिमितंवावरथंतरमपरि
मितंबृहत्परिमिताच्चैवैनमपरिमिताच्चांतरेतिविश्वामित्रजमदग्नीवसिष्ठेनास्पर्धेतांऽसएतज्जमद

न्निर्विहव्यमपश्यत्तेनवैसवसिष्ठस्येंद्रियंवीर्यमवृंक्त यद्विहव्यꣳशस्यतइंद्रियमेवतद्वीर्यंयजमानोभ्रातृव्य
स्यवृंक्तेयस्यभूयाꣳसोयज्ञक्रतवइत्याहुःसदेवतावृंक्तइतियद्यग्निष्टोमःसोमःपरस्तात्स्यादुक्थ्यंकुर्वी
तयद्युक्थ्यःस्यादतिरात्रंकुर्वीतयज्ञक्रतुभिरेवास्यदेवतावृंक्तेवसीयान्भवति॥३॥प्राणापानयोर्भूतंवृंक्ते
ष्टाविꣳशतिश्च॥७॥ ॥निग्राभ्यास्स्थदेवश्रुतआयुर्मेतर्पयतप्राणंमेतर्पयतापानंमेतर्पयतव्यानंमेतर्पय
तचक्षुर्मेतर्पयतश्रोत्रंमेतर्पयतमनोमेतर्पयतवाचंमेतर्पयतात्मानंमेतर्पयतांगानिमेतर्पयतप्रजांमेत
र्पयतपशून्मेतर्पयतगृहान्मेतर्पयतगणान्मेतर्पयतसर्वगणंमातर्पयततर्पयतमा॥४॥गणामेमावि
तृषन्नोषधयोवैसोमस्यविशोविशःखलुवैराज्ञःप्रदातारईश्वराऐंद्रःसोमोवीवृधंवोमनसासुजाताऋत
प्रजाताभगइद्वस्याम।इंद्रेणदेवीर्वीरुधःसंविदानाअनुमन्यंताꣳसवनायसोममित्याहौषधीभ्य
एवैनꣳस्वायैविशःस्वायैदेवतायैनिर्याच्याभिषुणोतियोवैसोमस्याभिषूयमाणस्य॥५॥प्रथमोꣳशु

स्कंदतिसईश्वरइंद्रियंवीर्यंप्रजांपशून्यजमानस्यनिर्दहतोस्तमभिमंत्रयेतामास्कान्सहप्रजयासहरा
यस्पोषेणेंद्रियंमेवीर्यंमानिर्वधीरित्याशिषमेवैतामाशास्तइंद्रियस्यवीर्यस्यप्रजायैपशूनामनिर्घा
तायद्रप्सश्चस्कंदपृथिवीमनुद्यामिमंचयोनिमनुयश्चपूर्वः। तृतीयंयोनिमनुसंचरंतंद्रप्संजुहोम्यनु
सप्तहोत्राः॥६॥ तर्पयत माभिषूयमाणस्य यश्चदद्राव॥८॥ ॥ योवैदेवांदेवयशसेनार्पयतिमनुष्यान्म
नुष्ययशसेनदेवयशस्येवदेवेषुभवतिमनुष्ययशसीमनुष्येषुयान्प्राचीनमाग्रयणाद्ग्रहान्गृह्णीया
त्तानुपांशुगृह्णीयाद्यानूर्ध्वांस्तानुपब्दिमतोदेवानेवतद्देवयशसेनार्पयतिमनुष्यान्मनुष्ययश
सेनदेवयशस्येवदेवेषुभवतिमनुष्ययशसीमनुष्येष्वग्निः प्रातःसवनेपात्वस्मान्वैश्वानरोमहि
नाविश्वशंभूः॥ सनः पावकोद्रविणंदधातु॥१॥ आयुष्मतः सहभक्षास्याम। विश्वेदेवामरुतइंद्रोअ
स्मानस्मिंद्वितीयेसवनेनजह्युः॥ आयुष्मंतः प्रियमेषांवदंतोवयंदेवानांसुमतौस्याम। इदंतृतीयं

सं·तृ
६

सवनंकवीनामृतेनयेवमसमैरयंत। तेसौधन्वनाः सुवरानन्शानाः स्विष्टिन्नोअभिवसीयोनयंतु। आ
यतनवतीर्वाअन्याआहुतयोहूयंतेनायतनाअन्यायाआघारवतीस्ताआयतनवतीर्याः॥ २॥ सौम्या
स्ताअनायतनाऐंद्रवायवमादायाघारमाघारयेदध्वरोयज्ञोयमस्तुदेवाओषधीभ्यः पशवेनोजनाय
विश्वस्मैभूतायाध्वरोसिसपिन्वस्वघृतवद्देवसोमेतिसौम्याएवतदाहुतीरायतनवतीः करोत्यायतना
वान्भवतियएवंवेदाथोद्यावापृथिवीएवघृतेनव्युनत्तितेव्युत्तेउपजीवनीयेभवतउपजीवनीयोभवति
॥ ३॥ यएवंवेदैषतेरुद्रभागोयन्निरयाचथास्तंजुषस्वविदेर्गौपत्यꣳ रायस्पोषꣳ सुवीर्यꣳ संवत्सरीणाꣳ
स्वस्तिं। मनुः पुत्रेभ्योदायंव्यभजत्सनाभानेदिष्ठंब्रह्मचर्यंवसंतन्निरभजत्सआगच्छत्सोब्रवीत्कथा
मानिरभागितिनत्वानिरभाक्षमित्यब्रवीदंगिरसइमेसत्रमासतेते॥ ४॥ सुवर्गंलोकन्नप्रजानंतितेभ्य
इदंब्राह्मणंब्रूहितेसुवर्गंलोकंयंतोयएषांपशवस्ताꣳस्तेदास्यंतीतितदेभ्योब्रवीत्तेसुवर्गंलोकंयंतोय

राम
६

एषांपशवआसंतानस्माअददुस्तंपशुभिश्चरंतंयज्ञवास्तौरुद्रआगच्छत्सोब्रवीन्ममवाइमेपशवइत्यं
दुर्वै ॥५॥ मह्यमिमानित्यब्रवीन्नैवतस्यतईशातइत्यब्रवीद्यद्यज्ञवास्तौहीयतेममैवतदितितस्माद्यज्ञ
वास्तुनाभ्यवेत्यꣳसोब्रवीद्यज्ञेमाभजाथतेपशून्नाभिमꣳस्यइतितस्माएतंमंथिनःसꣳस्रावमजुहो
त्ततोवैतस्यरुद्रःपशून्नाभ्यमन्यतयत्रैतमेवंविद्वान्मंथिनःसꣳस्रावंजुहोतिनतत्ररुद्रःपशूनभिमन्य
ते ॥६॥ दधात्वायतनवतीर्याउपजीवनीयेभवतउपजीवनीयोभवतितेदुर्वैयत्रैतमेकादशाव ॥२॥ ॥ज्जु
ष्टोवाचोभूयासंज्जुष्टोवाचस्पतयेदेविवाक्।यद्वाचोमधुमत्तस्मिन्माधाःस्वाहासरस्वत्यै।ऋचास्तोमꣳ
समर्धयगायत्रेणरथंतरं।बृहद्गायत्रवर्तनि।यस्तेद्रप्सस्कंदतियस्तेअꣳशुर्बाहुच्युतोधिषणयोरुप
स्थात्।अध्वर्योर्वापरियस्तेपवित्रात्स्वाहाकृतमिंद्रायतंजुहोमि।योद्रꣳशुःपतितःपृथिव्यांपरिवापात
॥१॥ पुरोडाशात्करंभात्।धानासोमान्मंथिनइंद्रशुक्रात्स्वाहाकृत×प्सोअ×मिंद्रायतंजुहोमि।यस्ते

द्रप्सोमधुमाँ॒इंद्रियावान्स्वाहाकृतः पुनरप्येतिदेवान् । दिवःपृथिव्याःपर्यंतरिक्षात्स्वाहाकृतमिंद्रायतं
जुहोमि । अध्वर्युर्वाऋत्विजांप्रथमोयुज्यतेतेनस्तोमोयोक्तव्यइत्याहुर्वागग्रेगाअग्रएत्वृजुगादेवेभ्योय
शोमयिदधतीप्राणान्पशुषुप्रजांमयि ॥२॥ व्युयजमानेत्वेत्याहवाचमेवतद्यज्ञमुखेयुनक्तिवास्तुवा
एतद्यज्ञस्यक्रियतेयद्ग्रहान्गृहीत्वाबहिष्पवमानंसर्पंतिपरांचोहियंतिपराचीभिस्तुवतेवैष्णव्यर्चा
पुनरेत्योपतिष्ठतेयज्ञोवैविष्णुर्यज्ञमेवाकर्विष्णोत्वंनोअंतमःशर्मयच्छसहंत्य । प्रतेधारामधुश्चुतउ
त्संदुह्रतेअक्षितमित्याहयदेवास्यवशायानस्योपशुष्यतितदेवास्यैतेनाप्याययति ॥३॥ पुरिवापाल्पुजा
मयिदुक्तेत्वतुर्दश्राव ॥१०॥ ॥अग्निनारयिमश्नवत्पोषमेवदिवेदिवे । यशसंवीरवत्तमं । गोमाँ॒अग्ने
विमाँ॒अश्वीयज्ञोनृवत्सखासदमिदप्रमृष्यः । इडावाँ॒एषोअसुरप्रजावान्दीर्घोरयिःपृथुबुध्नः
सभावान् । आप्यायस्वसंते । इहत्वष्टारमग्रियंविश्वरूपमुपह्वये । अस्माकमस्तुकेवलः । तन्नस्तुरी

पमध्येपोषयित्नुदेवत्वष्टर्विरराणस्यस्व। यतोवीरः॥१॥ कर्मण्यःसुदक्षोयुक्तग्रावाजायतेदेवका
मः। शिवस्त्वष्टरिहागहिविभुःपोषउतत्मना। यज्ञेयज्ञेनउदव। पिशंगरूपःसुभरोवयोधाःश्रुष्टी
वीरोजायतेदेवकामः। प्रजांत्वष्टाविष्यतुनाभिमस्मेअथादेवानामप्येतुपाथः। प्रणोदेव्यानोदिवः।
पीपिवाꣳसꣳसरस्वतस्तनंयोविश्वदर्शतः। धुक्षीमहिप्रजामिषं॥२॥ येतेसरस्वऊर्मयोमधुमं
तोघृतश्चुतः। तेषांतेसुम्नमीमहे। यस्यव्रतंपशवोयंतिसर्वेयस्यव्रतमुपतिष्ठंतआपः। यस्यव्रतेपु
ष्टपतिर्निविष्टस्तꣳसरस्वंतमवसेहुवेम। दिव्यꣳसुपर्णंवयसंबृहंतमपांगर्भंवृषभमोषधीनां। अ
भीपतोवृष्ट्यातर्पयंतꣳसरस्वंतमवसेहुवेम। सिनीवालिपृथुष्टुकेयादेवानामसिस्वसा। जुषस्व
हव्यं॥३॥ आहुतंप्रजांदेविदिदिड्ढिनः। यासुपाणिःस्वंगुरिःसुषूमाबहुसूवरी। तस्यैविश्पत्न्यै
हविःसिनीवाल्यैजुहोतन। इंद्रंवोविश्वतस्परींद्रंनरः। असितवर्णाहरयःसुपर्णामिहोवसानादिव

मुत्पतंति। तआववृत्रन्सदनानिऋत्वादित्पृथिवीघृतैर्व्युंद्यते। हिरण्यकेशोरजसोविसारेहिर्धुनिर्वातइ
वध्रजीमान्। शुचिभ्राजाउषसः॥ ४॥ नवेदायशस्वतीरपस्युवोनसत्याः। आतेसुपर्णाअमिनंतएवैःकृ
ष्णोनोनाववृषभोयदीदं। शिवाभिर्नस्मयमानाभिरागात्पतंतिमिहस्तनयंत्यभ्रा। वाश्रेवविद्युन्मिमा
तिवत्संनमातासिषक्ति। यदेषांवृष्टिरसर्जि। पर्वतश्चिन्महिवृद्धोबिभायदिवश्चित्सानुरेजतस्वनेवः।
यत्क्रीडथमरुतः॥ ५॥ ऋष्टिमंतआपइवसध्रियंचोधवध्वोअभिक्रंदस्तनयगर्भमाधाउदन्वतापरिदी
यारथेन। दृतिंसुकर्षविषितंन्यंचंसमाभवंतूद्वतानिपादाः। त्वंसाविदस्युताग्नेपश्चुर्नयवसे। धामा
हयत्तेअजरवनावृश्चंतिशिक्वसः। अग्नेभूरीणितवजातवेदोदेवस्वधावोम्रतस्यधाम। याश्च॥ ६॥
मायामायिनांविश्वमिन्वत्वेपूर्वीःसंदधुःपृष्टबंधो। दिवोनोवृष्टिंमरुतोररीध्वंप्रपिन्वतवृष्णोअश्व
स्यधाराः। अर्वाङेतेनस्तनयित्नुनेह्यपोनिषिंचन्नसुरःपितानः। पिन्वंत्यपोमरुतःसुदानवःपयोघृ

तवद्विद्येघाखुवः।अत्यन्नमिहेविनयंतिवाजिनमुत्संदुहंतिस्तनयंतमक्षितं।उदप्रुतोमरुतस्ताꣳ
इयर्तवृष्टिं॥७॥येविश्वेमरुतोजुनंति।क्रोशातिगर्दाकन्येवतुन्नापेरुंतुंजानापत्येवजाया।घृतेनद्या
वापृथिवीमधुनासमुक्षतपयस्वतीःकृणुतापओषधीः।ऊर्जंचतत्रसुमतिंचपिन्वथयत्रानरोमरु
तःसिंचथामधु।उदुत्यंचित्रं।और्वभृगुवच्छुचिमप्नवानवदाहुवे।अग्निꣳसमुद्रवाससं।आसवꣳस
वितुर्यथाभगस्येवभुजिꣳहुवे।अग्निꣳसमुद्रवाससं।हुवेवातस्वनंकविंपर्जन्यक्रंद्यꣳसहः।अग्निꣳ
समुद्रवाससं॥८॥ ॥वीरद्रुषंहव्यमुषसोमरुतस्त्ववृष्टिंभगस्यद्वादशाच॥११॥ ॥प्रजापतिरेषतेगाय
त्रीयज्ञंवैप्रजापतेःप्राजापत्यांयोवाअयथादेवतमिष्टर्गोनिग्राभ्यास्त्वयोवैदेवांजुष्टोग्निनारयिमेका
दश॥११॥ ॥प्रजापतिःप्रजापतेर्जायमानांमह्यग्निमिमांमायामायिनांद्विचत्वारिꣳशत्॥४२॥ ॥ह
रिःओम्॥ ॥योवैपवमानानामन्वारोहान्विद्वान्यजतेनुपवमानानारोहतिनपवनेमाभ्योवच्छिद्यते

व्यायच्छंते

सं·त
१

न्नुयेनोसिगायत्रछंदाअनुत्वारभेस्वस्तिमासंपारयसुपर्णोसित्रिष्टुप्छंदाअनुत्वारभेस्वस्तिमासंपारयस
धासिजगतीछंदाअनुत्वारभेस्वस्तिमासंपारयेत्याहेते॥१॥वैपवमानानामन्वारोहास्तान्यएवंविद्वान्य
ज्ञेतनुपवमानानारोहतिनपवमानेभ्यावछिद्यतेयोवैपवमानस्यसंततिंवेदसर्वमायुरेतिनपुरायुषःप्र
मीयतेपशुमान्भवतिविंदतेप्रजांपवमानस्यग्रहागृह्यंतेथवाअस्यैतेगृहीताद्रोणकलशआधवनी
यःपुतभृत्तान्यदगृहीत्वोपाकुर्यात्पवमानंवि॥२॥छिंद्यात्तंविछिद्यमानमध्वर्योःप्राणोनुविछिद्य
तोपयामगृहीतोसिप्रजापतयेत्वेतिद्रोणकलशमभिमृशेदिंद्रायत्वेत्याधवनीयंविश्वेभ्यस्त्वादेवेभ्य
इतिपूतभृतंपवमानमेवतत्संनोतिसर्वमायुरेतिनपुरायुषःप्रमीयतेपशुमान्भवतिविंदतेप्रजां॥३॥
एतेविद्धिचत्वारिꣳशा×त×ञ्च॥१॥ ॥त्रीणिवावसवनान्यथतृतीयꣳसवनमवलुंपंत्यनꣳशुकुर्वंतउपा
ꣳशुꣳहुत्वोपाꣳशुपात्रेंशुमवास्यतंतृतीयसवनेपिसृज्याभिषुणुयाद्यदाप्याययतितेनाꣳशुमद्यदभि

राम
१

घुणोतितेनर्जीषिसर्वाण्येवतत्सवनान्यꣳशुमंतिशुक्रवंतिसमावद्वीर्याणिकरोतिद्वौसमुद्रौवितता
वजूर्यौपर्यावर्तेतेजठरेवपादाः। तयोःपश्यंतोअतियंत्यन्यैपश्यंतः॥१॥ सेतुनातियंत्यन्यं। द्वेद्रधसी म२
सततीवस्तएकःकेशीविश्वाभुवनानिविद्वान्। तिरोधायैत्यसितंवसानःशुक्रमादत्तेअनुहायजार्यै।
देवावैयद्यज्ञेकुर्वततदसुराअकुर्वततेदेवाएतंमहायज्ञमपश्यंतमतन्वताग्निहोत्रंव्रतमकुर्वततस्मा
द्विव्रतस्याद्विरग्निहोत्रंजुह्वति पौर्णमासंयज्ञमग्नीषोमीयं॥२॥ पशुमकुर्वतदार्श्यंयज्ञमाग्नेयं
पशुमकुर्वतवैश्वदेवंप्रातःसवनमकुर्वतवरुणप्रघासान्माध्यंदिनꣳसवनꣳसाकमेधान्पितृयज्ञंत्र्यं
बकाꣳस्तृतीयसवनमकुर्वततमेषामसुरायज्ञमन्ववाजिगाꣳसंतंन्नान्ववायंतेब्रुवन्नध्वर्तव्यावाइ
मेदेवाअभूवन्नितितदध्वरस्याध्वरत्वंततोदेवाअभवन्परासुरायएवंविद्वान्सोमेनयजतेभवत्यात्म
नापरास्यभ्रातृव्योभवति॥३॥ अपश्यंताग्नीषोमीयमात्मनापरात्रीणिच॥२॥ ॥परिभूरग्निंपरि

सं·त·
१०

भूरिंद्रंपरिभूर्विश्वान्देवान्परिभूर्माꣳसहब्रह्मवर्चसेनसनःपवस्वशंगवेशंजनायशमर्वतेशꣳराजन्नोष
धीभ्योछिन्नस्यतेरयिपतेसुवीर्यस्यरायस्पोषस्यददितारस्याम।तस्यमेरास्वतस्यतेभक्षीयतस्यतइदमु
न्मृजे।प्राणायमेवर्चोदावर्चसेपवस्वापानायव्यानायवाचे॥१॥दक्षक्रतुभ्यांचक्षुर्भ्यांमेवर्चोदौवर्चसेप
वेथाꣳश्रोत्रायात्मनेंगेभ्यआयुषेवीर्यायविष्णोरिंद्रस्यविश्वेषांदेवानांजठरमसिवर्चोदामेवर्चसेपवस्व
कोसिकोनामकस्मैत्वाकायत्वायंत्वासोमेनातीतृपंयंत्वासोमेनामीमदꣳसुप्रजाःप्रजयाभूयासꣳ
सुवीरोवीरैःसुवर्चावर्चसासुपोषःपोषैर्विश्वेभ्योमेरूपेभ्योवर्चोदाः॥२॥वर्चसेपवस्वतस्यमेरास्व
तस्यतेभक्षीयतस्यतइदमुन्मृजे।बुभूषन्नवेक्षेतैषवैपात्रियःप्रजापतिर्यज्ञःप्रजापतिस्तमेवतर्पय
तिसएनंतृप्तोभूत्याभिपवतेब्रह्मवर्चसकामोवेक्षेतैषवैपात्रियःप्रजापतिर्यज्ञःप्रजापतिस्तमेवतर्प
यतिसएनंतृप्तोब्रह्मवर्चसेनाभिपवतआमयावी॥३॥अवेक्षेतैषवैपात्रियःप्रजापतिर्यज्ञःप्रजापति

राम्
१०

स्तमेवंतर्पयतिसएनंतृप्तआयुषाभिपवतेभिवरल्लवेक्षितेषवेपात्रियःप्रजापतिर्यज्ञःप्रजापतिस्तमे
वतर्पयतिसएनंतृप्तःप्राणापानाभ्यांवाचोदक्षक्रतुभ्यांचक्षुर्भ्यांश्रोत्राभ्यामात्मनोंगेभ्यआयुषो
तरैतिताउजक्म्रधंन्वति॥४॥वावेरूपेभ्योवर्वोदाओमयावीपंचचत्वारिंशद्राज्ञ॥३॥ ॥स्फ्यस्वस्तिर्वि
घनस्वस्तिःपर्शुर्वेदिःपरशुर्नस्वस्तिः।यज्ञियायज्ञकृतस्थतेमास्मिन्यज्ञउपह्वयध्वमुपमाद्यावापृ
थिवीह्वयेतामुपास्तावःकलशःसोमोअग्निरुपदेवाउपयज्ञउपमाहोत्राउपहवेह्वयंतांनमोग्न
येमखघ्नेमखस्यमायशोर्यादित्याहवनीयमुपतिष्ठतेयज्ञोवैमखः॥१॥यज्ञंवावसतद्धंतितस्माए
वनमस्कृत्यसदःप्रसर्पत्यात्मनोनार्त्यैनमोरुद्रायमखघ्नेनमस्कृत्यामापाहीत्याग्नीध्रंतस्माएवंन
मस्कृत्यसदःप्रसर्पत्यात्मनोनार्त्यैनमइंद्रायमखघ्नइंद्रियंमेवीर्यंमानिर्वधीरितिहोत्रीयमाशिष
मेवैतामाशास्तइंद्रियस्यवीर्यस्यानिर्घाताययावै॥२॥देवताःसदस्यार्तिमार्पयंतियस्ताविद्वान्प्र

सं·त·
११

सर्पतिनसदस्यार्तिमार्छतिनमोग्नयेमखघ्नइत्याहैतावैदेवताःसदस्यार्तिमार्पयंतितायएवंविद्वान्प्रसर्प
तिनसदस्यार्तिमार्छतिदृढेस्थःशिथिरेसमीचीमाꣳहसस्पातꣳसूर्योमादेवोदिव्यादꣳहसस्पातुवायुरंत
रिक्षात्॥३॥अग्निःपृथिव्यायमःपितृभ्यःसरस्वतीमनुष्येभ्योदेवीद्वारौमामासंताप्तंनमःसदसेन
मःसदस्पतयेनमःसखीनांपुरोगाणांचक्षुषेनमोदिवेनमःपृथिव्याअहेदैधिषव्योदतस्तिष्ठान्य
स्यसदनेसीदयोस्मत्पाकतरउन्निवतउदुद्वतश्चगेषंपातंमाद्यावापृथिवीअद्यान्हःसदोवैप्रसर्पतं
॥४॥पितरोनुप्रसर्पतीतिएनमीश्वराहिꣳसितोःसदःप्रसृप्यदक्षिणार्धेपरेक्षितागतपितरःपितृमा
नहंयुष्माभिर्भूयासꣳसुप्रजसोमयायूयंभूयास्तेतितेभ्यएवनमस्कृत्यसदःप्रसर्पत्यात्मनोर्त्यै॥५॥ ना॰ राम
मखोवाअंतरिक्षात्प्रसर्पतंत्वयेस्विꣳस्राद्ध॥४॥ ॥भक्षेहिमाविशदीर्घायुत्वायशंतनुत्वायरायस्पो ११
षायवर्चसेसुप्रजास्त्वायेहिवसोपुरोवसोप्रियोमेहृदस्यश्विनोस्त्वाबाहुभ्याꣳसघ्यासंनृचक्षसंत्वा

देवसोमसुचक्षा अवख्येषंमुंद्राभिभूतिःकेतुर्यज्ञानांवाग्जुषाणासोमस्यतृप्यतुमंद्रास्वर्वाच्यदिति
रनाहतशीर्ष्णीवाग्जुषाणासोमस्यतृप्यत्वेहिविश्वचर्षणे॥१॥शंभूर्मयोभूःस्वस्तिमाहरिवर्णप्रच
रक्रत्वेदक्षायरायस्पोषायसुवीरतायैमामाराजंन्विबीभिषोमामेहार्दित्विषावधीः।वृषणेशुष्मा
यायुषेवर्चसे।वसुमद्गणस्यसोमदेवतेमतिविदःप्रातःसवनस्यगायत्रच्छंदसइंद्रपीतस्यनराशꣳस
पीतस्यपितृपीतस्यमधुमतउपहूतःस्योपहूतोभक्षयामिरुद्रवद्गणस्यसोमदेवतेमतिविदोमाध्यं
दिनस्यसवनस्यत्रिष्टुप्छंदसइंद्रपीतस्यनराशꣳसपीतस्य॥२॥पितृपीतस्यमधुमतउपहूतस्यो
पहूतोभक्षयाम्यादित्यवद्गणस्यसोमदेवतेमतिविदस्तृतीयस्यसवनस्यजगतीछंदसइंद्रपीतस्य
नराशꣳसपीतस्यपितृपीतस्यमधुमतउपहूतस्योपहूतोभक्षयामि।आप्यायस्वसमेतुतेविश्व
तःसोमवृष्णियं।भवावाजस्यसंगथे।हिन्वमेगात्राहरिवोगणान्मेमावितीतृषः।शिवोमेसप्तर्षीनु

सं.त्व
१२

पतिष्ठस्वमामेवाङ्ग्निर्मति॥३॥ गाः। अपामसोमममृताअभूमागन्मज्योतिरविदामदेवान्। किमस्मा
न्कृणवदरातिः किमुधूर्तिरमृतमर्त्यस्य। यन्मआत्मनोमिंदाभूदग्निस्तत्पुनराहार्जातवेदाविचर्षणिः।
पुनरग्निश्चक्षुरदात्पुनरिंद्रोबृहस्पतिः। पुनर्मेअश्विनायुवंचक्षुराधत्तमक्ष्योः। इष्टयजुषस्तेदेवसोमस्तु
तस्तोमस्य॥४॥ शस्तोक्थस्यहरिवतइंद्रपीतस्यमधुमतउपहूतःस्योपहूतोभक्षयामि। आहूर्या
स्थामाहरयतप्रजयाचधनेनच। एतत्तेततयेचत्वामन्वेतत्तेपितामहप्रपितामहयेचत्वामन्वत्रपित
रोयथाभागंमंदध्वं नमोवःपितरोरसायनमोवःपितरःशुष्मायनमोवःपितरोजीवायनमोवःपितरः
॥५॥ स्वधायैनमोवःपितरोमन्यवेनमोवःपितरोघोरायपितरोनमोवोयएतस्मिन्लोकेस्थयुष्मांस्ते
नुयेस्मिंल्लोकेमांतेनुयएतस्मिन्लोकेस्थयूयंतेषांवसिष्ठाभूयास्तयेस्मिन्लोकेहंतेषांवसिष्ठोभू
यासंप्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिताबभूव। यत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्याम
॥६॥

राम
१२

पतयोरयीणां। देवकृतस्यैनसोवयजनमसिमनुष्यकृतस्यैवनसोवयजनमसिपितृकृतस्यैनसोवय
जनमस्यप्सुधौतस्यसोमदेवतेनृभिः सुतस्येष्टयजुषस्तुतस्तोमस्यशस्तोक्थस्ययोभक्षोअश्वस
निर्योगोसनिस्तस्यतेपितृभिर्भक्षंकृतस्यापहूतः स्यापहूतोभक्षयामि॥६॥ विश्वकर्मणात्रिष्टुप्छं
दसेंद्रपीतस्यनराशꣳसपीतस्यातिस्तुतस्तोमस्यजीवायनमोवः पितरोबभूवचतुश्चत्वारिꣳशच्च॥
॥५॥ ॥ महीनांपयोसिविश्वेषांदेवानांतनूर्ऋध्यासमद्यपृषतीनांग्रहंपृषतीनांग्रहोऽसिविष्णोर्हृदय
मस्येकमिषविष्णुस्त्वानुविचक्रमेभूतिर्दध्नाघृतेनवर्धतांतस्यमेष्टस्यवीतस्यद्रविणमागम्याज्ज्यो
तिरसिवैश्वानरंपृश्नियैदुग्धंयावतीद्यावापृथिवीमहित्वायावच्चसप्तसिंधवोवितस्थुः। तावंतमिंद्र
ते॥१॥ ग्रहꣳसहोर्जागृह्णाम्यस्तृतं। यत्कृष्णशाकुनः पृषदाज्यमवमृशेच्छूद्राअस्यप्रमायुकास्यु
र्यच्छ्वावमृशेच्चतुष्पादोस्यपशवः प्रमायुकास्युर्यत्स्कंदेद्यजमानः प्रमायुकस्यात्पशवोवैपृषदाज्यं

सं·त
१३

पृश्रावोवाएतस्यस्कंदतियस्यपृषदाज्यꣳस्कंदतियत्पृषदाज्यंपुनर्गृह्णातिपश्रूनेवास्मैपुनर्गृह्णातिप्रा
णोवैपृषदाज्यंप्राणोवै॥२॥ एतस्यस्कंदतियस्यपृषदाज्यꣳस्कंदतियत्पृषदाज्यंपुनर्गृह्णातिप्राणमेवा
स्मैपुनर्गृह्णातिहिरण्यमवधायगृह्णात्यमृतंवैहिरण्यंप्राणःपृषदाज्यममृतमेवास्यप्राणेदधातिना
नमानंभवतिशतायुःपुरुषःशतेंद्रियआयुष्येवेंद्रियेप्रतितिष्ठत्यश्वमवघ्रापयतिप्राजापत्योवा
अश्वःप्राजापत्यःप्राणःस्वादेवास्मैयोनेःप्राणंनिर्मिमीतेविवाएतस्ययज्ञःछिद्यतेयस्यपृषदा
ज्यꣳस्कंदतिवैष्णव्यर्चापुनर्गृह्णातियज्ञोवैविष्णुर्यज्ञेनैवयज्ञꣳसंतनोति॥३॥ तेपृषदाज्यंप्राणोवैयो
नेःप्राणंदधाविꣳशतिश्च॥६॥ ॥ देवसवितरेतत्तेप्राहतत्प्रचसुवप्रचयजबृहस्पतिर्ब्रह्मायुष्मत्याऋ
चोमागाततनूपा[redacted]त्साम्नःसत्यावआशिषःसंतुसत्याआकूतयऋ
तंचसत्यंचवदतस्तुतदेवस्यसवितुःप्रसवेस्तुतस्यस्तुतमस्यूर्जंमह्यꣳस्तुतंदुहामामास्तुतस्यस्तुतंग

राम
१३

म्याच्छस्त्रस्यशस्त्रे ॥१॥ अस्यूर्जंमह्यꣳशस्त्रंदुहामामाशस्त्रस्यशस्त्रंगम्यादिंद्रियावंतोवनामहेधुक्षी
महिप्रजामिषं। सामेसत्याशीर्देवेषुभूयाद्ब्रह्मवर्चसंमागम्यात्। यज्ञोबभूवसआबभूवसप्रजज्ञेसवावृ
धे। सदेवानामधिपतिर्बभूवसोअस्माꣳ अधिपतीन्करोतुवयꣳस्यामपतयोरयीणां। यज्ञोवावै ॥२॥ य
ज्ञपतिंदुहेयज्ञपतिर्वायज्ञंदुहेसयस्स्तुतशस्त्रयोर्दोहमविद्वान्यजतेतंयज्ञोदुहेसदुग्ध्वापापीयान्भवति
यएनयोर्दोहंविद्वान्यजतेसयज्ञंदुहेसदुग्ध्वावसीयान्भवतिस्तुतस्यस्तुतमस्यूर्जंमह्यꣳस्तुतंदुहामा
मास्तुतस्यस्तुतंगम्याच्छस्त्रस्यशस्त्रमस्यूर्जंमह्यꣳशस्त्रंदुहामामाशस्त्रस्यशस्त्रंगम्यादित्याहैष
वैस्तुतशस्त्रयोर्दोहस्तंयएवंविद्वान्यजतेदुहएवयज्ञमिष्ट्वावसीयान्भवति ॥३॥ शस्त्रंवैशस्त्रंदुहां
द्वाविꣳशतिश्च ॥७॥ ॥ श्येनायपत्वनेस्वाहावट्स्वयमभिगूर्तायनमोविष्टंभायधर्मणेस्वाहावट्स्व
यमभिगूर्तायनमःपरिधयेजनप्रथनायस्वाहावट्स्वयमभिगूर्तायनमऊर्जेहोत्राणाꣳस्वाहा

सं·त·
१४

वट्त्स्वयमभिगूर्त्तायनमः पयसेहोत्राणाꣳस्वाहावट्त्स्वयमभिगूर्त्तायनमः प्रजापतयेमनवेस्वाहावट्
त्स्वयमभिगूर्त्तायनमऋतमृतपाः सुवर्वाट्स्वाहावट्त्स्वयमभिगूर्त्तायनमस्तृंपंताꣳहोत्रामधोर्घृत
स्ययज्ञपतिमृषयएनसा॥१॥ आहुः। प्रजानिर्भक्ताअनुतप्यमानामधुव्यौस्तोकापतौरराध। सन्नः
स्ताभ्याꣳसृजतुविश्वकर्माघोराऋषयोनमोअस्त्वेभ्यः। चक्षुषएषांमनसश्चसंधौबृहस्पतयेमहिष
द्युमन्नमः। नमोविश्वकर्मणेसउपात्वस्माननन्यान्त्सोमपान्मन्यमानः। प्राणस्यविद्वान्त्समरेनधी
रएनश्चकृवान्महिबद्धएषां। तंविश्वकर्मन्॥२॥ प्रमुंचास्वस्तयेयेभक्षयंतोनवसून्यानृहुः। यानग्नयो
न्वतप्यंतधिष्णियाइयंतेषामवयादुरिष्ट्यैस्विष्टिन्नस्तांकृणोतुविश्वकर्मा। नमः पितृभ्योअभियेनो
अख्यन्यज्ञकृतोयज्ञकामाः सुदेवाअकामावोदक्षिणान्ननीनिममानस्तस्मादेनसः पापयिष्ट। या
वंतोवैसदस्याःस्तेसर्वेदक्षिण्यास्तेभ्योयोदक्षिणान्न॥३॥ नयेदैभ्योवृश्च्येतयद्वैश्वकर्मणान्जुहो।

व ३

राम
१४

तिसदस्यानेवतत्क्षीणात्यस्मेदेवासोवपुषेचिकित्सतयमाशिरादंपतीवाममश्नुतः।पुमान्पुत्रोजाय
तेविंदतेवस्वथविश्वेअरपाएधतेगृहः।आशीर्दायादंपतीवाममश्नुतामरिष्टोरायःसचतांसमो
कसा।यआसिंचत्संदुग्धंकुंभ्यासहेष्टेनयामन्नमतिंजहातुसः।सर्पिर्ग्रीवी॥४॥पीवर्यस्यजायापी
वानःपुत्राअकृशासोअस्य।सहजानिर्यःसुमखस्यमानइंद्रायाशिरंसहकुंभ्यादात्।आशी
र्मऊर्जमुतसुप्रजास्त्वमिषंदधातुद्रविणंसवर्चसं।संजयन्क्षेत्राणिसहसाहमिंद्रकृण्वानोअन्यां
अधरान्सपत्नान्।भूतमसिभूतेमाधामुखमसिमुखंभूयासंद्यावापृथिवीभ्यांत्वापरिगृह्णामि
विश्वेत्वादेवावैश्वानराः॥५॥प्रच्यावयंतुदिविदेवांदृंहांतरिक्षेवयांसिपृथिव्यांपार्थिवांध्रुवंध्रुवे
णहविषावसोमंनयामसि।यथानःसर्वमिज्जगदयक्ष्मंसुमनाअसत्।यथानइंद्रइद्विशःके
वलीःसर्वाःसमनसःकरत्।यथानःसर्वाइद्दिशोस्माकंकेवलीरसन्॥६॥एनसाविश्वकर्मन्योदक्षि

सं॰त॰
१५

णान्नसर्पिर्ग्रीवीवैश्वानराः श्चत्वारिं॰शाच्च॥८॥ ॥यद्वैहोताध्वर्युमभ्याह्वयतेवज्रमेनमभिप्रवर्तयत्यु
क्थशाइत्याहप्रातःसवनंप्रतिगीर्यत्रीण्येतान्यक्षराणित्रिपदागायत्रीगायत्रंप्रातःसवनंगायत्र्यैवै
वप्रातःसवनेवज्रमंतर्धत्तउक्थंवाचीत्याहमाध्यंदिनं॰सवनंप्रतिगीर्यचत्वार्येतान्यक्षराणिचतुष्प
दात्रिष्टुप्त्रैष्टुभंमाध्यंदिनं॰सवनंत्रिष्टुभैवमाध्यंदिनेसवनेवज्रमंतर्धत्ते॥१॥उक्थंवाचींद्रायेत्या
हतृतीयसवनंप्रतिगीर्यसप्तैतान्यक्षराणिसप्तपदाशाक्वरीशाक्वरोवज्रोवज्रेणैवतृतीयसवनेवज्र
मंतर्धत्तेब्रह्मवादिनोवदंतिसत्वाअध्वर्युःस्याद्योयथासवनंप्रतिगरेछंदां॰सिसंपादयेत्तेजःप्रातस्स
वनआत्मंदधीतेंद्रियंमाध्यंदिनेसवनेपशूं॰स्तृतीयसवनइत्युक्थशाइत्याहप्रातःसवनंप्रतिगीर्यत्री
ण्येतान्यक्षराणि॥२॥त्रिपदागायत्रीगायत्रंप्रातःसवनंप्रातःसवनएवप्रतिगरेछंदां॰सिसंपादय
त्यथोतेजोवैगायत्रीतेजःप्रातस्सवनंतेजएवप्रातःसवनआत्मंधत्तउक्थंवाचीत्याहमाध्यंदिनं॰सव

राम
१५

नंप्रतिगीर्यचत्वार्येतान्यक्षराणिचतुष्पदात्रिष्टुप्त्रैष्टुभंमाध्यंदिनंसवनंमाध्यंदिनएवसवनेप्रतिगरे
छंदांसिसंपादयत्यथोइंद्रियंवैत्रिष्टुबिंद्रियंमाध्यंदिनंसवनं॥३॥इंद्रियमेवमाध्यंदिनेसवनआ
त्मंधत्तउक्थंवाचींद्रायेत्याहतृतीयसवनंप्रतिगीर्यसप्तैतान्यक्षराणिसप्तपदाशक्वरीशाक्वराःपशवो
जागतंतृतीयसवनंतृतीयसवनएवप्रतिगरेछंदांसिसंपादयत्यथोपशवोवैजगतीपशवस्तृतीय
सवनंपशूनेवतृतीयसवनआत्मंधत्तेयद्धोताध्वर्युमभ्याह्वयतआव्यमस्मिंदधातितद्यदन्न॥४॥अ
पह्नीतपुरास्यसंवत्सराद्गृहआवीरञ्छोंसामोदइवेतिप्रत्याह्वयतेतेनैवतदपह्नुतेयथावाआय
तांप्रतीक्षेतएवमध्वर्युःप्रतिगरंप्रतीक्षतेयदभिप्रतिगृणीयाद्यथायतयासमृच्छेततादृगेवतद्यद
र्धर्चाल्लुप्येतयथाधावद्भ्योहीयेततादृगेवतत्सबाहुग्वाऋत्विजामुद्गीथाउद्गीथएवोद्गातृणां॥५॥ऋचःप्र
णवउक्थशंसिनांप्रतिगरोध्वर्यूणांयएवंविद्वान्प्रतिगृणात्यन्नादएवभवत्यास्यप्रजायांवाजीजायत

इयंवैहोतासावध्वर्युर्यदासीनःशꣳसत्यस्याएवतद्धोतानैत्यास्तइवहीयमथोइमामेवतेनयजमानोदु
हेयत्तिष्ठन्प्रतिगृणात्यमुष्याएवतदध्वर्युर्नैति॥६॥तिष्ठतीवह्यसावथोअमूमेवतेनयजमानोदुहेयदा
सीनःशꣳसतितस्मादितःप्रदानंदेवाउपजीवंतियत्तिष्ठन्प्रतिगृणातितस्मादमुतःप्रदानंमनुष्याउपजी
वंतियत्प्राङासीनःशꣳसतिप्रत्यङ्तिष्ठन्प्रतिगृणातितस्मात्प्राचीनꣳरेतोधीयतेप्रतीचीःप्रजाजायंतेयद्वै
होताध्वर्युमभ्याह्वयतेवज्रमेनमभिप्रवर्तयतिपराङावर्ततेवज्रमेवतन्निकरोति॥७॥सवेनवज्रमंतर्धे
त्तत्रीण्येतान्यक्षराणींद्रियंमाध्यंदिनꣳसवनन्नोद्गातॄणामध्वर्युर्नैतिवर्तयत्पृष्ठेन॥८॥ ॥उपया
मगृहीतोसिवाक्षसदसिवाक्पाभ्यांत्वाक्रतुपाभ्यामस्ययज्ञस्यध्रुवस्याध्यक्षाभ्यांगृह्णाम्युपयामगृही
तोस्यृतसदसिचक्षुष्पाभ्यांत्वाक्रतुपाभ्यामस्ययज्ञस्यध्रुवस्याध्यक्षाभ्यांगृह्णाम्युपयामगृहीतोसिश्रु
तसदसिश्रोत्रपाभ्यांत्वाक्रतुपाभ्यामस्ययज्ञस्यध्रुवस्याध्यक्षाभ्यांगृह्णामिदेवेभ्यस्त्वाविश्वदेवेभ्यस्त्वा

विश्वेभ्यस्त्वादेवेभ्योविष्णवुरुक्रमैषतेसोमस्तꣳरक्षस्व॥ १॥ तंतेदुश्चक्षामावख्यन्मयिवसुःपुरोवसुर्वा
क्पावाचंमेपाहिमयिवसुर्विदद्वसुश्चक्षुष्पाःश्चक्षुर्मेपाहिमयिवसुःसंयद्वसुःश्रोत्रपाःश्रोत्रंमेपाहिभूर
सिश्रेष्ठोरश्मीनांप्राणपाःप्राणंमेपाहिधूरसिश्रेष्ठोरश्मीनामपानपाअपानंमेपाहियोनइंद्रवायूमित्रा
वरुणावश्विनावभिदासतिभ्रातृव्यउत्पिपीतेशुभस्पतीइदमहंतमधरंपादयामियथेंद्राहमुत्तमश्चेतया
नि॥ २॥ रक्षस्वभ्रातृव्यस्त्रयोदशान्व॥ १०॥ ॥ प्रसोअग्नेतवोतिभिःसुवीराभिस्तरतिवाज द्ध कर्मभिः
स यस्यत्वꣳसख्यमाविथ। प्रहोत्रेपूर्व्यंवचोग्नयेभरताबृहत्। विपांज्योतीꣳषिबिभ्रतेनवेधसे। अग्नेत्रीते
वाजिनात्रीषधस्थातिस्रस्तेजिह्वाऋतजातपूर्वीः। तिस्रउतेतनुवोदेववातास्ताभिर्नःपाहिगिरोअप्रयुछन्।
संवांकर्मणासमिषा॥ १॥ हिनोमींद्राविष्णुअपसस्पारेअस्य। जुषेथांयज्ञंद्रविणंचधत्तमरिष्टैर्नःपथि
भिःपारयंता। उभाजिग्यथुर्नपराजयेथेनपराजिग्येकतरश्चनैनोः। इंद्रश्चविष्णोयदपस्पृधेथांत्रेधा

सं·त·
९७

सहस्त्रंवितदैरयेथां।त्रीण्यायूं॑षितवजातवेदस्तिस्रआजानीरुषसस्तेअग्ने।ताभिर्देवानामवोयक्षिवि
द्वानथ॥२॥नवयजमानायपन्त्रांयोः।अग्निस्त्रीणित्रिधातून्याक्षेतिविदथाकविः।सत्रीं॑रेकादशां॑इह।
यक्षञ्चपिप्रयञ्चनोविप्रोदूतःपरिष्कृतः।नभंतामन्यकेसमे।इंद्राविष्णूदृं॑हिताः।शंबरस्यनवपुरोनवतिं
चश्नथिष्टं।शतंवर्चिनःसहस्त्रंचसाकं॑हथोअप्रत्यसुरस्यवीरान्।उतमातामहिषमन्ववेनदमीत्वा
जहतिपुत्रदेवाः।अथाब्रवीद्वृत्रमिंद्रोहनिष्यन्सखेविष्णोवितरंविक्रमस्व॥३॥दृषाथत्वात्रयोदशाव
॥९१॥ ॥योवैपवमानानांत्रीणिपरिभूंस्फ्यस्वस्तिर्भक्षेदिमहीनांपयोसिदेवसवितरेतत्तेनूयेना
ययद्वैहोतापयामगृहीतोसिप्रसोअग्नएकादश॥११॥ ॥योवैपवमानानां॑स्फ्यस्वस्तिःस्वधा
यैनमःप्रमुंवास्वस्तयेतिष्ठतीवंदृत्वतारिं॑शात॥४६॥ ॥हरिःओम्॥अग्नेतेजस्विंतेजस्वीत्वंदे
वेषुभूयास्तेजस्वंतंमामायुष्मंतं×५×वर्चस्वंतंमनुष्येषुकुरुदीक्षायैचत्वातपसश्चतेजसेजुहोमितेजो

राम
९७

गाभमदक्षि

विदसितेजोमामाहासीन्माहंतेजोहासिषंमामांतेजोहासीदिंद्रौजस्विन्नोजस्वीत्वंदेवेषुभूयाओज
स्वंतंमामायुष्मंतंवर्चस्वंतंमनुष्येषुकुरुब्रह्मणश्चत्वाक्षत्रस्यच॥१॥ओजसेजुहोम्योजोविदस्योजोमा
माहासीन्माहमोजोहासिषंमामामोजोहासीत्सूर्यभ्राजस्विन्भ्राजस्वीत्वंदेवेषुभूयाभ्राजस्वंतंमामा
युष्मंतंवर्चस्वंतंमनुष्येषुकुरुवायोश्चत्वापांचभ्राजसेजुहोमिसुवर्विदसिसुवर्मामाहासीन्माहꣳ
सुवर्हासिषंमामाꣳसुवर्हासीन्मयिमेधांमयिप्रजांमय्यग्निस्तेजोदधातुमयिमेधांमयिप्रजांम
यींद्रइंद्रियंदधातुमयिमेधांमयिप्रजांमयिसूर्योभ्राजोदधातु॥२॥सत्त्रस्यत्वमयित्रयोद[illegible]॥१४॥ तिष्ठ
वायुर्हिंकर्ताग्निःप्रस्तोताप्रजापतिःसामबृहस्पतिरुद्गाताविश्वेदेवाउपगातारोमरुतःप्रतिहर्तारइं
द्रोनिधनंतेदेवाःप्राणभृतःप्राणंमयिदधत्वेतद्वैसर्वमध्वर्युरुपाकुर्वन्नुद्गातृभ्यउपाकरोतितेदेवाः
प्राणभृतःप्राणंमयिदधत्वित्याहैतदेवसर्वमात्मन्धत्तइडादेवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानिशꣳ

सिषद्विश्वेदेवाः॥१॥सूक्तवाकः पृथिविमातर्मामाहिꣳसीर्मधुमनिष्येमधुजनिष्येमधुवक्ष्यामिमधु
वदिष्यामिमधुमतींदेवेभ्योवाचमुद्यासꣳशुश्रूषेण्यांमनुष्येभ्यस्तंमादेवाअवंतुशोभायैपितरो
ति नुमदंतु॥२॥ब्राꣳस्तिषद्विश्वेदेवाअष्टाविꣳशंच॥४॥ ॥वसवस्त्वाप्रवृहंतुगायत्रेणछंदसाग्नेःप्रियं
पाथउपेहिरुद्रास्त्वाप्रवृहंतुत्रैष्टुभेनछंदसेंद्रस्यप्रियंपाथउपेह्यादित्यास्त्वाप्रवृहंतुजागतेनछंदसाविश्वेषांदेवानांप्रियंपाथउपेहिमादासुतेस्सुक्रस्सुक्रमाधूनोमिभंदनासुकोतनासुनूतनासुरेशीषुमेषी
षुवाशीषुविश्वभृत्सुमाध्वीषुककुहासुशाक्वरीषु॥१॥शुक्रासुतेस्सुक्रस्सुक्रमाधूनोमिसुक्रंतेसुक्रेण
गृह्णाम्यह्नोरूपेणसूर्यस्यरश्मिभिः।आस्मिन्नुग्राअचुच्यवुर्दिवोधाराअसश्चत।ककुहꣳरूपंवृष
भस्यरोचतेबृहत्सोमःसोमस्यपुरोगाःशुक्रःशुक्रस्यपुरोगाः।यत्तेसोमादाभ्यन्नामजागृवितस्मै
तेसोमसोमायस्वाहा॥उशिक्त्वंदेवसोमगायत्रेणछंदसाग्नेः॥२॥प्रियंपाथोअपीहिवशीत्वंदेवसोम

त्रैष्टुभेनछंदसेंद्रस्यप्रियंपाथोअपीह्यस्मत्सखात्वंदेवसोमज्ञागतेनछंदसाविश्वेषांदेवानांप्रियंपाथो
अपीह्यानःप्राणएतुपरावतआंतरिक्षाद्दिवस्परि।आयुःपृथिव्याअध्यमृतमसिप्राणायत्वा।इंद्राग्नी
मेवर्चःकृणुतांवर्चःसोमोबृहस्पतिर्वर्चोमेविश्वेदेवावर्चोमेधत्तमश्विना।दधन्वेवायदीमनुवोचद्ब्रह्मा
णिवेरुतत्।परिविश्वानिकाव्यानेमिश्चक्रमिवाभवत्॥३॥शाक्करीधुग्नेर्बृहस्पतिःपंचविंशतिश्च
॥३॥ ॥एतद्वाअपांनामधेयंगुह्यंयदाधावामंदासुतेशुक्रशुक्रमाधूनोमीत्याहापामेवनामधेये
नगुह्येनदिवोवृष्टिमवरुंधेशुक्रंतेशुक्रेणगृह्णामीत्याहैतद्वाअह्नोरूपंयद्रात्रिःसूर्यस्यरश्मयोवृष्ट्या।
ईशातेह्नएवरूपेणसूर्यस्यरश्मिभिर्दिवोवृष्टिंच्यावयत्यास्मिन्नुग्राः॥१॥अचुच्युवुरित्याहयथायु
जुरेवैतत्ककुहंरूपंवृषभस्यरोचतेबृहदित्याहैतद्वाअस्यककुहंरूपंयद्वृष्टीरूपेणैववृष्टिमवरुंधे
यत्तेसोमादाभ्यंनामजागृवीत्याहैषहवैहविषाहविर्यजतियोदाभ्यंगृहीत्वासोमायज्जुहोतिपरा

सं·त्
१९

वाएतस्यायुःप्राणएति॥२॥योऽंशुंगृह्णात्यानःप्राणएतुपरावतइत्याहायुरेवप्राणमात्मंधत्तेमृतम
सिप्राणायत्वेतिहिरण्यमभिव्यनित्यमृतंवैहिरण्यमायुःप्राणोमृतेनैवायुरात्मंधत्तेशतमानंभव
तिशतायुःपुरुषःशतेंद्रियआयुष्येवेंद्रियेप्रतितिष्ठत्यपउपस्पृशतिमेध्यंवाआपोमेध्यमेवकुरु
ते॥३॥उग्राएत्यापस्त्रीणिच॥४॥ ॥वायुरसिप्राणानामसवितुराधिपत्येपानम्मेदाश्चक्षुरसिश्रो
त्रंन्नामधातुराधिपत्यआयुर्मेदारूपमसिवर्णानामबृहस्पतेराधिपत्येप्रजांम्मेदाऋतमसिस
त्यन्नामेंद्रस्याधिपत्येक्षत्रंम्मेदाभूतमसिभव्यंन्नामपितृणामाधिपत्येपामोषधीनांगर्भंधाऋत
स्यत्वाव्योमनऋतस्य॥१॥त्वाविभूमनऋतस्यत्वाविधर्मणऋतस्यत्वासत्यायर्तस्यत्वाज्योति
षेप्रजापतिर्विराजमपश्यत्तयाभूतंचभव्यंचासृजततामृषिभ्यस्तिरोदधात्ताजमदग्निस्तपसाप
श्यत्तयावैसपृश्नीन्कामानसृजतततःपृश्नीनांपृश्नित्वंयत्पृश्नयोगृह्यंतेपृश्नीनेवतैःकामान्यजमा

राम
१९

नोवरुंधेवायुरसिप्राणाः॥ २॥ नामेत्याहप्राणापानावेवावरुंधेचक्षुरसिश्रोत्रंन्नामेत्याहायुरेवाव
रुंधेरूपमसिवर्णोनामेत्याहप्रजामेवावरुंधेऋतमसिसत्यंन्नामेत्याहक्षत्रमेवावरुंधेभूँमसिभ
व्युंन्नामेत्याहपश्रावावाअपामोषधीनांगर्भःपशूनेव॥ ३॥ अवरुंधएतावद्वैपुरुषंपरित'त'स्तद
वावरुंधऋतस्यत्वाव्योमंनइत्याहेयंवाऋतस्यव्योमेमामेवाभिजयत्यृतस्यत्वाविमनइत्याहांत
रिक्षंवाऋतस्यविमेमांतरिक्षमेवाभिजयत्यृतस्यत्वाविधर्मणइत्याहद्यौर्वाऋतस्यविधर्मदिव
मेवाभिजयत्यृतस्य॥ ४॥ त्वासत्यायेत्याहदिशोवाऋतस्यसत्यंदिशएवाभिजयत्यृतस्यत्वाज्योति
षइत्याहसुवर्गोवैलोकऋतस्यज्योतिःसुवर्गमेवलोकमभिजयत्येतावंतोवैदेवलोकास्तानेवाभिज
यतिदशसंपद्यंतेदशाक्षराविराडन्नंविराड्विराज्येवान्नाद्येप्रतितिष्ठति॥ ५॥ व्योमऋतस्यप्राणः
पशूनेवविधर्मदिवमेवाभिजयत्यृतस्यषट्चत्वारिꣳशच्च॥ ५॥ ॥ देवावैयद्यज्ञेननावारुंधततत्परैरवा

सं॰ त॰
२०

रुंधततत्पराणांपरत्वंयत्सौरेगृह्यंतेयदेवयज्ञेननावरुंधेतस्यावरुध्यैयंप्रथमंगृह्णातीममेवतेनलोकम
भिजयतियंद्वितीयमंतरिक्षंतेनयंतृतीयममुमेवतेनलोकमभिजयतियदेतेगृह्यंतएषांलोकानाम
भिजित्यै॥१॥उत्तरेष्वहःस्वमुतोर्वांचोगृह्यंतेभिजित्यैवेमांल्लोकान्पुनरिमंलोकंप्रत्यवरोहंतियत्पूर्वे
ष्वहःस्वितःपरांचोगृह्यंतेतस्मादितःपरांचइमेलोकायदुत्तरेष्वहस्स्वमुतोर्वांचोगृह्यंतेतस्मादमुतोर्वां
चइमेलोकास्तस्मादयातयाम्नोलोकान्मनुष्याउपजीवंतिब्रह्मवादिनोवदंतिकस्मात्सत्यादद्भ्यओ
षधयःसंभवंत्योषधयः॥२॥मनुष्याणामन्नंप्रजापतिंप्रजाअनुप्रजायंतइतिपरामन्वितिब्रूयाद्गृ
ह्णात्यद्भ्यस्त्वौषधीभ्योगृह्णामीतितस्मादद्भ्यओषधयःसंभवंतियद्गृह्णात्योषधीभ्यस्त्वाप्रजाभ्यो
गृह्णामीतितस्मादोषधयोमनुष्याणामन्नंयद्गृह्णातिप्रजाभ्यस्त्वाप्रजापतयेगृह्णामीतितस्मात्प्र
जापतिंप्रजाअनुप्रजायंते॥३॥अभिजित्याओषधयोष्टाचत्वारिंशच्च॥६॥ ॥प्रजापतिर्देवासुरा

राम
२०

सत्यानांवरुणोपाꣳसमुद्रःस्रोत्यानामन्नꣳसाम्राज्यानामधिपतितन्मावतुसोमओषधीनाꣳस
वितापसवानाꣳरुद्रःपशूनांत्वष्टारूपाणांविष्णुःपर्वतानाम्मरुतोगणानामधिपतयस्तेमावंतुपित
रःपितामहाःपरेवरेततास्ततामहाइहमावत।अस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधा
यामस्मिन्कर्मन्नस्यांदेवहूत्यां॥१॥अवरेसप्तदशाच॥५॥ ॥देवावैयद्यज्ञेकुर्वततदसुराअकुर्वतते
देवाएतानभ्यातानानपश्यन्तानभ्यातन्वतयद्देवानांकर्मासीदार्ध्यततयदसुराणांन्नतदार्ध्यतये
नकर्मणेर्त्सेत्तत्रहोतव्याऋध्नोत्येवतेनकर्मणायद्विश्वेदेवाःसमभरंतस्मादभ्यातानावैश्वदेवाय
त्प्रजापतिर्जयान्प्रायच्छत्तस्माज्जयाःप्राजापत्याः॥१॥यद्राष्ट्रभृद्भीराष्ट्रमाददततद्राष्ट्रभृताꣳरा
ष्ट्रभृत्त्वंतेदेवाअभ्यातानैरसुरानभ्यातन्वतजयैरजयन्राष्ट्रभृद्भीराष्ट्रमाददतयद्देवाअभ्यातानैरसु
रानभ्यातन्वततदभ्यातानानामभ्यातानत्वंयज्जयैरजयंतज्जयानांजयत्वंयद्राष्ट्रभृद्भीराष्ट्रमाद

सं·तै·
२७

दततद्राष्ट्रभृताꣳराष्ट्रभृत्त्वंततोदेवाअभवन्परासुरायोभ्रातृव्यवान्त्स्यात्सएतांजुहुयादभ्यातानैरेव
भ्रातृव्यानभ्यातनुतेजयैर्जयतिराष्ट्रभृद्भीराष्ट्रमादत्तेभवत्यात्मनापरास्यभ्रातृव्योभवति॥२॥प्रा
जापत्याःसोष्टादश्चाव॥६॥ ॥ऋताषाडृतधामाग्निर्गंधर्वस्तस्यौषधयोप्सरसऊर्जोनामसइदंब्र
ह्मक्षत्रंपातुताइदंब्रह्मक्षत्रंपांतुतस्मैस्वाहाताभ्यःस्वाहासꣳहितोविश्वसामासूर्योगंधर्वस्तस्य
मरीचयोप्सरसआयुवःसुषुम्नःसूर्यरश्मिश्चंद्रमागंधर्वस्तस्यनक्षत्राण्यप्सरसोबेकुरयोभुज्युः
सुपर्णोयज्ञोगंधर्वस्तस्यदक्षिणाअप्सरसस्तवाःप्रजापतिर्विश्वकर्मामनः॥१॥गंधर्वस्तस्यर्क्सा
मान्यप्सरसोवन्हयइषिरोविश्वव्यचावातोगंधर्वस्तस्यापोप्सरसोमुदाभुवनस्यपतेयस्यतउपरिगृ
हाइहच।सनोरास्वाज्यानिꣳरायस्पोषꣳसुवीर्यꣳसंवत्सरीणाꣳस्वस्तिं।परमेष्ठ्यधिपतिर्मृत्युर्गंध
र्वस्तस्यविश्वमप्सरसोभुवःसुक्षितिःसुभूतिर्भद्रकृत्सुवर्वान्पर्जन्योगंधर्वस्तस्यविद्युतोप्सरसोरुचो

राम
२७

दूरेहेतिरमृडयः॥२॥ मृत्युर्गंधर्वस्यप्रजाअप्सरसोभीरुवश्चारुः कृपणकाशीकामोगंधर्वस्तस्याध
योप्सरसः शोचयंतीर्नामसइदंब्रह्मक्षत्रंपातुताइदंब्रह्मक्षत्रंपांतुतस्मैस्वाहाताभ्यःस्वाहासनोभु
वनस्यपतेयस्यतउपरिगृहाइहच।उरुब्रह्मणेस्मैक्षत्रायमहिशर्मयच्छ॥३॥ मनोमृडयः षट्चत्वारिं
शच्च॥७॥ ॥राष्ट्रकामायहोतव्याराष्ट्रंवैराष्ट्रभृतोराष्ट्रेणैवास्मैराष्ट्रमवरुंधेराष्ट्रमेवभवत्यात्मनेहोत
व्याराष्ट्रंवैराष्ट्रभृतोराष्ट्रंप्रजाराष्ट्रंपशवोराष्ट्रंयच्छ्रेष्ठोभवतिराष्ट्रेणैवराष्ट्रमवरुंधेवसिष्ठः समाना
नांभवतिग्रामकामायहोतव्याराष्ट्रंवैराष्ट्रभृतोराष्ट्रंसजाताराष्ट्रेणैवास्मैराष्ट्रंसजातानवरुंधे
ग्रामी॥१॥ एवभवत्यधिदेवनेजुहोत्यधिदेवनएवास्मैसजातानवरुंधेतएनमवद्धाउपतिष्ठंतेरथ रु
मुखओजस्कामस्यहोतव्याओजोवैराष्ट्रभृतओजोरथओजसैवास्माओजोवरुंधओजस्व्येवभ
वतियोराष्ट्रादपभूतस्यात्तस्मैहोतव्यायावंतोस्यरथास्युस्तान्ब्रूयाद्युंग्ध्वमितिराष्ट्रमेवास्मैयुनक्ति॥२॥

सं·त·
२८

आहुतयोवाएतस्याक्लृप्तायस्यराष्ट्रन्नकल्पतेस्वरथस्यदक्षिणंचक्रंप्रवृह्यनाडीमभिजुहुयादाहुतीरे
वास्यकल्पयतिताअस्यकल्पमानाराष्ट्रमनुकल्पतेसंग्रामेसंयत्तेहोतव्याराष्ट्रंवैराष्ट्रभृतोराष्ट्रंखलु
वाएतेव्यायच्छंतेयेसंग्रामꣳसंयंतियस्यपूर्वस्यजुह्वतिसएवभवतिजयतितꣳसंग्राममांधुकइध्मः॥३॥
भवत्यंगाराएवप्रतिवेष्टमानाअमित्राणामस्यसेनांप्रतिवेष्टयंतियउन्माद्येत्तस्मैहोतव्यागंधर्वाप्स
रसोवाएतमुन्मादयंतियउन्माद्यत्येतेखलुवैगंधर्वाप्सरसोयद्राष्ट्रभृतस्तस्मैस्वाहाताभ्यःस्वाहेतिजु
होतितेनैवैनाञ्छमयतिनैयग्रोधऔदुंबरआश्वत्थःप्लाक्षइतीध्मोभवत्येतेवैगंधर्वाप्सरसांगृहास्व
एवैनान्॥४॥आयतनेच्छमयत्यभिचरताप्रतिलोमꣳहोतव्याःप्राणानेवास्यप्रतीचःप्रतियौति
तंततोयेनकेनचस्तृणुतेस्वकृतइरिणेजुहोतिप्रदरेवैतद्वाअस्यैनिर्ऋतिगृहीतंनिर्ऋतिगृहीतएवैनंनि
र्ऋत्याग्राहयतियद्वाचःक्रूरंतेनवषट्करोतिवाचएवैनंक्रूरेणप्रवृश्चतिताजगार्तिमार्छतियस्यकाम

राम्
२८

येतान्नाद्यं ॥ ५ ॥ आददीयेतितस्यसभायामुत्तानोनिपद्यभुवनस्यपतदृतितृणानिसंगृह्णीयात्प्रजा
पतिर्वैभुवनस्यपतिः प्रजापतिनैवास्यान्नाद्यमादत्तइदमहममुष्यामुष्यायणस्यान्नाद्यꣳहरामीत्या
हान्नाद्यमेवास्यहरतिषड्भिर्हरतिषड्वाऋतवः प्रजापतिनैवास्यान्नाद्यमादायर्तवोस्माअनुप्रयच्छंति
॥ ६ ॥ योज्येष्ठबंधुरपभूतस्यात्तꣳस्थलेवसाय्यब्रह्मौदनंचतुःशरावंपक्त्वातस्मैहोतव्यावर्ष्मवैराष्ट्रभृतो
वर्ष्मस्थलंवर्ष्मणैवैनंवर्ष्मसमानानांगमयतिचतुःशरावोभवतिदिक्ष्वेवप्रतितिष्ठतिक्षीरेभवतिरुचमे
वास्मिंदधात्युद्धरतिशृतत्वायसर्पिष्वान्भवतिमेध्यत्वायचत्वारआर्षेयाः प्राश्नंतिदिशामेवज्योतिषिजु
होति ॥ ७ ॥ ग्रामीयुनक्तीध्मः सएवैनानन्नाद्यंयच्छत्येकान्नपंचाशत्राज्ञ ॥ ८ ॥ ॥ देविकानिर्वपेत्प्रजाकाम
श्छंदाꣳसिवैदेविकाः श्छंदाꣳसीवखलुवैप्रजाश्छंदोभिरेवास्मैप्रजाः प्रजनयतिप्रथमंधातारंकरोति
मिथुनीएवतेनकरोत्यन्वेवास्माअनुमतिर्मन्यतेरातेराकाप्रसिनीवालीजनयतिप्रजास्वेवप्रजातासुकु

द्वावाविंदधात्येताएवनिर्वपेत्पशुकामश्छंदाꣳसिवैदेविकाश्छंदाꣳसि॥१॥ दूवखलुवैपशवश्छंदोभि
रेवास्मैपशून्प्रजनयतिप्रथमंधातारंकरोतिमिथुनीवतेनवापयत्यन्वेवास्माअनुमतिर्मन्यतेरातेराकाप्रसि
नीवालीञ्जनयतिपशूनेवप्रजातान्कुहूप्रतिष्ठापयत्येताएवनिर्वपेद्ग्रामकामश्छंदाꣳसिवैदेविका
श्छंदाꣳसीवखलुवैग्रामश्छंदोभिरेवास्मैग्रामं॥२॥ अवरुंधेमध्यतोधातारंकरोतिमध्यतएवैनं
ग्रामस्यदधात्येताएवनिर्वपेज्ज्योगामयावीछंदाꣳसिवैदेविकाःश्छंदाꣳसिखलुवाएतमभिमन्यं
तेयस्यज्योगामयतिच्छंदोभिरेवैनमगदंकरोतिमध्यतोधातारंकरोतिमध्यतोवाएतस्याकूतं
यस्यज्योगामयतिमध्यतएवास्यतेनकल्पयत्येताएवनिः॥३॥ र्वपेद्यंयज्ञोनोपनमेच्छंदाꣳसिवै
देविकाःश्छंदाꣳसिखलुवाएतन्नोपनमंतियंयज्ञोनोपनमतिप्रथमंधातारंकरोतिमुखतएवास्मैछं
दाꣳसिदधात्युपैनंयज्ञोनमत्येताएवनिर्वपेदीजानश्छंदाꣳसिवैदेविकायातयामानीवखलुवाएत

स्यछंदाꣳसियदीजानउत्तमंधातारंकरोति॥४॥उपरिष्टादेवास्मैछंदाꣳस्ययातयामान्यवरुंधउपै
नमुत्तरायुज्ञोनमत्येताएवनिर्वपेद्यंमेधानोपनमेछंदाꣳसिवैदेविकाःश्छंदाꣳसिखलुवाएतन्नोप
नमंतियम्मेधानोपनमतिप्रथमंधातारंकरोतिमुखतएवास्मैछंदाꣳसिदधात्युपैनंमेधानमत्येताए
वनिर्वपेत्॥५॥रुक्कामश्छंदाꣳसिवैदेविकाःश्छंदाꣳसीवुखलुवैरुक्छंदोभिरेवास्मिन्रुचंदधातिक्षी
रेभवंतिरुचमेवास्मिंदधतिमध्यतोधातारंकरोतिमध्यतएवैनꣳरुचादधातिगायत्रीवाअनुमति
स्त्रिष्टुब्राकाजगतीसिनीवाल्यनुष्टुप्कुहूर्धातावषट्कारःपूर्वपक्षोराकापरपक्षःकुहूरमावास्यासि
नीवालीपौर्णमास्यनुमतिश्चंद्रमाधाताष्टौ॥६॥वसवोष्टाक्षरागायत्र्येकादशरुद्राएकादशाक्ष
रात्रिष्टुब्द्वादशादित्याद्वादशाक्षराजगतीप्रजापतिरनुष्टुब्धातावषट्कारएतद्वैदेविकाःसर्वाणि
वछंदाꣳसिसर्वाश्चदेवतावषट्कारस्तायत्सहसर्वानिर्वपेदीश्वराएनंप्रदहोद्वप्रथमेनिरुप्यधातुस्त

सं·तै·
३०

तीयन्निर्वपेत्तयोएवोत्तरेनिर्वपेत्तथैनन्नप्रदहत्यथोयस्मैकामायनिरुप्यंतेतमेवाभिरूपाप्नोति॥७॥
पशुकामश्छंदाᳲसिवैदेविकाःश्छंदाᳲसियामंकल्पयत्येताएवनिरुत्तमेधातारंकरोतिमेधानम
त्येताएवनिर्वपेदृश्चैदहतिनववा॥१॥ ॥वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोअनमीवोभवानः॥
यत्वेमहेप्रतितन्नोजुषस्वशन्नएधिद्विपदेशंचतुष्पदे। वास्तोष्पतेशग्मयासꣳसदातेसक्षीमहिर
ण्वयागातुमत्या। आवः क्षेमउतयोगेवरन्नोयूयंपातस्वस्तिभिःसदानः। यत्सायंप्रातरग्निहोत्रंजु
होत्याहुतीष्टकाएवताउपधत्ते॥१॥यजमानोहोरात्राणिवाएतस्येष्टकायआहिताग्निर्यत्सायंप्रा
तर्जुहोत्यहोरात्राण्येवाप्त्वेष्टकाःकृत्वोपधत्तेदशसमानत्रजुहोतिदशाक्षराविराड्विराजमेवाप्त्वे
ष्टकांकृत्वोपधत्तेथोविराज्येवयज्ञमाप्नोतिचित्यश्चित्योस्यभवतितस्माद्यत्रदशोषित्वाप्रयाति
तद्यज्ञवास्त्ववास्त्वेवतद्यत्ततोर्वाचीनं॥२॥रुद्रःखलुवैवास्तोष्पतिर्यदहुत्वावास्तोष्पतीयंप्रया

राम
३०

याज्जुहुद्र एनंभूत्वाग्निरनूत्थायहंन्याद्वास्तोष्पतीयंजुहोतिभागधेयेनैवैनꣳशमयतिनार्तिमा
र्छतियजमानोयद्युक्तेजुहुयाद्यथाप्रयातेवास्तावाहुतिंजुहोतितादृगेवतद्यदयुक्तेजुहुयाद्य
थाक्षेमआहुतिंजुहोतितादृगेवतदहुतमस्यवास्तोष्पतीयꣳस्यात्॥ ३॥ दक्षिणोयुक्तोभवति
सव्योयुक्तोथवास्तोष्पतीयंजुहोत्युभयमेवाकरपरि वर्गमेवैनꣳशमयतियदेकयाजुहुयाद्दर्वि
होमंकुर्यात्पुरोनुवाक्यामनूच्ययाज्ययाजुहोतिसदेवत्वाययद्धुतआदध्याद्रुद्रंगृहानन्वारोहये
द्यदवक्षाणान्यसंप्रक्षाप्यप्रयायाद्यथायज्ञवेशसंवादहनंवातादृगेवतदयंतेयोनिर्ऋत्वियइ
त्यरण्योःसमारोहयति॥ ४॥ एषवाअग्नेर्योनिःस्वएवैनंयोनौसमारोहयत्यथोखल्वाहुर्यदर
ण्योःसमारूढोनश्येदुदस्याग्निःसीदेत्पुनराधेयस्यादितियातेअग्नेयज्ञियातनूस्तयेह्यारो
हेत्यात्मन्त्समारोहयतेयजमानोवाअग्नेर्योनिःस्वायामेवैनंयोन्याꣳसमारोहयते॥ ५॥ धन्वर्वा

चीनꣳस्यात्समारोहयतिपंचचत्वारिꣳशत्राच॥१८॥ ॥त्वमग्नेबृहद्वयोदधासिदेवदाशुषे॥कविर्गृहप
तिर्युवा।हव्यवाडग्निरजरःपितानोविभुर्विभावासुदृशीकोअस्मे।सुगार्हपत्याःसमिषोदिदीह्यस्म
द्र्यक्संमिमीहिश्रवाꣳसि।त्वंचसोमनोवशोजीवातुन्नमरामहे।प्रियस्तोत्रोवनस्पतिः।ब्रह्मादे
वानांपदवीःकवीनामृषिर्विप्राणा।महिषोमृगाणा॥श्येनोगृध्राणाꣳस्वधितिर्वनानाꣳसोमः॥१॥
पवित्रमत्येतिरेभन्।आविश्वदेवꣳसत्पतिꣳसूक्तैरद्यावृणीमहे।सत्यसवꣳसवितारं।आसत्ये
नरजसावर्तमानोनिवेशयन्नमृतंमर्त्यंच।हिरण्ययेनसवितारथेनादेवोयातिभुवनाविपश्यन्।
यथानोअदितिःकरत्पश्वेनृभ्योयथागवे।यथातोकायरुद्रियं।मानस्तोकेतनयेमानआयुषि
मानोगोषुमा॥२॥नोअश्वेषुरीरिषः।वीरान्मानोरुद्रभामितोवधीर्हविष्मंतोनमसाविधेमते।
उदप्रुतोनवयोरक्षमाणावावदतोअभ्रियस्येवघोषाः।गिरिभ्रजोनोर्मयोमदंतोबृहस्पतिमभ्य

कौञनावन्‌। हꣳसैरिवसखिभिर्वावदद्भिरश्ममन्मयानिनहनाव्यस्यन्‌। बृहस्पतिरभिकनिक्रदद्गा
उतप्रास्तौदुच्चविद्वाꣳअगायत्‌। ऐंद्रसानसिꣳरयिं॥३॥ सजित्वानꣳसदासहं। वर्षिष्ठमूतयेभर। प्रस
साह्विषुपुरुहूतशत्रून्ज्येष्ठस्तेशुष्मइहरातिरस्तु। इंद्राभरदक्षिणेनावसूनिपतिःसिंधूनामसिरेवती
नां। त्वꣳसुतस्यपीतयेसद्योवृद्धोअजायथाः। इंद्रज्यैष्ठ्यायसुक्रतो। भुवस्त्वमिंद्रब्रह्मणामहान्भुवो
विश्वेषुसवनेषुयज्ञियः। भुवोन्नꣳश्चौत्नोविश्वस्मिन्भरेज्येष्ठश्चमंत्रः॥४॥ विश्वचर्षणे। मित्रस्यचर्ष
णीधृतश्चवोदेवस्यसानसिं। सत्यंचित्रश्रवस्तमं। मित्रोजनान्यातयतिप्रजानन्मित्रोदाधारपृथिवी
मुतद्यां। मित्रःकृष्टीरनिमिषाभिचष्टेसत्यायहव्यंघृतवद्विधेम। प्रसमित्रमर्तोअस्तुप्रयस्वान्यस्त
आदित्यशिक्षतिव्रतेन। नहन्यतेनजीयतेत्वोतोनैनमꣳहोअश्नोत्यंतितोनदूरात्‌। यत॥५॥ चि
द्धितेविशोयथाप्रदेववरुणव्रतं। मिनीमसिद्यविद्यवि। यत्किंचेदंवरुणदैव्येजनेभिद्रोहंमनुष्याश्च

रामसि। अन्वित्तीयत्तवधर्मायुयोपिमोमेनस्तस्मादेनसोदेवरीरिषः। कितवासोयद्रिरिपुर्नदीवियद्वा
घासत्यमुतयन्नविद्म। सर्वाताविष्यशिथिरेवदेवाथातेस्यामवरुणप्रियासः॥६॥ सोमोगोषुमारयिं
मंत्रोयच्छिरासस्त्व॥११॥ ॥विवाआवावायोदुमैवैचित्तमग्निर्भूतानांदेवावाकूनाषाड्राष्टुकामायदेवि
कावास्तोष्पतेत्वमग्नेबृहद्वयएकादश॥११॥ ॥विवाइत्याहयथायायज्जुरेवैतन्मृत्युर्गंधर्वोविरूधेत्वमग्ने
बृहद्वयः षट्चत्वारिंशत्॥४६॥ ॥हरिःओम्॥ पूर्णापश्चादुतपूर्णापुरस्तादुन्मध्यतःपौर्णमासी
जिगाय। तस्यांदेवाअधिसंवसंतउत्तमेनाकइहमादयंतां। यत्तेदेवाअदधुर्भागधेयँमावास्येसंवसंतो
महित्वा। सानोयज्ञंपिपृहिविश्ववारेरयिंनोधेहिसुभगेसुवीरं। निवेशनीसंगमनीवसूनांविश्वारू
पाणिवसून्यावेशयंती। सहस्रपोषꣳसुभगारराणासानआगन्वर्चसा॥१॥ संविदाना। अग्नीषो
मौप्रथमौवीर्येणवसून्रुद्रानादित्यानिहजिन्वतं। माध्यꣳहिपौर्णमासंजुषेथांब्रह्मणावृद्धौसुकृते

नसानाविथास्मभ्यꣳ सहवीराꣳ रयिंनियच्छतं । आदित्याश्चांगिरसश्चाग्नीनादधत तेदर्शपूर्णमासौ
प्रैप्सन्तेषामंगिरसांनिरुप्तꣳ हविरासीदथादित्याएतौहोमावपश्यन्तौजुहवुस्ततोवैतेदर्शपूर्णमा
सौ ॥२॥ पूर्वआलभेतदर्शपूर्णमासावालभमानएतौहोमौपुरस्ताज्जु×वे×हुयात्साक्षादेवदर्शपूर्ण
मासावालभेतब्रह्मवादिनोवदंतिसत्वैदर्शपूर्णमासावालभेतयएनयोरनुलोमंचप्रतिलोमंचवि
द्यादित्यमावास्यायाऊर्ध्वंतदनुलोमंपौर्णमास्यैप्रतीचीनंतत्प्रतिलोमंयत्पौर्णमासींपूर्वामाल
भेतप्रतिलोमूमेनावालभेतामुमपक्षीयमाणमन्वप ॥३॥ क्षीयतसारस्वतौहोमौपुरस्ताज्जुहु
यादमावास्यावैसरस्वत्यनुलोममेवैनावालभेतमुमाप्यायमानमन्वाप्यायतआग्नावैष्णवमेका
दशाकपालंपुरस्तान्निर्वपेत्सरस्वत्यैचरुꣳ सरस्वतेद्वादशाकपालंयदाग्नेयोभवत्यग्निर्वैयज्ञमुखं
यज्ञमुखमेवार्द्धिंपुरस्ताद्धत्तेयद्वैष्णवोभवतियज्ञोवैविष्णुर्यज्ञमेवारभ्यप्रतनुतेसरस्वत्यैचरुर्भवति

सरस्वतेद्वादशकपालोमावास्यांवैसरस्वती पूर्णमासः सरस्वान्तावेवसाक्षादारभतऋध्नोत्याभ्यांद्वा
दशकपालः सरस्वते भवतिमिथुनत्वायप्रजात्यैमिथुनौगावौदक्षिणासमृध्यै॥४॥ वत्सौवैतेदर्शपू
र्णमासावपत्तनुतेसरस्वत्यैपंचविंशच्चातिस्त्र॥१॥ ॥ऋषयोवाइंद्रंप्रत्यक्षंनापश्यन्तंवसिष्ठःप्रत्यक्षम
पश्यत्सोब्रवीद्ब्राह्मणंतेवक्ष्यामियथात्वत्पुरोहिताः प्रजाः प्रजनिष्यंतेथमेतरेभ्यऋषिभ्योमाप्रवोच
इतितस्माएतान्स्तोमभागानब्रवीत्ततोवसिष्ठपुरोहिताः प्रजाः प्राजायंततस्माद्वासिष्ठोब्रह्माका
र्यः प्रैवजायतेरश्मिरसिक्षयायत्वाक्षयंजिन्वेति॥१॥आहदेवावैक्षयोदेवेभ्यएवयज्ञंप्राहप्रेतिर
सिधर्मायत्वाधर्मंजिन्वेत्याहमनुष्यावैधर्मोमनुष्येभ्यएवयज्ञंप्राहान्वितिरसिदिवेत्वादिवंजिन्वे
त्याहेभ्यएवलोकेभ्योयज्ञंप्राहविष्टंभोसिवृष्ट्यैत्वावृष्टिंजिन्वेत्याहवृष्टिमेवाव॥२॥रुंधे
प्रवास्यनुवासीत्याहमिथुनत्वायोशिगसिवसुभ्यस्त्वावसूंजिन्वेत्याहाष्टौवसवः

कादृत्रारुद्राद्दृादृत्रादित्याएतावंतोवैदेवास्तेभ्यएवयज्ञंप्राहौजोसिपितृभ्यस्त्वापितॄंजिन्वेत्याहदेवा
नेवपितॄननुसंतनोतितंतुरसिप्रजाभ्यस्त्वाप्रजाजिन्व ॥ ३ ॥ इत्याहपितॄनेवप्रजाअनुसंतनोतिपृत
नाषाडसिपशुभ्यस्त्वापशूंजिन्वेत्याहप्रजाएवपशून्ननुसंतनोतिरेवदस्योषधीभ्यस्त्वौषधीर्जिन्वे
त्याहौषधीष्वेवपशून्प्रतिष्ठापयत्यभिजिदसियुक्तग्रावेंद्रायत्वेंद्रंजिन्वेत्याहाभिजित्याअधिपतिरसि
प्राणायत्वाप्राणं ॥ ४ ॥ जिन्वेत्याहप्रजास्वेवप्राणंदधातित्रिवृदसिप्रवृदसीत्याहमिथुनत्वायसꣳरोहो
सिनीरोहोसीत्याहप्रजात्यैवसुकोसिवेषश्रि×णा×रसिवस्यष्टिरसीत्याहप्रतिष्ठित्यै ॥ ५ ॥ जिन्वेत्य
वप्रजाजिन्वप्राणांत्रिꣳशच्च ॥ २ ॥ ॥ अग्निनादेवेनपृतनाजयामिगायत्रेणछंदसात्रिवृतास्तोमेनर
थंतरेणसाम्नावषट्कारेणवज्रेणपूर्वजान्भ्रातृव्यानधरान्पादयाम्यवैनान्बाधेप्रत्येनान्नुदेस्मिन्क्षये
स्मिंभूमिलोकेयोस्मान्द्वेष्टियंचवयंद्विष्मोविष्णोःक्रमेणात्येनान्क्रामामीन्द्रेणदेवेनपृतनाजयामित्रै

सं·तं·
३४

सा
ष्टुभेनछंदपंचदशेनस्तोमेनबृहतासाम्नावषट्कारेणवज्रेण॥१॥सहजान्विश्वेभिर्देवेभिःपृतनाजया
मिजागतेनछंदसासप्तदशेनस्तोमेनवामदेव्येनसाम्नावषट्कारेणवज्रेणापरजान्निंद्रेणसयुजोव
यंःसासह्यामपृतन्यतः।घ्नंतोवृत्राण्यप्रति।यत्तेअग्नेतेजस्तेनाहंतेजस्वीभूयासंयत्तेअग्नेवर्चस्ते
नाहंवर्चस्वीभूयासंयत्तेअग्नेहरस्तेनाहंःहरस्वीभूयासं॥२॥बृहतासाम्नावषट्कारेणवज्रेणषट्
त्वारिंःशाद्व॥३॥ ॥येदेवायज्ञहनोयज्ञमुषःपृथिव्यामध्यासते।अग्निर्मातेभ्योरक्षतुगच्छेमसुकृ
तोवयं।आगन्ममित्रावरुणावरेण्यारात्रीणांभागोयुवयोर्योअस्ति।नाकंगृह्णानाःसुकृतस्यलोकेतृ
तीयेपृष्ठेअधिरोचनेदिवः।येदेवायज्ञहनोयज्ञमुषोंतरिक्षेध्यासते।वायुर्मातेभ्योरक्षतुगच्छेमसुकृतो
वयं।यास्तेरात्रीःसवितः॥१॥देवयानीरंतराद्यावापृथिवीवियंति।गृहैश्चसर्वैःप्रजयान्वग्रेस्वोरु
हाणास्तरतारजांःसि।येदेवायज्ञहनोयज्ञमुषोदिव्यध्यासते।सूर्योमातेभ्योरक्षतुगच्छेमसुकृतोव

राम
३४

यं।येनेंद्रायसमभरःपयाꣳस्युत्तमेनहविषाजातवेदः।तेनाग्नेत्वमुतवर्धयेमꣳसजातानाꣳश्रैष्ठ्यआ
धेह्येनं।यज्ञहनोवैदेवायज्ञमुषः॥२॥संतितएषुलोकेष्वासतआददानाविमथ्नानायोददातियो
यजतेतस्य।येदेवायज्ञहनःपृथिव्यामध्यासतेयेअंतरिक्षेयेदिवीत्याहेमानेवलोकाꣳस्तीर्त्वासगृ
हःसपशुःसुवर्गंल्लोकमेत्यपवैसोमेनेजानाद्देवताश्चयज्ञश्चक्रामंत्याग्नेयंपंचकपालमुदवसानीयं
न्निर्वपेदग्निःसर्वादेवताः॥३॥पांक्तोयज्ञोदेवताश्चैवयज्ञंचावरुंधेगायत्रोवाअग्निर्गायत्रछंदास्तंछं
दसाव्यर्धयतियत्पंचकपालंकरोत्यष्टाकपालःकार्योष्टाक्षरागायत्रीगायत्रोग्निर्गायत्रछंदाःस्वेनैवै
नंछंदसासमर्धयतिपंक्त्यौयाज्यानुवाक्येभवतःपांक्तोयज्ञस्तेनैवयज्ञान्नैति॥४॥सवितर्देवाय
ज्ञमुषःसर्वादेवताःस्त्रिचत्वारिꣳशाच्च॥५॥ ॥सूर्योमादेवोदेवेभ्यःपातुवायुरंतरिक्षाद्यजमानोग्नि
र्मापातुचक्षुषः।सक्षशूषसवितर्विश्वचर्षणएतेभिःसोमनामभिर्विधेमतेतेभिःसोमनामभिर्विधेमते।

सं·त्र
३५

अहंपरस्तादहमवस्तादहंज्योतिषावितमोववार।यदंतरिक्षंतदुमेपिताभूदहꣳसूर्यमुभयतोददर्शाहं
भूयासमुत्तमःसमानानां॥१॥आसमुद्रादांतरिक्षात्प्रजापतिरुदधिं×न्नू×च्यावयातींद्रःप्रस्नौतुम
रुतोवर्षयंतून्नंभयपृथिवींभिंधीदंदिव्यन्नभः।उद्नोदिव्यस्यनोदेहीशानोविसृजादृतिं।पशवोवा
एतेयदादित्यएषरुद्रोयदग्निरोषधीःप्रास्याग्नावादित्यंजुहोतिरुद्रादेवपशूनंतर्दधात्यथोओषधी
ष्वेवपशून्॥२॥प्रतिष्ठापयतिविकर्णंयज्ञस्यवितनोतिपंथांल्लोकस्यपृष्ठेअधिरोचनेदिवः।येनहव्यंव
हसियासिदूतइतःप्रचेताअमुतःसनीयान्।यास्तेविश्वाःसमिधःसंत्यग्नेयाःपृथिव्यांबर्हिषिसू
र्येयाः।तास्तेगच्छंत्वाहुतिंघृतस्यदेवायतेयजमानायशर्म।आशासानःसुवीर्यꣳरायस्पोषꣳस्व
श्वियं।बृहस्पतिनाराया।स्वगाकृतोमह्यंयजमानायतिष्ठ॥३॥समानानामोषधीष्वेवपशून्मह्यं
यजमानायैकंच॥५॥ ॥संत्वानह्यामिपयसाघृतेनसंत्वानह्याम्यपओषधीभिः।संत्वानह्यामि

राम
३५

प्रजयाहमद्यसादीक्षितासनवोवाजमस्मे। प्रेतुब्रह्मणस्पत्नीवेदिंवर्णेनसीदतु। अथाहमनुका
मिनीस्वेलोकेविशादृह। सुप्रजसस्त्वावयꣳ सुपत्नीरुपसेदिम। अग्नेसपत्नदंभनमदब्धासोम
दाभ्यं। इमंविष्यामिवरुणस्यपाशं॥१॥ यमबध्नीतसवितासुकेतः। धातुश्चयोनौसुकृतस्यलोके
स्योनंमेसहपत्याकरोमि। प्रेह्युदेह्यृतस्यवामीरन्वग्निस्तेग्रंनयत्वदितिर्मध्यंददतांरुद्रावसृष्टा
सियुवानाम मामाहिꣳसीर्वसुभ्योरुद्रेभ्यआदित्येभ्योविश्वेभ्योवोदेवेभ्यःपन्नेजनीर्गृह्णामि
यज्ञायवःपन्नेजनीःसादयामिविश्वस्यतेविश्वावतोवृष्णियावतः॥२॥ तवाग्नेवामीरनुसंदृशिवि
श्वारेताꣳसिधिषीयागंदेवान्यज्ञोनिदेवीर्देवेभ्योयज्ञमशिषन्नस्मिन्त्सुन्वतियजमानआशिषःस्वाहा
कृताःसमुद्रेष्ठागंधर्वमातिष्ठतानु। वातस्यपत्मन्निडईडिताः॥३॥ पाशंवृष्णियावतस्त्रिꣳशच्च॥६॥
वषट्कारोवैगायत्रियैशिरोच्छिनत्तस्यैरसःपरापतत्सपृथिवीमाविशत्सखदिरोभवद्यस्यखादि

सं·त्तं
३६

रस्रुवोभवतिछंदसामेवरसेनावद्यतिसरसास्याऽहुतयोभवंतितृतीयस्यामितोदिविसोमऽआसीत्तं
गायत्र्याहरत्तस्यपर्णमच्छिद्यततत्पर्णोभवत्तत्पर्णस्यपर्णत्वंयस्यपर्णमयीजुहूः॥१॥भवतिसौम्या
अस्याहुतयोभवंतिजुषंतेस्यदेवाआहुतीर्देवावैब्रह्मन्नवदंततत्पर्णउपाशृणोत्सुश्रवावैनामयस्य
पर्णमयीजुहूर्भवतिनपापꣳश्लोकꣳशृणोतिब्रह्मवैपर्णोविण्मरुतोन्नंविण्मारुतोश्वत्थोयस्यप
र्णमयीजुहूर्भवत्याश्वत्थ्युपभृद्ब्रह्मणैवान्नमवरुंधेथोब्रह्म॥२॥एवविश्यध्यूहतिराष्ट्रंवैपर्णोविड
श्वत्थोयत्पर्णमयीजुहूर्भवत्याश्वत्थ्युपभृद्राष्ट्रमेवविश्यध्यूहतिप्रजापतिर्वाअजुहोत्सायत्राहुतिः
प्रत्यतिष्ठत्ततोविकंकतउदतिष्ठत्ततःप्रजाअसृजतयस्यवैकंकतीध्रुवाभवतिप्रत्येवास्याहुतयस्ति
ष्ठंत्यथोप्रैवजायतएतद्वैस्रुचाꣳरूपंयस्यैवꣳरूपाःस्रुचोभवंतिसर्वाण्येवैनꣳरूपाणिपशूनामुप
तिष्ठंतेनास्यापरूपमात्मंजायते॥३॥जुहूरथोब्रह्मस्रुचाꣳसप्तदशाच॥७॥ ॥उपयामगृहीतोसि

राम
३६

प्रजापतयेत्वाज्योतिष्मतेज्योतिष्मंतंगृह्णामिदक्षायदक्षवृधेरातंदेवेभ्योग्निजिह्वेभ्यस्त्वर्तायुभ्य
इंद्रज्येष्ठेभ्योवरुणराजभ्योवातापिभ्यःपर्जन्यात्मभ्योदिवेत्वांतरिक्षायत्वापृथिव्यैत्वापेंद्रद्विषतो
मनोपजिज्यासतोजह्यपयेनोरातीयतितंजहिप्राणायत्वापानायत्वाव्यानायत्वासतेत्वासते
त्वाद्भ्यःस्त्वौषधीभ्योविश्वेभ्यस्त्वाभूतेभ्योयतःप्रजाअखिद्राअजायंततस्मैत्वाप्रजापतयेविभू
दाव्नेज्योतिष्मतेज्योतिष्मंतंजुहोमि॥१॥ओषधीभ्यश्चतुर्दशाव॥८॥ ॥यंवाअध्वर्युश्चयजमान
श्चदेवतामंतरितस्तस्याआवृश्चेतेप्राजापत्यंदधिग्रहंगृह्णीयात्प्रजापतिःसर्वादेवतादेवताभ्यएव
निन्हुवातेज्येष्ठोवाएषग्रहाणांयस्यैषगृह्यतेज्यैष्ठ्यमेवगच्छतिसर्वासांवाएतद्देवतानांरूपंयदेष
य ग्रहोयस्यैषगृह्यतेसर्वाण्येवैनंरूपाणिपशूनामुपतिष्ठंतउपयामगृहीतः॥१॥असिप्रजापतयेत्वा
ज्योतिष्मतेज्योतिष्मंतंगृह्णामीत्याहज्योतिरेवैनंसमानानांकरोत्यग्निजिह्वेभ्यस्त्वर्तायुभ्यइत्याहैता

वतीर्वैदेवतास्ताभ्यएवैनꣳसर्वाभ्योगृह्णात्यैंद्रद्विषतोमनद्वत्याहभ्रातृव्यापनुत्त्यैप्राणायत्वापानायत्वे
त्याहप्राणानेवयजमानेदधातितस्मैत्वाप्रजापतयेविभूदाव्नेज्योतिष्मतेज्योतिष्मंतंजुहोमि॥२॥इत्या
हप्रजापतिःसर्वादेवताःसर्वाभ्यएवैनंदेवताभ्योजुहोत्याज्यग्रहंगृह्णीयात्तेजस्कामस्यतेजोवाआज्यं
तेजस्व्येवभवतिसोमग्रहंगृह्णीयाद्ब्रह्मवर्चसकामस्यब्रह्मवर्चसंवैसोमोब्रह्मवर्चस्येवभवतिदधिग्र
हंगृह्णीयात्पशुकामस्योर्ग्वैदध्यूर्क्पशवऊर्जैवास्माऊर्जंपशूनवरुंधे॥३॥उपयामगृहीतोजुहोमि
त्रिचत्वारिंशच्च॥९॥ ॥स्वेक्रतुमपिरंजंतिविश्वेदूर्यदेतेत्रिर्भवंत्यूमाः।स्वादोःस्वादीयःस्वादुनास्व
जासमतंऊषुमधुमधुनाभियोधि।उपयामगृहीतोसिप्रजापतयेत्वाजुष्टंगृह्णाम्येषतेयोनिःप्रजाप
तयेत्वा।प्राणग्रहान्गृह्णात्येतावद्वाअस्तियावदेतेग्रहास्तोमाश्छंदाꣳसिपृष्ठानिदिशोयावदेवास्तित
द्॥१॥अवरुंधेज्येष्ठावाएतान्ब्राह्मणाःपुराविदामक्रन्तस्मात्तेषाꣳसर्वादिशोभिजिताअभूवंन्यस्ये

तेगृह्यंतेज्यैष्ठ्यमेवगच्छत्यभिदिग्भ्योजयतिपंचवगृह्यंतेपंचवैदिशः सर्वास्वेवदिक्ष्वृध्नुवंतिनवनवगृह्यंते
नववैपुरुषेप्राणाः प्राणानेवयजमानेषुदधतिप्रायणीयेचोदयनीयेचगृह्यंतेप्राणावैप्राणग्रहाः॥२॥
ति३ प्राणैरेवप्रयंतिप्राणैरुद्यंतिदशमेहन्गृह्यंतेप्राणावैप्राणग्रहाः प्राणेभ्यः खलुवाएतत्प्रजायंतियद्वाम
देव्यंयोनेश्च्यवतेदशमेहन्वामदेव्यंयोनेश्च्यवतेयद्दशमेहन्गृह्यंतेप्राणेभ्यएवतत्प्रजानयंति॥३॥
तत्प्राणग्रहाः सप्तत्रिंशच्च॥१०॥ ॥प्रदेवंदेव्याधियाभरताजातवेदसं। हव्यानोवक्षदानुषक्। अय
मुष्यप्रदेवयुर्होतायज्ञायनीयते। रथोनयोरभीवृतोघृणीवांचेततित्मना। अयमग्निरुरुष्यत्यमृ
तादिवजन्मनः। सहसश्चित्सहीयान्देवोजीवातवेकृतः। इडायास्त्वापदेवयन्नाभापृथिव्याअधि। जा
तवेदोनिधीमह्यग्नेहव्यायवोढवे॥१॥ अग्नेविश्वेभिस्स्वनीकदेवैरूर्णावंतंप्रथमः सीदयोनिं। कुलायि
नंघृतवंतं सवित्रेयज्ञन्नययजमानायसाधु। सीदहोतस्वउलोकेचिकित्वान्त्सादयायज्ञं सुकृत

सं.त.
३८

स्वयोनौ।देवावीर्देवान्हविषायजास्यग्नेबृहद्यजमानेवयोधाः।निहोताहोतृषदनेविदानस्त्वेषोदीदि
वाꣳअसदत्सुदक्षः।अदब्धव्रतप्रमतिर्वसिष्ठःसहस्रंभरःशुचिजिह्वोऽग्निः।त्वंदूतस्त्वं॥२॥उ
नःपरस्पाःस्त्वंवस्वआवृषभप्रणेता।अग्नेतोकस्यनस्तनेतनूनामप्रयुच्छंदीद्यद्बोधिगोपाः।अग्नि
त्वादेवसवितरीशानंवार्याणां।सदावन्भागमीमहे।महीद्यौःपृथिवीचनइमंयज्ञंमिमिक्षतां।पिपृतान्नोभ
रीमभिः।त्वामग्नेपुष्करादध्यथर्वानिरमंथत।मूर्ध्नोविश्वस्यवाघतः।तमु॥३॥त्वादध्यङ्ङृषिःपुत्रई
धेअथर्वणः।वृत्रहणंपुरंदरं।तमुत्वापाथ्योवृषासमीधेदस्युहंतमं।धनंजयꣳरणेरणे।उतब्रुवंतुजंतव
उदग्निर्वृत्रहाजनि।धनंजयोरणेरणे।आयꣳहस्तेनखादिनꣳशिशुंजातन्नबिभ्रति।विशामग्निꣳस्व
ध्वरं।प्रदेवंदेववीतयेभरतावसुवित्तमं।आस्वेयोनौनिषीदतु।आ॥४॥जातंजातवेदसिप्रियꣳशिशी
तातिथिं।स्योनआगृहपतिं।अग्निनाग्निःसमिध्यतेकविर्गृहपतिर्युवा।हव्यवाड्जुह्वास्यः।त्वꣳह्यग्ने

राम
३८

अग्निनाविप्रोविप्रेणसन्त्सुता। सखासख्यासमिध्यसे। तम्मर्जयंतसुक्रतुंपुरोयावानमाजिषु। स्वे
षुक्षयेषुवाजिनं। यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन्। तेहनाकंमहिमानःसचंते
यत्रपूर्वेसाध्याःसंतिदेवाः॥५॥ वोदवेडुतस्त्वंतमुसीदत्वायत्रेनत्वारिव॥११॥ ॥पूर्णषैयोग्निनादे
वेनयदेवाःस्त्र्यौंमास्त्वावषट्कारःसखदिरउपयामगृहीतोसियांवैलेक्रतुंप्रदेवंदेव्येकादश॥११॥ ॥
पूर्णासहस्राः स्तवाग्नेवामीपाणैरेवषड्ड्रिः रात्॥३६॥ ॥हरिःओम्॥ ॥श्रीकृष्णायनमः॥ ॥
शके१६९२विकृतिनामसंवत्सरेज्येष्ठवद्य अष्टमिमंदवासरेदंपुस्तकंसमाप्तं॥ ॥शुभंभवतु॥ ॥
भग्नपृष्ठिकटिग्रीवस्तब्धदृष्टिरधोमुखंकष्टेनलिखितंग्रंथंयत्नेनप्रतिपालयेत्॥ ॥छ॥ ॥छ॥
॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

इतिसंहितात्तृतीयाष्टकसमाप्तः॥

इतिश्री चतुर्थाष्टक प्रारंभः गोविंदभट्ट स्वालपुले वद्धनं ॥

श्रीगणेशायनमः ॥ हरिः ॐ त्वामग्नेहविष्मंतोदेवंमर्त्तासईळते ॥ मन्येत्वाजातवे
दसंसहव्यावक्ष्यानुषक् ॥ अग्निर्होतादास्वतःक्षयस्यवृक्तबर्हिषः ॥ संयज्ञास
श्चरंतियंसंवाजासश्श्रवस्यवः ॥ उतस्मयंशिशुंयथानवंजनिष्टारणी ॥ धर्ता
रंमानुषीणांविशामग्निंस्वध्वरं ॥ उतस्मदुर्गृभीयसेपुत्रोनह्वार्याणां ॥ पुरूयो
दग्धासिवनाग्नेपशुर्नयवसे ॥ अधस्मयस्यार्चयःसम्यक्संयंतिधूमिनः ॥
यदीमहत्रितोदिव्युपध्मातेवधमतिशिशीतेध्मातरीयथा ॥ तवाहमग्नऊति
भिर्मित्रस्यचप्रशस्तिभिः ॥ द्वेषोयुतोनदुरितातुर्याममर्त्यानां ॥ तंनोअग्नेअ
भीनरोरयिंसहस्वआभर ॥ सक्षेपयत्सपोषयद्भुवद्वाजस्यसातयउतैधिपृ
त्सुनोवृधे ॥ १ ॥ श्रीगणेशायनमः ॥ ॐ मू ॥ अग्नऽओजिष्ठमाभरद्युम्नमस्म
भ्यमध्रिगो ॥ प्रनोरायापरीणसारत्सिवाजायपंथां ॥ त्वंनोऽअग्नेअद्भुतक्रत्वा
दक्षस्यमहना ॥ त्वेऽअसुर्य१मारुहत्क्राणामित्रोनयज्ञियः ॥ त्वंनोअग्नऽएषांग

॥१॥ यंपुष्टिंचवर्द्धय॥ येस्तोमेभिःप्रसूरयोनरोमघान्यानशुः॥ येअग्नेचंद्रतेगिरः॥ ॥२॥
शुंभंत्यश्वराधसः॥ शुष्मेभिःशुष्मिणोनरोदिवश्चिद्येषांबृहत्सुकीर्तिर्बोध
तित्मना॥ तवत्येऽअग्नेऽअर्चयोभ्राजंतोयंतिधृष्णुया॥ परिज्मानोनविद्यु
तःस्वानोरथोनवाजयुः॥ नूनोऽअग्नऽऊतयेसबाधसश्चरातये॥ अस्मा
कासश्चसूरयोविश्वाऽआशास्तरीषणि॥ त्वंनोऽअग्नेऽअंगिरःस्तुतःस्त
वानआभर॥ होतर्विभ्वासहंरयिंस्तोतृभ्यःस्तवसेचनऽउतैधिपृत्सुनोवृधे
॥७॥ जनस्यगोपाअजनिष्टजागृविरग्निःसुदक्षःसुवितायनव्यसे॥ घृ
तप्रतीकोबृहतादिविस्पृशाद्युमद्विभातिभरतेभ्यःशुचिः॥ यज्ञस्यकेतुंप्र
थमंपुरोहितमग्निंनरस्त्रिषधस्थेसमीधिरे॥ इंद्रेणदेवैःसरथंसबर्हि
षिसीदन्निहोतायजथायसुक्रतुः॥ असंमृष्टोजायसेमात्रोःशुचिर्मंद्रः

त

कविरुदतिष्ठोविवस्वतः ॥ घृतेनत्वावर्द्धयंनग्नआहुतधूमस्तेकेतुरभवद्दिवि
श्रितः ॥ अग्निर्नोयज्ञमुपवेतुसाधुयाग्निंनरोविभरंतेगृहेगृहे ॥ अग्निर्दूतो
अभवद्धव्यवाहनोग्निं वृणानावृणतेकविक्रतुं ॥ तुभ्येदमग्नेमधुमत्तमं
वचःस्तुभ्यंमनीषाइयमस्तुशंहृदे ॥ त्वांगिरःसिंधुमिवावनीर्महीरापृणं
तिशवसावर्धयंतिच ॥ त्वामग्नेऽअंगिरसोगुहाहितमन्वविंदंछिश्रियाणं
वनेवने ॥ सजायसेमथ्यमानःसहोमहत्वामाहुःसहसस्पुत्रमंगिरः ॥ २५॥
प्राग्नयेवृहतेयज्ञियायऽऋतस्यवृष्णेऽअसुरायमन्म ॥ घृतंनयज्ञआस्ये
ऽसुपूतंगिरंभरेवृषभायप्रतीचीं ॥ ऋतंचिकित्वऋतमिच्चिकिद्ध्यृतस्य
धाराऽअनुतृंधिपूर्वीः ॥ नाहंयातुंसहसानद्वयेनऽऋतंसपाम्यरुषस्यवृ
ष्णः ॥ कयानोअग्नऽऋतयन्नृतेनभुवोनवेदाऽउचथस्यनव्यः ॥ [illegible]

वेद्यमिदेवऽऋतुपाऽऋतूनांनाहंपतिंसनितुरस्यरायः।।केतेऽअग्नेरिपवेबं ।।२।।
धनासःकेपायवःसनिषंतद्युमंतः।।केधासिमग्नेअनृतस्यपांतिकआ
सतोवचसःसंतिगोपाः।।सखायस्तेविषुणाअग्नएतेशिवासःसंतोऽअ
शिवाअभूवन्।।अधूर्षतस्वयमेतेवचोभिर्ऋजूयतेवृजिनानिब्रुवंतः।।
यस्तेअग्नेनमसायज्ञमीट्टऽऋतंसपात्यरुषस्यवृष्णः।।तस्यक्षयःपृथुरा
साधुरेतुप्रसर्स्राणस्यनहुषस्यशेषः।।४।।अर्चंतस्त्वाहवामहेर्चंतःसमिधी
महि।।अग्नेऽअर्चंतऊतये।।अग्नेस्तोमंमनामहेसिध्रमद्यदिविस्पृशः।
देवस्यद्रविणस्यवः।।अग्निर्जुषतनोगिरोहोतायोमानुषेष्वा।।सयक्षद्
दैव्यंजनं।।त्वमग्नेसप्रथाअसिजुष्टोहोतावरेण्यः।।त्वयायज्ञंवितन्वते।।
त्वामग्नेवाजसातमंविप्रावर्धंतिसुष्टुतं।।सनोरास्वसुवीर्यं।।अग्नेने

मिरराँइवदेवाँस्त्वंपरिभूरसि॥आराधश्चित्रमृंजसे॥५॥अग्निंस्तो
मेनबोधयसमिधानोअमर्त्यं॥हव्यादेवेषुनोदधत्॥तमध्वरेष्वीळ
तेदेवंमर्ताअमर्त्यं॥यजिष्ठंमानुषेजने॥तंहिशश्वंतईळतेस्रुचादेवंघृ
तश्चुता॥अग्निंहव्यायवोळ्हवे॥अग्निर्जातोअरोचतघ्नंदस्यूंज्यो
तिषातमः॥अविंदद्गाअपस्वः॥अग्निमीळेन्यंकविंघृतपृष्ठंसपर्य
त॥वेतुमेशृणवद्धवं॥अग्निंघृतेनवावृधुःस्तोमेभिर्विश्वचर्षणिं॥
स्वाधीभिर्वचस्युभिः॥६॥५॥प्रवेधसेकवयेवेद्यायगिरंभरेयशसेपू
र्व्याय॥घृतप्रसत्तोअसुरःसुशेवोरायोधर्ताधरुणोवस्वोअ
ग्निः॥ऋतेनऋतंधरुणंधारयंतयज्ञस्यशाकेपरमेव्योमन्॥दिवोध
र्मंधरुणेसेदुषोनॄंजातैरजातांअभियेननक्षुः॥अंहोयुवस्तन्वस्त

स्तन्वतेविवयोमहद्दुष्टरंपूर्व्याय॥ससंवतोनवजातस्तुतुर्यात्सिंहंनक्रुद्ध ३॥
मभितःपरिष्ठुः॥मातेवयद्भरसेपप्रथानोजनंजनंधायसेचक्षसेच॥वयो
वयोजरसेयद्दधानःपरित्मनाविषुरूपोजिगासि॥वाजोनुतेशवसस्पा
त्वंतमुरुंदोघंधरुणंदेवरायः॥पदंनतायुर्गुहादधानोमहोरायेचितयं
न्नत्रिमस्पः॥७॥बृहद्वयोहिभानवेर्चादेवायाग्नये॥यंमित्रंनप्रशस्ति
भिर्मर्तासोदधिरेपुरः॥सहिद्युभिर्जनानांहोतादक्षस्यबाह्वोः॥विहव्य
मग्निरानुषग्भगोनवारमृण्वति॥अस्यस्तोमेमघोनःसख्येवृद्धशोचि
षः॥विश्वायस्मिन्तुविष्वणिसमर्येशुष्ममादधुः॥अधाह्यग्नएषांसुवी
र्यस्यमंहना॥तमिद्यह्वंनरोदसीपरिश्रवोबभूवतुः॥नूनएहिवार्यम
ग्नेगृणानआभर॥येवयंयेचसूरयःस्वस्तिधामहेसचोतैधिपृत्सु

नो वृधे ॥ ५ ॥ १६ ॥ आ यज्ञैर्देव मर्त्य इत्था तव्यांसमूतये ॥ अग्निं कृते स्वध्वरे पू
रुरीळीतावसे ॥ अस्य हि स्वयशस्तर ऽ आसा विधर्मन्मन्यसे ॥ तं नाकं
चित्रशोचिषं मंद्रं परो मनीषया ॥ अस्य वासा उ अर्चिषा य ऽ आयुक्त तुजा गि
रा ॥ दिवो न यस्य रेतसा बृहच्छोचंत्यर्चयः ॥ अस्य क्रत्वा विचेतसो दस्म
स्य वसु रथ ऽ आ ॥ अधा विश्वासु हव्योऽग्निर्विक्षु प्र शस्यते ॥ नू न इ
द्धि वार्यमासा सचंत सूरयः ॥ ऊर्जो नपादभिष्टये पाहि शग्धि स्वस्तय उ
त्सु नो वृधे तैधि पृ ॥ २ ॥ प्रातरग्निः पुरुप्रियो विशः स्तवेतातिथिः ॥ विश्वानि यो अमर्त्यो
हव्या मर्तेषु रण्यति ॥ द्विताय मृक्तवाहसे स्वस्य दक्षस्य मंहना ॥ इंदुं स धत्त ऽ
आनुषक् स्तोता चित्ते अमर्त्य ॥ तं वो दीर्घायुशोचिषं गिरा हुवे मघोनां ॥
अरिष्टो येषां रथो व्यश्वदावन्नीयते ॥ चित्रा वा येषु दीधितिरासन्नुक्था पां

न्तिये॥ स्तीर्णं बर्हिः स्वर्णरे श्रवांसि दधिरे परि॥ ये मे पंचाशतं ददुरश्वानां स
धस्तुति॥ द्युमदग्ने महि श्रवो बृहत्कृधि मघोनां नृवदमृत नृणां॥ १०॥
अभ्यवस्थाः प्रजायंते प्रवव्रेर्वव्रिश्चिकेत॥ उपस्थे मातुर्वि चष्टे॥ जुहुरे
विचितयंतोऽनिमिषं नृम्णं पांति॥ आ दृळ्हां पुरं विविशुः॥ आ श्वैत्रेय
स्य जंतवो द्युमद्वर्द्धंत कृष्टयः॥ निष्कग्रीवो बृहदुक्थ एना मध्वा न वाजु
युः॥ प्रियं दुग्धं न काम्यमजामि जाम्योः सचा॥ घर्मो न वाजजठरोऽदब्धः
शश्वतो दभः॥ क्रीळन्नो रश्म आ भुवः संभस्मना युना वेविदानः॥ ता अ वा
स्य संधृषजो न तिग्माः सुसंशिता वक्ष्यो वक्षणेस्थाः॥ ११॥ यमग्ने वाजसा
तम त्वं चिन्मन्यसे रयिं॥ तं नो गीर्भिः श्रवाय्यं देवत्रा पनया युजं॥ ये अग्ने ने
रयंति ते वृद्धा उग्रस्य शवसः॥ अप द्वेषो अप ह्वरोन्यव्रतस्य सश्चिरे॥ होता

रंत्वावृणीमहेग्नेदक्षस्यसाधनं॥यज्ञेषुपूर्व्यंगिराप्रयस्वंतोहवामहे॥इत्थाय
थातऊतयेसहसावंदिवेदिवे॥रायऋतायसुक्रतोगोभिःष्यामसधमादोवी
रैःस्यामसधमादः॥५२॥मनुष्वत्त्वानिधीमहिमनुष्वत्समिधीमहि॥अग्नेम
नुष्वदंगिरोदेवान्देवयतेयज॥त्वंहिमानुषेजनेग्नेसुप्रीतऽइध्यसे॥स्रुचस्त्वा
यंत्यानुषक्सुजातसर्पिरासुते॥त्वांविश्वेसजोषसोदेवासोदूतमक्रत॥स
पर्यंतस्त्वाकवेयज्ञेषुदेवमीळते॥देवंवोदेवयज्ययाग्निमीळीतमर्त्यः॥
समिद्धःशुक्रदीदिह्यृतस्ययोनिमासदःससस्ययोनिमासदः॥१२॥
प्रविश्वसामन्नत्रिवदर्चापावकशोचिषे॥योअध्वरेष्वीड्योहोतामंद्र
तमोविशि॥न्यग्निंजातवेदसंदधातादेवमृत्विजं॥प्रयज्ञएत्वानुषगद्या
देवव्यचस्तमः॥चिकित्विन्मनसंत्वादेवंमर्तासऽऊतये॥वरेण्यस्यतेवस

इयानासोअमन्महि ॥ अग्नेचिकिध्य१स्यनइदंवचः सहस्य ॥ तंत्वासुशिप्र
दंपतेस्तोमैर्वर्धंत्यत्रयोगीर्भिः शुंभंत्यत्रयः ॥ १४ ॥ अग्नेसहंतमाभर द्युम्न
स्यप्रासहारयिं ॥ विश्वायश्चर्षणीरभ्याऽसावाजेषुसासहत् ॥ तमग्नेपृत
नाषहंरयिंसहस्वआभर ॥ त्वंहिसत्योअद्भुतोदातावाजस्यगोमतः ॥ वि
श्वेहित्वासजोषसोजनासोवृक्तबर्हिषः ॥ होतारंसद्मसुप्रियंव्यंतिवा
र्यापुरु ॥ सहिष्माविश्वचर्षणिरभिमातिसहोदधे ॥ अग्नएषुक्षयेष्वार
वन्नःशुक्रदीदिहिद्युमत्पावकदीदिहि ॥ १५ ॥ अग्नेत्वंनोऽअंतमउतत्रा
ताशिवोभवावरूथ्यः ॥ वसुरग्निर्वसुश्रवाअच्छानक्षिद्युमत्तमंरयिंदाः ॥
सनोबोधिश्रुधीहवमुरुष्याणोअघायतःसमस्मात् ॥ तंत्वाशोचिष्ठदी
दिवःसुम्नायनूनमीमहेसखिभ्यः ॥ १६ ॥ अच्छावोऽअग्निमवसेदेवंगा

सि स नो वसुः॥ रासत्पुत्र ऋषूणामृतावा पर्षति द्विषः॥ स हि सत्यो यं पू
२मो र्वे चिद्देवासश्चिद्यमीधिरे॥ होतारं मंद्रजिह्वमित्सुदीतिभिर्विभावसुं॥ स
नो धीती वरिष्ठया श्रेष्ठया च सुमत्या॥ अग्ने रायो दिदीहि नः सुवृक्तिभि
र्वरेण्य॥ अग्निर्देवेषु राजत्यग्निर्मर्तेष्वाविशन्॥ अग्निर्नो हव्यवाहनो
ग्निं धीभिः सपर्यत॥ अग्निस्तुविश्रवस्तमं तुविब्रह्माणमुत्तमं॥ अतूर्तं
श्रावयत्पतिं पुत्रं ददाति दाशुषे॥ ५७॥ अग्निर्ददाति सत्पतिं सासाह यो
युधा नृभिः॥ अग्निरत्यं रघुष्यदं जेतारमपराजितं॥ यद्वाहिष्ठं तदग्नये बृ
हदर्च विभावसो॥ महिषीव त्वद्रयिस्त्वद्वाजा उदीरते॥ तव द्युमंतो अर्च
यो ग्रावेवोच्यते बृहत्॥ उतो ते तन्यतुर्यथा स्वानो अर्त त्मना दिवः॥ ए
वाँ अग्निं वसूयवः सहसानं ववंदिम॥ स नो विश्वा अति द्विषः पर्षन्नावे

॥६॥

वसुक्रतुः॥१८॥अग्नेपावकरोचिषामंद्रयादेवजिह्वया॥आदेवान्व
क्षियक्षिच॥तंत्वाघृतस्नवीमहेचित्रभानोस्वर्दृशं॥देवाँआवीतये
वह॥वीतिहोत्रंत्वाकवेद्युमंतंसमिधीमहि॥अग्नेबृहंतमध्वरे॥अग्ने
विश्वेभिरागहिदेवेभिर्हव्यदातये॥होतारंत्वावृणीमहे॥यजमानाय
सुन्वतःआग्नेसुवीर्यंवह॥देवैरासत्सिबर्हिषि॥१९॥समिधानः
सहस्रजिदग्नेधर्माणिपुष्यसि॥देवानांदूतऽउक्थ्यः॥न्य१ग्निंजात
वेदसंहोत्रवाहंयविष्ठ्यं॥दधातादेवमृत्विजं॥प्रयज्ञएत्वानुषगद्या
देवव्यचस्तमः॥स्तृणीतबर्हिरासदे॥एदंमरुतोऽअश्विनामित्रःसी
दंतुवरुणः॥देवासःसर्वयाविशा॥२०॥अनस्वंतासत्पतिर्माम
हेमेगावाचेतिष्ठोअसुरोमघोनः॥त्रैवृष्णोअग्नेदशभिःसहस्रै

वैश्वानरस्त्र्यरुणश्चिकेत॥ योमेशताचविंशतिंचगोनांहरीचयु
क्तासुधुराददाति॥ वैश्वानरसुष्टुतोवावृधानोऽग्नेयच्छत्र्यरुणाय
शर्म॥२॥ एवातेऽअग्नेसुमतिंचकानोनविष्ठायनवमंत्रसदस्युः॥ यो
मेगिरस्तुविजातस्यपूर्वीर्युक्तेनाभित्र्यरुणोगृणाति॥ योमइति
प्रवोचत्यश्वमेधायसूरये॥ दददृचासनिंयतेददन्मेधामृतायते॥
५ यस्यमापरुषाःशतमुद्धर्षयन्त्युक्षणः॥ अश्वमेधस्यदानाःसोमाऽइव
त्र्याशिरः॥ इन्द्राग्नीशतदाव्न्यश्वमेधेसुवीर्यं॥ क्षत्रंधारयतंबृहद्दिवि
सूर्यमिवाजरं॥२॥ समिद्धोऽअग्निर्दिविशोचिरश्रेत्प्रत्यंङुषसमुर्वि
याविभाति॥ एतिप्राचीविश्ववारानमोभिर्देवाँ ईळानाहविषाघृता
ची॥ समिध्यमानोऽअमृतस्यराजसिहविष्कृण्वन्तंसचसेस्वस्तये॥

विश्वं स धत्ते द्रविणं यमिन्वस्यातिथ्यमग्ने नि च धत्त इत्पुरः ॥ अग्ने शर्ध महते सौ ॥ ७ ॥
भगाय तव द्युम्नान्युत्तमानि संतु ॥ सं जास्पत्यं सुयममा कृणुष्व शत्रूयतामभि
तिष्ठा महांसि ॥ समिद्धस्य प्रमहसोऽग्ने वंदे तव श्रियं ॥ वृषभो द्युम्नवाँ असि
समध्वरेष्विध्यसे ॥ समिद्धो अग्नऽ आहुत देवान्यक्षि स्वध्वर ॥ त्वं हि हव्यवाळ
सि ॥ आ जुहोता दुवस्यताग्निं प्रयत्यध्वरे ॥ वृणीध्वं हव्यवाहनं ॥ २२ ॥ त्र्यर्यमा
मनुषो देवताता त्री रोचना दिव्या धारयंत ॥ अर्चंति त्वा मरुतः पूतदक्षास्त्व
मेषामृषिरिंद्रासि धीरः ॥ अनु यदीं मरुतो मंदसानमार्चन्निंद्रं पपिवांसं सु
तस्य ॥ आदत्त वज्रमभि यदहिं हन्नपो यह्वीरसृजत्सर्तवा उ ॥ उत ब्रह्माणो
मरुतो मेऽस्येंद्रः सोमस्य सुषुतस्य पेयाः ॥ तद्धि हव्यं मनुषे गाऽ अविंदद
हन्नहिं पपिवाँ इंद्रोऽअस्य ॥ आद्रोदसी वितरं वि ष्कभायत्संविव्यानश्चिद्भि
यसे मृगं कः ॥ जिगर्तिमिंद्रो अपजर्गुराणः प्रति श्वसंतमव दानवं हन् ॥ अथ

क्रत्वा मघवंतुभ्यं देवा अनु विश्वे ऽ अददुः सोमपेयं ॥ यत्सूर्यस्य हरितः प
तंतीः पुरः सतीरुपरा एतशे कः ॥ २२ ॥ नव यदस्य नवतिं च भोगान्साकं वज्रे
ण मघवा विवृश्चत् ॥ अर्चंतींद्रं मरुतः सधस्थे त्रैष्टुभेन वचसा बाधत द्यां
॥ सखा सख्ये अपचत्तूयमग्निरस्य क्रत्वा महिषा त्री शतानि ॥ त्री साकमिंद्रो
मनुषः सरांसि सुतं पिबद्वृत्रहत्याय सोमं ॥ त्री यच्छता महिषाणामघो मास्त्री
सरांसि मघवा सोम्यापाः ॥ कारं न विश्वे अह्वंत देवा भरमिंद्राय यदहिं जघा
न ॥ उशना यत्सहस्यैरयातं गृहमिंद्र जूजुवानेभिरश्वैः ॥ वन्वानो अत्र सर
थं ययाथ कुत्सेन देवैरवनोर्ह शुष्णं ॥ प्रान्यच्चक्रमवृहः सूर्यस्य कुत्सायान्य
द्वरिवो यातवे ऽकः ॥ अनासो दस्यूँरमृणो वधेन नि दुर्योण आवृणङ्मृ
ध्रवाचः ॥ २३ ॥ स्तोमासस्त्वा गौरिवीतेरवर्धन्नरंधयो वैदथिनाय पिप्रुं ॥ आ
त्वामृजिश्वा सख्याय चक्रे पचन्पक्तीरपिबः सोममस्य ॥ नवग्वासः सुतसो

मासऽइंद्रंदशग्वासोअभ्यर्चंत्यर्कैः॥ गव्यंचिदूर्वमपिधानवंतंतंचिन्नरःशाश
मानाऽअपव्रन्॥ कथोनुतेपरिचराणिविद्वान्वीर्यामघवंन्याचकर्थ॥ याचो
नुनव्याकृणवःशविष्ठप्रेदुतातेविदथेषुब्रवाम॥ एताविश्वाचकृवाँइंद्रभूर्
यपरीतोजनुषावीर्येण॥ याचिन्नुवज्रिन्कृणवोदधृष्वान्नतेवर्तातविष्या
अस्तितस्याः॥ इंद्रब्रह्मक्रियमाणाजुषस्वयातेशविष्ठनव्याअकर्म॥ वस्त्रे
वभद्रासुकृतावसूयूरथंनधीरःस्वपाऽअतक्षं॥२५॥ क१स्यवीरःकोअप
श्यदिंद्रंसुखरथमीयमानंहरिभ्यां॥ योरायावज्रीसुतसोममिच्छन्तदोकोगं
तापुरुहूतऊती॥ अवाचचक्षंपदमस्यसस्वरुग्रंनिधातुरन्वायमिच्छन्॥
अपृच्छमन्याँउततेमआहुरिंद्रंनरोबुबुधानाऽअशेम॥ प्रनुवयंसुतेयातेकृ
तानींद्रब्रवामयानिनोजुजोषः॥ वेददविद्वांछृणवच्चविद्वान्वहतेयंमघ
वासर्वसेनः॥ स्थिरंमनश्चकृषेजातऽइंद्रवेषीदेकोयुधयेभूयसश्चित्॥ अ

ग्मानंचिछ्वमादिघुतोविविदोगवामूर्धमुस्त्रियाणां॥ परोयत्वंपरमऽआजनि
ष्ठाःपरावतिश्रुत्यंनामबिभ्रत॥ अतश्चिदिंद्रादभयंतदेवाविश्वाअपोऽअजयद्दा
सपत्नीः॥५॥ तुभ्येदेतेमरुतःसुशेवाअर्चंत्यर्कंसुन्वंत्यंधः॥ अहिमोहानमप
आशयानंप्रमायाभिर्मायिनंसक्षदिंद्रः॥ विषूमृधोजनुषादानमिन्वन्नहन्गा
वामघवंत्संचकानः॥ अत्रादासस्यनमुचेःशिरोयदवर्तयोमनवेगातु
मिच्छन्॥ युजंहिमामकृथाऽआदिदिंद्रशिरोदासस्यनमुचेर्मथायन्॥ अश्मा
नंचित्स्वर्यं१वर्तमानंप्रचक्रियेवरोदसीमरुद्भ्यः॥ स्त्रियोहिदासआयुधा
निचक्रेकिंमाकरन्नबलाऽअस्यसेनाः॥ अंतर्ह्यख्यदुभेऽअस्यधेनेऽअ
थोपप्रैद्युधयेदस्युमिंद्रः॥ समत्रगावोभितोनवंतेहेहवत्सैर्वियुतायदा
सन्॥ संताइंद्रोअसृजदस्यशाकैर्यदींसोमासःसुषुताऽअमंदन्॥२७॥
यदींसोमाबभ्रुधूताऽअमंदन्नरोरवीद्वृषभःसादनेषु। पुरंदरःपपिवाँइंद्रो

अस्यपुनर्गवामददादुस्त्रियाणां॥भद्रमिदंरुशमाअग्नेअक्रंन्गवांचत्वारिदद
सहस्रा॥ऋणंचयस्यप्रयतामघानिप्रत्यग्रभीष्मनृतमस्यनृणां॥सुपेशसंमा
व॰सृजंत्यस्तंगवांसहस्रैरुशमासोऽअग्ने॥तीव्राइंद्रममंदुःसुतासोक्तोर्व्यु
ष्टौपरितक्म्यायाः॥औछत्सारात्रीपरितक्म्यायांऋणंचयेराजनिरुशमानां
॥अत्योनवाजीरघुरज्यमानोबभ्रुश्चत्वार्यसनत्सहस्रा॥चतुःसहस्रंगव्यस्य
पश्वःप्रत्यग्रभीष्मरुशमेष्वग्ने॥घर्मश्चित्तप्तःप्रवृजेयआसीदयस्मयस्तम्वा
दामविप्राः॥२८॥इंद्रोरथायप्रवतंकृणोतियमध्यस्थान्मघवावाजयंतं॥
यूथेवपश्वोव्युनोतिगोपाऽअरिष्टोयातिप्रथमःसिषासन्॥आप्रद्रवहरि
वोमाविवेनःपिशंगरातेअभिनःसचस्व॥नहित्वदिंद्रवस्योऽअन्यदस्त्य
मेनांश्चिज्जनिवतश्चकर्थ॥उद्यत्सहःसहसआजनिष्टदेदिष्टइंद्रइंद्रि
याणिविश्वा॥प्राचोदयत्सुदुघावव्रेअंतर्विज्योतिषासंववृत्वत्तमोवः॥

अनवस्ते रथमश्वाय तक्षंत्वष्टा वज्रं पुरुहूत द्युमंतं ॥ ब्रह्माण इंद्रं महयंतो अ
र्कैरवर्धयन्नहये हंतवा उ ॥ वृष्णे यत्ते वृषणो अर्कमर्चानिंद्र ग्रावाणो अदितिः
सजोषाः ॥ अनश्वासो ये पवयो ऽरथा इंद्रेषिता अभ्यवर्तंत दस्यून् ॥२९॥ प्र ते पू
र्वाणि करणानि वोचं प्र नूतना मघवन्या चकर्थ ॥ शक्तीवो यद्विभरा रोदसी
उभे जयन्नपो मनवे दानुचित्राः ॥ तदिन्नु ते करणं दस्म विप्राहिं यद्घ्नन्नोजो
अत्रामिमीथाः ॥ शुष्णस्य चित्परि माया अगृभ्णाः प्रपित्वं यन्नप दस्यूँ
रसेधः ॥ त्वमपो यदवे तुर्वशायारमयः सुदुघाः पार इंद्र ॥ उग्रमया
तमवहो ह कुत्सं सं ह यद्वामुशनारंत देवाः ॥ इंद्राकुत्सा वहमाना रथेना
वामत्या अपि कर्णे वहंतु ॥ निः षीमद्भ्यो धमथो निः षधस्थान्मघोनो हृ
दो वरथस्तमांसि ॥ वातस्य युक्तान्सुयुजश्चिदश्वान्कविश्चिदेषो अज
गन्नवस्युः ॥ विश्वे ते अत्र मरुतः सखाय इंद्र ब्रह्माणि तविषीमवर्ध

न्त॥ १०॥ सूरश्चिद्रथंपरितक्म्यायांपूर्वंकरदुपरंजूजुवांसं॥ भरच्चक्रमेतशः
संरिणातिपुरोदधत्सनिष्यतिक्रतुंनः॥ आयंजनाअभिचक्षेजगामेंद्रः
सखायंसुतसोममिच्छन्॥ वदन्ग्रावाववेदिंभ्रियातेयस्यजीरमध्वर्यु
वा वश्चरंति॥ येचाकनंतचाकनंतनूतेमर्ताअमृतमोतेऽअंहआरन्॥ वावंधि
यज्यूंरुततेषुधेह्योजोजनेषुयेषुतेस्याम॥ १३॥ अदर्दरुत्समसृजोविखा
नित्वमर्णवान्बद्बधानांऽअरम्णाः॥ महांतमिंद्रपर्वतंवियद्वःसृजोवि
धाराअवदानवंहन्॥ त्वमुत्सांऋतुभिर्बद्बधानांऽअरंहऽऊधःपर्वतस्य
वज्रिन्॥ अहिंचिदुग्रप्रयुतंशयानंजघन्वाँइंद्रतविषीमधत्थाः॥ त्यस्य
चिन्महतोनिर्मृगस्यवधर्जघानतविषीभिरिंद्रः॥ यएकइदप्रतिर्मन्यमा
नआदस्मादन्योअजनिष्टतव्यान्॥ त्यंचिदेषांस्वधयामदंतंमिहोनपा
तंसुवृधंतमोगां॥ वृषप्रभर्मादानवस्यभामंवज्रेणवज्रीनिजघानशुष्णं॥

त्यं चिदस्य क्रतुभिर्निषत्तममर्मणो विददिदस्य मर्म ॥ यदीं सुक्षत्र प्रभृता मदस्य
युयुत्संतं तमसि हर्म्ये धाः ॥ त्यं चिदित्था कत्पयं शयानमसूर्ये तमसि वावृधानं
॥ तं चिन्मंदानो वृषभः सुतस्योच्चैरिंद्रो अपगूर्या जघान ॥[illegible]॥ उद्यदिंद्रो म
हते दानवाय वधर्यमिष्ट सहो अप्रतीतं ॥ यदीं वज्रस्य प्रभृतौ ददाभ विश्वस्य जं
तोरधमं चकार ॥ त्यं चिदर्णं मधुपं शयानमसिन्वं वव्रं मह्याददुग्रः ॥ अपादम
त्रं महता वधेन नि दुर्योण आवृणङ्मृध्रवाचं ॥ को अस्य शुष्मं तविषीं वरात ए
को धना भरते अप्रतीतः ॥ इमे चिदस्य ज्रयसो नु देवी इंद्रस्यौजसो भियसा
जिहाते ॥ न्यस्मै देवी स्वधितिर्जिहीत इंद्राय गातुरुशतीव येमे ॥ सं यदोजो यु
वते विश्वमाभिरनु स्वधाव्ने क्षितयो नमंत ॥ एकं नु त्वा सत्पतिं पांचजन्यं जा
तं शृणोमि यशसं जनेषु ॥ तं मे जगृभ्र आशसो नविष्ठं दोषा वस्तोर्हवमाना
स इंद्रं ॥ एवा हि त्वामृतुथा यातयंतं मघा विप्रेभ्यो ददतं शृणोमि ॥ किं ते ब्रह्मा

ऐळोगृहतेसखायोयेत्वायानिदधुःकाममिंद्र॥२२॥इतिचतुर्थाष्टकेप्रथमोध्या
यः॥ॐम॥महिमहेतवसेदीध्येन्नॄनिंद्रायेत्थातवसेअतव्यान्॥योअस्मैसु
मतिंवाजसातौस्तुतोजनेसमर्यश्चिकेत॥सत्वंनइंद्रधियसानोअर्कैर्हरी
णांवृषंन्योक्त्रमश्रेः॥याइत्थामघवंननुजोषंवक्षोअभिप्रार्यःसक्षिजनान्॥
नतेतइंद्राभ्य१स्मदृष्वायुक्तासोअब्रह्मतायदसन्॥तिष्ठारथमधितंवज्र
हस्तारश्मिंदेवयमसेस्वश्वः॥पुरूयत्तइंद्रसंत्युक्थागवेचकर्थोर्वरासुयु
ध्यन्॥ततक्षेसूर्यायचिदोकसिस्वेवृषासमत्सुदासस्यनामचित्॥वयं
तेतइंद्रयेचनरःशर्धोजज्ञानायाताश्चरथाः॥आस्मांजगम्यादहिशुष्मस
त्वाभगोनहव्यःप्रभृथेषुचारुः॥१॥पपृक्षेण्यमिंद्रत्वेह्योजोनृम्णानिच
नृतमानोअमर्तः॥सनएनींवसवानोरयिंदाःप्रार्यःस्तुषेतुविमघस्यदानं॥
एवानइंद्रोतिभिरवपाहिगृणतःशूरकारून्॥उतत्वचंददतोवाजसातौपि

प्रीहि मध्वः सुषुतस्य चारोः ॥ उत त्ये मा पौरुकुत्स्यस्य सूरेस्त्रसदस्योर्हिरणि
नो रराणाः ॥ वहंतु मा दश श्येतासो । अस्य गैरिक्षितस्य क्रतुभिर्नु सश्चे ॥ उत
त्ये मा मारुताश्वस्य शोणाः क्रत्वामघासो विदथस्य रातौ ॥ सहस्रा मे च्यव
तानो ददानः । आनूकमर्यो वपुषे नार्चत् ॥ उत त्ये मा ध्वन्यस्य जुष्टा
लक्ष्मण्यस्य सुरुचो यतानाः ॥ मह्ना रायः संवरणस्य ऋषेर्व्रजं न गावः प्र
यता । अपि ग्मन् ॥ २ ॥ अजातशत्रुमजरा स्वर्वत्यनु स्वधामिता दस्ममी
यते ॥ सुनोतन पचत ब्रह्मवाहसे पुरुष्टुताय प्रतरं दधातन ॥ आ यः सोमेन ज
ठरमपिप्रतामंदत मघवा मध्वो । अंधसः ॥ यदीं मृगाय हंतवे महावधः स
हस्रभृष्टिमुशना वधं यमत् ॥ यो । अस्मै घ्रंस उत वा य ऊधनि सोमं सुनो
ति भवति द्युमाँ अह ॥ अपाप शक्रस्ततनुष्टिमूहति तनूशुभ्रं मघवा यः क
वासखः ॥ यस्यावधीत्पितरं यस्य मातरं यस्य शक्रो भ्रातरं नात ईषते ।

वेतीदूस्य प्रयता यतंकरो न किल्बिषादीषते वस्व आकरः ॥ न पंचभिर्दशभिर्व
ष्ट्यारभं नासुन्वता सचते पुष्यता चन ॥ जिनाति वेदमुया हंति वा धुनिरा दे
वयुं भजति गोमति व्रजे ॥५॥ वित्वक्षणः समृतौ चक्रमासजोसुन्वतो वि विषुणःसुन्व
धः ॥ इंद्रो विश्वस्य दमिता विभीषणो यथावशं नयति दासमार्यः ॥ समी
पणेरजति भोजनं मुषे वि दाशुषे भजति सूनरं वसु ॥ दुर्गे चन ध्रियते विश्व
आ पुरु जनो यो अस्य तविषीमचुक्रुधत् ॥ सं यज्जनौ सुधनौ विश्वशर्ध
सावविदिंद्रो मघवा गोषु शुभ्रिषु ॥ युजं ह्यन्यमकृत प्रवेपन्युदीं गव्यं सृज
ते सत्वभिर्धुनिः ॥ सहस्रसामाग्निवेशिं गृणीषे शत्रिमग्न उपमां केतुमर्यः
॥ तस्मा आपः संयतः पीपयंत तस्मिन्क्षत्रममवत्त्वेषमस्तु ॥४॥ यस्ते सा
धिष्ठोवस इंद्र क्रतुष्टमा भर ॥ अस्मभ्यं चर्षणीसहं सस्निं वाजेषु दुष्टरं ॥
यदिंद्र ते चतस्रो यच्छूर संति तिस्रः ॥ यद्वा पंच क्षितीनामवस्तत्सु न आ

भर ॥ अत्येवोवरेण्यं वृषंतमस्य हूमहे ॥ वृषजूतिर्हि जज्ञिष आभूभिरिंद्र तुर्व
णिः ॥ वृषासि राधसे जज्ञिषे वृष्णि ते शवः ॥ स्वक्षत्रं ते धृषन्मनः सत्रा
हमिंद्र पौंस्यं ॥ त्वं तमिंद्र मर्त्यममित्रयंतमद्रिवः ॥ सर्वरथा शतक्रतो नि
याहि शवसस्पते ॥ ५ ॥ त्वामिद्वृत्रहंतम जनासो वृक्तबर्हिषः ॥ उग्रं पूर्वी
षु पूर्व्यं हवंते वाजसातये ॥ अस्माकमिंद्र दुष्टरं पुरोयावानमाजिषु ॥ सयो
वानं धनेधने वाजयंतमवा रथं ॥ अस्माकमिंद्रेहि नो रथमवा पुरंध्या ॥ वयं
शविष्ठ वार्यं दिवि श्रवो दधीमहि दिवि स्तोमं मनामहे ॥ ६ ॥ स आ गमदिं
द्रो यो वसूनां चिकेतद्दातुं दामनो रयीणां ॥ धन्वचरो न वंसगस्तृषाणश्च
कमानः पिबतु दुग्धमंशुं ॥ [illegible] ॥ आ ते हनू हरिवः शूर
शिप्रे रुहत्सोमो न पर्वतस्य पृष्ठे ॥ अनु त्वा राजन्नर्वतो न हिन्वन्गीर्भिर्मदेम

पुरुहूत विश्वे॥ चक्रं न वृत्तं पुरुहूत वेपते मनो भिया मे अमतेरिदद्रिवः॥ रथा
द्धि त्वा जरिता सदावृध कुविन्नु स्तोषन्मघवन्पुरूवसुः॥ एष ग्रावेव जरिता त
इंद्रेयर्त्ति वाचं बृहदाशुषाणः॥ प्र सव्येन मघवन्यंसि रायः प्र दक्षिणिद्धरि
वो मा वि वेनः॥ वृषा त्वा वृषणं वर्धतु द्यौर्वृषा वृषभ्यां वहसे हरिभ्यां॥ स
नो वृषा वृषरथः सुशिप्र वृषक्रतो वृषा वज्रिन्भरे धाः॥ यो रोहितो वाजि
नीवाजिनीवांस्त्रिभिः शतैः सचमानावदिष्ट॥ यूने समस्मै क्षितयो न
मंतां श्रुतरथाय मरुतो दुवोया॥ ७॥ सं भानुना यतते सूर्यस्याजुह्वा
नो घृतपृष्ठः स्वंचाः॥ तस्मा अमृध्रा उषसो व्युछान्य इंद्राय सुनवामेत्याह॥ समि
द्धाग्निर्वनवत्स्तीर्णबर्हिर्युक्तग्रावा सुतसोमो जराते॥ ग्रावाणो यस्येषिरं व
दंत्ययदध्वर्युर्हविषाव सिंधुं॥ वधूरियं पतिमिच्छंत्येति य ईं वहाते महिषीमि
षिरां॥ आस्य श्रवस्याद्रथ आ च घोषात्पुरू सहस्रा परि वर्तयाते॥ न स

राजाव्यथतेयस्मिन्निंद्रस्तीव्रंसोमंपिबति गोसखायं॥आसत्वनैर
जतिहंतिवृत्रंक्षेतिक्षितीःसुभगोनामपुष्यन्॥पुष्यात्क्षेमेअभियोगेभवात्यु
भेवृतौसंयतीसंजयाति॥प्रियःसूर्येप्रियोअग्नाभवातियइंद्रायसुतसोमो
ददाशत्॥१॥उरोष्टइंद्रराधसोविभ्वीरातिःशतक्रतो॥अधानोविश्वचर्ष
णेद्युम्नासुक्षत्रमंहय॥यदीमिंद्रश्रवाय्यमिषंशविष्ठदधिषे॥पप्रथेदीर्घश्रु
त्तमंहिरण्यवर्णदुष्टरं॥शुष्मासोयेतेअद्रिवोमेहनाकेतसापः॥उभादेवा
वभिष्टयेदिवश्चग्मश्चराजथः॥उतोनोअस्यकस्यचिद्दक्षस्यतववृत्रहन्
अस्मभ्यंनृम्णमाभरास्मभ्यंनृमणस्यसे॥नूतआभिरभिष्टिभिस्तवशर्मं
न्छतक्रतो॥इंद्रस्यामसुगोपाःशूरस्यामसुगोपाः॥२॥यदिंद्रचित्रमेहना
स्तित्वादातमद्रिवः॥राधस्तन्नोविदद्वसउभयाहस्त्याभर॥यन्मन्यसेव
रेण्यमिंद्रद्युक्षंतदाभर॥विद्यामतस्यतेवयमकूपारस्यदावने॥यत्तेदि

स्तू प्रराध्यंमनोअस्तिश्रुतंबृहत्।।तेनदृळ्हाचिदद्रिवआवाजंदर्षिसातये।।
मंहिष्ठंवोमघोनांराजानंचर्षणीनां।।इंद्रमुपप्रशस्तयेपूर्वीभिर्जुजुषेगिरः
अस्माइत्काव्यंवचउक्थमिंद्रायशंस्यं।।तस्माउब्रह्मवाहसेगिरोवर्धंत्य
त्रयोगिरःशुंभंत्यत्रयः।।५०।।आयाह्यद्रिभिःसुतंसोमंसोमपतेपिब।।वृ
षन्निंद्रवृषभिर्वृत्रहंतम।।वृषाग्रावावृषामदोवृषासोमोअयंसुतः।।
वृषन्निंद्रवृषा०।।वृषात्वावृषणंहुवेवज्रिंचित्राभिरूतिभिः।।वृषं०।।ऋजी
षीवज्रीवृषभस्तुराषाट्शुष्मीराजावृत्रहासोमपावा।।युक्त्वाहरिभ्यामुप
यासदर्वाङ्माध्यंदिनेसवनेमत्सदिंद्रः।।यत्वासूर्यस्वर्भानुस्तमसावि
ध्यदासुरः।।अक्षेत्रविद्यथामुग्धोभुवनान्यदीधयुः।।११।।स्वर्भानो
रधयदिंद्रमायाअवोदिवोवर्तमानाअवाहन्।।गूळ्हंसूर्यंतमसापव्र
तेनतुरीयेणब्रह्मणाविंददत्रिः।।मौमिमंतवसंतमत्रइरस्याद्रुग्धोभिय
मा

सानिगारीत्॥ त्वंमित्रोअसिसत्यराधास्तौमेहावतंवरुणश्चराजा॥ ग्रा
व्णोब्रह्मायुयुजानःसपर्यन्कीरिणादेवान्नमसोपशिक्षन्॥ अत्रिःसूर्यस्य
दिविचक्षुराधात्स्वर्भानोरपमायाअघुक्षत्॥ यंवैसूर्यंस्वर्भानुस्तमसा
विध्यदासुरः॥ अत्रयस्तमन्वविंदन्नह्यन्येअशक्नुवन्॥ १२॥ कोनुवां
मित्रावरुणावृतायन्दिवोवामहःपार्थिवस्यवादे॥ ऋतस्यवासदसित्रासी
थान्नोयज्ञायतेवापशुषोनवाजान्॥ तेनोमित्रोवरुणोअर्यमायुरिंद्रऋभु
क्षामरुतोजुषंत॥ नमोभिर्वायेदधतेसुवृक्तिंस्तोमंरुद्रायमीळ्हुषेसजोषाः॥
आवांयेष्ठाश्विनाहुवध्यैवातस्यपत्मन्रथ्यस्यपुष्टौ॥ उतवादिवोअसु
रायमन्मप्रांधांसीवयज्यवेभरध्वं॥ प्रसक्षणोदिव्यःकण्वहोतात्रितोदि
वःसजोषावातोअग्निः॥ पूषाभगःप्रभृथेविश्वभोजाआजिंनजग्मुराश्व
श्वतमाः॥ प्रवोरयिंयुक्ताश्वंभरध्वंरायएषेवसेदधीतधीः॥ सुशेवएवैरौ

ज्ञस्य होता ये व एवा मरुतस्तुराणां ॥ १३ ॥ प्र वो वायुं रथयुजं कृणुध्वं प्र देवं
विप्रं पनितारमर्कैः ॥ इषुध्यव ऋतसापः पुरंधीर्वस्वीर्नो अत्र पत्नीरा धिये धुः ॥ उप व ए
षे वंद्येभिः शूषैः प्र यह्वी दिवश्चितयद्भिरर्कैः ॥ उषासानक्ता विदुषीव विश्वमा हा व
हतो मर्त्याय यज्ञं ॥ अभि वो अर्चे पोष्यावतो नॄन्वास्तोष्पतिं त्वष्टारं रराणः ॥
धन्या सजोषा धिषणा नमोभिर्वनस्पतीरोषधी राय एषे ॥ तुजे नस्तने पर्वताः सं
तु स्वैतवो ये वसवो न वीराः ॥ पनित आप्त्यो यजतः सदा नो वर्धान्नः शंसं नर्यो
अभिष्टौ ॥ वृष्णो अस्तोषि भूम्यस्य गर्भं त्रितो नपातमपां सुवृक्ति ॥ गृणीते अग्नि
रेतरी न शूषैः शोचिष्केशो नि रिणाति वना ॥ १४ ॥ कथा महे रुद्रियाय ब्रवाम
कद्राये चिकितुषे भगाय ॥ आप ओषधीरुत नोऽवंतु द्यौर्वना गिरयो वृक्षकेशाः ॥
शृणोतु न ऊर्जां पतिर्गिरः स नभस्तरीयाँ इषिरः परिज्मा ॥ शृण्वंत्वापः पुरो
न शुभ्राः परि स्रुचो बबृहाणस्याद्रेः ॥ विदा चिन्नु महांतो ये व एवा ब्रवाम दस्मा
वार्यं दधानाः ॥ वयश्चन सुभ्व आव यंति क्षुभा मर्तमनुयतं वधस्नैः ॥ आ दे

थ्यानिपार्थिवानिजन्मापश्चाच्छासुमखायवोचं॥वर्धंतांद्यावोगिरःश्चंद्राग्राउ
दावर्धंतामभिषाताअर्णाः॥पदेपदेमेजरिमानिधायिवरूत्रीवाशक्रायापायुभि
श्च॥सिषक्तुमातामहीरसानःस्मत्सूरिभिर्ऋजुहस्तऋजुवनिः॥१५॥कथादाशे
मनमसासुदानूनेवयामरुतोअच्छोक्तौप्रश्रवसोमरुतोअच्छोक्तौ॥मानोहि
र्बुध्न्योरिषेधादस्माकंभूदुपमातिवनिः॥इतिचिन्नुप्रजायैपशुमत्यैदेवासोव
नतेमर्त्योवआदेवासोवनतेमर्त्योवः॥अत्राशिवांतन्वोधासिमस्याजरांचि
न्मेनिर्ऋतिर्जग्रसीत॥तांवोदेवाःसुमतिमूर्जयंतीमिषमश्यामवसवःशसा
गोः॥सानःसुदानुर्मृळयंतीदेवीप्रतिद्रवंतीसुवितायगम्याः॥अभिनइळा
यूथस्यमातास्मन्नदीभिरुर्वशीवागृणातु॥उर्वशीवाबृहद्दिवागृणाना
भ्यूर्ण्वानाप्रभृथस्यायोः॥सिषक्तुनऊर्जव्यस्यपुष्टेः॥१६॥प्रशंतमावरुण
दीधितीगीर्मित्रंभगमदितिंनूनमश्याः॥पृषद्योनिःपंचहोताशृणोत्वतूर्तपं

थाअसुरोमयोभुः॥प्रतिमेस्तोममदितिर्जगृभ्यात्सूनुंनमाताहृद्यंसुशेवं
ब्रह्मप्रियंदेवहितंयदस्त्यहंमित्रेवरुणेयन्मयोभु॥उदीरयकवितमंकवीनामु
नत्तैनमभिमध्वाघृतेन॥सनोवसूनिप्रयताहितानिचंद्राणिदेवःसविता
सुवाति॥समिंद्रणोमनसानेषिगोभिःसंसूरिभिर्हरिवःसंस्वस्ति॥संब्रह्मणा
देवहितंयदस्तिसंदेवानांसुमत्यायज्ञियानां॥देवोभगःसवितारायोअंश
इंद्रोवृत्रस्यसंजितोधनानां॥ऋभुक्षावाजउतवापुरंधिरवंतुनोअमृतास
स्कृरासः॥२७॥मरुत्वतोअप्रतीतस्यजिष्णोरजूर्यतःप्रब्रवामाकृतानि॥न
तेपूर्वेमघवन्नापरासोनवीर्यंनूतनःकश्चनाप॥उपस्तुहिप्रथमंरत्नधेयंबृ
हस्पतिंसनितारंधनानां॥यःशंसतेस्तुवतेशंभविष्ठःपुरूवसुरागमज्जो
हुवानं॥तवोतिभिःसचमानाअरिष्टाबृहस्पतेमघवानःसुवीराः॥येअश्व
दाउतवासंतिगोदायेवस्त्रदाःसुभगास्तेषुरायः॥विसर्माणंकृणुहिवि

तमेषांयेभुंजतेअपृणंतोनउक्थैः ।। अपव्रतान्प्रसवेवावृधानान्ब्रह्मद्विषःसूर्या
द्यावयस्व ।। यओहतेरक्षसोदेववीतावचक्रेभिस्तंमरुतोनियात ।। योवःशमीं
शशमानस्यनिंदात्तुच्छ्यान्कामान्करतेसिष्विदानः ।। १० ।। तमुष्टुहियःस्विषुःसुध
न्वायोविश्वस्यक्षयतिभेषजस्य ।। यक्ष्वामहेसौमनसायरुद्रंनमोभिर्देवमसुरंदु
वस्य ।। दमूनसोअपसोयेसुहस्तावृष्णःपत्नीर्नद्योविभ्वतष्टाः ।। सरस्वतीबृ
हद्दिवोतराकादशस्यंतीर्वरिवस्यंतुशुभ्राः ।। प्रसूमहेसुशरणायमेधांगिरंभ
रेनव्यसींजायमानां ।। यआहनादुहितुर्वक्षणासुरूपामिनानोऽकृणोदिदं
नः ।। प्रसुष्टुतिःस्तनयंतंरुवंतमिळस्पतिंजरितर्नूनमश्याः ।। योऽअब्दिमाँ
उदनिमाँइयर्तिप्रविद्युतारोदसीउक्षमाणः ।। एषस्तोमोमारुतंशर्धोऽअ
च्छारुद्रस्यसूनूँर्युवन्यूँरुदश्याः ।। कामोरायेहवतेमास्वस्त्युपस्तुहिपृष
दश्वाँअयासः ।। प्रैषस्तोमःपृथिवीमंतरिक्षंवनस्पतीँरोषधीरायेअश्याः ।।

देवोदेवः सुहवोभूतुमह्यंमानोमातापृथिवीदुर्मतौधात॥ उरौदेवाअनिबा
धेस्याम॥ समश्विनोरवसानूतनेनमयोभुवासुप्रणीतीगमेम॥ आनोरयिं
वहतमोतवीरानाविश्वान्यमृतासौभगानि॥१२॥ आधेनवः पयसातूर्ण्य
र्थाअमर्धतीरुपनोयंतुमध्वा॥ महोरायेबृहतीः सप्तविप्रोमयोभुवोजरिता
जोहवीति॥ आसुष्टुतीनमसावर्तयध्यैद्यावावाजायपृथिवीअमृध्रे॥ पिता
मातामधुवचाः सुहस्ताभरेभरेनोयशसावविष्टं॥ अध्वर्यवश्चकृवांसोमधू
निप्रवायवेभरतचारुशुक्रं॥ होतेवनः प्रथमः पाह्यस्यदेवमध्वोररिमातेम
दाय॥ दशक्षिपोयुंजतेबाहूअद्रिंसोमस्ययाशमितारासुहस्ता॥ मध्वो
रसंसुगभस्तिर्गिरिष्ठांचनिश्चदद्दुदुहेशुक्रमंशुः॥ असावितेजुजुषाणाय
सोमः क्रत्वेदक्षायबृहतेमदाय॥ हरीरथेसुधुरायोगेअर्वागिंद्रप्रियाकृ
णुहिहूयमानः॥२०॥ आनोमहीमरमतिंसजोषाग्नांदेवींनमसारातहव्यां॥

मधोमेदाय बृहतीमृतज्ञामाग्नेवह पथिभिर्देवयानैः ॥ अजैतिर्यं प्रथयैतो
नविश्रावपार्वैते नाग्निनालपंतः ॥ पितुर्नपुत्रउपसिप्रेष्ठआ घर्मोअग्निमृतयं
न्नसादि ॥ अच्छामही बृहतीशंतमागीर्दूतोन [illegible]गच्छत्वश्विनाहुवध्यै ॥ मयोभु
वासरथायातमर्वाग्गंतंनिधिंधुरमाणिर्नेनाभिं ॥ प्रलेव्यसोनमउक्तिंतुरस्यो
हं पत्नउतवायोरदिक्षि ॥ याराधसाचोदितारामतीनांयावाजस्यद्रविणोदा
उतत्मन् ॥ आनामभिर्मरुतोवक्षिविश्वानारूपेभिर्जातवेदोहुवानः ॥ यज्ञंगि
रोजरितुःसुष्टुतिंचविश्वेगंतमरुतोविश्वऊती ॥ २१ ॥ आनोदिवोबृहतःपर्वतो
दासरस्वतीयजता[illegible] गंतुयज्ञं ॥ हवंदेवीजुजुषाणाघृताचीशग्मानोवाचमुश
तीश्रृणोतु ॥ आवेधसंनीलपृष्ठंबृहंतंबृहस्पतिंस[illegible]नेसादयध्वं ॥ सादद्यो
निंदमआदीदिवांसंहिरण्यवर्णमरुषंसपेम ॥ आधर्णसिर्बृहद्दिवोरराणो
विश्वेभिर्गंत्वोमभिर्हुवानः ॥ ग्नावसानऽओषधीरमृध्रस्त्रिधातुशृंगोवृषभो
वयो[illegible]धाः ॥ मातुष्पदेपरमेअंक्रेऽआयोर्विपन्युवोरास्पिरासोऽअग्मन् ॥

सुशेव्यं नमसा रातहव्याः शिशुं मृजंत्यायवो न वासे ॥ बृहद्वयो बृहते तुभ्यमग्ने
धियाजुरो मिथुनासः सचंत । देवोदेवः सुहवो भूतु मह्यं मा नो माता पृथिवी दुर्म
तौ धात् ॥ उरौ देवा अनिबाधे स्याम ॥ समश्विनोरवसा नूतनेन मयोभुवा सु
प्रणीती गमेम ॥ आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ॥२२॥
तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदं । प्रतीचीनं वृजने
वृजनं दोहसे गिराशुं जयंतमनु यासु वर्धसे ॥ श्रिये सुदृशीरुपरस्य याः स्व
र्विरोचमानः ककुभामचोदते ॥ सुगोपा असि न दभाय सुक्रतो परो माया
भिर्ऋत ऽ आस नाम ते ॥ अत्यं हविः सचते सच्च धातु चारिष्टगातुः स होता
सहोभरिः ॥ प्रसर्स्राणो ऽ अनु बर्हिर्वृषा शिशुर्मध्ये युवाजरो विस्रुहा हितः ॥
प्र व एते सुयुजो यामन्निष्टये नीचीरमुष्मै यम्य ऋतावृधः ॥ सुयंतुभिः सर्व
शासैरभीशुभिः क्रिविर्नामानि प्रवणे मुषायति ॥ संजर्भुराणस्तरुभिः
सुतेगृभं वयाकिनं चित्तगर्भासु सुस्वरुः ॥ धारवाकेष्वृजुगाथ शोभसे

वर्धस्वपत्नीरभिजीवोऽध्वरे॥ २॥ यादृगेवददृशेतादृगुच्यतेसंछाययाद
धिरेसिध्रयाप्स्वा॥ महीमस्मभ्यमुरुषामुरुज्रयोबृहत्सुवीरमनपच्युतंसहः॥
वेत्यग्रुर्जनिवान्वा॥ अतिस्पृधःसमर्यतामनसासूर्यःकविः॥ घ्रंसंरक्षंतंपरि
विश्वतोगयमस्माकंशर्मवनवत्स्वावसुः॥ ज्यायांसमस्ययतुनस्यकेतुन
ऋषिस्वरंचरतियासुनामते॥ यादृश्मिंधायितमपस्ययाविदद्यउस्वयंवह
तेसोअरंकरत्॥ समुद्रमासामवतस्थेअग्रिमानरिष्यतिसवनंयस्मिन्ना
यता॥ अत्रानहार्दिक्रवणस्यरेजतेयत्रामतिर्विद्यतेपूतबंधनी॥ सहिक्षत्र
स्यमनसस्यचित्तिभिरेवावदस्ययजतस्यसध्रेः॥ अवत्सारस्यस्पृणवाम
रण्वभिः शविष्ठंवाजंविदुषाचिदर्ध्यं॥ २४॥ श्येनआसामदितिःकक्ष्यो
मदोविश्ववारस्ययजतस्यमायिनः॥ सममन्यमन्यमर्थयंत्येतवेविदुर्विषा
णंपरिपानमंतिते॥ सदापृणोयजतोविद्विषोवधीद्बाहुवृक्तःश्रुतवित्तर्योवः
सचा॥ उभासवराप्रत्येतिभातिचयदींगणंभजतेसुप्रयावभिः॥ सुतंभरो

यजमानस्यसत्पतिर्विश्वासामूधः सधियामुदंचनः ॥ भरद्धेनूरसवच्छिश्रि
येपयोनुब्रुवाणोऽध्येति न स्वपन् ॥ यो जागार तमृचः कामयंते यो जागा
रतमुसामानि यंति ॥ यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्यो
काः ॥ अग्निर्जागार तमृचः कामयंतेऽग्निर्जागार तमु सामानि यंति ॥ अग्नि
र्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ॥ जागर्षि त्वं भुवने जा
तवेदो जागर्षि यत्र यजते हविष्मान् ॥ इदं हविः श्रद्दधानो जुहोमि तेन पासि
गुह्यं नाम गोनां ॥ १५ ॥ विदा दिवो विष्यन्नद्रिमुक्थैरायत्या उषसो अर्चिनो
गुः ॥ अपावृत व्रजिनीरुत्स्वर्गाद्वि दुरो मानुषीर्देव आवः ॥ वि सूर्यो अमतिं न श्रि
यं सादोर्वाद्गवां माता जानती गात् ॥ धन्वर्णसो नद्यः खादोअर्णाः स्थूणेव
सुमिता दृंहत द्यौः ॥ अस्मा उक्थाय पर्वतस्य गर्भो महीनां जनुषे पूर्व्याय ॥ वि
पर्वतो जिहीत साधत द्यौराविवासंतो दसयंत भूम ॥ सूक्तेभिर्वो वचोभि

देवजुष्टैरिंद्रा न्व१ग्नीऽअवसेहुवध्यै॥ उक्थेभिर्हिष्मा कवयः सुयज्ञाःऽआविवा
संतो मरुतो यजंति॥ एतो न्व१द्य सुध्यो३ भवाम प्रदुच्छुना मिनवामा वरीयः॥
आरे द्वेषांसि सनुतर्दधामायाम प्रांचो यजमानमच्छ॥ २६॥ एता धियं कृण
वामा सखायो प या मातों ऋणुत व्रजं गोः॥ यया मनुर्विशिशिप्रं जिगा
य यया वणिग्वंकुरापा पुरीषं॥ अनूनोदत्र हस्तयतो अद्रिरार्चन्येन दश
मासो नवग्वाः॥ ऋतं यती सरमा गा अविंदद्विश्वानि सत्यांगिराश्चकार॥
विश्वेऽअस्या व्युषि माहिनायाः संयद्गोभिरंगिरसो नवंत॥ उत्सऽआसां
परमे सधस्थऽऋतस्य पथा सरमा विदद्गाः॥ आ सूर्यो यातु सप्ताश्वः क्षे
त्रं यदस्योर्विया दीर्घयाथे॥ रघुः श्येनः पतयदंधो अच्छा युवा कविर्दीद
यद्गोषु गच्छन्॥ आ सूर्यो अरुहच्छुक्रमर्णोयुक्त यद्धरितो वीतपृष्ठाः॥ उद्ना
न नावमनयंत धीराःऽआशृण्वतीरापो अर्वागतिष्ठन्॥ धियं वो अप्सु द
धिषे स्वर्षां ययातरं दश मासो नवग्वाः॥ अया धिया स्याम देवगोपाःऽअया

धियातुतुर्यामात्यंहः ॥२७॥ हयोनविद्वाँअयुजिस्वयंधुरितांवहामिप्रतर
णीमवस्युवं ॥ नास्यावश्मिविमुचंनावृतंपुनर्विद्वान्पथःपुरएतऋजुनेष
ति ॥ अग्नइंद्रवरुणमित्रदेवाःशर्धःप्रयंतमारुतोतविष्णो ॥ उभानासत्या
रुद्रोअधग्नाःपूषाभगःसरस्वतीजुषंत ॥ इंद्राग्नीमित्रावरुणादितिंस्वः
पृथिवींद्यांमरुतःपर्वताँअपः ॥ हुवेविष्णुंपूषणंब्रह्मणस्पतिंभगंनुशंससवि णु
तारमूतये ॥ उतनोविष्णुरुतवातोअस्रिधोद्रविणोदाउतसोमोमयस्क
रत् ॥ उतऋभवउतरायेनोऽअश्विनोतत्वष्टोतविभ्वानुमंसते ॥ उतत्यन्नो
मारुतंशर्धऽआगमद्दिविक्षयंयजतंबर्हिरासदे ॥ बृहस्पतिःशर्मपूषोत
नोयमद्वरूथ्यं१वरुणोमित्रोअर्यमा ॥ उतत्येनःपर्वतासःसुशस्तयःसुदी त
योनद्य१स्त्रामणेभुवन् ॥ भगोविभक्ताशवसावसागमदुरुव्यचाऽअदि
तिःश्रोतुमेहवं ॥ देवानांपत्नीरुशतीरवंतुनःप्रावंतुनस्तुजयेवाजसातये ॥

याः पार्थिवासो या ऽअपामपि व्रते ता नो देवीः सुहवाः शर्म यच्छत ॥ उत ग्ना
व्यंतु देवपत्नीरिंद्राण्यग्नाय्यश्विनी राट् ॥ आ रोदसी वरुणानी शृणोतु व्यं
तु देवीर्य ऋतुर्जनीनां ॥८॥६॥ इति चतुर्थाष्टके द्वितीयोऽध्यायः ॥ ॥ॐ॥ म्रा॥
प्रयुंजती दिव एति ब्रुवाणा मही माता दुहितुर्बोधयंती ॥ आविवासंती यु
वतिर्मनीषा पितृभ्य ऽआ सदने जोहुवाना ॥ अजिरासस्तदप ऽईयमाना ऽ
आतस्थिवांसो ऽअमृतस्य नाभिं ॥ अनंतास उरवो विश्वतः सीं परि द्यावापृथि
वी यंति पंथाः ॥ उक्षा समुद्रो अरुषः सुपर्णः पूर्वस्य योनिं पितुरा विवेश ॥ म
ध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसस्पात्यंतौ ॥ चत्वार ईं बिभ्रति
क्षेमयंतो दश गर्भं चरसे धापयंते ॥ त्रिधातवः परमा ऽअस्य गावो दिवश्चरं
ति परि सद्यो ऽअंतान् ॥ इदं वपुर्निवचनं जनासश्चरंति यन्नद्यस्तस्थुरापः ॥

द्वेयदींबिभ्रतोमातुरन्येइहेहजातेयम्याऽसबंधू॥ वितन्वतेधियोऽअस्मा
अपांसिवस्त्रापुत्रायमातरोवयंति॥ उपप्रक्षेवृषणोमोदमानादिवस्पथावध्वो
यंत्यछ॥ तदस्तुमित्रावरुणातदग्नेशंयोरस्मभ्यमिदमस्तुशस्तं॥ अशीम
ध हिगाधमुतप्रतिष्ठांनमोदिवेबृहतेसादनाय॥१॥ कदुप्रियायधाम्नेमनामहेस्व
क्षत्रायस्वयशसेमहेवयं॥ आमेन्यस्यरजसोयदभ्रआँअपोवृणानावितनो ना
तिमायिनी॥ ताऽअत्नतवयुनंवीरवक्षणंसमान्यावृतयाविश्वमारजः॥
अपोअपाचीरपराऽअपेजतेप्रपूर्वाभिस्तिरतेदेवयुर्जनः॥ आग्रावभिरह
प्र न्येभिरक्तुभिर्वरिष्ठंवज्रमाजिघर्तिमायिनि॥ शतंवायस्यप्रचरन्स्वेदमे
संवर्तयंतोविचवर्तयन्नहा॥ तामस्यरीतिंपरशोरिवप्रत्यनीकमख्यंभु
जेअस्यवर्पसः॥ सचायदिपितुमंतमिवक्षयंरत्नंदधातिभरहूतयेविशे॥

पीतंरसंपालिश्चवेननवा ।। पीकपलअग्पानांसमुद्रं [illegible] स्वाहा ।। [illegible] ।।

सजिह्वयाचतुरनीकऽऋंजतेचारुवसानोवरुणोयतन्नरिं ।। नतस्यविद्मपुरु
षत्वतावयंयतोभगः सवितादातिवार्यं ।। ५ ।। देवंवोअद्यसवितारमेषेभगंच
रत्नंविभजंतमायोः ।। आवांनरापुरुभुजाववृत्यांदिवेदिवेचिदश्विनासखी
यन् ।। १ ।। प्रतिप्रयाणमसुरस्यविद्वान्त्सूक्तैर्देवंसवितारंदुवस्य ।। उपब्रुवीतनमसा
विजानंज्येष्ठंचरत्नंविभजंतमायोः ।। अदत्रयादयतेवार्याणिपूषाभगोऽअ
दितिर्वस्तउस्रः ।। इंद्रोविष्णुर्वरुणोमित्रोऽअग्निरहानिभद्राजनयंतदस्माः ।।
तन्नोऽअनर्वासवितावरूथंतत्सिंधवइषयंतोऽअनुग्मन् ।। उपयद्वोचेऽअध्वर
स्यहोतारायःस्यामपतयोवाजरत्नाः ।। प्रयेवसुभ्यईवदानमोदुर्येमित्रेवरुणे
सूक्तवाचः ।। अवैत्वभ्वंकृणुतावरीयोदिवस्पृथिव्योरवसामदेम ।। ५ ।। विश्वोदे
वस्यनेतुर्मर्तोवुरीतसख्यं ।। विश्वोरायइषुध्यतिद्युम्नंवृणीतपुष्यसे ।। ते

पर्वाविद्धमसंतोते [illegible]

तैदेवनेतर्येचेमाँअनुचासै॥तेरायातेह्याऽपृचेसचेमहिसचथ्यैः॥अतौनआ ॥२२॥
न्नॄनतिथीनतःपत्नीर्दशस्यत॥आरेविश्वंपथेष्ठांद्विषोयुयोतुयूयुविः॥यत्रव
न्हिरभिहितोदुद्रवद्द्रोण्यःपशुः॥नृमणावीरपस्त्योर्णाधीरेवसनिता॥एषते
देवनेतारथस्पतिःशंरयिः॥शंरायेशंस्वस्तयइषस्तुतोमनामहेदेवस्तुतोम
नामहे॥४॥अग्नेसुतस्यपीतयेविश्वैरूमेभिरागहि॥देवेभिर्हव्यदातये॥
ऋतधीतयऽआगतसत्यधर्माणोऽअध्वरं॥अग्नेःपिबतजिह्वया॥विप्रेभि
र्विप्रसंत्यप्रातर्यावभिरागहि॥देवेभिःसोमपीतये॥अयंसोम[illegible]श्चमूसु
तोमत्रेपरिषिच्यते॥प्रियइंद्रायवायवे॥वायवायाहिवीतयेजुषाणोहव्य
दातये॥पिबासुतस्यांधसोऽअभिप्रयः॥५॥इंद्रश्चवायवेषांसुतानां
पीतिमर्हथः॥तांजुषेथामरेपसावभिप्रयः॥सुताइंद्रायवायवे[illegible]सु[illegible]नो
सोमासोदध्याशिरः॥निम्नंनयंतिसिंधवोभिप्रयः॥सजूर्विश्वेभिर्देवे

भिरश्विभ्यामुषसा सजूः ॥ आयाह्यग्ने अत्रिवत्सुते रण ॥ सजूर्मित्रावरु
णाभ्यां सजूः सोमेन विष्णुना ॥ आया० सजूरादित्येभिर्वसुभिः सजूरिंद्रेण
वायुना ॥ आयाह्यग्ने ॥ ०॥ ६ ॥ स्वस्ति नो मिमीतामश्विना भगः स्वस्ति दे
व्यदितिरनर्वणः ॥ स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी
सुचेतुना ॥ स्वस्तये वायुमुपब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः ।
बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय० आदित्यासो भवंतु नः ॥ विश्वेदे
वा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये० देवा० अवंतृभवः स्व
स्तये स्वस्ति नो रुद्रः पात्वंहसः ॥ स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति ॥
स्वस्ति न इंद्रश्चाग्निश्च स्वस्ति नो अदिते कृधि ॥ स्वस्ति पंथामनुरमसू
र्याचंद्रमसाविव ॥ पुनर्ददताघ्नता जानता संगमेमहि ॥ स्वस्त्ययनं तार्क्ष्य
मरिष्टनेमिं महद्भूतं वायसं देवतानां ॥ असुरघ्नमिंद्रसखं समत्सु बृहद्य

त्रौ। तावीमिवारुहेम ।। अंहोमुचमांगिरसंगयंचस्वस्त्यात्रेयंमनसाचताक्ष्र्यं ।। २३।।
प्रयतपाणिः शरणंप्रपद्ये स्वस्तिसंबाधेष्वभयंनोअस्तु ।।७।। प्रश्यावाश्व
ॐ धृष्णुयार्चामरुद्भिर्ऋक्वभिः ।। येअद्रोघमनुष्वधंश्रवोमदंतियज्ञियाः ।। तेहिस्थि
रस्यशवसःसखायःसंतिधृष्णुया । तेयामन्नाधृषद्विनस्त्मनापांतिश
श्वतः ।। तेस्पंद्रासोनोक्षणोतिष्कंदंतिशर्वरीः ।। मरुतामधामहोदिवि
क्षमाचमन्महे ।। मरुत्सुवोदधीमहिस्तोमंयज्ञंचधृष्णुया । विश्वेयेमा
नुषायुगापांतिमर्त्यंरिषः ।। अर्हंतोयेसुदानवोनरोऽसामिशवसः ।
प्रयज्ञंयज्ञियेभ्योदिवोअर्चामरुद्भ्यः ।।५।। आरुक्मैरायुधानरऋष्वा
ऋष्टीरसृक्षत ।। अन्वेनांअहविद्युतोमरुतोजज्झतीरिवभानुरर्तत्मना
दिवः ।। येवावृधंतपार्थिवायउरावंतरिक्षआ ।। वृजनेवानदीनांसध
स्थेवामहोदिवः ।। शर्धोमारुतमुच्छंससत्यशवसमृभ्वसं ।। उतस्मतेशु

येनरःप्रस्यंद्रायुजतत्मना ॥८॥ उतस्मतेपरुष्ण्यामूर्णावसतशुंध्यवः ॥ उतप
व्यारथानामद्रिंभिं दंत्योजसा ॥९॥ आपथयोविपथयोंतस्पथा ऽ अनुपथाः
॥ एतेभिर्मह्यंनामभिर्यज्ञंविष्टार ऽ ओहते ॥१०॥ अधानरोन्योहतेधा ऽ नियु
ते ऽ ओहते ॥ अधापारावताइतिचित्रारूपाणिदर्श्या ॥ छंदःस्तुभःकुभन्य
वउत्समाकीरिणोनृतुः ॥ तेमेकेचिन्नतायवऊमा ऽ आसंदृशित्विषे ॥
यऋष्वाऋष्टिविद्युतः कवयःसंतिवेधसः ॥ तमृषेमारुतंगणंनमस्यारम
यागिरा ॥ अच्छ ऽ ऋषेमारुतंगणंदानामित्रंनयोषणा ॥ दिवोवाधृष्णव ऽ
मे ओजसास्तुताधीभिरिषण्यत ॥ नूमन्वान ऽ एदेवाँअच्छानवक्षणा ॥ दा षां
नासचेतसूरिभिर्यामश्रुतेभिरंजिभिः ॥ प्रयेमेबंध्वेषेगांवोचंतसूर
यःपृश्निंवोचंतमातरं ॥ अधापितरमिष्मिणंरुद्रंवोचंतशिक्वसः ॥ स
प्तमेसप्तशाकिनएकमेकाशताददुः ॥ यमुनायामधिश्रुतमुद्राधोगव्यं

मृजे नि राधो अश्व्यं मृजे ॥७॥ को वेद जानमेषां को वा पुरा सुम्नेष्वास मरुतां ॥
यद्युयुज्रे किलास्यः ॥ ऐतान्रथेषु तस्थुषः कः शुश्राव कथा ययुः ॥ कस्मै सस्रुः सु
दासे अन्वापय ळ्हाभिर्वृष्टयः सह ॥ ते म आहुर्य आययुरुप द्युभिर्विभिर्मदे ॥ नरो
मर्या अरेपस इमान्पश्यन्निति ष्टुहि ॥ ये अंजिषु ये वाशीषु स्वभानवः स्रक्षु रु
क्मेषु खादिषु ॥ श्राया रथेषु धन्वसु ॥ युष्माकं स्मा रथाँ अनु मुदे दधे मरुतो जीर
दानवः ॥ वृष्टी द्यावो यतीरिव ॥११॥ आ यन्नरः सुदानवो ददाशुषे दिवः को
शमचुच्यवुः ॥ वि पर्जन्यं सृजंति रोदसी अनु धन्वना यंति वृष्टयः ॥ ततृदानाः
सिंधवः क्षोदसा रजः प्र सस्रुर्धेनवो यथा ॥ स्यंन्ना अश्वा इवाध्वनो विमो
चने वि यद्वर्त्तंत एन्यः ॥ आ यात मरुतो दिव आंतरिक्षादमादुत ॥ माव स्थात
परावतः ॥ मा वो रसानितभा कुभा क्रुमुर्मा वः सिंधुर्नि रीरमत् ॥ मा वः परि ष्ठा
त्सरयुः पुरीषिण्यस्मे इत्सुम्नमस्तु वः ॥ तं वः शर्धं रथानां त्वेषं गणं मारुतं नव्य
सीनां ॥ अनु प्र यंति वृष्टयः ॥१२॥ शर्धंशर्धं व एषां व्रातंव्रातं गणंगणं सुश

स्तिभिः॥ अनुक्रमेमधीतिभिः॥ कस्माऽअद्यसुजातायरातहव्यायप्रययुः॥ एना
यामेनमरुतः॥ येनतोकायतनयायधान्यं१बीजंवहध्वेअक्षितं॥ अस्मभ्यंतद्ध
त्तनयद्वईमहेराधोविश्वायुसौभगं॥ अतीयामनिदस्तिरःस्वस्तिभिर्हित्वावद्य
मरातीः॥ वृष्ट्वीशंयोरापउस्रिभेषजंस्याममरुतः सह॥ सुदेवःसमहासतिसु
वीरोनरोमरुतःसमर्त्यः॥ यंत्रायध्वेस्यामते॥ स्तुहिभोजान्स्तुवतोअस्यया
मनिरणन्गावोनयवसे॥ यतःपूर्वाँइवसखीँरनुह्वयगिरागृणीहिकामिनः॥
॥१२॥ प्रशर्धायमारुतायस्वभानवइमांवाचमनजापर्वतच्युते॥ घर्मस्तुभे
दिवऽआपृष्ठयज्वनेद्युम्नश्रवसेमहिनृम्णमर्चत॥ प्रवोमरुतस्तविषाउदन्यवोवयो
वृधोअश्वयुजःपरिज्रयः॥ संविद्युतादधतिवाशतित्रितःस्वरंत्यापोवनापरि
ज्रयः॥ विद्युन्महसोनरोअश्मदिद्यवोवाततिविषोमरुतःपर्वतच्युतः॥ अब्दया
चिन्मुहुराह्रादुनीवृतःस्तनयदमारभसाऽउदोजसः॥ व्य१क्तून्रुद्राव्यहानिशि

क्वसोव्य१न्तरिक्षंविरजांसिधूतयः॥वियदज्राँअजथनावईंयथा॥विदुर्गा
णिमरुतोनाहरिष्यथ॥तद्वीर्यंवोमरुतोमहित्वनंदीर्घंततानसूर्योनयोज
[illegible]नं॥एतानयामेअगृभीतशोचिषोनश्वदांयन्न्ययातनागिरिं॥१४॥
अभ्राजिशर्धोमरुतोयदर्णसंमोषथावृक्षंकपनेववेधसः॥अधस्मानो
अरमतिंसजोषसश्चक्षुरिवयंतमनुनेषथासुगं॥नसजीयतेमरुतोनहन्य
तेनस्रेधतिनव्यथतेनरिष्यति॥नास्यरायउपदस्यंतिनोतयऋषिंवायंरा
जानंवासुषूदथ॥नियुत्वंतोग्रामजितोयथानरोर्यमणोनमरुतःकबंधि
नः॥पिन्वंत्युत्संयदिनासोअस्वरन्व्युंदंतिपृथिवींमध्वोऽअंधसा॥प्रवत्
वतीयंपृथिवीमरुद्भ्यःप्रवत्वतीद्यौर्भवतिप्रयद्भ्यः॥प्रवत्वतीःपथ्याअंतरि
क्ष्याःप्रवत्वंतःपर्वताजीरदानवः॥यन्मरुतःसभरसःस्वर्णरःसूर्यउदिते
मदथादिवोनरः॥नवोश्वाःश्रथयंताहसिस्रतःसद्योअस्याध्वनःपार

मश्नुथ॥१५॥ अंसेषु व ऋष्टयः पत्सु खादयो वक्षःसु रुक्मा मरुतो रथे
शुभः॥ अग्निभ्राजसो विद्युतो गभस्त्योः शिप्राः शीर्षसु वितता हिरण्य
यीः॥ तं नाकमर्यो अगृभीतशोचिषं रुशंपिप्पलं मरुतो वि धूनुथ॥
समच्यंत वृजनातित्विषंत यत्स्वरंति घोषं विततमृतायवः॥ युष्मा
दत्तस्य मरुतो विचेतसो रायः स्याम रथ्यो३ वयस्वतः॥ न यो युच्छति तिष्यो३
यथा दिवो३स्मे रारंत मरुतः सहस्रिणं॥ यूयं रयिं मरुतः स्पार्हवीरं यू
यमृषिमवथ सामविप्रं॥ यूयमर्वंतं भरताय वाजं यूयं धत्थ राजानं श्रु
ष्टिमंतं॥ तद्वो यामि द्रविणं सद्यऊतयो येना स्व१र्ण ततनाम नॄंरभि॥ इ
दं सु मे मरुतो हर्यता वचो यस्य तरेम तरसा शतं हिमाः॥१६॥ प्रयज्य यं
वो मरुतो भ्राजदृष्टयो बृहद्वयो दधिरे रुक्मवक्षसः॥ ईयंते अश्वैः सुय
मेभिराशुभिः शुभं यातामनु रथा अवृत्सत॥ स्वयं दधिध्वे तविषीं

यथाविद बृहन्महांतउर्वियाविराजथ।। उतांतरिक्षंममिरे व्योजसाशु
भंया०।। साकंजाताःसुभ्वः साकमुक्षिताः श्रियेचिदाप्रतरंवावृधुर्नरः।।
विरोकिणःसूर्यस्येवरश्मयःशुभंयाता०।। आभूषेण्यंवोमरुतोमहित्व
नंदिदृक्षेण्यंसूर्यस्येवचक्षणं।। उतोअस्मांअमृतत्वेदधातनशुभंया
तामनुरथाअवृत्सत।। उदीरयथामरुतःसमुद्रतोयूयंवृष्टिंवर्षयथापुरी
षिणः।। नवोदस्राउपदस्यंतिधेनवःशुभंया०।। ५।। यदश्वान्धूर्षुपृष
तीरयुग्ध्वंहिरण्ययान्प्रत्यत्कांअमुग्ध्वं।। विश्वाइत्स्पृधोमरुतोव्यस्य
थशुभंया०।। नपर्वताननद्योवरंतवोयत्राचिध्वंमरुतोगछथेदुतत्।। उत
द्यावापृथिवीयाथनापरिशुभंया०।। यत्पूर्व्यंमरुतोयच्चनूतनंयदुद्य
तेवसवोयच्चशस्यते।। विश्वस्यतस्यभवथानवेदसःशुभंयातामनु
रथाअवृत्सत।। मृळतनोमरुतोमावधिष्टनास्मभ्यंशर्मबहुलंवियं

तन॥ अधिस्तोत्रस्य सख्यस्य गातन शुभं यामनुरथा॥ यूयमस्मा
न्नयत वस्योऽ अच्छा निरंहतिभ्यो मरुतो गृणानाः॥ जुषध्वं नो हव्यदातिं
यजत्रा वयं स्याम पतयो रयीणां॥१७॥ अग्ने शर्धंतमा गणं पिष्टं रुक्मेभि
रंजिभिः॥ विशो अद्य मरुतामव ह्वये दिवश्चिद्रोचनादधि॥ यथा चिन्मन्य
से हृदा तदिन्मे जग्मुराशसः॥ ये ते नेदिष्ठं हवनान्यागमंतान्वर्ध भीम
संदृशः॥ मीळ्हुष्मतीव पृथिवी पराहता मदंत्येत्यस्मदा॥ ऋक्षो न वो
मरुतः शिमीवाँ अमो दुध्रो गौरिव भीमयुः॥ नि ये रिणंत्योजसा वृथा
गावो न दुर्धुरः॥ अश्मानं चित्स्वर्यं पर्वतं गिरिं प्र च्यावयंति यामभिः॥
उत्तिष्ठ नूनमेषां स्तोमैः समुक्षितानां॥ मरुतां पुरुतममपूर्व्यं गवां
सर्गमिव ह्वये॥१८॥ युंग्ध्वं ह्यरुषी रथे युंग्ध्वं रथेषु रोहितः॥ युंग्
ध्वं हरी अजिरा धुरि वोळ्हवे वहिष्ठा धुरि वोळ्हवे॥ उत स्य वाज्यरुष

स्तुविष्वणिरिह स्म धायि दर्शतः ॥ मा वो यामेषु मरुतश्चिरं करत्प्र तं रथे
षु चोदत ॥ रथं नु मारुतं वयं श्रवस्युमा हुवामहे ॥ आ यस्मिन्तस्थौ सुरणा
नि बिभ्रती सचा मरुत्सु रोदसी ॥ तं वः शर्धं रथेशुभं त्वेषं पनस्युमा हुवे ॥
यस्मिन्त्सुजाता सुभगा महीयते सचा मरुत्सु मीळ्हुषी ॥२०॥ आ रुद्रा
स इन्द्रवन्तः सजोषसो हिरण्यरथाः सुविताय गन्तन ॥ इयं वो अस्मत्प्रति
हर्यते मतिस्तृष्णजे न दिव उत्सा उदन्यवे ॥ वाशीमन्त ऋष्टिमन्तो मनीषि
णः सुधन्वान इषुमन्तो निषङ्गिणः ॥ स्वश्वाः स्थ सुरथाः पृश्निमातरः स्वा
युधा मरुतो याथना शुभं ॥ धूनुथ द्यां पर्वतान्दाशुषे वसु नि वो वना जि
हते यामनो भिया ॥ कोपयथ पृथिवीं पृश्निमातरः शुभे यदुग्राः पृष
तीरयुग्ध्वं ॥ वातत्विषो मरुतो वर्षनिर्णिजो यमा इव सुसदृशः सुपेशसः ॥
पिशङ्गाश्वा अरुणाश्वा ऽअरेपसः प्रत्वक्षसो महिना द्यौरिवोरवः ॥ पुरु

द्रुभ्राजदंजिमंतः सुदानवस्त्वेषसंदृशो अनवभ्रराधसः ॥ सुजातासो जनुषा
रुक्मवक्षसो दिवो अर्का अमृतं नाम भेजिरे ॥ २१ ॥ ऋष्टयो वो मरुतो अंसयो
रधि सह ओजो बाह्वोर्वो बलं हितं ॥ नृम्णा शीर्षस्वायुधा रथेषु वो विश्वा
वः श्रीरधि तनूषु पिपिशे ॥ गोमदश्वावद्रथवत्सुवीरं चंद्रवद्राधो मरुतो दद
नः ॥ प्रशस्तिं नः कृणुत रुद्रियासो भक्षीय वो वसो दैव्यस्य ॥ हये नरो मरु
तो मृळता नस्तुवीमघासो अमृता ऋतज्ञाः ॥ सत्यश्रुतः कवयो युवानो बृ
हद्गिरयो बृहदुक्षमाणाः ॥ २२ ॥ तमु नूनं तविषीमंतमेषां स्तुषे गणं मारुतं न
व्यसीनां ॥ य आश्वश्वा अमवद्वहंत उतेशिरे अमृतस्य स्वराजः ॥ त्वेषं गणं
तवसं खादिहस्तं धुनिव्रतं मायिनं दातिवारं ॥ मयोभुवो ये अमिता महित्वा
वंदस्व विप्र तुविराधसो नॄन् ॥ आ वो यंतूदवाहासो अद्य वृष्टिं ये विश्वे मरुतो
जुनंति ॥ अयं यो अग्निर्मरुतः समिद्ध एतं जुषध्वं कवयो युवानः ॥ यूयं राजा
नमिर्यं जनाय विभ्वतष्टं जनयथा यजत्राः ॥ युष्मदेति मुष्टिहा बाहुजूतो युष्म

सदश्वो मरुतः सुवीरः॥ अराइवेदचरमा ऽअहेव प्रप्रजायंते ऽअकवा महोभिः॥ पृ
श्नेः पुत्रा उपमासो रभिष्ठाः स्वया मत्या मरुतः सं मिमिक्षुः॥ यत्प्रायासिष्ट पृषती
भिरश्वैर्वीळुपविभिर्मरुतो रथेभिः॥ क्षोदंत आपो रिणते वनान्यवोस्रियो वृ
षभः क्रंदतु द्यौः॥ प्रथिष्ट यामन्पृथिवी चिदेषां भर्तेव गर्भं स्वमिच्छवो धुः॥ वा
तान्ह्यश्वान्धुर्यायुयुज्रे वर्षं स्वेदं चक्रिरे रुद्रियासः॥ हये नरो मरुतो मृळता न
स्तुवीमघासो अमृता ऋतज्ञाः॥ सत्यश्रुतः कवयो युवानो बृहद्गिरयो बृहदु
क्षमाणाः॥ २२॥ प्र वः स्पळक्रन्सुविताय दावनेऽर्चा दिवे प्र पृथिव्या ऋतं भरे॥
उक्षंते अश्वान्तरुषंत ऽआ रजोऽनु स्वं भानुं श्रथयंते अर्णवैः॥ अमादेषां भियसा
भूमिरेजति नौर्न पूर्णा क्षरति व्यथिर्यती॥ दूरेदृशो ये चितयंत एमभिरंतर्महे वि
दथे येतिरे नरः॥ गवामिव श्रियसे शृंगमुत्तमं सूर्यो न चक्षू रजसो विसर्जने॥
अत्या इव सुभ्वश्चारवः स्थन मर्या इव श्रियसे चेतथा नरः॥ को वो महांति मह
तामुदश्नवत्कस्काव्या मरुतः को ह पौंस्या॥ यूयं ह भूमिं किरणं न रेजथ प्र यद्भ

रथ्येवसुखितायदावने ॥ अश्वाइवेदरुषासःसबंधवःशूराइवप्रयुधःप्रोतयुयु
धुः ॥ मर्याइवसुवृधोवावृधुर्नरःसूर्यस्यचक्षुःप्रमिनंतिवृष्टिभिः ॥ तेअज्येष्ठा
अकनिष्ठासउद्भिदोमध्यमासोमहसाविवावृधुः ॥ सुजातासोजनुषापृश्निमा
तरोदिवोमर्याऽ[illegible]आनोअच्छाजिगातन ॥ वयोनयेश्रेणीःपप्तुरोजसांतां
न्दिवोबृहतःसानुनस्परि ॥ अश्वासएषामुभयेयथाविदुःप्रपर्वतस्यनभनूं
रचुच्यवुः ॥ मिमातुद्यौरदितिर्वीतयेनःसंदानुचित्राउषसोयतंतां ॥ आचु
च्युर्दिव्यंकोशमेतऋषेरुद्रस्यमरुतोगृणानाः ॥ २४ ॥ ईळेअग्निंस्ववसंनमो
भिरिहप्रसत्तोविचय[illegible]तंनः ॥ रथैरिवप्रभरेवाजयद्भिःप्रदक्षिणिन्मरुतां
स्तोममृध्यां ॥ आयेतस्थुःपृषतीषुश्रुतासुसुखेषुरुद्रामरुतोरथेषु ॥ वना
चिदुग्राजिहतेनिवोभियापृथिवीचिद्रेजतेपर्वतश्चित् ॥ पर्वतश्चिन्महिवृ
द्धोबिभायदिवश्चित्सानुरेजतस्वनेवः ॥ यत्क्रीळथमरुतऋष्टिमंतऽआप

इव सध्र्यंचो धवध्वे॥ वराइवेद्रैवतासो हिरण्यैरभिस्वधाभिस्तन्वः पिपिश्रे॥
श्रिये श्रेयांसस्तवसो रथेषु सत्रा महांसि चक्रिरे तनूषु॥ अज्येष्ठासो अकनिष्ठा
स एते सं भ्रातरो वावृधुः सौभगाय॥ युवा पिता स्वपा रुद्र एषां सुदुघा पृश्निः
सुदिना मरुद्भ्यः॥ यदुत्तमे मरुतो मध्यमे वा यद्वावमे सुभगासो दिवि ष्ठ। अतो
नो रुद्रा उत वा न्व१स्याग्ने वित्ताद्धविषो यद्यजाम॥ अग्निश्च यन्मरुतो विश्व
वेदसो दिवो वहध्व उत्तरादधि ष्णुभिः॥ ते मंदसाना धुनयो रिशादसो वामं
धत्त यजमानाय सुन्वते॥ अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिः सोमं पिब मंदसा
नो गणश्रिभिः॥ पावकेभिर्विश्वमिन्वेभिरायुभिर्वैश्वानर प्रदिवा केतुना
सजूः॥ २५॥ केष्ठा नरः श्रेष्ठतमा य एक एक आयय। पृष्ठे सदो नसोर्य
मः॥ जघने चोद एषां वि सक्थानि नरो यमुः॥ पुत्रकृथे न जनयः॥ परा वीरा
स एतन मर्यासो भद्रजानयः॥ अग्नितपो यथासथ॥ सनत्साश्व्यं पशुमु
× परमस्याः परावतः॥ क्व१ वोश्वाः क्वा३भीशवः कथं शेक कथा यय॥ ×

तगव्यंशतावयं॥श्यावाश्वस्तुतायया दोर्वीरायोपबर्बृहत्॥२६॥उतत्वा
स्त्रीशशीयसीपुंसोभवतिवस्यसी॥अदेवत्रादराधसः॥वियाजानातिज
सुरिंवितृष्यंतंविकामिनं॥देवत्राकृणुतेमनः॥उतघानेमोअस्तुतः पुमांइति
ब्रुवेपणिः॥सवैरदेयइत्समः॥उतमेरपद्युवतिर्ममंदुषी॥प्रतिश्यावायवर्तनिं॥
विरोहितापुरुमीळ्हाययेमतुर्विप्रायदीर्घयशसे॥योमेधेनूनांशतंवैददश्वि
र्यथाददत्॥तरंतइवमंहना॥२७॥यईंवहंतआशुभिः पिबंतोमदिरंमधु॥
अत्रश्रवांसिदधिरे॥येषांश्रियाधिरोदसीविभ्राजंतेरथेष्वा॥दिविरुक्म
इवोपरि॥युवासमारुतोगणस्त्वेषरथोअनेद्यः॥शुभंयावाप्रतिष्कुतः॥को
वेदनूनमेषांयत्रामदंतिधूतयः॥ऋतजाताअरेपसः॥यूयंमर्तंविपन्यवः
प्रणेतारइत्थाधिया॥श्रोतारोयामहूतिषु॥२८॥तेनोवसूनिकाम्यापुरुश्चं
द्रारिशादसः॥आयज्ञियासोववृत्तन॥एतंमेस्तोममूर्म्येदार्भ्यायपरावह॥
गिरोदेविरथीरिव॥उतमेवोचतादितिसुतसोमेरथवीतौ॥नकामोअप

वोंतमो॥ एष क्षेति रथवीतिर्मघवा गोमतीरनु॥ पर्वतेष्वपश्रितः॥१९॥ ऋते
नऋतमपिहितं ध्रुवं वां सूर्यस्य यत्र विमुचंत्यश्वान्॥ दश शता सह तस्थु
स्तदेकं देवानां श्रेष्ठं वपुषामपश्यं॥ तत्सु वां मित्रावरुणा महित्वमीर्मा त
स्थुषीरहभिर्दुदुह्रे॥ विश्वाः पिन्वथः स्वसरस्य धेना अनु वामेकः प वीराव
र्त॥ अधारयतं पृथिवीमुत द्यां मित्रराजाना वरुणा महोभिः॥ वर्धयतमो
षधीः पिन्वतं गा अव वृष्टिं सृजतं जीरदानू॥ आ वामश्वासः सुयुजो वहं
तु यतरश्मय उप यंत्वर्वाक्॥ घृतस्य निर्णिगनु वर्तते वामुप सिंधवः प्रदि
वि क्षरंति॥ अनुश्रुताममतिं वर्धदुर्वीं बर्हिरिव यजुषा रक्षमाणा॥ नमस्वं
ता धृतदक्षाधि गर्ते मित्रासाथे वरुणेळास्वंतः॥२॥ अक्रविहस्ता सु
कृते परस्पा यं त्रासाथे वरुणेळास्वंतः॥ राजाना क्षत्रमहृणीयमाना
सहस्रस्थूणं बिभृथः सह द्वौ॥ हिरण्यनिर्णिगयो अस्य स्थूणा वि भ्राजते
दिव्यश्वाजनीव॥ भद्रे क्षेत्रे निमिता तिल्विले वा सनेम मध्वो अधि

गर्त्यस्य ॥ हिरंण्यरूपमुषसो व्युष्टावयस्थूणमुदिता सूर्यस्य ॥ आरोहथो
वरुणमित्रगर्त्तमतश्चक्षाथे अदितिं दितिं च ॥ यद्बंहिष्ठं नातिविधे सुदानू
अछिद्रं शर्म भुवनस्य गोपा ॥ तेन नो मित्रावरुणावविष्टं सिषासंतो जिगी
वांसः स्याम ॥ ९ ॥ इति श्री चतुर्थीष्टके तृतीयोध्यायः ॥ ६२ ॥ ॐ ॥ म ॥ ऋ
तस्य गोपावधितिष्ठथो रथं सत्यधर्माणा परमे व्योमनि ॥ यमत्र मित्रावरुणा
वथो युवं तस्मै वृष्टिर्मधुमत्पिन्वते दिवः ॥ सम्राजावस्य भुवनस्य राजथो मित्राव
णा विदथे स्वर्दृशा ॥ वृष्टिं वो राधो अमृतत्वमीमहे द्यावापृथिवी विचरंति तं
न्यवः ॥ सम्राजा उग्रा वृषभा दिवस्पती पृथिव्या मित्रावरुणा विचर्षणी ॥
चित्रेभिरभ्रैरुपतिष्ठथो रवं द्यां वर्षयथो असुरस्य मायया ॥ माया वां मित्रा
वरुणा दिवि श्रिता सूर्यो ज्योतिश्चरति चित्रमायुधं ॥ तमभ्रेण वृष्ट्या गूहथो
दिवि पर्जन्य द्रप्सा मधुमंत ईरते ॥ रथं युंजते मरुतः शुभे सुखं शूरो न मित्राव
रुणा गविष्टिषु ॥ रजांसि चित्रा विचरंति तन्यवो दिवः सम्राजा पयसा न उक्ष

तं॥ वाचं सुमि त्रा वरुणाचिरावतीं पर्जन्यश्चित्रां वदति त्विषीमतीं॥ अभ्रा
वसत मरुतः सुमायया द्यां वर्षयतमरुणामरेपसं॥ धर्मणा मित्रावरुणा वि
पश्चिता व्रता रक्षेथे ऽ असुरस्य मायया॥ ऋतेन विश्वं भुवनं विराजथः सूर्यमा
धत्थो दिवि चित्र्यं रथं॥१॥ वरुणं वो रिशादसमृचा मित्रं हवाम हे॥ परि व्रजेव
बाह्वोर्जगन्वांसा स्वर्णरं॥ ता बाहवा सुचेतुना प्रयंतमस्मा अर्चते॥ शेवं हि जा
र्यं वां विश्वासु क्षासु जोगुवे॥ यन्नूनमश्यां गतिं [illegible]त्रस्य यायां पथा॥ अस्य प्रि
यस्य शर्मण्यहिंसानस्य सश्चिरे॥ युवाभ्यां मित्रावरुणोपमं धेयामृचा॥
यद्ध क्षये मघोनां स्तोतॄणां च स्पूर्धसे॥ आ नो मित्र सुदीतिभिर्वरुणश्च सध
स्थ आ॥ स्वे क्षये मघोनां सखीनां च वृधसे॥ युवं नो येषु वरुण क्षत्रं बृहच्च बि
भृथः॥ उरु णो वाजसातये कृतं राये स्वस्तये॥ उच्छंत्यां मे यजता देवक्षत्रे रुशद्ग
वि॥ सुतं सोमं न हस्तिभिरा पड्भिर्धावतं नरा बिभ्रतावर्चनानसं॥२॥ यश्चिके
त स सुक्रतुर्देवत्रा स ब्रवीतु नः॥ वरुणो यस्य दर्शतो मित्रो वा वनते गिरः।

ताहिश्रेष्ठवर्चसाराजानादीर्घश्रुत्तमा॥तासत्पतीऋतावृधऋतावानाजने वा
जने॥तावामियानोवसेपूर्वाउपब्रुवेसचा॥स्वश्वासःसुचेतुनावाजाँअभिप्र
दावने॥मित्रोअंहोश्चिदादुरुक्षयायगातुंवनते॥मित्रस्यहिप्रतूर्वतःसुमतिर
स्तिविधतः॥वयंमित्रस्यावसिस्यामसप्रथस्तमे॥अनेहसस्त्वोतयःसत्राव
रुणशेषसः॥युवंमित्रेमंजनंयतथःसंचनयथः॥मामघोनःपरिख्यतंमोअ
स्माकमृषीणांगोपीथेनउरुष्यतं॥३॥आचिकितानसुक्रतूदेवौमर्तरिशाद
सा॥वरुणायऋतपेशसेदधीतप्रयसेमहे॥ताहिक्षत्रमविह्रुतंसम्यगसुर्य१
माशाते॥अधव्रतेवमानुषंस्व१र्णधायिदर्शतं॥तावामेषेरथामुर्वींगव्यूतिमे ना
षां॥रातहव्यस्यसुष्टुतिंदधृक्स्तोमैर्मनामहे॥अधाहिकाव्यायुवंदक्षस्यपू
र्भिरद्भुता॥निकेतुनाजनानांचिकेथेपूतदक्षसा॥तदृतंपृथिविबृहच्छ्रवएष
ऋषीणां॥जयसानावरंपृथ्वतिक्षरंतियामभिः॥आयद्वामीयचक्षसामि

त्रवयंचसूरयः॥ व्यचिष्ठेबहुपाय्येयतेमहिस्वराज्ये॥४॥ बळित्थादेवनिष्कृतमा
दित्यायजतंबृहत्॥ वरुणामित्रार्यमन्वर्षिष्ठंक्षत्रमाशाथे॥ आयद्योनिंहिरण्ययं
वरुणमित्रसदथः॥ धर्तारासचर्षणीनांयंतंसुम्नंरिशादसा॥ विश्वेहिविश्ववेद
सोवरुणोमित्रोअर्यमा॥ व्रतापदेवसश्चिरेपांतिमर्त्यंरिषः॥ तेहिसत्याऋतस्पृ
शऋतावानोजनेजने॥ सुनीथासःसुदानवोंहोश्चिदुरुचक्रयः॥ कोनुवांमि
त्रास्तुतोवरुणोवातनूनां॥ तत्सुवामेषतेमतिरत्रिभ्यएषतेमतिः॥५॥ प्रवोमित्रा
यगायतवरुणायविपागिरा॥ महिक्षत्रावृतंबृहत्॥ सम्राजायाघृतयोनीमि
त्रश्चोभावरुणश्च॥ देवादेवेषुप्रशस्ता॥ तानःशक्तंपार्थिवस्यमहोरायोदि
व्यस्य॥ महिवांक्षत्रंदेवेषु॥ ऋतमृतेनसपंतेषिरंदक्षमाशाते॥ अद्रुहादेवौव
र्धेते॥ वृष्टिद्यावारीत्यापेषस्पतीदानुमत्याः॥ बृहंतंगर्त्तमाशाते॥६॥ त्रीरोच
नावरुणत्रींरुतद्यूंत्रीणिमित्रधारयथोरजांसि॥ वावृधानावमतिंक्षत्रियस्या

नुव्रतंरक्षमाणावजुर्यं ।। इरावतीर्वरुणधेनवोवांमधुमद्वांसिंधवोमित्रदुह्रे ।।
त्रयस्तस्थुर्वृषभासस्तिसृणांधिषणानांरेतोधाविद्युमंतः ।। प्रातर्देवीमदितिंजो
हवीमिमध्यंदिनउदितासूर्यस्य ।। रायेमित्रावरुणासर्वतातेळेतोकायतनया
यशंयोः ।। याधर्तारारजसोरोचनस्योतादित्यादिव्यापार्थिवस्य ।। नवांदे
वाअमृताआमिनंतिव्रतानिमित्रावरुणाध्रुवाणि ।। ७ ।। पुरूरुणाचिद्ध्यस्त्य
वोनूनंवांवरुण ।। मित्रवंसिवांसुमतिं ।। तावांसम्यगद्रुह्वाणेषमश्यामधायसे ।।
वयंतेरुद्रास्याम ।। पातंनोरुद्रापायुभिरुतत्रायेथांसुत्रात्रा ।। तुर्यामदस्यूं
तनूभिः ।। माकस्याद्भुतक्रतूयक्षंभुजेमातनूभिः ।। माशेषसामातनसा ।। ८ ।। आ
नोगंतंरिशादसावरुणमित्रबर्हणा ।। उपेमंचारुमध्वरं ।। विश्वस्यहिप्रचेतसा
वरुणमित्रराजथः ।। ईशानापिप्यतंधियः ।। उपनःसुतमागतंवरुणमित्र
दाशुषः ।। अस्यसोमस्यपीतये ।। २ ।। आमित्रेवरुणेवयंगीर्भिर्जुहुमोअत्रिवत् ।।

निर्बर्हिषि सदतं सोमपीतये ॥ अतेन स्त्रोधृ वह्ले माध्यमेणायालय ऽ ऊ जना ॥ निर्बर्हि
षि ॥ मित्रश्च नो वरुणश्च जुषेतां यज्ञमिष्टये ॥ निर्बर्हिषि सदतां सोमपीतये ॥७॥
यद घ स्थः परावति यदर्वावत्यश्विना ॥ यद्वा पुरू पुरुभुजा यदंतरिक्ष आ गतं ॥
इहत्य पुरुभूतमा पुरू दंसांसि बिभ्रता ॥ वरस्याया म्यध्रिगू हुवे तुविष्टमा भुजे ॥
ईर्मान्यद्वपुषे वपुश्चक्रं रथस्य येमथुः ॥ पर्यन्या नाहुषा युगा मह्ना रजांसि दीयथः ॥
तद्वृषु वामेना कृतं विश्वा यद्वामनु ष्टवे ॥ नाना जाता वरेपसा समस्मे बंधुमेयथुः ॥
आ यद्वां सूर्या रथं ति [illegible] ष्ठद्रघुष्यदं सदा ॥ परि वामरुषा वयो घृणा वरंत आत
पः ॥११॥ युवोरत्रिश्चिकेतति नरा सुम्नेन चेतसा ॥ घर्मं यद्वामरेपसं नासत्या
स्ना भुरण्यति ॥ उग्रो वां ककुहो ययिः शृण्वे यामेषु संतनिः ॥ यद्वां दंसेभिरश्वि
ना त्रिर्नरा ववर्तति ॥ मध्व ऊ षु मधुयुवा रुद्रा सिषक्ति पिप्युषी ॥ यत्समुद्राति
पर्षथः पक्वाः पृक्षो भरंत वां ॥ सत्यमिद्वा उ अश्विना युवामाहुर्मयोभुवा ॥

तायामन्यामहूतमायामन्नामृळयत्तमा ॥ इमाब्रह्माणिवर्धनाश्विभ्यांसंतु
शंतमा ॥ यातक्षामरथाँइवावोचामबृहन्नमः ॥ १२ ॥ कूष्ठोदेवावश्विनाद्यादि
वोमनावसू ॥ तच्छ्रवथोवृषण्वसूअत्रिर्वामाविवासति ॥ कुहत्याकुहनुश्रुता
दिविदेवानासत्या ॥ कस्मिन्नायतथोजने कोवांनदीनांसचा ॥ कंयाथः
कंहगच्छथः कमच्छायुंजाथेरथं ॥ कस्यब्रह्माणिरण्यथोवयंवामुश्मसीष्टये ॥
पौरंचिद्ध्युदप्रुतंपौरपौरायजिन्वथः ॥ यदींगृभीततातयेसिंहमिवद्रुहस्प
दे ॥ प्रच्यवानाज्जुजुरुषोवव्रिमत्कंनमुंचथः ॥ युवायदीकृथःपुनराकाममृण्वे
वध्वः ॥ १३ ॥ अस्तिहिवामिहस्तोतास्मसिवांसंदृशिश्रिये ॥ नूश्रुतंमआगत
मवोभिर्वाजिनीवसू ॥ कोवामद्यपुरूणामावव्नेमर्त्यानां ॥ कोविप्रोविप्रवाहसा
कोयज्ञैर्वाजिनीवसू ॥ आवांरथोरथानांयेष्ठोयात्वश्विना ॥ पुरुचिदस्मयुस्ति
रआंगूषोमर्त्येष्वा ॥ शमूषुवांमधूयुवास्माकमस्तुचर्कृतिः ॥ अर्वाचीना

विचेतसाविप्रिश्येनेवदीयुतं॥अश्विनायद्धकर्हिचिच्छुश्रूयातमिमंहवं॥
वस्वीरूषुवांभुजंःपृंचंतिसुवांपृचः॥१४॥प्रलिभ्रियतमंरथंवृषणंवसुवाहनं॥
स्तोतावामश्विनांवृषि स्तोमेनप्रतिभूषतिमाध्वीममश्रुतंहवं॥अत्यायात
मश्विनातिरोविश्वाअहंसना॥दस्राहिरण्यवर्तनीसुषुम्नासिंधुवाहसामा
ध्वीमम०॥आनोरत्नानिबिभ्रतावश्विनागच्छतंयुवं॥रुद्राहिरण्यवर्तनीजु
षाणावाजिनीवसूमध्वी०॥सुष्टुभोवांवृषण्वसूरथेवाणीच्याहिता॥उत
वांककुहोमृगःपृक्षःकृणोतिवापुषोमाध्वी०बोधिन्मनसारथ्येषिराह
वनश्रुता॥विभिश्च्यवानमश्विनानियाथोअद्वयाविनंमध्वी०१५॥आ
वांनरोमनोयुजोश्वासःप्रुषितप्सवः॥वयोवहंतुपीतयेसहसुम्नेभिरश्वि
नामाध्वी०॥अश्विनावेहगच्छतंनासत्यामाविवेनतं॥तिरश्चिदर्ययापरिव
र्तिर्यातमदाभ्यामाध्वी०अस्मिन्यज्ञेअदाभ्याजरितारंशुभस्पती॥

अवस्युमश्विनायुवंगृणंतमुपभूषथोमाध्वी॥०॥अभूदुषारुशत्पशुराग्निर
धाय्यृत्वियः॥अयोजिवांवृषण्वसूरथोदस्रावमर्त्योमाध्वी॥०॥१६॥आभात्य
ग्निरुषसामनीकमुद्विप्राणांदेवयावाचोअस्थुः॥अर्वांचानूनंरथ्येहयातं
पीपिवांसमश्विनाघर्ममच्छ॥नसंस्कृतंप्रमिमीतोगमिष्ठांतिनूनमश्विनोप
स्तुतेह॥दिवाभिपित्वेवसागमिष्ठाप्रत्यवर्त्तिंदाशुषेशंभविष्ठा॥उतायातं
संगवेप्रातरह्नोमध्यंदिनउदितासूर्यस्य॥दिवानक्तमवसाशंतमेननेदा
नींपीतिरश्विनाततान॥इदंहिवांप्रदिविस्थानमोक[illegible]इमेगृहाअश्विनेदं
दुरोणं॥आनो[illegible]दिवोबृह
तःपर्वतादाद्भ्योयातमिषमूर्जंवहंता॥समश्विनोरवसानूतनेनमयोभुवा
सुप्रणीतीगमेम॥आनोरयिंवहतमोतवीरानाविश्वान्यमृतासौभगानि॥
॥१७॥प्रातर्यावाणाप्रथमायजध्वंपुरागृध्राददरुषःपिबातः॥प्रातर्हिय

ज्ञमश्विना दधाते प्रशंसंति क॰वयः पूर्वभाजः॥ प्रातर्यजध्वमश्विना हि
नोत न सायमस्ति देवया॰ अजुष्टं॥ उतान्यो अस्मद्यजते विचावः पूर्वःऽ पूर्वो
यजमानो वनीयान्॥ हिरण्यत्वङ्मधुवर्णो घृतस्नुः पृक्षो वहन्ना रथो वर्तते वां
॥ मनोजवा॰ अश्विना वातरंहा येनातियाथो दुरितानि विश्वा॥ यो भूयिष्ठं ना
सत्याभ्यां विवेष चनिष्ठं पित्वो ररते विभागे॥ स तोकमस्य पीपरच्छमीभिरनू
र्ध्वभासः सदमित्तुतुर्यात्॥ समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती
गमेम॥ आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि॥ १८॥ अश्वि
नावेह गच्छतं नासत्या मा वि वेनतं॥ हंसाविव पततमा सुताँ उप॥ अश्विना
हरिणाविव गौराविवानु यवसं॥ हंसाविव पततमा॰॥ अश्विना वाजिनीव
सू जुषेथां यज्ञमिष्टये॥ हंसाविव॰॥ अत्रिर्यद्वामवरोहन्नृबीसमजोहवीन्नाधमा
नेव योषा॥ श्येनस्य चिज्जवसा नूतनेनागच्छतमश्विना शंतमेन॥ १९॥

ध्विजिहीष्ववनस्पतेयोनिः सूष्यंत्याइव॥श्रुतंमेअश्विनाहवंसप्तवध्रिंचमुंच
तं॥भीतायनाधमानायऋषयेसप्तवध्रये॥मायाभिरश्विनायुवंवृक्षंसंचवि
चाचथः॥यथावातः पुष्करिणींसमिंगयतिसर्वतः॥एवातेगर्भएजतुनिरैतुद
शमास्यः॥यथावातोयथावनंयथासमुद्रएजति॥एवात्वंदशमास्यसहावेहि
जरायुणा॥दशमासाञ्छशयानःकुमारोअधिमातरि॥निरैतुजीवोअक्षतो
जीवोजीवंत्याअधि॥२०॥महेनोअद्यबोधयोषोरायेदिवित्मती॥यथाचि
न्नोअबोधयःसत्यश्रवसिवाय्येसुजातेअश्वसूनृते॥यासुनीथेशौचद्रथेव्यौ
छोदुहितर्दिवः॥साव्युच्छसहीयसिसत्यश्रवसि०॥सानोअद्याभरद्वसुर्व्युच्छा
दुहितर्दिवः॥योव्योच्छःसहीयसिसत्यश्र०॥अभियेत्वाविभावरिस्तोमैर्गृणंति
वह्नयः॥मघैर्मघोनिसुश्रियोदामन्वंतः सुरातयः सुजातेअश्वसूनृते॥य
च्चिद्धितेगणाइमेछदयंतिमघत्तये॥परिचिद्वष्टयोदधुर्ददतोराधोअह्रयंसु

जाते॥०॥२१॥ ऐषुधावीरवद्यशउषोमघोनिसूरिषु॥ येनोराधांस्यह्रयाम
घवानोअरासतसुजातेअश्वसूनृते॥ तेभ्योद्युम्नंबृहद्यशउषोमघोन्यावह॥
येनोराधांस्यश्व्यागव्याभजंतसूरयःसुजाते०॥ उतनोगोमतीरिषआव
हादुहितर्दिवः॥ साकंसूर्यस्यरश्मिभिःशुक्रैःशोचद्भिरर्चिभिःसुजाते०॥
व्युछादुहितर्दिवोमाचिरंतनुथाऽपः॥ नेत्वास्तेनंयथारिपुंतपातिसूरोअ
र्चिषासुजाते०॥ एतावद्वेदुषस्त्वंभूयोवादातुमर्हसि॥ यास्तोतृभ्योविभाव
र्युछंतीनप्रमीयसेसुजाते०॥२२॥ द्युतद्यामानंबृहतीमृतेनऋतावरीम
रुणप्सुंविभातीं॥ देवीमुषसंस्वरावहंतीप्रतिविप्रासोमतिभिर्जरंते॥ एषाज
नंदर्शताबोधयंतीसुगान्पथःकृण्वतीयात्यग्रे॥ बृहद्रथाबृहतीविश्वमिन्व
न्वोषाज्योतिर्यछत्यग्रेअन्हां॥ एषागोभिररुणेभिर्युजानास्रेधंतीरयिम
प्रायुचक्रे॥ पथोरदंतीसुवितायदेवीपुरुष्टुताविश्ववाराविभाति॥ एषा

व्येनीभवतिद्विबर्हा आविष्कृण्वानातन्वंपुरस्तात्॥ ऋतस्यपंथामन्वेतिसा
धुप्रजानतीवनदिशोमिनाति॥ एषाशुभ्रानतन्वोविदानोर्ध्वेवस्नातीदृशये
नोअस्थात्॥ अपद्वेषोबाधमानातमांस्युषादिवोदुहिताज्योतिषागात्॥ एषा
स: प्रतीचीदुहितादिवोनॄन्योषेवभद्रानिरिणीतेअप्सः॥ व्यूर्ण्वतीदाशुषेवार्या
णिपुनर्ज्योतिर्युवतिःपूर्वथाकः॥ २०॥ युंजतेमनउतयुंजतेधियोविप्राविप्र
स्यबृहतोविपश्चितः॥ विहोत्रादधेवयुनाविदेकइन्महीदेवस्यसवितुः
परिष्टुतिः॥ विश्वारूपाणिप्रतिमुंचतेकविःप्रासावीद्भद्रंद्विपदेचतुष्पदे॥ विना
कमख्यत्सवितावरेण्योनुप्रयाणमुषसोविराजति॥ यस्यप्रयाणमन्वन्य
इद्ययुर्देवादेवस्यमहिमानमोजसा॥ यःपार्थिवानिविममेसएतशोरजां
सिदेवःसवितामहित्वना॥ उतयासिसवितस्त्रीणिरोचनोतसूर्यस्यर
श्मिभिःसमुच्यसि॥ उतरात्रीमुभयतःपरीयसउतमित्रोभवसिदेवध

मीभिः॥ उतेशिषेप्रसवस्यत्वमेकइदुतपूषाभवसिदेवयामभिः॥ उतेदंवि
श्वंभुवनंविराजसिश्यावाश्वस्तेसवितःस्तोममानशे॥२४॥ तत्सवितु
र्वृणीमहेवयंदेवस्यभोजनं॥ श्रेष्ठंसर्व~~सर्व~~धातमंतुरंभगस्यधीमहि॥
अस्यहिस्वयशस्तरंसवितुःकच्चनप्रियं॥ नमिनंतिस्वराज्यं॥ सहिरत्ना
निदाशुषेसुवातिसविताभगः॥ तंभागंचित्रमीमहे॥ अद्यानोदेवसवितः
प्रजावत्सावीःसौभगं॥ परादुष्वप्न्यंसुव॥ विश्वानिदेवसवितर्दुरितानिपरा
सुव॥ यद्भद्रंतन्नआसुव॥२५॥ अनागसोअदितयेदेवस्यसवितुःसवे॥
विश्वावामानिधीमहि॥ आविश्वदेवंसत्पतिंसूक्तैरद्यावृणीमहे॥ सत्यस
वंसवितारं॥ यइमेउभेअहनीपुरएत्यप्रयुच्छन्॥ स्वाधीर्देवःसविता॥ य
इमाविश्वाजातान्याश्रावयतिश्लोकेन॥ प्रचसुवातिसविता॥२६॥
अच्छावदतवसंगीर्भिराभिःस्तुहिपर्जन्यंनमसाविवास॥ कनिक्रदद्वृ

षभोजीरदानूरेतोदधात्योषधीषुगर्भं ॥ विवृक्षान्हंत्युतहंतिरक्षसोविश्वं
बिभायभुवनंमहावधात् ॥ उतानागाईषतेवृष्ण्यावतोयत्पर्जन्यःस्तनयहंति
दुष्कृतः ॥ रथीवकशयाश्वाँअभिक्षिपन्नाविर्दूतान्कृणुतेवर्ष्याँअह ॥ दूरा
त्सिंहस्यस्तनथाऽउदीरतेयत्पर्जन्यःकृणुतेवर्ष्यंनभः ॥ प्रवातावांतिपतयं
तिविद्युतउदोषधीर्जिहतेपिन्वतेस्वः ॥ इराविश्वस्मैभुवनायजायतेयत्पर्जे
न्यःपृथिवीरेतसावति ॥ यस्यव्रतेपृथिवीनन्नमीतियस्यव्रतेशफवज्जर्भु
रीति ॥ यस्यव्रतओषधीर्विश्वरूपाःसनःपर्जन्यमहिशर्मयच्छ ॥ ५ ॥ दिवो
नोवृष्टिंमरुतोररीध्वंप्रपिन्वतवृष्णोअश्वस्यधाराः ॥ अर्वाङेतेनस्तनयि
त्नुनेह्यपोनिषिंचन्नसुरःपितानः ॥ अभिक्रंदस्तनयगर्भमाधाउदन्वता
परिदीयारथेन ॥ दृतिंसुकर्षविषितंन्यंचंसमाभवंतूद्वतोनिपादाः ॥ महां
तंकोशमुदचानिषिंचस्यंदंतांकुल्याविषिताःपुरस्तात् ॥ घृतेनद्यावापृ

थिवीव्युंधिसुप्रपाणंभवत्वघ्न्याभ्यः॥यत्पर्जन्यकनिक्रदत्स्तनयंन्हंसिदु
ष्कृतः॥प्रतीदंविश्वंमोदतेयत्किंचपृथिव्याअधि॥अवर्षीर्वर्षमुदुषूगृभाया
कर्धन्वान्यत्येतवाउ॥अजीजनओषधीर्भोजनायकमुतप्रजाभ्योविदो
मनीषां॥२८॥बळित्थापर्वतानांखिद्रंबिभर्षिपृथिवि॥प्रयाभूमिंप्रवत्व
तिमह्नाजिनोषिमहिनि॥स्तोमासस्त्वाविचारिणिप्रतिष्टोभंत्यक्तुभिः॥प्र
यावाजंनहेषंतंपेरुमस्यस्यर्जुनि॥दृळ्हाचिद्यावनस्पतीन्क्ष्मयादर्धर्ष्यो
जसा॥यत्तेअभ्रस्यविद्युतोदिवोवर्षंतिवृष्टयः॥वर्षतुतेविभावरिदिवोऽ
अभ्रस्यविद्युतः॥रोहंतुसर्वबीजान्यवब्रह्मद्विषोजहि॥२९॥प्रसम्राजे
बृहदर्चागभीरंब्रह्मप्रियंवरुणायश्रुताय॥वियोजघानशमितेवचर्मो
पस्तिरेपृथिवींसूर्याय॥वनेषुव्य१ंतरिक्षंततानवाजमर्वत्सुपयउस्रि
यासु॥हृत्सुक्रतुंवरुणोअप्स्व१ग्निंदिविसूर्यमदधात्सोममद्रौ॥नीची

नबारंवरुणः कवंधंप्रससर्जरोदसीअंतरिक्षं ॥ तेनविश्वस्यभुवनस्यराजा
यवंनवृष्टिर्व्युनत्तिभूम ॥ उनत्तिभूमिंपृथिवीमुतद्यांयदादुग्धंवरुणोव
ष्ट्यादित् ॥ समभ्रेणवसतपर्वतासस्तविषीयंतः श्रथयंतवीराः ॥ इमामू
ष्वासुरस्यश्रुतस्यमहीमायांवरुणस्यप्रवोचं ॥ मानेनेवतस्थिवाँअंतरिक्षे
वियोममेपृथिवींसूर्येण ॥ २० ॥ इमामूनुकवितमस्यमायांमहींदेवस्यनकि
रादधर्ष ॥ एकंयदुद्नानपृणंत्येनीरासिंचंतीरवनयः समुद्रं ॥ अर्यम्यंवरुण
मित्र्यंवासखायंवासदमिद्भ्रातरंवा ॥ वेशंवानित्यंवरुणारणंवायत्सीमा
गश्चकृमाशिश्रथस्तत् ॥ कितवासोयद्रिरिपुर्नदीवियद्वाघासत्यमुतयन्न
विद्म ॥ सर्वाताविष्यशिथिरेवदेवाधातेस्यामवरुणप्रियासः ॥ २१ ॥ इंद्राग्नी
यमवथउभावाजेषुमर्त्यं ॥ दृळ्हाचित्सप्रभेदतिद्युम्नावाणीरिवत्रितः ॥
यापृतनासुदुष्टरायावाजेषुश्रवाय्या ॥ यापंचचर्षणीरभींद्राग्नीताह
वामहे ॥ तयोरिदमवच्छवस्तिग्मादिद्युन्मघोनोः ॥ प्रतिद्रुणागभस्त्योर्गवां

वृत्रघ्न एष ते ॥ ता वामेषे रथानामिंद्राग्नी हवामहे ॥ पती तुरस्य राधसो विद्वां
सा गिर्वणस्तमा ॥ ता वृधंता वनु द्यून्मर्ताय देवावदभा ॥ अर्हंता चित्पुरो दधे
शेव देवावर्वते ॥ एवेंद्राग्निभ्यामहावि हव्यं शूष्यं घृतं न पूतमद्रिभिः ॥ ता
सूरिषु श्रवो बृहद्रयिं गृणत्सु दिधृतमिषं गृणत्सु दिधृतं ॥ ३२ ॥ प्र वो महे मतयो
यंतु विष्णवे मरुत्वते गिरिजा एवयामरुत् ॥ प्र शर्द्धाय प्रयज्यवे सुखादये तवसे
भंददिष्टये धुनिव्रताय शवसे ॥ प्र ये जाता महिना ये च नु स्वयं प्र विद्मना ब्रुवत एव
यामरुत् ॥ क्रत्वा तद्वो मरुतो नाधृषे शवो दाना मह्ना तदेषामधृष्टासो नाद्रयः ॥
प्र ये दिवो बृहतः शृण्विरे गिरा सुशुक्वानः सुभ्व एवयामरुत् ॥ न येषामिरी सध
स्थ ईष्ट आँ अग्नयो न स्वविद्युतः प्र स्पंद्रासो धुनीनां ॥ स चक्रमे महतो निरुरुक्रमः
समानस्मात्सदस एवयामरुत् ॥ यदायुक्त त्मना स्वादधि ष्णुभिर्विष्पर्धसो वि
महसो जिगाति शेवृधो नृभिः ॥ स्वनो न वोऽमवान्रेजयद्वृषा त्वेषो ययिस्त

त्विषयेवयामरुत्॥ येनासहंतऋंजतस्वरोचिषः स्थारश्मानोहिरण्ययाःस्वा
युधासइष्मिणः॥५॥ अपारोवोमहिमावृद्धशवसस्त्वेषंशवोवत्वेवयामरु
त्॥ स्थातारोहिप्रसितौसंदृशिस्थनतेनउरुष्यतानिदः शुशुक्वांसोनाग्न
यः॥ तेरुद्रासःसुमखाअग्नयोयथातुविद्युम्नाअवंत्वेवयामरुत्॥ दीर्घंपृ
थुपप्रथेसद्मपार्थिवंयेषामज्मेष्वामहः शर्धांस्यद्भुतैनसां॥ अद्वेषोनोमरु
तोगातुमेतनश्रोताहवंजरितुरेवयामरुत्॥ विष्णोर्महःसमन्यवोयुयोत
नस्मद्रथ्योनदंसनापद्वेषांसिसनुतः॥ गंतानोयज्ञंयज्ञियाःसुशमिश्रो
ताहवमरक्षएवयामरुत्॥ ज्येष्ठासोनपर्वतासोव्योमनियूयंतस्यप्रचेत
सःस्यातदुर्धर्तवोनिदः॥ इतिमंडलं॥८७॥ त्वंह्यग्नेप्रथमोमनोतास्याधि
योअभवोदस्महोता॥ त्वंसींवृषन्नकृणोर्दुष्टरीतुसहोविश्वस्मैसहसेस

हध्यै॥अधाहोतान्यसीदोयजीयानिळस्पदइषयन्नीड्यःसन्॥तंत्वानरः
प्रथमंदेवयंतोमहोरायेचितयंतोअनुग्मन्॥वृतेवयंतंबहुभिर्वसव्यैस्त्वे
रयिंजागृवांसोअनुग्मन्॥रुशंतमग्निंदर्शतंबृहंतंवपावंतंविश्वहादीदि
वांसं॥पदंदेवस्यनमसाव्यंतःश्रवस्यवःश्रवआपन्नमृक्तं॥नामानिचि
द्दधिरेयज्ञियानिभद्रायांतेरणयंतसंदृष्टौ॥त्वांवर्धंतिक्षितयःपृथिव्यां
त्वांरायउभयासोजनानां॥त्वंत्रातातरणेचेत्योभूः।पितामातासदमिन्मा
नुषाणां॥२५॥सपर्येण्यःसप्रियोविक्ष्वग्निर्होतामंद्रोनिषसादायजी
यान्॥तंत्वावयंदमआदीदिवांसमुपज्ञुबाधोनमसासदेम॥तंत्वावयंसु
ध्योनव्यमग्नेसुम्नायवईमहेदेवयंतः॥त्वंविशोअनयोदीद्यानोदिवो
अग्नेबृहतारोचनेन॥विशांकविंविश्पतिंशश्वतीनांनितोशनंवृषभं र

चर्षणीनां॥ऋतीषणिमिषयंतंपावकंराजंतमग्निंयजतंरयीणां॥सोअग्न
ईजेशशमेचमर्त्तोयस्तआनट्समिधाहव्यदातिं॥यआहुतिंपरिवेदा
नमोभिर्विश्वेत्सवामादधतेत्वोतः॥अस्माउतेमहिमहेविधेमनमोभि
रग्नेसमिधोत हव्यैः॥वेदीसूनोसहसोगीर्भिरुक्थैरातेभद्रायांसुम
तौयतेम॥आयस्ततंथरोदसीविभासाश्रवोभिश्चश्रवस्य१स्तरुत्रः॥
बृहद्भिर्वाजैःस्थविरेभिरस्मेरेवद्भिरग्नेवितरंविभाहि॥नृवद्वसोसद
मिद्धेह्यस्मेभूरितोकायतनयायपश्वः॥पूर्वीरिषोबृहतीरारेअघाअस्मे
भद्रासौश्रवसानिसंतु॥पुरूण्यग्नेपुरुधात्वायावसूनिराजन्वसुता
तेअश्यां॥पुरूणिहित्वेपुरुवारसंत्यग्नेवसुविधतेराजनित्वे॥२६॥
इतिचतुर्थाष्टकेचतुर्थोध्यायः॥ॐ॥त्वंहिक्षैतवद्यशोग्नेमित्रोनप
त्यसे॥त्वंविचर्षणेश्रवोवसोपुष्टिंनपुष्यसि॥त्वांहिष्मा चर्षणयो

यज्ञेभिर्गीर्भिरीळते ।। त्वां वाजी यात्यवृको रजस्तूर्विश्वचर्षणिः ।। सजोषस्त्वा
दिवोनरोयज्ञस्यकेतुमिंधते ।। यद्धस्यमानुषोजनः सुम्नायुर्जुह्वे अध्वरे ।।
ऋधद्यस्तेसुदानवेधियामर्त्तः शशमते ।। ऊतीषबृहतोदिवोद्विषोअंहोन
तरति ।। समिधायस्तआहुतिंनिशितिंमर्त्योनशत् ।। वयावंतंसपुष्यति
क्षयमग्नेशतायुषं ।। ४ ।। त्वेषस्तेधूमऋण्वति दिविषंछुक्रआततः ।।
सूरोनहिद्युतात्वंकृपापावकरोचसे ।। अधाहिविक्ष्वीड्योसिप्रियोनोअ
तिथिः ।। रण्वः पुरीवजूर्यः सूनुर्नत्रययाय्यः ।। क्रत्वाहिद्रोणेअज्यसेग्नेवा
जीनकृत्व्यः ।। परिज्मेवस्वधागयोत्योनह्वार्यः शिशुः ।। त्वंत्याचिदच्युता
ग्नेपशुर्नयवसे ।। धामाहयत्तेअजरवनावृश्चंतिशिक्वसः ।। वेषिह्यध्व
रीयतामग्नेहोतादमेविशां ।। समृधोविश्पतेकृणुजुषस्वहव्यमंगि
रः ।। अच्छानोमित्रमहोदेवदेवानग्नेवोचः सुमतिंरोदस्योः ।। वीहि

स्वस्तिंसुक्षितिंदिवोनॄँरिषोअंहांसिदुरितातरेमतातरेम[illegible]तवावसा २
तरेम॥२॥छ॥ॐअग्नेसक्षेषदृतपाऋतेजाउरुज्योतिर्नशतेदेवयुष्टे॥यं
त्वंमित्रेणवरुणःसजोषादेवपासित्यजसामर्तमंहः॥ईजेयज्ञेभिःशशमेश
मीभिरृधद्वारायाग्नयेददाश॥एवाचनतंयशसामजुष्टिर्नांहोमर्तंनश
तेनप्रदृप्तिः॥सूरोनयस्यदृशतिररेपाभीमायदेतिशुचतस्तआधीः॥हे
षस्वतःशुरुधोनायमक्तोःकुत्राचिद्रण्वोवसतिर्वनेजाः॥तिग्मंचिदेम
महिवर्पोअस्यभसदश्वोनयमसानआसा॥विजेहमानःपरशुर्नजिह्वांद्र
विर्नद्रावयतिदारुधक्षत्॥सइदस्तेवप्रतिधादसिष्यंछिशीततेजोऽयसो
नधारां॥चित्रध्रजतिररतिर्योअक्तोर्वेर्नद्रुषद्वारघुपत्मजंहाः॥२५
सईंरेभोनप्रतिवस्तउस्राःशोचिषारारपीतिमित्रमहाः॥नक्तंयईम
रुषोयोदिवानॄन्नमर्त्योअरुषोयोदिवानॄन्॥दिवोनयस्यविधतोन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वानोद्वृषारुक्षओषधीषुनूनोत्॥ घृणानयोध्रजसापत्मनायन्नारोद
सीवसुनादंसुपत्नी॥ धायोभिर्वायोयुज्येभिरर्कैर्विद्युन्नदविद्योत्स्वेभिः
शुष्मैः॥ शर्धोवायोमरुतांततक्षऋभुर्नत्वेषोरभसानोअद्यौत्॥८॥ यथा
होतर्मनुषोदेवतातायज्ञेभिः सूनोसहसोयजासि॥ एवानोअद्यसमना
समानानुशन्नग्नउशतोयक्षिदेवान्॥ सनोविभावाचक्षणिर्नवस्तोर
ग्निर्वंदारुवेद्यश्चनोधात्॥ विश्वायुर्योअमृतोमर्त्येषूषर्भुद्भूदतिथिर्जात
वेदाः॥ द्यावानयस्यपनयंत्यभ्वंभासांसिवस्तेसूर्योनशुक्रः॥ वियइ
नोत्यजरःपावकोश्नस्यचिच्छिश्नथत्पूर्व्याणि॥ वद्माहिसूनोअस्यद्मस
द्वाचक्रेअग्निर्जनुषाज्मान्नं॥ सत्वंनऊर्जसनऊर्जंधाराजेवजेरवृकेक्षेष्यं
तः॥ नितिक्तियोवारणमन्नमत्तिवायुर्नराष्ट्यत्येत्यक्तून्॥ तुर्यामयस्त
आदिशामरातीरत्योनह्रुतःपततःपरिह्रुत्॥५॥ आसूर्योनभानुमद्भि

रकैरग्नेततंथरोदसीविभासा॥चित्रोनयत्परितमांस्यक्तःशोचिषापत्मन्नौ
शिजोनदीयन्॥त्वंहिमंद्रतममर्कशोकैर्ववृमहेमहिनःश्रोष्यग्ने॥इंद्रंनत्वा
शवसादेवतावायुंपृणंतिराधसानृतमाः॥नूनोअग्नेवृकेभिःस्वस्तिवेषिरा
यःपथिभिःपर्ष्यंहः॥तासूरिभ्योगृणतेरासिसुम्नंमदेमशतहिमाःसुवीराः॥६
हुवेवःसूनुंसहसोयुवानमद्रोघवाचंमतिभिर्यविष्ठं॥यइन्वतिद्रविणानिप्र
चेताविश्ववाराणिपुरुवारोअध्रुक्॥त्वेवसूनिपुर्वणीकहोतर्दोषावस्तो
रेरिरेयज्ञियासः॥क्षामेवविश्वाभुवनानियस्मिन्त्संसौभगानिदधिरेपावके॥
त्वंविक्षुप्रदिवःसीदआसुक्रत्वारथीरभवोवार्याणां॥अतइनोषिविधतेचि
कित्वोव्यानुषग्जातवेदोवसूनि॥योनःसनुत्योअभिदासदग्नेयोअंतरो
मित्रमहोवनुष्यात्॥तमजरेभिर्वृषभिस्तवस्वैस्तपातपिष्ठतपसातप
स्वान्॥यस्तेयज्ञेनसमिधायउक्थैरर्केभिःसूनोसहसोददाशत्॥१

समर्त्येष्वमृतप्रचेताराया द्युम्नेन श्रवसा विभाति ॥ सत[illegible]त्कृधीषितस्तू
यमग्नेस्पृधोबाधस्वसहसासहस्वान् ॥ यच्छस्यसेद्युभिरक्तोवचोभिस्त
ज्जुषस्वजरितुर्घोषिमन्म ॥ अश्यामतंकाममग्नेतवोतीअश्यामरयिंरयिवः
सुवीरं ॥ अश्यामवाजमभिवाजयंतोश्यामद्युम्नमजराजरंते ॥ ७ ॥ प्रनव्यसा
सहसःसूनुमच्छायज्ञेनगातुमवइच्छमानः ॥ वृश्चद्वनंकृष्णयामंरुशंतंवीतीहोता
रंदिव्यंजिगाति ॥ सश्वितानस्तन्यतूरोचनस्थाअजरेभिर्नानदद्भिर्यविष्ठः ॥
यःपावकःपुरुतमःपुरूणिपृथून्यग्निरनुयातिभर्वन् ॥ विते[illegible]विष्वग्वातजूता
सोअग्नेभामासःशुचेशुचयश्चरंति ॥ तुविम्रक्षासोदिव्यानवग्वाव
नावनंतिधृषतारुजंतः ॥ येतेशुक्रासःशुचयःशुचिष्मःक्षांवपंतिविषि
तासोअश्वाः ॥ अधभ्रमस्तउर्वियाविभातियातयमानोअधिसानुपृ
श्नेः ॥ अधजिह्वापापतीतिप्रवृष्णोगोषुयुधोनाशनिःसृजाना ॥ शूरस्ये

वप्रसितिःक्षातिरग्नेर्दुर्वर्तुर्भीमोदयतेवनानि।।आभानुनापार्थिवानिज्रयांसि
महस्तोदस्यधृषताततंथः।।सबाधस्त्वापभयासहोभिःस्पृधोवनुष्यन्वनुषो
निजूर्व।।सचित्रचित्रंचितयंतमस्मेचित्रक्षत्रचित्रतमंवयोधां।।चंद्रंरयिंपुरुवी
रंबृहंतंचंद्रचंद्राभिर्गृणतेयुवस्व।।८।।मूर्धानंदिवोअरतिंपृथिव्यावैश्वानर
मृतआजातमग्निं।।कविंसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाः।।
नाभिंयज्ञानांसदनंरयीणांमहामहावमभिसंनवंत।।वैश्वानरंरथ्यमध्व
राणांयज्ञस्यकेतुंजनयंतदेवाः।।त्वद्विप्रोजायतेवाज्यग्नेत्वद्वीरासोअभिमा
तिषाहः।।वैश्वानरत्वमस्मासुधेहिवसूनिराजन्स्पृहयाय्याणि।।त्वांविश्वे
अमृतजायमानंशिशुंनदेवाअभिसंनवंते।।तवक्रतुभिरमृतत्वमायन्वैश्वानर
यत्पित्रोरदीदेः।।वैश्वानरतवतानिव्रतानिमहान्यग्नेनकिरादधर्ष।।यज्जा
यमानःपित्रोरुपस्थेविंदःकेतुंवयुनेष्वन्हां।।वैश्वानरस्यविमितानिचक्षसा

सानूनिदिवोअमृतस्यकेतुना॥तस्येदुविश्वाभुवनाधिमूर्धनिवयाइवरुरुहः
सप्तविस्रुहः॥वियोरजांस्यमिमीतसुक्रतुर्वैश्वानरोविदिवोरोचनाकविः॥परि
योविश्वाभुवनानिपप्रथेदब्धोगोपाअमृतस्यरक्षिता॥२॥पृक्षस्यवृष्णोअ
रुषस्यनूसहः।प्रनुवोचंविदथाजातवेदसः॥वैश्वानरायमतिर्नव्यसीशुचिः
सोमइवपवतेचारुरग्नये॥सजायमानःपरमेव्योमनिव्रतान्यग्निर्व्रतपाअर
क्षत॥व्यं१तरिक्षममिमीतसुक्रतुर्वैश्वानरोमहिनानाकमस्पृशत्॥व्यस्त
भ्नाद्रोदसीमित्रोअद्भुतोंतर्वावदकृणोज्ज्योतिषातमः॥विचर्मणीवधिष
णेअवर्तयद्वैश्वानरोविश्वमधत्तवृष्ण्यं॥अपामुपस्थेमहिषाअगृभ्णत
विशोराजानमुपतस्थुर्ऋग्मियं॥आहूतोअग्निमभरद्विवस्वतोवैश्वानरं
मातरिश्वापरावतः॥युगेयुगेविदथ्यंगृणद्भ्योग्नेरयिंयशसंधेहिनव्ये

सं॥ पथ्ये वराजन्न घत्रां समजरनी चाजिरं श्वयनि नं नलेजसा॥ अस्माकम
ग्ने मघवत्सु धारयानामि क्षत्रमजरं सुवीर्यं॥ वयं जयेम शतिनं सहस्त्रिणं वै
श्वानर वाजमग्ने तवोतिभिः॥ अदब्धेभिस्तव गोपाभिरिष्टे स्माकं पाहि त्रिषध
स्थ सूरीन्॥ रक्षा च नो ददुषां शर्धो अग्ने वैश्वानर प्र च तारीः स्तवानः॥ ७॥
अहश्च कृष्णमहरर्जुनं चो वि वर्त्तेते रजसी वेद्याभिः॥ वैश्वानरो जायमानो न रा
जावातिरज्ज्योतिषाग्निस्तमांसि॥ नाहं तंतुं न वि जानाम्योतुं न यं वयंति सम
रेतमानाः॥ कस्य स्वित्पुत्र इह वक्त्वान्यृतुथा वदाति॥ य ईं चिकेतदमृतस्य
गोपा अवश्चरन्परो अन्येन पश्यन्॥ अयं होता प्रथमः पश्यतेममिदं ज्यो
रमृतं मर्त्येषु॥ अयं स जज्ञे ध्रुव आ निषत्तोमर्त्यस्तन्वा वर्द्धमानः॥ ध्रुवं ज्यो
तिर्निहितं दृशये कं मनो जविष्ठं पतयत्स्वंतः॥ विश्वे देवाः समनसः सके
ता एकं क्रतुमभि वि यंति साधु॥ वि मे कर्णा पतयतो वि चक्षुर्वीदं ज्योतिर्हृ
नि परो वदात्यवरेण पित्रा॥ स इत्तंतुं स वि जानात्योतुं स वक्त्वा ×५ शोध

८५

दय आहितंयत्।। विमेमनश्चरतिदूरआधीः किंस्विद्वक्ष्यामिकिमूनुमनि
ष्ये।। विश्वेदेवाऽअनमस्यन्भियानास्त्वामग्नेतमसितस्थिवांसं।। वैश्वान
रोवतूतयेनोमर्त्योवतूतयेनः।।१२।।पुरोवोमंद्रंदिव्यंसुवृक्तिंप्रयतियज्ञेअ
ग्निमध्वरेदधिध्वं।।पुरउक्थेभिःसहिनोविभावास्वध्वराकरतिजातवेदाः।।
तमुद्युमःपुर्वणीकहोतरग्नेअग्निभिर्मनुषइधानः।।स्तोमंयमस्मैममतेव
शूषंघृतंनशुचिमतयःपवंते।।पीपायसःश्रवसामर्त्येषुयोअग्नयेददाश
विप्रउक्थैः।।चित्राभिस्तमूतिभिश्चित्रशोचिर्व्रजस्यसातागोमतोदधाति।
आयःपप्रौजायमानउर्वीदूरेदृशाभासाकृष्णाध्वा।।अधबहुचित्तमऊर्म्या
यास्तिरःशोचिषाददृशेपावकः।।नूनश्चित्रंपुरुवाजाभिरूतीअग्नेरयिं
मघवद्भ्यश्चधेहि।।येराधसाश्रवसाचात्यन्यान्सुवीर्येभिश्चाभिसंतिज
नान्।।इमंयज्ञंचनोधाअग्नेउशन्यंतआसानोजुहुतेहविष्मान्।।भरद्वा

जेषुदधिषेसुवृक्तिमवीर्वाजस्यगध्यस्यसातौ ॥६॥ विद्वेषांसीनुहिवर्द्धयेळां
मदेमशतहिमाःसुवीराः ॥७॥१०॥ यजस्वहोतरिषितोयजीयानग्नेबाधोमरुतां
नप्रयुक्ति ॥ आनोमित्रावरुणानासत्याद्यावाहोत्रायपृथिवीववृत्याः ॥
त्वंहोतामंद्रतमोनोअध्रुगंतर्देवोविदथामर्त्येषु ॥ पावकयाजुह्वावह्नि
रासाग्नेयजस्वतन्वं१तवस्वां ॥ धन्याचिद्धित्वेधिषणावष्टिप्रदेवांजन्मगृ
णतेयजध्यै ॥ वेपिष्ठोअंगिरसांयद्धविप्रोमधुच्छंदोभनतिरेभइष्टौ ॥ अ
दिद्युतत्स्वपाकोविभावाग्नेयजस्वरोदसीउरूची ॥ आयुंनयंनमसारातह
व्याऽअंजंतिसुप्रयसंपंचजनाः ॥ वृंजेहयंनमसाबर्हिरग्नावयामिस्रुग्
घृतवतीसुवृक्तिः ॥ अम्यक्षिसद्मसदनेपृथिव्याअश्रायियज्ञःसूर्येन
चक्षुः ॥ दशस्यानःपुर्वणीकहोतर्देवेभिरग्नेअग्निभिरिधानः ॥ रायः
सूनोसहसोवावसानाऽअतिस्रसेमवृजनंनांहः ॥६॥११॥ मध्येहोतादुरोणे

बर्हिषोराळग्निस्तोदस्यरोदसीयजध्यै॥अयंससूनुःसहसऋतावादूरा
त्सूर्योनशोचिषाततान॥आयस्मिंत्वेस्वपाकेयजत्रयक्षद्राजंत्सर्वतातेव
नुद्यौः॥त्रिषधस्थस्ततरुषोनजंहोहव्यामघानिमानुषायजध्यै॥तेजिष्ठा
यस्यारतिर्वनेराट्तोदोअध्वंनवृधसानोअद्यौत्॥अद्रोघोनद्रविता
चेततित्मन्नमर्त्योवर्त्रओषधीषु॥सास्माकेभिरेतरीनशूषैरग्निष्टवेदम
आजातवेदाः॥द्रुन्नोवन्वंक्रत्वानार्वोस्रःपितेवजारयायियज्ञैः॥अधस्मा
स्यपनयंतिभासोवृथायत्तक्षदनुयातिपृथ्वीं॥सद्योयःस्यंद्रोविषितो
धवीयानृणोनतायुरतिधन्वाराट्॥सत्वंनोअर्वन्निदायाविश्वेभिरग्नेअ
ग्निभिरिधानः॥वेषिरायोवियासिदुछुनामदे॥१४॥त्वद्विश्वासुभग
सौभगान्यग्ने[illegible]वियंतिवनिनोनवयाः॥श्रुष्टीरयिर्वा

जोवृत्रतूर्येदिवोवृष्टिरीड्योरीतिरपां॥ त्वंभगोनआहिरत्नमिषेपरिज्मेव
क्षयसिदस्मवर्चाः॥ अग्नेमित्रोनबृहतऽऋतस्यासिक्षत्तावामस्यदेवभूरेः॥
ससत्पतिःशवसाहंतिवृत्रमग्नेविप्रोविपणोभर्त्तिवाजं॥ यंत्वंप्रचेतऽऋतजा
तरायासजोषानप्त्रापांहिनोषि॥ यस्तेसूनोसहसोगीर्भिरुक्थैर्यज्ञैर्मर्तोनि
शितिंवेद्यानट्॥ विश्वंसदेवप्रतिवारमग्नेधत्तेधान्यं१पत्यतेवसव्यैः॥ तान
भ्यआसौश्रवसासुवीराग्नेसूनोसहसःपुष्यसेधाः॥ कृणोषियच्छवसा
भूरिपश्वोवयोवृकायारयेजसुरये॥ वद्मासूनोसहसोनोविहायाअग्नेतो
कंतनयंवाजिनोदाः॥ विश्वाभिर्गीर्भिरभिपूर्तिमश्यांमदे॥ १५॥ अग्नायो
मर्त्योदुवोधियंजुजोषधीतिभिः॥ भसन्नुषप्रपूर्व्यऽइषंवुरीतावसे॥ अग्निरि
द्धिप्रचेताऽअग्निर्वेधस्तमऽऋषिः॥ अग्निंहोतारमीळतेयज्ञेषुमनुषोविशः
नानाह्य१ग्नेवसेस्पर्द्धंतेरायोऽअर्यः॥ तूर्वंदस्युमायवोव्रतैःसीक्षंतोअव्रतं॥
तो

अग्निरप्सामृतीषहंवीरंददातिसत्पतिं॥यस्यत्रसंतिशवसःसंचक्षिशत्रवोभि
या॥अग्निर्हिविद्मनानिदोदेवोमर्त्तमुरुष्यति॥सहावायस्यावृतोरयिर्वाजे
ष्ववृतः॥अच्छानोमित्रमहोदेवदेवानग्नेवोचःसुमतिंरोदस्योः॥वीहिस्वस्तिं ८
सुक्षितिंदिवोनॄन्द्विषोअंहांसिदुरितातरेमतातरेमतवावसातरेम॥१८॥
द्रमन्मवोषु॰अतिथिमुषर्बुधंविश्वासांविशांपतिमृंजसेगिरा॥वेतीद्दिवोजनुषाकच्चि
दाशुचिर्ज्योक्चिदत्तिगर्भोयदच्युतं॥मित्रंनयंसुधितंभृगवोदधुर्वनस्पतावीड्यमू
र्ध्वशोचिषं॥सत्वंसुप्रीतोवीतहव्योअद्भुतप्रशस्तिभिर्महयसेदिवेदिवे॥स
त्वंदक्षस्यावृकोवृधोभूरर्यःपरस्यांतरस्यतरुषः॥रायःसूनोसहसोमर्त्येष्वा
छर्दिर्यच्छवीतहव्यायसप्रथोभरद्वाजायसप्रथः॥द्युतानंवोअतिथिंस्वर्ण
रमग्निंहोतारंमनुषःस्वध्वरं॥विप्रंनद्युक्षवचसंसुवृक्तिभिर्हव्यवाहमरतिंदे
वमृंजसे॥पावकयायश्चितयंत्याकृपाक्षामन्रुरुचउषसोनभानुना॥तूर्वे

त्वया मन्द्रे तन्त्रास्यन्तरण ज्या यो घृणेन तत्तृषाणो अजरः॥१७॥ अग्निमग्निं वः स
मिधा दुवस्यत प्रियंप्रियं वो अतिथिं गृणीषणि॥ उप वो गीर्भिरमृतं विवासत देवो
देवेषु वनते हि वार्यं देवो देवेषु वनते हि नो दुवः॥ समिद्धमग्निं समिधा गिरा गृणे
शुचिं पावकं पुरो अध्वरे ध्रुवं॥ विप्रं होतारं पुरुवारमद्रुहं कविं सुम्नैरीमहे जातवे
दसं॥ त्वां दूतमग्ने अमृतं युगेयुगे हव्यवाहं दधिरे पायुमीड्यं॥ देवासश्च मर्तासश्च
जागृविं विभुं विश्पतिं नमसा नि षेदिरे॥ विभूषन्नग्न उभयाँ अनु व्रता दूतो दे
वानां रजसी समीयसे॥ यत्ते धीतिं सुमतिमावृणीमहे ध स्मा नस्त्रिवरूथः शि
वो भव॥ तं सुप्रतीकं सुदृशं स्वंचमविद्वांसो विदुष्टरं सपेम॥ स यक्षद्विश्वा वयु
नानि विद्वान्प्र हव्यमग्निरमृतेषु वोचति॥ १८ ॥ तमग्ने पास्युत तं पिपर्षि यस्त
आनट् कवये शूर धीतिं॥ यज्ञस्य वा निशितिं वोदितिं वा तमित्पृणक्षि शवसो
त राया॥ त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात्॥ सं त्वा ध्वस्मन्व

दःध्येतुपायःसंरेयिस्यहयाय्यःसहस्री॥अग्निर्हौतागृहपतिःसराजाविश्वा
वेदजनिमाजातवेदाः॥देवानामुतयोमर्त्यानांयजिष्ठःसप्रयजतामृतावा॥अ
ग्नेयदद्यविशोअध्वरस्यहोतःपावकशोचेवेष्ट्वंहियज्वा॥ऋतायजासि
महिनावियद्भूर्हव्यावहयविष्ठयातेअद्य॥अभिप्रयांसिसुधितानिहिख्यो॥नि
त्वादधीतरोदसीयजध्यै॥अवानोमघवन्वाजसातावग्नेविश्वानिदुरिता
तरेम॥१९॥अग्नेविश्वेभिःस्वनीकदेवैरूर्णावंतं प्रथमःसीदयोनिं॥कु
लायिनंघृतवंतंसवित्रेयज्ञंनययजमानायसाधु॥इममुत्यमथर्ववदग्निं
मंथंतिवेधसः॥यमंकूयंतमानयंनमूरंश्याव्याभ्यः॥जनिष्वादेववीतये
सर्वतातास्वस्तये॥आदेवान्वक्ष्यमृतां॥ऋतावृधोयज्ञंदेवेषुपिस्पृशः॥
वयमुत्वागृहपतेजनानामग्नेअकर्मसमिधाबृहंतं॥अस्थूरिनोगार्हपत्या
निसंतुतिग्मेननस्तेजसासंशिशाधि॥२०॥त्वमग्नेयज्ञानांहोताविश्वेषां

हितः ॥ देवेभिर्मानुषेजने ॥ सनोमंद्राभिरध्वरे जिह्वाभिर्यजामहः ॥ आदेवान्व
क्षियक्षिच ॥ वेत्थाहिवेधोऽअध्वनः पथश्चदेवांजसा ॥ अग्नेयज्ञेषुसुक्रतो ॥
त्वामीळेअधद्विताभरतोवाजिभिःशुनं ॥ ईजेयज्ञेषुयज्ञियं ॥ त्वमिमावार्यापुरु
दिवोदासायसुन्वते ॥ भरद्वाजायदाशुषे ॥ २१ ॥ त्वंदूतोऽअमर्त्यआवहादैव्यं
जनं ॥ शृण्वन्विप्रस्यसुष्टुतिं ॥ त्वामग्नेस्वाध्योऽमर्त्तासोदेववीतये ॥ यज्ञेषुदे
वमीळते ॥ तवप्रयक्षिसंदृशमुतक्रतुंसुदानवः ॥ विश्वेजुषंतकामिनः ॥ त्वंहो
तामनुर्हितोवह्निरासाविदुष्टरः ॥ अग्नेयक्षिदिवोविशः ॥ अग्नऽआयाहिवी
तयेगृणानोहव्यदातये ॥ निहोतासत्सिबर्हिषि ॥ २२ ॥ तंत्वासमिद्भिरंगिरो
घृतेनवर्द्धयामसि ॥ बृहच्छोचायविष्ठ्य ॥ सनःपृथुश्रवाय्यमच्छादेवविवास
सि ॥ बृहदग्नेसुवीर्यं ॥ त्वामग्नेपुष्करादध्यथर्वानिरमंथत ॥ मूर्ध्नोविश्वस्यवा
घतः ॥ तमुत्वादध्यङ्ङृषिःपुत्रईधेअथर्वणः ॥ वृत्रहणंपुरंदरं ॥ तमुत्वापा

थ्यो वृषा समीधे दस्युहंतमं।। धनंजयं रणेरणे।।२३।। एह्यू षु ब्रवाणि तेग्न इत्थे
तराग्गिरः।। एभिर्वर्द्धास इंदुभिः।। यत्र क्व च ते मनो दक्षं दधस उत्तरं।। तत्रा सदः कृ
णवसे।। नहि ते पूर्तमक्षिपद्भुवन्नेमनां वसो।। अथा दुवो वनवसे।। आग्निरगा
मि भारतो वृत्रहा पुरुचेतनः।। दिवोदासस्य सत्पतिः।। सहि विश्वाति पार्थिवा र
यिं दाशन्महित्वना।। वन्वन्नवातो अस्तृतः।।२४।। सप्रत्नवन्नवीयसाग्ने द्यु
म्नेन संयता।। बृहत्ततंथ भानुना।। प्रवः सखायो अग्नये स्तोमं यज्ञं च धृष्णु
या।। अर्च गाय च वेधसे।। सहि यो मानुषा युगा सीदद्धोता कविक्रतुः।। दूतश्च ह
व्यवाहनः।। ता राजाना शुचिव्रतादित्यान्मारुतं गणं।। वसो यक्षीह रोदसी।
वस्वी ते अग्ने संदृष्टिरिषयते मर्त्याय।। ऊर्जो नपादमृतस्य।।२५।। क्रत्वा दा अ
स्तु श्रेष्ठोद्य त्वा वन्वन्त्सुरेक्णाः।। मर्त आनाश सुवृक्तिं।। ते ते अग्ने त्वोता इष
यंतो विश्वमायुः।। तरंतो अर्यो अरातीर्वन्वंतो अर्यो अरातीः।। अग्निस्तिग्मे

नशोचिषायासद्विश्वंन्या१त्रिणं॥अग्निर्नोवनतेरयिं॥सुवीरंस्वपमाभर
जातवेदोविचर्षणे॥जहिरक्षांसिसुक्रतो॥त्वंनःपाह्यंहसोजातवेदोअघा
यतः॥रक्षाणोब्रह्मणस्क[illegible]वे॥[illegible]॥योनोअग्नेदुरेवआमर्तोवधायदाश
ति॥तस्मान्नःपाह्यंहसः॥त्वंतंदेवजिह्वयापरिबाधस्वदुष्कृतं॥मर्तोयोनो
जिघांसति॥भरद्वाजायसप्रथःशर्मयच्छसहंत्य॥अग्नेवरेण्यंवसु॥अ
ग्निर्वृत्राणिजंघनद्द्रविणस्युर्विपन्यया॥समिद्धःशुक्रआहुतः॥गर्भेमातुः
पितुष्पिताविदिद्युतानोअक्षरे॥सीदन्नृतस्ययोनिमा॥२७॥ब्रह्मप्रजाव
दाभरजातवेदोविचर्षणे॥अग्ने~~संसृज्महेगिरः~~॥यद्दीदयद्दिवि॥उपत्वा
रण्वसंदृशंप्रयस्वंतःसहस्कृत॥अग्नेससृज्महेगिरः॥उपच्छायामिवघृ
णेरगन्मशर्मतेवयं॥अग्नेहिरण्यसंदृशः॥यउग्रइवशर्यहा॥तिग्मशृंगो

२
५०

न वंसगः ॥ अग्ने पुरो रुरोजिथ ॥ आ यं हस्ते न खादिनं शिशुं जातं न बिभ्रति
विशामग्निं स्वध्वरं ॥ २८ ॥ प्र देवं देववीतये भरता वसुवित्तमं ॥ आ स्वे योनौ नि
षीदतु ॥ आ जातं जातवेदसि प्रियं शिशीतातिथिं ॥ स्योन आ गृहपतिं ॥ अग्ने
युक्ष्वा हि ये तवाश्वासो देव साधवः ॥ अरं वहंति मन्यवे ॥ अच्छा नो याह्या वहा
भि प्रयांसि वीतये ॥ आ देवान्त्सोमपीतये ॥ उदग्ने भारत द्युमदजस्रेण दविद्यु
तत् ॥ शोचा वि भाह्यजर ॥ २९ ॥ वीती यो देवं मर्तो दुवस्येदग्निमीळीता
ध्वरे हविष्मान् ॥ होतारं सत्ययजं रोदस्योरुत्तानहस्तो नमसा विवासेत् ॥
आ ते अग्न ऋचा हविर्हृदा तष्टं भरामसि ॥ ते ते भवंतूक्षण ऋषभासो वशा
उत ॥ अग्निं देवासो अग्नियमिंधते वृत्रहंतमं ॥ येना वसून्याभृता तृळ्हा र
क्षांसि वाजिना ॥ ३० ॥ इति चतुर्थाष्टके पंचमोऽध्यायः ॥ ५९ ॥ ५९ ॥

ॐ भूरा पिबासोममभियमुग्रतर्दऊर्वंगव्यंमहिगृणानइंद्र॥ वियोधृष्णोवधि
षोवज्रहस्तविश्वावृत्रममित्रियाशवोभिः॥ सईंपाहियऋजीषीतरुत्रोयःशि
प्रवान्वृषभोयोमतीनां॥ योगोत्रभिद्वज्रभृद्योहरिष्ठाःसइंद्रचित्रांअभितृंधि
वाजान्॥ एवापाहिप्रत्नथामंदतुत्वाश्रुधिब्रह्मवावृधस्वोतगीर्भिः॥ आविःसू
र्यंकृणुहिपीपिहीषोजहिशत्रूंरभिगाइंद्रतृंधि॥ तेत्वामदाबृहदिंद्रस्वधावइमे
पीताउक्षयंतद्युमंतं॥ महामनूनंतवसंविभूतिंमत्सरासोजर्हृषंतप्रसाहं॥
येभिःसूर्यमुषसंमंदसानोवासयोपदृळ्हानिदर्द्रत्॥ महामद्रिंपरिगाइंद्र
संतंनुत्थाअच्युतंसदसस्परिस्वात्॥ २१॥ तवक्रत्वातवतद्दंसनाभिरामासुप
क्वंशच्यानिदीधः॥ और्णोर्दुरउस्रियाभ्योविदृळ्होदूर्वाद्गाअसृजोअंगिर
स्वान्॥ पप्राथक्षांमहिदंसोव्यु१र्वीमुपद्यामृष्वोबृहदिंद्रस्तभायः॥ अधा
रयोरोदसीदेवपुत्रेप्रत्नेमातरायह्वीऋतस्य॥ अधत्वाविश्वेपुरइंद्रदेवाएकं

तवसंदधिरेभराय॥अदेवोयदभ्यौहिष्टदेवान्त्स्वर्षातावृणतइंद्रमत्र॥अधद्यौश्चि
त्तेअपसानुवज्राद्द्वितानमद्भियसास्वस्यमन्योः॥अहिंयदिंद्रोअभ्योहसानंनिचि
द्विश्वायुः शयथेजघान॥अधत्वष्टातेमहउग्रवज्रंसहस्रभृष्टिंववृतच्छताश्रिं॥
निकाममरमणसंयेननवंतमहिंसंपिणगृजीषिन्॥१०॥वर्धान्यंविश्वेमरुतःस
जोषाःपचच्छतंमहिषाँइंद्रतुभ्यं॥पूषाविष्णुस्त्रीणिसरांसिधावन्वृत्रहणंम
रमंशुमस्मै॥आक्षोदोमहिवृतंनदीनांपरिष्ठितमसृजऊर्मिमपां॥तासामनु
प्रवतइंद्रपंथांप्रार्दयोनीचीरपसःसमुद्रं॥एवाताविश्वाचकृवांसमिंद्रंमहामुग्रम
जुर्यंसहोदां॥सुवीरंत्वास्वायुधंसुवज्रमाब्रह्मनव्यमवसेववृत्यात्॥सनोवा
जायश्रवसइषेचरायेधेहिद्युमतइंद्रविप्रान्॥भरद्वाजेनृवतइंद्रसूरीन्दिवि
चस्मैधिपार्येनइंद्र॥अयावाजंदेवहितंसनेममदेमशतहिमाःसुवीराः॥१५॥
तमुष्टुहि योअभिभूत्योजावन्वन्नवातःपुरुहूतइंद्रः॥अषाळ्हमुग्रंसह

मानमाभिगीर्भिर्वर्धवृषभंचर्षणीनां॥ सयुध्मःसत्वाखजकृत्समद्वातु
विम्रक्षोनदनुमांऋजीषी॥ बृहद्रेणुश्च्यवनोमानुषीणामेकःकृष्टीनामभव
३८ त्सहावा॥ त्वंहनुत्यददमायोदस्यूंरेकःकृष्टीरवनोरार्याय॥ अस्तिस्विन्नु
वीर्यंतत्तइंद्रनस्विदस्तितदृतुथाविवोचः॥ सदिद्धितेतुविजातस्यमन्ये
सहःसहिष्ठतुरतस्तुरस्य॥ उग्रमुग्रस्यतवसस्तवीयोरध्रस्यरध्रतुरो
बभूव॥ तन्नःप्रत्नंसख्यमस्तुयुष्मेइत्थावदद्भिर्वलमंगिरोभिः॥ हन्न
च्युतच्युद्दस्मेषयंतमृणोःपुरोविदुरोअस्यविश्वाः॥४॥ सहिधीभिर्ह
व्योअस्त्युग्रईशानकृन्महतिवृत्रतूर्ये॥ सतोकसातातनयेसवज्रीवितंत
साय्योअभवत्समत्सु॥ समज्मनाजनिममानुषाणाममर्त्येननाम्ना
तिप्रसर्स्रे॥ सद्युम्नेनसशवसोतरायासवीर्येणनृतमःसमोकाः॥

सयोनमुहेनमिथूजनोभू[illegible]सुमंतुनामाचुमुरिंधुनिंच॥ वृणक्पिप्रुंशं
बरंशु[illegible]ष्णमिंद्रः पुरांच्यौत्नायशयथायनूचित्॥ उदावतात्वक्षसापन्य
[illegible]चवृत्रहत्यायरथमिंद्रतिष्ठ॥ धिष्ववज्रंहस्तआदक्षिणत्राभिप्रमंद
पुरुदत्रमायाः॥ अग्निर्नशुष्कंवनमिंद्रहेतीरक्षोनिधक्ष्यशनिर्नभीमा॥
गंभीरयऋष्वयायोरुरोजाध्वानयद्दुरितादंभयच्च॥५॥ आसहस्रंप
थिभिरिंद्ररायातुविद्युम्नतुविवाजेभिरर्वाक्॥ याहिसूनोसहसोयस्य
नूचिददेवईशेपुरुहूतयोतोः॥ प्रतुविद्युम्नस्यस्थविरस्यघृष्वेर्दिवोररप्शे
महिमापृथिव्याः॥ नास्यशत्रुर्नप्रतिमानमस्तिनप्रतिष्ठिःपुरुमायस्य
सह्योः॥ प्रतत्तेअद्याकरणंकृतंभूत्कुत्संयदायुमतिथिग्वमस्मै॥ पुरूस
हस्रानिशिशा॥ अभिक्षामुतूर्वयाणंधृषतानिनेथ॥ अनुत्वाहिघ्ने

अधदेवदेवामदन्विश्वेकवितमंकवीनां ।। करोयत्रवरिवोबाधिता
यद्दिवेजनायतन्वेगृणानः ।। अनुद्यावापृथिवीतत्तओजोमर्त्याजिहत
इंद्रदेवाः ।। कृष्वाकृत्नोअकृतंयत्तेअस्त्यु[illegible]ंनवीयोजनयस्वयज्ञैः ।। क्थं
।।१५।। महाँइंद्रोनृवदाचर्षणिप्राउतद्विबर्हाअमिनः सहोभिः ।। अस्म
द्र्यग्वावृधेवीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् ।। इंद्रमेवधिषणासात
येधाद्बृहंतमृष्वमजरंयुवानं ।। अषाळ्हेनशवसाशूशुवांसंसद्यश्चिद्यो
वावृधेअसामि ।। पृथूकरस्नाबहुलागभस्तीअस्मद्र्य१क्संमिमीहि
श्रवांसि ।। यूथेवपश्वः पशुपादमूनाः अस्माँइंद्राभ्याववृत्स्वाजौ ।। तं
वइंद्रंचतिनमस्यशाकैरिहनूनंवाजयंतोहुवेम ।। यथाचित्पूर्वेजरिता
रआसुरनेद्याअनवद्याअरिष्टाः ।। धृतव्रतोधनदाः सोमवृद्धः

५३

सहि वामस्य वसुनः पुरुक्षुः ॥ सं जग्मिरे पथ्य३ रायो अस्मिन्त्समुद्रेण सिं
धवो यादमानाः ॥ ५ ॥ शविष्ठं न आ भर शूर शव ओजिष्ठमोजो अभिभू
त उग्रं ॥ विश्वा द्युम्ना वृष्ण्या मानुषाणामस्मभ्यं दा हरिवो मादयध्यै ॥
यस्ते मदः पृतनाषाळमृध्र३ इंद्र तन्न३ आ भर शूशुवांसं ॥ येन तोकस्य
तनयस्य सातौ मंसीमहि जिगीवांसस्त्वोताः ॥ आ नो भर वृषणं शुष्ममिं
द्र धनस्पृतं शूशुवांसं सुदक्षं ॥ येन वंसाम पृतनासु शत्रूंतवोतिभि
रुत जामीरजामीन् ॥ आ ते शुष्मो वृषभ एतु पश्चादोत्तरादधरादा पुर
स्तात् ॥ आ विश्वतो अभि समेत्वर्वाङिंद्र द्युम्नं स्वर्वद्धेह्यस्मे ॥ नृवत्त
इंद्र नृतमाभिरूती वंसीमहि वामं श्रोमतेभिः ॥ ईक्षे हि वस्व३ उभयस्य
राजन्धा रत्नं महि स्थूरं बृहंतं ॥ मरुत्वंतं वृषभं वावृधानमकवारिं दि

घ्नंत्रुणासमिद्धं॥विश्वासाहमवसेनूतनायोग्रंसहोदामिहतंहुवेम॥जनंव
ज्रिन्महिचिन्मन्यमानमेभ्योनृभ्योरंधयायेष्वस्मि॥अधाहित्वापृथिव्यां
शूरसातौहवामहेतनयेगोष्वप्सु॥वयंतऽएभिःपुरुहूतसख्यैःशत्रोः
शत्रोरुत्तरइत्स्याम॥घ्नंतोवृत्राण्युभयानिशूररायामदेमबृहतात्वो
ताः॥८॥द्यौर्नयऽइंद्राभिभूमार्यस्तस्थौरयिःशवसापृत्सुजनान्॥
तंनःसहस्रभरमुर्वरासांदद्धिसूनोसहसोवृत्रतुरं॥दिवोनतुभ्यम
न्विंद्रसत्रासुर्यंदेवेभिर्धायिविश्वं॥अहिंयद्वृत्रमपोवव्रिवांसंहन्नृजी
षिन्विष्णुनासचानः॥तूर्वन्नोजीयांतवसस्तवीयान्कृतब्रह्मेंद्रोवृद्धम
हाः॥राजाभवन्मधुनःसोम्यस्यविश्वासांयत्पुरांदर्त्नुमावत्॥शतैर
पद्रन्पणयइंद्रात्रदशोणयेकवयेऽर्कसातौ॥वधैःशुष्णस्याशुषस्य

मायाःपित्वोनारिरेचीत्किंचनप्र॥महोद्रुहोअपविश्वायुधायिवज्रस्यय
त्पतनेपादिशुष्णः॥उरुषसरथंसारथयेकरिंद्रःकुत्सायसूर्यस्यसातौ
॥५॥प्रश्येनोनमदिरमंशुमस्मैशिरोदासस्यनमुचेर्मथायन्॥प्रावन्नमींसा
प्यंससंतंपृणग्रायासमिषासंस्वस्ति॥विपिप्रोरहिमायस्यदृळ्हाःपुरोव
ज्रिंछवसानदर्दः॥सुदामंतद्रेक्णोअप्रमृष्यमृजिश्वनेदात्रंदाशुषेदाः॥
सवेतसुंदशमायंदशोणिंतूतुजिमिंद्रःस्वभिष्टिसुम्नः॥आतुग्रंशश्वदिभंद्
द्योतनायमातुर्नसीमुपसृजाइयध्यै॥सईंस्पृधोवनतेअप्रतीतोबि
भ्रद्वज्रंवृत्रहणंगभस्तौ॥तिष्ठद्धरीअध्यस्तेवगर्तेवचोयुजावहतइंद्रमृ
ष्वं॥सनेमतेवसानव्यइंद्रप्रपूरवःस्तवंतएनायज्ञैः॥सप्तयत्पुरःशर्मशा
रदीर्दर्द्धन्दासीःपुरुकुत्सायशिक्षन्॥त्वंवृधइंद्रपूर्व्योभूर्वरिवस्यन्नु

रानेकाव्यायप॥परानववास्त्वमनुदेयंमहेपित्रेददा स्वन्नपातं॥त्वंधु
निरिंद्रधुनिमतीऋणोरपःसीरानस्त्रवंती॥प्रयत्समुद्रमतिशूरपर्षि
पारयातुर्वशंयदुंस्वस्ति॥तवहत्यदिंद्रविश्वमाजौसस्तोधुनीचुमुरीया
हसिष्वप॥दीदयेदित्तुभ्यंसोमेभिःसुन्वंदभीतिरिध्मभृतिःपक्थ्य१
र्कैः॥२०॥इमाउत्वापुरुतमस्यकारोर्हव्यंवीरहव्याहवंते॥धियोरथेष्ठा
मजरंनवीयोरयिर्विभूतिरीयतेवचस्या॥तमुस्तुष॰इंद्रंयोविदानोगिर्वा
हसंगीर्भिर्यज्ञवृद्धं॥यस्यदिवमतिमह्नापृथिव्याःपुरुमायस्यरिरिचेम
हित्वं॥सइत्तमोवयुनंततन्वत्सूर्येणवयुनवच्चकार॥कदातेमर्त्ताअम
तस्यधामेयक्षंतोनमिनंतिस्वधावः॥यस्ताचकारसकुहस्विदिंद्रःक
माऽजनंचरतिकासुविक्षु॥कस्तेयज्ञोमनसेशंवरायकोअर्कइंद्रक

तमः स होता॥ इदा हि ते वेविषतः पुराजाः प्रत्नास आसुः पुरुकृत्सखायः॥
ये मध्यमास उत नूतनास उतावमस्य पुरुहूत बोधि॥१२॥ तं पृच्छंतोऽवरा
सः पराणि प्रत्ना त इंद्र श्रुत्यानु येमुः॥ अर्चामसि वीर ब्रह्मवाहो यादेव विद्
म ता त्वा महांतं॥ अभि त्वा पाजो रक्षसो वि तस्थे महि जज्ञानमभि तत्सु
तिष्ठ॥ तव प्रत्नेन युज्येन सख्या वज्रेण धृष्णो अप ता नुदस्व॥ स तु श्रु
धींद्र नूतनस्य ब्रह्मण्यतो वीर कारुधायः॥ त्वं ह्यापिः प्रदिवि पितॄणां
शश्वद्बभूथ सुहव एष्टौ॥ प्रोतये वरुणं मित्रमिंद्रं मरुतः कृष्वावसे नो अ
द्य॥ प्र पूषणं विष्णुमग्निं पुरंधिं सवितारमोषधीः पर्वतांश्च॥ इम ऽउ
त्वा पुरुशाक प्रयज्यो जरितारोऽभ्यर्चंत्यर्कैः॥ श्रुधी हवमा हुवतो
हुवानो न त्वावाँ अन्योऽमृत त्वदस्ति॥ नू म आ वाचमुप याहि वि

द्वान्विश्वेभिः सूनो सहसो यजत्रैः॥ ये अग्निजिह्वा ऽ ऋतसाप ऽ आसुर्ये
मनुं चक्रुरुपरं दसाय॥ स नो बोधि पुरएता सुगेषूत दुर्गेषु पथिकृद्विदा
नः॥ ये ऽ अश्रमास उरवो वहिष्ठास्तेभिर्न ऽ इंद्राभि वक्षि वाजं॥ १२॥ य ऽ
एक इद्धव्यश्चर्षणीनामिंद्रं तं गीर्भिरभ्यर्च आभिः॥ यः पत्यते वृषभो वृ
ष्ण्यावान्सत्यः सत्वा पुरुमायः सहस्वान्॥ तमु नः पूर्वे पितरो नवग्वाः
सप्त विप्रासो ऽ अभि वाजयंतः॥ नक्षद्दाभं ततुरिं पर्वतेष्ठामद्रोघवाचं मति

म भिः शविष्ठं॥ तमीमह इंद्रमस्य रायः पुरुवीरस्य नृवतः पुरुक्षोः॥ यो अ
स्कृधोयुरजरः स्वर्वान्तमा भर हरिवो मादयध्यै॥ तन्नो वि वोचो यदि ते पुरा
चिज्जरितार आनशुः सुम्नमिंद्र कस्ते भागः किं वयो दुध्र खिद्वः पुरु
हूत पुरूवसो ऽसुरघ्नः॥ तं पृच्छंती वज्रहस्तं रथेष्ठामिंद्रं वेपी वक्करी य

स्य नू गीः ॥ तुवि ग्राभं तुवि कूर्मिं रभो दां गातु मिषे नक्षते तुम्र मच्छ ॥५॥
अया ह त्यं माय्या वावृधानं मनोजुवा स्वतवः पर्वतेन ॥ अच्युता चिद्वी
ळिता स्वोजो रुजो वि दृळ्हा धृषता विरप्शिन् ॥ तं वो धिया नव्यस्या
शविष्ठं प्रत्नं प्रत्नवत्परितंसयध्यै ॥ स नो वक्षदनिमानः सुवह्मेंद्रो
विश्वान्यति दुर्गहाणि ॥ आ जनाय द्रुह्वणे पार्थिवानि दिव्यानि दीप
योंतरिक्षा ॥ तपा वृषन्विश्वतः शोचिषा तान्ब्रह्मद्विषे शोचय
क्षामपश्च ॥ भुवो जनस्य दिव्यस्य राजा पार्थिवस्य जगतस्त्वेषसं
दृक् ॥ धिष्व वज्रं दक्षिण इंद्र हस्ते विश्वा अजुर्य दयसे वि मायाः ॥ आ
संयतमिंद्र णः स्वस्तिं शत्रुतूर्याय बृहतीममृध्रां ॥ यया दासान्या

यौणि च्यौत्ना करो वज्रिंत्सुतुका नाहुषाणि॥ स नो नियुद्भिः पुरुहूत वेधो वि
श्ववाराभिरा गहि प्रयज्यो॥ न या अदेवो वरते न देव आभिर्याहि तूय
मा मद्र्यद्रिक्॥५४॥ सुत इत्त्वं निमिश्ल इंद्र सोमे स्तोमे ब्रह्मणि शस्यमान
उक्थे॥ यद्वा युक्ताभ्यां मघवन्हरिभ्यां बिभ्रद्वज्रं बाह्वोरिंद्र यासि॥ य
द्वा दिवि पार्ये सुष्विमिंद्र वृत्रहत्येऽवसि शूरसातौ॥ यद्वा दक्षस्य
बिभ्युषो अबिभ्यदरंधयः शर्धत इंद्र दस्यून्॥ पाता सुतमिंद्रो अस्तु सो
मं प्रणेनीरुग्रो जरितारमूती॥ कर्ता वीराय सुष्वय उ लोकं दाता वसु स्तुव
ते कीरये चित्॥ गंतेयांति सवना हरिभ्यां बभ्रिर्वज्रं पपिः सोमं ददिर्गाः॥
कर्ता वीरं नर्यं सर्ववीरं श्रोता हवं गृणतः स्तोमवाहाः॥ अस्मै वयं यद्वावा
न तद्विविष्म इंद्राय यो नः प्रदिवो अपस्कः॥ सुते सोमे स्तुमसि शंसदु क्थं

द्रायब्रह्मवर्द्धनंयथासत्॥५॥ब्रह्माणिहिचकृषेवर्द्धनानितावत्तइंद्रमति
भिर्विविष्मः॥सुतेसोमेसुतपाःशंतमानिरांड्याक्रियास्मवक्षणानियज्ञैः॥सनो
बोधिपुरोळाशंरराणःपिबातुसोमंगोऋजीकमिंद्र॥एदंबर्हिर्यजमानस्यसी
दोरुंकृधित्वायतउलोकं॥समंदस्वाह्यनुजोषमुग्रप्रत्वायज्ञासइमेअश्नुवंतु॥
प्रेमेहवासःपुरुहूतमस्मेआत्वेयंधीरवसइंद्रयम्याः॥तंवःसखायःसंय
थासुतेषुसोमेभिरीपृणताभोजमिंद्रं॥कुवित्तस्माअसतिनोभरायनसु
ष्विमिंद्रोवसेमृधाति॥एवेदिंद्रःसुतेअस्तावि सोमेभरद्वाजेषुक्षयदिन्म
घोनः॥असद्यथाजरित्रउतसूरिरिंद्रोरायोविश्ववारस्यदाता॥१६॥
वृषामदइंद्रेश्लोकउक्थासचासोमेषुसुतपाऋजीषी॥अर्चत्र्योमघवा
नृभ्यउक्थैर्द्युक्षोराजागिरामक्षितोतिः॥ततुरिर्वीरोनर्योविचेताःश्रो

ताहवं गृणत उर्व्यूति:॥ वसु: शंसो नरां कारुधाया वाजी स्तुतो विदथे दा
ति वाजं॥ अक्षो न चक्र्यो: शूर बृहन्प्रते मह्ना रिरिचे रोदस्यो:॥ वृक्षस्य नु
ते पुरुहूत वया व्यूतयो रुरुहुरिंद्र पूर्वी:॥ शचीवतस्ते पुरुशाक शाका गा
वामिव स्रुतय: संचरणी:॥ वत्सानां न तंतयस्त इंद्र दामन्वंतो अदामान:
सुदामन्॥ अन्यदद्य कर्वरमन्यदु श्वोऽसच्च सन्मुहुराचक्रिरिंद्र:॥ मित्रो
नो अत्र वरुणश्च पूषार्यो वशस्य पर्येतास्ति॥ ५७॥ वि त्वदापो न पर्वतस्य
पृष्ठादुक्थेभिरिंद्रानयंत यज्ञै:॥ तं त्वाभि: सुष्टुतिभिर्वाजयंत आजिं न ज
ग्मुर्गिर्वाहो अश्वा:॥ न यं जरंति शरदो न मासा न द्याव इंद्रमवकर्शयंति॥
वृद्धस्य चिद्वर्धतामस्य तनू: स्तोमेभिरुक्थैश्च शस्यमाना॥ न वीळवे नमते न
स्थिराय न शर्धते दस्युजूताय स्तवान्॥ अज्रा इंद्रस्य गिरयश्चिदृष्वा गंभी

रेचिद्भवतिगाधमस्मै॥ गंभीरेणनउरुणामत्रिन्प्रेषोयंधिसुतपावन्वाजान्॥ स्था
ऊषुऊर्ध्वऊतीअरिषण्यन्नक्तोर्व्युष्टौपरितक्म्यायां॥ सचस्वनायमवसेअभीक
इतोवातमिंद्रपाहिरिषः॥ अमाचैनमरण्येपाहिरिषोमदेमशत०॥१८॥ या
तऊतिरवमायापरमायामध्यमेंद्रशुष्मिन्नस्ति॥ ताभिरूषुवृत्रहत्येवीर्न
एभिश्चवाजैर्महान्नउग्र॥ आभिस्पृधोमिथतीररिषण्यन्नमित्रस्यव्यथया
मन्युमिंद्र॥ आभिर्विश्वाअभियुजोविषूचीरार्यायविशोवतारीर्दासीः॥ इं
द्रजामयउतयेजामयोर्वाचीनासोवनुषोयुयुज्रे॥ त्वमेषांविथुराशवां
सिजहिवृष्ण्यानिकृणुहीपराचः॥ शूरोवाशूरंवनतेशरीरैस्तनूरुचात
रुषियत्कृण्वैते॥ तोकेवागोषुतनयेयदप्सुविक्रंदसीउर्वरासुब्रवैते॥ न
हित्वाशूरोनतुरोनधृष्णुर्नत्वायोधोमन्यमानोयुयोध॥ इंद्रनकिष्ट्वा

मत्यस्त्येषां विश्वा जातान्यभ्यसि तानि॥१९॥ सपत्यउतेभयोर्नृम्णमयो
यदी वेधसः समिथे हवंते। वृत्रे वा महो नृवति क्षये वा व्यचस्वंता यदि वि
तंतसैते॥ अधस्मा ते चर्षणयो यदेजानिंद्र त्रातोत भवा वरूता॥ अ
स्माकासो ये नृतमासो अर्य॰ इंद्र सूरयो दधिरे पुरो नः। अनु ते दायि म
ह इंद्रियाय सत्रा ते विश्वमनु वृत्रहत्ये॥ अनु क्षत्रमनु सहो यजत्रेंद्र देवेभि
रनु ते नृषह्ये॥ एवा नः स्पृधः समजा समत्स्विंद्र रारंधि मिथतीरदेवीः॥
विद्याम वस्तोरवसा गृणंतो भरद्वाजा उत त इंद्र नूनं॥२०॥४॥ श्रुधी न
इंद्र ह्वयामसि त्वा महो वाजस्य सातौ वावृषाणाः॥ संयद्विशोयंत शूर
रसाता उग्रं नो वः पार्ये अहं दाः॥ त्वां वाजी हवते वाजिनेयो महो वा

त्रस्यगव्यस्यसातौ॥ त्वांवृत्रेष्विंद्रसत्पतिंतरुत्रंत्वांचष्टेमुष्टि[illegible]हा
गोषुयुध्यन्॥ त्वंकविंचोदयोर्कसातौत्वंकुत्सायशुष्णंदाशुषेवर्क्॥ त्व
ञ्छिरोअमर्मणःपराहन्नतिथिग्वायशंस्यंकरिष्यन्॥ त्वंरथंप्रभरोयोध
मृष्वमावोयुध्यंतंवृषभंदशद्युं॥ त्वंतुग्रंवेतसवे[illegible]सचाहंत्वंतुजिंगृणंतं
मिंद्रतूतोः॥ त्वंतदुक्थमिंद्रब[illegible]र्हणाकः प्रयच्छता
सहस्राशूरदर्षि॥ अवगिरेर्दासंशंबरंहन्प्रावोदिवोदासंचित्राभि
रूती॥२१॥५॥ त्वंश्रद्धाभिर्मंदसानः सोमैर्दभीतयेचुमुरिमिंद्रसिष्वप्॥
त्वंरजिंपिठीनसेदशस्यन्षष्टिंसहस्राशच्यासचाहन्॥ अहंचनतत्सू
रिभिरानश्यांतवज्यायइंद्रसुम्नमोजः॥ त्वयायत्स्तवंतेसधवीरवीरा
स्त्रिवरूथेननहुषाशविष्ठ॥ वयंतेअस्यामिंद्रद्युम्नहूतौसखायः

स्याममहिनप्रेष्ठाः॥प्रातर्दनिःक्षत्रश्रीरस्तुश्रेष्ठोघनेवृत्राणांसनये
धनानां॥२२॥३ किमस्यमदेकिम्वस्यपीताविंद्रःकिमस्यसख्ये
चकार॥रणावायेनिषदिकिंतेअस्यपुराविविद्रेकिमुनूतनासः॥
सदस्यमदेसद्वस्यपीताविंद्रःसदस्यसख्येचकार॥रणावायेनिष
दिसत्तेअस्यपुराविविद्रेसदुनूतनासः॥नहिनुतेमहिमनःसमस्य
नमघवंन्मघवत्वस्यविद्म॥नराधसोराधसोनूतनस्येंद्रनकि
र्ददृशइंद्रियंते॥एतत्यत्तइंद्रियमचेतियेनावधीर्वरशिखस्यशेषः॥
वज्रस्ययत्तेनिहतस्यशुष्मात्स्वनाच्चिदिंद्रपरमोददार॥वधीदिं
द्रोवरशिखस्यशेषोभ्यावर्तिनेचायमानायशिक्षन्॥वृचीवतो
यद्धरियूपीयायांहन्पूर्वेअर्द्धेभियसापरोदर्त्॥२३॥त्रिंशच्छतंव

र्मिण[illegible]द्रसाकं यव्यावत्यांपुरुहूतश्रवस्या॥वृचीवंतःशरवेपत्य
मानाःपात्राभिंदानान्यर्थान्यायन्॥यस्यगावावरुषासूयवस्यूअंत
रूषुचरतोरेरिहाणा॥सस्रंजयायतुर्वशंपरादाद्वृचीवतोदेववाताय
शिक्षन्॥द्वयाँअग्नेरथिनोविंशतिंगावधूमतोमघवामह्यंसम्राट्॥
अभ्यावर्तीचायमानोददातिदूणाशेयंदक्षिणापार्थवानां॥२७॥२
आगावोअग्मन्नुतभद्रमक्रंसीदंतुगोष्ठेरणयंत्वस्मे॥प्रजावतीःपुरु
रूपाइहस्युरिंद्रायपूर्वीरुषसोदुहानाः॥इंद्रोयज्वनेपृणतेच[illegible]क्षत्य
पेद्ददातिनस्वंमुषायति॥भूयोभूयोरयिमिदस्यवर्धयन्नभिन्नेखि
ल्येनिदधातिदेवयुं॥नतानशंतिनदभातितस्करोनासामामित्रो
व्यथिरादधर्षति॥देवांश्चयाभिर्यजतेददातिचज्योगित्ताभिःस
चतेगोपतिःसह॥नताअर्वारेणुककाटोअश्नुतेनसंस्कृतत्रमुप

यंतिताअभिा।उरुगायमभयंतस्यताअनुगावोमर्तस्यविचरंतियज्वनः॥
गावोभगोगावइंद्रोमेअछान्गावःसोमस्यप्रथमस्यभक्षः॥इमायागा
वःसजनासइंद्रइछामीहृदामनसाचिदिंद्रं॥ ॥यूयंगावोवोमेदयथा
कृशंचिदश्रीरंचित्कृणुथासुप्रतीकं॥भद्रंगृहंकृणुथभद्रवाचोबृहद्वो
वयउच्यतेसभासु॥प्रजावतीःसूयवसंरिशंतीःशुद्धाअपःसुप्रपाणे
पिबंतीः॥मावःस्तेनईशतमाघशंसःपरिवोहेतीरुद्रस्यवृज्याः॥
उपेदमुपपर्चनमासुगोषूपपृच्यतां॥उपऋषभस्यरेतस्युपें[illegible]तववी
र्ये॥२५॥८॥इतिचतुर्थकांडेषष्ठोध्यायः॥ ॥छ॥इं इं॥ओम्रा॥इंद्रंवो
नरःसख्यायसेपुर्महोयंतःसुमतयेचकानाः॥महोहिदातावज्र
हस्तोअस्तिमहामुरंण्वमवसेयजध्वं॥आयस्मिन्हस्तेनर्योमि

मिक्षुरारथेहिरण्ययेरथेष्ठाः॥आरश्मयोगभस्त्योःस्थूरयोराध्वंन्नश्वासोवृष
णोयुजानाः॥श्रियेतेपादादुवआमिमिक्षुर्धृष्णुर्वज्रीशवसादक्षिणावान्॥वसानो
अत्कंसुरभिंदृशेकंस्व१र्णनृतविषिरोबभूथ॥ससोमआमिश्लतमःसुतोभूद्य
स्मिन्पक्तिःपच्यतेसंतिधानाः॥इंद्रंनरःस्तुवंतोब्रह्मकारउक्थाशंसंतोदेववात
तमाः॥नतेअंतःशवसोधाय्यस्यविबाबधेरोदसीमहित्वा॥आतासूरिःपृण
तितूतुजानोयूथेवाप्सुसमीजमानऊती॥एवेदिंद्रःसुहवऋष्वोअस्तूती
अनूतीहिरिशिप्रःसत्वा॥एवाहिजातोअसमात्योजाःपुरूचवृत्राह
नतिनिदस्यून्॥१॥भूयइद्वावृधेवीर्यायँएकोअजुर्योदयतेवसूनि॥प्ररि
रिचेदिवइंद्रःपृथिव्याअर्धमिदस्यप्रतिरोदसीउभे॥अधामन्येबृह
दसुर्यमस्ययानिदाधारनकिरामिनाति॥दिवेदिवेसूर्योदर्शतोभूद्विस

आन्युर्वियां सुक्रतुर्धात् ॥ अधाऽचिन्नूऽचित्तदपोनदीनां यदाभ्यो अरदोगातु
मिंद्र॥ निपर्वता अद्मसदोनसेदुस्त्वयादृळ्हानिसुक्रतोरजाऽसि॥ सत्यमित्त
न्नत्वावां अन्यो अस्तींद्रदेवोनमर्त्योज्यायान्॥ अहन्नहिंपरिशयानमर्णोवा
सृजो अपो अच्छासमुद्रं॥ त्वमपोऽविदुरोऽविषूचीरिंद्रदृळ्हमरुजः पर्वतस्य॥
राजाभवोजगतश्चर्षणीनांसाकंसूर्यंजनयंद्यामुषासं॥२॥ अभूऽरेकोरयि
पतेरयीणामाहस्तयोऽधिथाइंद्रकृष्टीः॥ वितोके अप्सुतनयेचसूरेवोचंतच
र्षणयोऽविवाचः॥ त्वद्भियेंद्रपार्थिवानिऽविश्वाच्युताचिच्च्यावयंतेरजांसि॥
द्यावाक्षामापर्वतासोवनानिविश्वंदृळ्हंभयते अज्मन्नाते॥ त्वंकुत्सेना
भिशुष्णमिंद्राशुषंयुध्यकुयवंगविष्टौ॥ दशप्रपित्व अधसूर्यस्यमुषाय
श्चक्रमविवेरपांसि॥ त्वंशतान्यवशंबरस्यपुरोजघंथाप्रतीनिदस्योः॥

अशिक्षोयत्रशच्याशचीवोदिवोदासायसुन्वतेसुतक्रेभरद्वाजायगृणते
वसूनि॥ससत्यसत्वंमहतेरणायरथमातिष्ठतुविनृम्णभीमं॥याहिप्रप ६२
थिन्नवसोपमद्रिक्प्रचश्रुतश्रावयचर्षणिभ्यः॥२१॥अपूर्व्यापुरुतमां
न्यस्मैमहेवीरायतवसेतुराय॥विरप्शिनेवज्रिणेशंतमानिवचांस्या
सास्थविरायतक्षं॥समातरासूर्येणाकवीनामवासयद्रुजदद्रिंगृणा
नः॥स्वाधीभिर्ऋक्वभिर्वावशानउदुस्रियाणामसृजन्निदानं॥सव
ह्निभिर्ऋक्वभिर्गोषुशश्वन्मितज्ञुभिःपुरुकृत्वाजिगाय॥पुरःपुरोहा
सखिभिःसखीयंदृळ्हारुरोजकविभिःकविःसन्॥सनीव्याभिर्ज
रितारमच्छामहोवाजेभिर्महद्भिश्चशुष्मैः॥पुरुवीराभिर्वृषभक्षितीना
मागिर्वणःसुवितायप्रयाहि॥ससर्गेणशवसातक्तोअत्यैरपइंद्रो

दक्षिणतस्तुराषाट् ॥ इत्थासृजानाअनपावृदर्थंदिवेदिवेविविषुरप्रमृष्यं
॥ ॥ यओजिष्ठइंद्रतंसुनोदामदोवृषन्स्वभिष्टिर्दास्वान् ॥ सौवश्व्यंयोवन
वत्स्वश्वोवृत्रासमत्सुसासहदमित्रान् ॥ त्वांहींद्रावसेविवाचोहवंतेचर्ष
णयःशूरसातौ ॥ त्वंविप्रेभिर्विपणीँरशायस्त्वोतइत्सनितावाजमर्वा ॥
त्वंताँइंद्रोभयाँअमित्रांदासावृत्राण्यार्याचशूर ॥ वधीर्वनेवसुधितेभिरत्कै
रापृत्सुदर्षिनृणांनृतम ॥ सत्वंनइंद्राकवाभिरूतीसखाविश्वायुरविता
वृधेभूः ॥ स्वर्षातायद्ध्वयामसित्वायुध्यंतोनेमधितापृत्सुशूर ॥ नूनं
नइंद्रापरायचस्याभवामृळीकउतनोअभिष्टौ ॥ इत्थागृणंतोमहिनस्य
शर्मंदिविष्यामपार्येगोषतमाः ॥ ५ ॥ संचत्वेजग्मुर्गिरइंद्रपूर्वीर्विचत्वद्यं
तिविभ्वोमनीषाः ॥ पुरुगूर्तऋभ्वाँएकःपुरुप्रशस्तोअस्तियज्ञैः ॥ रथो
॥ पुरानूनंचस्तुतयऋषीणांपस्पृध्रइंद्रेअध्युक्थार्का ॥ पुरुहूतोयः

नमहेशवसेयुजानो ऽस्माभिरिंद्रो। अनुमाद्योभूत्॥ नयंहिंसंतिधीतयो
नवाणीरिंद्रंनक्षंतीदभिवर्धयंतीः॥ यदिस्तोतारःशतंयत्सहस्रंगृणंतिगिर्व
णसंशंतदस्मै॥ अस्माएतद्दिव्य१र्चेवमासा॥ मिमिक्षइंद्रेन्ययामिसो
मः॥ जनंनधन्वन्नभिसंयदापः सत्रावावृधुर्हवनानियज्ञैः॥ अस्माए
तन्मह्यांगूषमस्माइंद्रायस्तोत्रंमतिभिरवाचि। असद्यथामहतिवृ
त्रतूर्यइंद्रोविश्वायुरविताव्रधश्च ६॥ कदाभुवन्रथक्षयाणिब्रह्मकदा
स्तोत्रेसहस्रपोष्यंदाः॥ कदास्तोमंवासयोऽस्यराया॥ कदाधियःकरसिवाजरत्नाः॥
कर्हिस्वित्तदिंद्रयन्नृभिर्नॄन्वीरैर्वीरान्नीळयासेजयाजीन्॥ त्रिधातुगाअ
धिजयासिगोष्विंद्रद्युम्नंस्वर्वद्धेह्यस्मे॥ कर्हिस्वित्तदिंद्रयज्जरित्रेविश्व
प्सुब्रह्मकृणवःशविष्ठ॥ कदाधियोननियुतोयुवासेकदागोमघाह

वनानि गच्छाः॥ स गोमघा जरित्रे ऽश्वश्चंद्रा वाजश्रवसो अधि धेहि पृ
क्षः॥ पीपिहीषः सुदुघामिंद्र धेनुं भरद्वाजेषु सुरुचो रुरुच्याः॥ तमा नूनं वृ
जनमन्यथा चिच्छूरो यच्छक्र वि दुरो गृणीषे॥ मा निररं शुक्रदुघस्य धेनो
रांगिरसान्ब्रह्मणा विप्र जिन्व॥ ७॥ सत्रा मदासस्तव विश्वजन्याः सत्रा
रायो ऽध ये पार्थिवासः॥ सत्रा वाजानामभवो विभक्ता यद्देवेषु धारयथा
असुर्यं॥ अनु प्र येजे जन ओजो अस्य सत्रा दधिरे अनु वीर्याय॥ स्यूमग
भे दुधये ऽर्वते च क्रतुं वृंजंत्यपि वृत्रहत्ये॥ तं सध्रीचीरूतयो वृष्ण्यानि पौंस्या
नि नियुतः सश्चुरिंद्रं॥ समुद्रं न सिंधव उक्थशुष्मा उरुव्यचसं गिर आ वि
शंति॥ स रायस्खामुप सृजा गृणानः पुरुश्चंद्रस्य त्वमिंद्र वस्वः॥ पति
र्बभूथासमो जनानामेको विश्वस्य भुवनस्य [illegible] राजा॥ स तु

ऋधिक्कृत्यायो३वायुद्यौर्नभ्रमाभिरायोऽर्यः ॥ अस्मे यथा नः शवसा च ६८
कानो युगे युगे वयसा चेकितानः ॥ ८ ॥ अर्वाग्रथं विश्ववारं त उग्रेंद्र युक्तासो ह
रयो वहंतु ॥ कीरिश्चिद्धि त्वा हवते स्वर्वानृधीमहि सधमादस्ते अद्य ॥ प्रो द्रोणे ह
रयः कर्माग्मन्पुनानास ऋज्यंतो अभूवन् ॥ इंद्रो नो अस्य पूर्व्यः पपीयाद्द्युक्षो
मदस्य सोम्यस्य राजा ॥ आसस्राणासः शवसानमच्छेंद्रं सुचक्रे रथ्यासो अ
श्वाः ॥ अभि श्रव ऋज्यंतो वहेयुर्नू चिन्नु वायोरमृतं वि दस्येत् ॥ वरिष्ठो अस्य
दक्षिणामियर्तींद्रो मघोनां तुविकूर्मितमः ॥ यया वज्रिवः परियास्यंहो मघा
च धृष्णो दयसे वि सूरीन् ॥ इंद्रो वाजस्य स्थविरस्य दातेंद्रो गीर्भिर्वर्धतां
वृद्धमहाः ॥ इंद्रो वृत्रं हनिष्ठो अस्तु सत्वा ता सूरिः पृणति तूतुजानः ॥ ९ ॥ अ
पादित उदु नश्चित्रतमो मही भर्षद्द्युमतीमिंद्रहूतिं ॥ पन्यसीं धीतिं दै

व्यस्य यामन्न न स्परातिं येन ते सुदानुः॥ दूरञ्चित्सदावसतोऽस्य कर्णा घो
षादिंद्रस्य तन्यति ब्रुवाणः॥ एयमेनं देवहूतिर्ववृत्यान्मद्र्य१गिंद्रमिय
मृच्यमाना॥ तं वो धिया परमया पुराजामजरमिंद्रमभ्यनूष्यर्कैः॥ ब्रह्मा
च गिरो दधिरे समस्मिन्महांश्च स्तोमो अधि वर्द्धदिंद्रे। वर्धाद्यं यज्ञ उ
त सोम इंद्रं वर्धाद्ब्रह्म गिर उक्था च मन्म॥ वर्धाहैनमुषसो यामन्नक्तो
र्वर्धान्मासाः शरदो द्याव इंद्रं॥ एवा जज्ञानं सहसे असामि वावृधानं
राधसे च श्रुताय॥ महामुग्रमवसे विप्र नूनमा विवासेम वृत्रतूर्येषु॥१०॥
मंद्रस्य कवेर्दिव्यस्य वह्नेर्विप्रमन्मनो वचनस्य मध्वः॥ अपा नस्तस्य
सचनस्य देवेषो युवस्व गृणते गोअग्राः॥ अयमुशानः पर्यद्रिमुस्रा
ऋतधीतिभिर्ऋतयुग्युजानः॥ रुजदरुग्णं वि वलस्य सानुं पणीँर्वचो

भिरभियोधदिंद्रः॥अयंद्योतयदद्युतोव्य१क्तूंदोषावस्तोःशरदइंदु
रिंद्र॥इमंकेतुमदधुर्नूचिदन्हांशुचिजन्मनउषसश्चकार॥अयंरोचयद
रुचोरुचानोऽयंवासयद्व्यृ१तेनपूर्वीः॥अयमीयतऋतयुग्भिरश्वैः
स्वर्विदानाभिनाचर्षणिप्राः॥नूगृणानोगृणतेप्रत्नराजन्निषःपिन्ववसु
देयायपूर्वीः॥अपओषधीरविषावनानिगाअर्वतोनॄनृचसेरिरीहि
॥११॥इंद्रपिबतुभ्यंसुतोमदायावस्यहरीविमुचासखाया॥उतप्रगा
यगणआनिषद्याथायज्ञायगृणतेवयोधाः॥अस्यपिबयस्यजज्ञानइं
द्रमदायक्रत्वेअपिबोविरप्शिन्॥तमुतेगावोनरआपोअद्रिरिंदुंसम
ह्यन्पीतयेसमस्मै॥समिद्धेअग्नौसुतइंद्रसोमआत्वावहंतुहरयो
वहिष्ठाः॥त्वायतामनसाजोहवीमींद्रायाहिसुवितायमहेनः॥आया

हित्वाम्यदुत्तातायथायेंद्रमहामनसासोमपेयं।।उपब्रह्माणिशृणवइमानो
यातेयज्ञस्तन्वेवयोधात्।।यदिंद्रदिविपार्येयदृधग्यद्वास्वेसदनेयत्रवा
सि।।अतोनोयज्ञमवसेनियुत्वांसजोषाःपाहिगिर्वणोमरुद्भिः।।१२।।अ
हेळमानउपयाहियज्ञंतुभ्यंपवंतइंदवःसुतासः।।गावोनवज्रिन्स्वमोको
अच्छेंद्रागहिप्रथमोयज्ञियानां।।यत्तेककुत्सुसुतापावरिष्ठायपात्राण्यस्य
वसिमच्चऊर्मिं।।त्वंपापाहिप्रतेअध्वर्युरस्थात्संतेवज्रोवर्त्ततामिंद्रगव्युः।।
एषद्रप्सोवृषभोविश्वरूपइंद्रायवृष्णेसमकारिसोमः।।एतंपिबहरिवः
स्थातरुग्रयस्येशिषेप्रदिवियस्तेअन्नं।।सुतःसोमोअसुतादिंद्रवस्यां
नयंश्रेयांचिकितुषेरणाय।।एतंतितिर्वउपयाहियज्ञंतेनविश्वास्तविषी

९९

राघृणस्य॥ इयामसित्येवं इयाह्यर्वाङुरते सोमस्तन्वेभवाति॥ त्वालंकृतोमा
दयस्वास्मिन्नेषुत्रास्मै अवएलनासुत्रविष्टः॥१३॥ प्रत्यस्मैपिपीषतेविश्वानि
विदुषेभर॥ अरंगमायजग्मयेऽपश्चाद्द[illegible]घ्वनेनरे॥ एमेनंप्रत्येतनसोमे
भिःसोमपातमं॥ अमत्रेभिर्ऋजीषिणमिंद्रंसुतेभिरिंदुभिः॥ [illegible]यदी
सुतेभिरिंदुभिःसोमेभिःप्रतिभूषथ॥ वेदाविश्वस्यमेधि[illegible]रोधृषत्तंतमिदे
षते॥ अस्मा अस्मा इदंधसोऽध्वर्योप्रभरासुतं॥ कुवित्समस्यजेन्यस्य
शर्धतोऽभिशस्तेरवस्परत्॥१४॥ यस्यत्यच्छंबरंमदेदिवोदासायरंध
यः॥ अयंससोमइंद्रतेसुतःपिब॥ यस्यतीव्रसुतंमदंमध्यमंतंचरक्ष
से॥ अयं०॥ यस्यगाअंतरश्मनोमदेदृळ्हाअवासृजः॥ अयं०॥ यस्यमंदानो
अंधसोमाघोनंदधिषेशवः॥ अयंससो०॥१५॥ योरयिवोरयिंतमोयो

द्युम्नैर्द्युम्नवत्तमः॥ सोमः सुतः स इंद्र तेऽस्ति स्वधापते मदः॥ यः शग्मस्तुवि
शग्म ते रायो दामा मतीनां॥ सोम०॥ येन वृद्धो न शवसा तुरो न स्वाभिरूतिभिः॥
सोम०॥ त्यमु वो अप्रहणं गृणीषे शवसस्पतिं॥ इंद्रं विश्वासहं नरं मंहिष्ठं वि
श्वचर्षणिं॥ यं वर्धयंतीद्गिरः पतिं तुरस्य राधसः॥ तमिन्न्वस्य रोदसी देवी
शुष्मं सपर्यतः॥१५॥ तद्व उक्थस्य बर्हणेंद्रायोपस्तृणीषणि॥ विपो न
यस्योतयो वि यद्रोहंति सक्षितः॥ अविदद्दक्षं मित्रो नवीयान्पपानो देवे
भ्यो वस्यो अचैत्॥ ससवान्स्तौलाभिर्धौतरीभिरुरुष्या पायुरभवत्स
खिभ्यः॥ ऋतस्य पथि वेधा अपायि श्रिये मनांसि देवासो अक्रन्॥ दधा
नो नाम महो वचोभिर्वपुर्दृशये वेन्यो व्यावः। द्युमत्तमं दक्षं धेह्यस्मे

सेधा जनानां पूर्वीररातीः ॥ वर्षिष्ठो वयः कृणुहि शचीभिर्धनस्य साताव
स्माँ अविड्ढि ॥ इंद्र तुभ्यमिन्मघवन्नभूम वयं दात्रे हरिवो मा वि वेनः ॥ नकि
रापिर्ददृशे मर्त्यत्रा किमंग रध्रचोदनं त्वाहुः ॥ १७ ॥ मा जस्वने वृषभ नो ररी
था मा ते रेवतः सख्ये रिषाम ॥ पूर्वीष्ट इंद्र निष्षिधो जनेषु जह्यसुष्वीन्प्र
वृहापृणतः ॥ उदभ्राणीव स्तनयन्नियर्तींद्रो राधांस्यश्व्यानि गव्या ॥ त्वम
सि प्रदिवः कारुधाया मा त्वादामान आ दभन्मघोनः ॥ अध्वर्यवो वीरप्रमहे सु
तानामिंद्राय भरत स ह्यस्य राजा ॥ य पूर्व्याभिरुत नूतनाभिर्गीर्भिर्वावृधे गृण
तामृषीणां ॥ अस्य मदे पुरु वर्पांसि विद्वानिंद्रो वृत्राण्यप्रती जघान ॥ तमु
प्र होषि मधुमंतमस्मे सोमं वीराय शिप्रिणे पिबध्यै ॥ पाता सुतमिंद्रो

अस्तसोमं हंता वृत्रं वज्रेण मंदसानः ॥ गंता यज्ञं परावतश्चिदछा वसुर्धी
नामविता कारुधायाः ॥१८॥ इदं त्यत्पात्रमिंद्रपानमिंद्रस्य प्रियममृतमपा
यि ॥ मत्सद्यथा सौमनसाय देवं व्य१स्मद्द्वेषो युयवद्व्यंहः ॥ एना मंदा
नो जहि शूर शत्रूं जामिमजामिं मघवन्नमित्रान् ॥ अभिषेणां अभ्या३देदि
शानान्पराच इंद्र प्रमृणा जही च ॥ आसु ष्मा णो मघवन्निंद्र पृत्स्व१स्मभ्यं
महि वरिवः सुगं कः ॥ अपां तोकस्य तनयस्य जेष इंद्र सूरीन्कृणुहि स्मा नो
अर्धं ॥ आ त्वा हरयो वृषणो युजाना वृषरथासो वृषरश्मयोऽत्याः ॥ अस्मत्रां
चो वृषणो वज्रवाहो वृष्णे मदाय सुयुजो वहंतु ॥ आ ते वृषन्वृषणो द्रोण
मस्थुर्घृतप्रुषो नोर्मयो मदंतः ॥ इंद्र प्र तुभ्यं वृषभिः सुतानां वृष्णे भरंति वृ
षभाय सोमं ॥१९॥ वृषासि दिवो वृषभः पृथिव्या वृषा सिंधूनां वृषभः स्ति
यानां ॥ वृष्णे त इंदुर्वृषभ पीपाय स्वादू रसो मधुपेयो वराय ॥ अयं देवः

५ परिशिष्ट॥ चक्षुश्च श्रोत्रं च मनश्च वाक् च प्राणापानौ देह इदं शरीरं॥ द्वौ प्रत्यंचावनुलोमौ
विसर्गावेतं तं मन्ये दशयंत्रमुत्सं॥ नखाश्च रोमाश्च करौ च बाहू जंघे चोरू उदरं शिरश्च॥६

सं-च. सहस्रा जायमान ऽइंद्रेण युजा पणिमस्तभायत्॥ अयं स्वस्य पितुरायुधानीं
५८ दुरमुष्णादशिवस्य मायाः॥ अयमकृणोदुषसः सुपत्नीरयं सूर्ये अदधाज्ज्यो
तिरंतः॥ अयं त्रिधातु दिवि रोचनेषु त्रितेषु विंददमृतं निगूळ्हं॥ अयं द्यावा
पृथिवी विष्कभायदयं रथमयुनक् सप्तरश्मिं॥ अयं गोषु शच्या पक्वमंतः सो
मो दाधार दशयंत्रमुत्सं॥२०॥ य आनयत्परावतः सुनीती तुर्वशं यदुं॥ इंद्रः
स नो युवा सखा॥ अविप्रे चिद्वयो दधदनाशुना चिदर्वता॥ इंद्रो जेता हितं
धनं॥ महीरस्य प्रणीतयः पूर्वीरुत प्रशस्तयः॥ नास्य क्षीयंत ऊतयः॥
सखायो ब्रह्मवाहसेऽर्चत प्र च गायत॥ स हि नः प्रमतिर्मही॥ त्वमेकस्य वृत्र
हन्नविता द्वयोरसि॥ उतेदृशे यथा वयं॥२१॥ नयसीद्वति द्विषः कृणोष्युक्थ
शंसिनः॥ नृभिः सुवीर उच्यसे॥ ब्रह्माणं ब्रह्मवाहसं गीर्भिः सखायमृ
ग्मियं॥ गां न दोहसे हुवे॥ यस्य विश्वानि हस्तयोरूचुर्वसूनि नि द्विता॥

रोमाणि मांसं रुधिरास्थि मज्जा मेतच्छरीरं जलबुद्बुदोपमं॥ भ्रुवौ ललाटश्च तथा च कर्णौ हनुः
कपोलौ चुबुकस्तथा च॥ ओष्ठाश्च दंताश्च तथैव जिह्वा मेतत्तु शुभ्रं मुखपद्मकोशं॥ ७

कपोलौचुबुकस्तथाच॥ ओष्ठाश्चदंताश्चतथैवजिह्वामेतत्सुभ्रंमुखरत्नकोशं॥ ७

वीरस्यपृतनाषहः॥ विदृळ्हानिचिदद्रिवोजनानांशचीपते॥ इहमायाअ
नानत॥ तमुत्वासत्यसोमपाइंद्रवाजानांपते॥ अहूमहिश्रवस्यवः॥ २२॥
तमुत्वायःपुरासिथयोवानूनंहितेधने॥ हव्यःसश्रुधीहवं॥ धीभिरर्वद्भि
रर्वतोवाजांइंद्रश्रवाय्यान्॥ त्वयाजेष्महितंधनं॥ अभूरुवीरगिर्वणोमहां
इंद्रधनेहिते॥ भरेवितंतसाय्यः॥ यातऊतिरमित्रहन्मक्षूजवस्त
मासति॥ तयानोहिनुहीरथं॥ सरथेनरथीतमोस्माकेनाभियुग्वना॥ जे
षिजिष्णोहितंधनं॥ २३॥ यएकइत्तमुष्टुहिकृष्टीनांविचर्षणिः॥ पतिर्जज्ञे
वृषक्रतुः॥ योगृणतामिदासिथापिरूतीशिवःसखा॥ सत्वंनइंद्रमृळय॥
धिष्ववज्रंगभस्त्योरक्षोहत्यायवज्रिवः॥ सासहीष्ठाअभिस्पृधः॥ प्रत्नंर
यीणांयुजंसखायंकीरिचोदनं॥ ब्रह्मवाहस्तमंहुवे॥ सहिविश्वानिपार्थि
वांएकोवसूनिपत्यते॥ गिर्वणस्तमोअध्रिगुः॥ २४॥ सनोनियुद्भिराप

णकामंवाजेभिरश्विभिः॥ गोमद्भिर्गोपतेधृषत्॥ तद्वोगायसुतेसचापुरुहूताय
सत्वने॥ शंयद्गवेनशाकिने॥ नघावसुर्नियमतेदानंवाजस्यगोमतः॥
यत्सीमुप श्रवद्गिरः॥ कुवित्सस्यप्रहिव्रजंगोमंतंदस्युहागमत्॥ शचीभि
रपनोवरत्॥ इमाउत्वाशतक्रतोभिप्रणोनुवुर्गिरः॥ इंद्रवत्संनमातरः॥२५॥
दूणाशंसख्यंतवगौरसिवीरगव्यते॥ अश्वोअश्वायतेभव॥ समंदस्वा
ह्यंधसोराधसेतन्वामहे॥ नस्तोतारंनिदेकरः॥ इमाउत्वासुतेसुतेनक्षंते
गिर्वणोगिरः॥ वत्संगावोनधेनवः॥ पुरूतमंपुरूणांस्तोतॄणांविवाचि॥
वाजेभिर्वाजयतां॥ अस्माकमिंद्रभूतुतेस्तोमोवाहिष्ठोअंतमः॥ अस्मा
न्रायेमहेहिनु॥ अधिबृबुःपणीनांवर्षिष्ठेमूर्धन्नस्थात्॥ उरुःकक्षोन
गांग्यः॥ यस्यवायोरिवद्रवद्भद्रारातिःसहस्रिणी॥ सद्योदानायमंहते॥
तत्सुनोविश्वेअर्यआसदागृणंतिकारवः॥ बृबुंसहस्रदातमंसूरिंस

हस्त्रसातमं॥२६॥ त्वामिद्धि हवामहे साता वाजस्य कारवः॥ त्वां वृत्रेष्विंद्र सत्पतिं
नरस्त्वां काष्ठास्वर्वतः॥ स त्वं नश्चित्र वज्रहस्त धृष्णुया मह स्तवानो अद्रिवः॥
गामश्वं रथ्यमिंद्र संकिर सत्रा वाजं न जिग्युषे॥ यः सत्राहा विचर्षणिरिंद्रं तं हू
महे वयं॥ सहस्रमुष्क तुविनृम्ण सत्पते भवा समत्सु नो वृधे॥ बाधसे जनान्वृ
षभेव मन्युना घृषौ मीळ्ह ऋचीषम॥ अस्माकं बोध्यविता महाधने तनूष्व
प्सु सूर्ये॥ इंद्र ज्येष्ठं न आ भरँ ओजिष्ठं पपुरि श्रवः॥ येनेमे चित्र वज्रहस्त रो
दसी ओभे सुशिप्र प्राः॥१२॥ त्वामुग्रमवसे चर्षणीसहं राजन्देवेषु हूमहे॥
विश्वा सु नो विथुरा पिब्दना वसोऽमित्रान्सुषहान्कृधि॥ यदिंद्र नाहुषीष्वाँ
ओजो नृम्णं च कृष्टिषु॥ यद्वा पंच क्षितीनां द्युम्नमा भर सत्रा विश्वानि
पौंस्या॥ यद्वा तृक्षौ मघवन्द्रुह्यावा जने यत्पूरौ कच्च वृष्ण्यं॥ अस्मभ्यं तद्रि
रीहि सं नृषाह्येऽमित्रान्पृत्सु तुर्वणे॥ इंद्र त्रिधातु शरणं त्रिवरूथं स्वस्तिमत्॥

छर्दिर्यच्छ मघवद्भ्यश्च मह्यं च यावया [illegible] दिद्युमेभ्यः ॥ ये गव्यता मनसा शत्रुमा
दभुरभिप्रघ्नंति धृष्णुया ॥ अध स्मा नो मघवन्निंद्र गिर्वणस्तनूपा अंतमो भव ॥
[illegible] अध स्मा नो वृधे भवेंद्र नायमवा युधि ॥ यदंतरिक्षे पतयंति पर्णिनो दिद्य
वस्तिग्ममूर्धानः ॥ यत्र शूरासस्तन्वो वितन्वते प्रिया शर्म पितॄणां ॥ अध स्मा
यच्छ तन्वे३ तने च छर्दिरचित्तं यावय द्वेषः ॥ यदिंद्र सर्गे अर्वतश्चोदयासे म
हाधने ॥ असमने अध्वनि वृजिने पथि श्येनाँ इव श्रवस्यतः ॥ सिंधूँरिव प्र
वण आशुया यतो यदि क्रोशमनु ष्वणि ॥ आ ये वयो न वर्वृतत्यामिषि गृभी
ता बाह्वोर्गवि ॥ २९ ॥ स्वादुष्किलायं मधुमाँ उतायं तीव्रः किलायं रसवाँ उता
यं ॥ उतो न्व१स्य पपिवांसमिंद्रं न कश्चन सहत आहवेषु ॥ अयं स्वादुरिह मदि
ष्ठ आस यस्येंद्रो वृत्रहत्ये ममाद ॥ पुरूणि यश्च्यौत्ना शंबरस्य वि नवतिं न
व च देह्यो३ हन् ॥ अयं मे पीत उदियर्ति वाचमयं मनीषामुशतीमजीगः ॥

अयंषळुर्वीरमिमीतधीरोनयाभ्योभुवनंकच्चनारे॥अयंसयोवरिमाणंपृथि
व्यावर्ष्माणंदिवोऽअकृणोदयंसः॥अयंपीयूषंतिसृषुप्रवत्सुसोमोदाधारो
र्वंतरिक्षं॥अयंविदच्चित्रदृशीकमर्णःशुक्रसद्मनामुषसामनीके॥अयं
महान्महतास्कंभनेनोद्द्यामस्तभ्नाद्वृषभोमरुत्वान्॥३०॥धृषत्पिबक
लशेसोममिंद्रवृत्रहाशूरसमरेवसूनां॥माध्यंदिनेसवनआवृषस्वरयि
स्थानोरयिमस्मासुधेहि॥इंद्रप्रणःपुरएतेवपश्यप्रनोनयप्रतरंवस्योअ
च्छ॥भवासुपारोअतिपारयोनोभवासुनीतिरुतवामनीतिः॥उरुंनोलो
कमनुनेषिविद्वान्स्वर्वज्ज्योतिरभयंस्वस्ति॥ऋष्वातइंद्रस्थविरस्यबाहूउ
पस्थेयामशरणाबृहंता॥वरिष्ठेनइंद्रवंधुरेधावहिष्ठयोःशतावन्नश्वयो
रा॥इषमावक्षीषांवर्षिष्ठांमानस्तारीन्मघवन्रायोअर्यः॥इंद्रमृळमह्यं
जीवातुमिच्छचोदयधियमयसोनधारां॥यत्किंचाहंत्वायुरिदंवदामित

ज्जुषस्व कृधि मा देववंतं ॥ ३१ ॥ त्रातारमिंद्रमवितारमिंद्रं हवेहवे सुहवं शूरमिंद्रं ।
ह्वयामि शक्रं पुरुहूतमिंद्रं स्वस्ति नो मघवा धात्विंद्रः ॥ इंद्रः सुत्रामा स्ववाँ अ
वोभिः सुमृळीको भवतु विश्ववेदाः ॥ बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य
पतयः स्याम ॥ तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ॥ स सु
त्रामा स्ववाँ इंद्रो अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु ॥ अव त्वे इंद्र प्रवतो नो
र्मिर्गिरो ब्रह्माणि नियुतो धवंते ॥ उरु न राधः सवना पुरूण्यपो गा वज्रिन्यु
वसे समिंदून् ॥ क ईं स्तवत्कः पृणात्को यजाते यदुग्रमिन्मघवा विश्वहा
वेत् ॥ पादाविव प्रहरन्नन्यमन्यं कृणोति पूर्वमपरं शचीभिः ॥ ३२ ॥ शृण्वे
वीर उग्रमुग्रं दमायन्नन्यमन्यमतिनेनीयमानः ॥ एधमानद्विळुभयस्य रा
जा चोष्कूयते विश इंद्रो मनुष्यान् ॥ परा पूर्वेषां सख्या वृणक्ति वितर्तु
राणो अपरेभिरेति ॥ अनानुभूतीरवधून्वानः पूर्वीरिंद्रः शरदस्तर्तरी

ति॥ रूपंरूपंप्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय॥ इंद्रो मायाभिः पु
रुरूप ईयते युक्ता ह्यस्य हरयः शता दश॥ युजानो हरिता रथे भूरि त्वष्टेह
राजति॥ को विश्वाहा द्विषतः पक्ष आसत उतासीनेषु सूरिषु॥ अगव्यूति क्षे
त्रमागन्म देवा उर्वी सती भूमिरंहूरणाभूत्॥ बृहस्पते प्र चिकित्सा गवि
ष्टावित्था सते जरित्र इंद्र पंथां॥२३॥ दिवेदिवे सदृशीरन्यमर्द्धं कृष्णा अ
सेधदप सद्मनो जाः॥ अहं दासा वृषभो वस्नयंतोदव्रजे वर्चिनं शंबरं
च॥ प्रस्तोक इन्नु राधसस्त इंद्र दश कोशयीर्दश वाजिनो दात्॥ दिवो
दासादतिथिग्वस्य राधः शांबरं वसु प्रत्यग्रभीष्म॥ दशाश्वान्दश कोशान्
दश वस्त्राधिभोजना॥ दशो हिरण्यपिंडान्दिवोदासादसानिषं॥ दश र
थान्प्रष्टिमतः शतं गा अथर्वभ्यः॥ अश्वथः पायवे दात्॥ महि राधो वि

भ्यजंन्यंदधानान्भारद्वाजांसांर्जयोअभ्ययष्ट॥२५॥ वनस्पतेवीडंगोहिभू
याअस्मत्सखाप्रतरणःसुवीरः॥ गोभिःसन्नद्धोअसिवीळयस्वास्थाता
तेजयतुजेत्वानि॥ दिवस्पृथिव्याःपर्योजउद्भृतंवनस्पतिभ्यःपर्याभृतं
सहः॥ अपामोज्मानंपरिगोभिरावृतमिंद्रस्यवज्रंहवि[illegible]षारथंयज॥ इंद्र
स्यवज्रोमरुतामनीकंमित्रस्यगर्भोवरुणस्यनाभिः॥ सेमांनोहव्यदातिं
जुषाणोदेवरथप्रतिहव्यागृभाय॥ उपश्वासयपृथिवीमुतद्यांपुरुत्रातेम
न्वतांविष्ठितंजगत्॥ सदुंदुभेसजूरिंद्रेणदेवैर्दूराद्दवीयोअपसेधशत्रू
न्॥ आक्रंदयबलमोजोनआधानिष्टनिहिदुरिताबाधमानः॥ अपप्रोथ
दुंदुभेदुच्छुनाइतइंद्रस्यमुष्टिरसिवीळयस्व॥ आमूरजप्रत्यावर्तयेमाः
केतुमद्दुंदुभिर्वावदीति॥ समश्वपर्णाश्चरंतिनोनरोस्माकमिंद्ररथिनोजयंतु॥

३५॥२

तोअह्नामदेवान्॥मिम्यक्षयेषुरोदसीनुदेवीसिषक्तिपूषाअभ्यर्धय
ज्वा॥श्रुत्वाहवंमरुतोयद्धयाथभूमारेजंतेअध्वंनिप्रविक्ते॥ ॥अभित्यं
वीरंगिर्वणसमर्चेंद्रंब्रह्मणाजरितर्नवेन॥श्रवदिद्धवमुपचस्तवानोरा
सद्वाजांउपमहोगृणानः॥ओमानमापोमानुषीरमृक्तंधाततोकायतनया
यशंयोः॥यूयंहिष्ठाभिषजोमातृतमाविश्वस्यस्थातुर्जगतोजनित्रीः
आनोदेवःसविताघायमाणोहिरण्यपाणिर्यजतोजगम्यात्॥योदत्रवां
उषसोनप्रतीकंव्यूर्णुतेदाशुषेवार्याणि॥उतत्वंसूनोसहसोनोअद्या
देवाँअस्मिन्नध्वरेववृत्याः॥स्यामहंतेसदमिद्रातौतवस्यामग्नेव
सासुवीरः॥उतत्यामेहवमाजग्म्यातंनासत्याधीभिर्युवमंगविप्रा॥
अत्रिंनमहस्तमसोमुमुक्तंतूर्वतंनरादुरितादभीके॥२॥तेनोरायोद्युम ५

तोवाजयतो दातारो भूत नृवतः पुरुक्षोः॥ दृत्रास्यंतो दिव्याः पार्थिवासो
गोजाता अप्या मृळता च देवाः॥ तेनो रुद्रः सरस्वती सजोषा मीह्ळुष्मंतो विष्णु
र्मृळंतु वायुः॥ ऋभुक्षा वाजो दैव्यो विधाता पर्जन्यावाता पिप्यतामिषं नः॥
उत स्य देवः सविता भगो नोपां नपादवतु दानु पप्रिः॥ त्वष्टा देवेभिर्जनिभिः
सजोषा द्यौर्देवेभिः पृथिवी समुद्रैः॥ उत नोहिर्बुध्न्यः शृणोत्वज एकपात्पृ
थिवी समुद्रः॥ विश्वे देवा ऋतावृधो हुवानाः स्तुता मंत्राः कविशस्ता अवं
तु॥ एवा नपातो मम तस्य धीभिर्भरद्वाजा अभ्यर्चंत्यर्कैः॥ ग्ना हुतासो वस
वोधृष्टा विश्वे स्तुतासो भूता यजत्राः॥ ५०॥ उदु त्यच्चक्षुर्महि मित्रयोरां ए
ति प्रियं वरुणयोरदब्धं॥ ऋतस्य शुचि दर्शतमनीकं रुक्मो न दिव उदि
ताव्यद्यौत्॥ वेद यस्त्रीणि विदथान्येषां देवानां जन्म सनुतरा च विप्रः॥

ऋजुमर्तेषुवृजिनाचपश्यन्नभिचष्टेसूरोअर्यएवान्॥स्तुषउवोमहऋतस्य
गोपानदितिंमित्रंवरुणंसुजातान्॥अर्यमणंभगमदब्धधीतीनच्छावोचे
सधन्यःपावकान्॥रिशादसःसत्पतीँरदब्धान्महोराज्ञःसुवसनस्यदा
तॄन्॥युनःसुक्षत्रान्क्षयतोदिवोनॄनादित्यान्यांम्यदितिंदुवोयु॥द्यौष्पि
तःपृथिविमातरध्रुगग्नेभ्रातर्वसवोमृळतानः॥विश्वआदित्याअदितेस
जोषाअस्मभ्यंशर्मबहुलंवियंत॥१५॥मानोवृकायवृकयेसमस्माऽअघा
यतेरीरधतायजत्राः॥यूयंहिष्ठारथ्योनस्तनूनांयूयंदक्षस्यवचसोबभूव॥
मावऽएनोअन्यकृतंभुजेममातत्कर्मवसवोयच्चयध्वे॥विश्वस्यहिक्षयथवि
श्वदेवाःस्वयंरिपुस्तन्वंरीरिषीष्ट॥नमइदुग्रंनमआविवासेनमोदाधारपृ
थिवीमुतद्यां॥नमोदेवेभ्योनमईशएषांकृतंचिदेनोनमसाविवासे॥

ऋतस्यवोरथ्यःपूतदक्षानृतस्यपस्त्यसदोअदब्धान्॥ तांआनमोभिरुरु
चक्षसोनृन्विश्वान्वआनमेमहोयजत्राः॥ तेहिश्रेष्ठवर्चसस्तउनस्तिरोवि
श्वानिदुरितानयंति॥ सुक्षत्रासोवरुणोमित्रोअग्निर्ऋतधीतयोवक्मरा
जसत्या॥१२॥ तेनइंद्रःपृथिवीक्षामवर्द्धन्पूषाभगोअदितिःपंचजनाः॥
सुशर्माणःस्ववसःसुनीथाभवंतुनःसुत्रात्रासःसुगोपाः॥ नूसद्मानं
दिव्यंनंशिदेवाभारद्वाजःसुमतिंयातिहोता॥ आसानेभिर्यजमानो
मियेधैर्देवानांजन्मवसूयुर्ववंद॥ अपत्यंवृजिनंरिपुंस्तेनमग्नेदु
राध्यं॥ दविष्ठमस्यसत्पतेकृधीसुगं॥ ग्रावाणःसोमनोहिकंसखित्व
नायवावशुः॥ जहीन्यत्रिणंपणिंवृकोहिषः॥ यूयंहिष्ठासुदानव
इंद्रज्येष्ठाअभिद्यवः॥ कर्तानोअध्वन्नासुगंगोपाअमा॥ अपिपं

थामगन्महिस्वस्तिगामनेहसं॥ येनविश्वाः परिद्विषोवृणक्तिविंदतेव
सु॥१३॥ नतद्दिवानपृथिव्यानुमन्येनयज्ञेननोतशमीभिराभिः॥उ
ब्जंतुतंसुभ्व१पर्वतासोनिहीयतामतियाजस्ययष्टा॥अतिवायोम
रुतोमन्यतेनोब्रह्मवायःक्रियमाणंनिनित्सात्॥तपूंषितस्मैवृजिना
निसंतुब्रह्मद्विषमभितंशोचतुद्यौः॥किमंगत्वाब्रह्मणःसोमगो
पांकिमंगत्वाहुरभिशस्तिपांनः॥किमंगनःपश्यसिनिद्यमाना
न्ब्रह्मद्विषेतपुषिंहेतिमस्य॥अवंतुमामुषसोजायमाना अवंतुमा
सिंधवःपिन्वमानाः॥अवंतुमापर्वतासोध्रुवासोवंतुमापितरो
देवहूतौ॥विश्वदानींसुमनसःस्यामपश्येमनुसूर्यमुच्चरंतं॥त
थाकरद्वसुपतिर्वसूनांदेवाँओहानोवसागमिष्ठः॥१४॥इंद्रो

नेदिष्ठमवसागमिष्ठः सरस्वती सिंधुभिः पिन्वमाना॥ पर्जन्यो नओ
षधीभिर्मयोभुर ग्निः सुशंसः सुहवः पितेव॥ विश्वेदेवासआ
गत शृणुता म इमं हवं॥ एदं बर्हिर्निषीदत॥ यो वो देवा घृतस्नुना
हव्येन प्रतिभूषति॥ तं विश्व उपगच्छथ॥ उपनः सूनवो गिरः शृ
ण्वंत्वमृतस्य ये॥ सुमृळीका भवंतु नः॥ विश्वेदेवा ऋतावृध ऋ
तुभिर्हवनश्रुतः॥ जुषंतां युज्यं पयः॥ १५॥ स्तोत्रमिंद्रो मरुद्गणस्त्व
ष्टृमान्मित्रो अर्यमा॥ इमा हव्या जुषंत नः॥ इमं नो अग्ने अध्वरं होत
र्वयुनशो यज॥ चिकित्वां दैव्यं जनं॥ विश्वेदेवाः शृणुतेमं हवं मे ये
अंतरिक्षे य उप द्यवि ष्ठ॥ ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मि
न्बर्हिषि मादयध्वं॥ विश्वेदेवा मम शृण्वंतु यज्ञिया उभे रोदसी

अपांनपाच्छ्रुमन्म ॥ मावोवचांसिपरिचक्ष्याणिवोचंसुम्नेष्विद्वो
अंतमामदेम ॥ येकेचज्मामहिनोअहिमायादिवोजज्ञिरेअपांस
धस्थे ॥ तेअस्मभ्यमिषयेविश्वमायुःक्षपउस्रावरिवस्यंतुदेवाः ॥ स्वं
अग्नीपर्जन्याववतंधियंमेऽस्मिन्हवेसुहवासुष्टुतिंनः ॥ इळामन्यो
जनयद्गर्भमन्यःप्रजावतीरिषआधत्तमस्मे ॥ स्तीर्णेबर्हिषिस
मिधानेअग्नौसूक्तेनमहानमसाविवासे ॥ अस्मिन्नोअद्यविद
थेयजत्राविश्वेदेवाहविषिमादयध्वं ॥१६॥ वयमुत्वापथस्प
तेरथंनवाजसातये ॥ धियेपूषन्नयुज्महि ॥ अभिनोनर्यंवसुवी
रंप्रयतदक्षिणं ॥ वामंगृहपतिंनय ॥ अदित्संतंचिदाघृणेपूषं
दानायचोदय ॥ पणेश्चिद्विम्रदामनः ॥ विपथोवाजसातयेचि
नुहिविमृधोजहि ॥ साधंतामुग्रनोधियः ॥ परितृंधिपणीनामा

८

रयाहृदयाकवे॥अथेमस्मभ्यंरंधय॥ ७ ॥ विपूषन्नारयातुदप
णेरिछहृदिप्रियं॥अथे॰ आरिखकिकिराकृणुपणीनांहृदयाक
वे॥अथे॰॥यांपूषन्ब्रह्मचोदनीमारांविभर्ष्याघृणे।तयासमस्य
हृदयमारिखकिकिराकृणु॥यातेअष्ट्रागोओपशाघृणेपशुसा
धनी॥तस्यास्तेसुम्नमीमहे॥उतनोगोषणिंधियमश्वसांवाज
सामुत॥नृवत्कृणुहिवीतये॥१०॥संपूषन्विदुषानययोअंजसा
नुशासति॥यएवेदमितिब्रवत्॥समुपूष्णागमेमहियोगृहाँअ व ४
भिशासति॥इमएवेतिचब्रवत्॥पूष्णश्चक्रंनरिष्यतिनकोशो
वपद्यते॥नोअस्यव्यथतेपविः॥योअस्मैहविषाविधन्नतंपू
षापिमृष्यते॥प्रथमोविंदतेवसु॥पूषागाअन्वेतुनः॥पूषार

क्षत्वर्वतः॥ पूषा वाजं सनोतु नः॥ १९॥ पूषन्ननु प्रगाइहि यजमानस्य
सुन्वतः॥ अस्माकं स्तुवतामुत॥ माकिर्नेशन्माकीं रिषन्माकीं सं
शारि केवटे॥ अथारिष्टाभिरागहि॥ शृण्वंतं पूषणं वयमिर्यमनष्ट
वेदसं॥ ईशानं राय ईमहे॥ पूषंतव व्रते वयं न रिष्येम कदाचन॥
स्तोतारस्त इह स्मसि॥ परि पूषा परस्ताद्धस्तं दधातु दक्षिणं॥ पुन
र्नोनष्टमाजतु॥ २०॥ एहि वां विमुचो नपादाघृणे सं सचावहै॥ रथी
र्ऋतस्य नो भव॥ रथीतमं कपर्दिनमीशानं राधसो महः॥ रायः स
खायमीमहे॥ रायो धारास्याघृणे वसो राशिरजाश्व॥ धीवतो धी
वतः सखा॥ पूषणं न्वजाश्वमुप स्तोषाम वाजिनं॥ स्वसुर्यो जा
र उच्यते॥ मातुर्दिधिषुमब्रवं स्वसुर्जारः शृणोतु नः॥ भ्रातेंद्रस्य

सखा मम ॥ आजासः पूषणं रथे निशृंभास्ते जनश्रियं ॥ देवं वहंतु
विभ्रतः ॥२१॥ य एनमादिदेशति करंभादिति पूषणं ॥ न तेन देव आ
दिशे ॥ उत घा स रथीतमः सख्या सत्पतिर्युजा ॥ इंद्रो वृत्राणि जिघ्नते ॥
उतादः परुषे गवि सूरश्चक्रं हिरण्ययं । न्यैरयद्रथीतमः ॥ यदद्य त्वा
पुरुष्टुत ब्रवाम दस्र मंतुमः ॥ तत्सु नो मन्म साधय ॥ इमं च नो गवे
षणं सातये सीषधो गणं ॥ आरात्पूषन्नसि श्रुतः ॥ आ ते स्वस्तिमी
मह आरेअघामुपावसुं ॥ अद्या च सर्वतातये । श्वश्च सर्वता
तये ॥२२॥ इंद्रा नु पूषणा वयं सख्याय स्वस्तये ॥ हुवेम वाजसातये ॥
सोममन्य उपासदत्पातवे चम्वोः सुतं ॥ करंभमन्य इच्छति ॥ अजा अ
न्यस्य वन्हयो हरी अन्यस्य संभृता ॥ ताभ्यां वृत्राणि जिघ्नते ॥ यदिंद्रो

अनयद्रितो मही रपो वृषंतमः ॥ तत्र पूषाभवत्सचा ॥ तां पूष्णः सुमतिं
वयं वृक्षस्य प्र वयामिव ॥ इंद्रस्य चारभामहे ॥ उत्पूषणं युवामहेभी
शूंरिव सारथिः ॥ मह्या इंद्रं स्वस्तये ॥ २३ ॥ शुक्रं ते अन्यद्यजतं ते अ
न्यद्विषुरूपे अहनी द्यौरिवासि ॥ विश्वा हि माया अवसि स्वधावो
भद्रा ते पूषन्निह रातिरस्तु ॥ अजाश्वः पशुपा वाजपस्त्यो धियंजि
न्वो भुवने विश्वे अर्पितः ॥ अष्ट्रां पूषा शिथिरामुद्वरीवृजत्संचक्षा
णो भुवना देव ईयते ॥ यास्ते पूषन्नावो अंतः समुद्रे हिरण्ययीरंतरि
क्षे चरंति ॥ ताभिर्यासि दूत्यां सूर्यस्य कामेन कृतः श्रव इच्छमानः ॥ पू
षा सुबंधुर्दिव आ पृथिव्या इळस्पतिर्मघवा दस्मवर्चाः ॥ यं देवासो
अददुः सूर्यायै कामेन कृतं तवसं स्वंचं ॥ २४ ॥ प्र नु वोचा सुतेषु वां

वीर्या३ यानि चक्रथुः ॥ हतासो वां पितरो देवशत्रव इंद्राग्नी जीवथो
युवं ॥ बळित्था महिमा वामिंद्राग्नी पनिष्ठ आ ॥ समानो वां जनिता
भ्रातरा युवं यमाविहेहमातरा ॥ ओकिवांसा सुते सचाँ अश्वा सप्ती
इवादने ॥ इंद्रान्व१ग्नी अवसेह वज्रिणा वयं देवा हवामहे ॥ य इंद्रा
ग्नी सुतेषु वां स्तवत्तेष्वृतावृधा ॥ जोषवाकं वदतः पज्रहोषिणा न
देवा भसथश्चन ॥ इंद्राग्नी को अस्य वां देवौ मर्तश्चिकेतति ॥ वि
षूचो अश्वान्युयुजान ईयत एकः समान आ रथे ॥ २५ ॥ इंद्राग्नी अ
पादियं पूर्वागात्पद्वतीभ्यः ॥ हित्वी शिरो जिह्वया वावदच्चरत्त्रिं
शत्पदा न्यक्रमीत् ॥ इंद्राग्नी आ हि तन्वते नरो धन्वानि बाह्वोः ॥ मा नो
अस्मिन्महाधने परा वर्क्तं गविष्टिषु ॥ इंद्राग्नी तपंति माघा अर्यो

न्यर्ुर्मिः ककुद्मान्प्रतूर्त्तिर्वाजसातमस्त्तेनायंवाजꣳसेत्॥ विष्णोः क्रमोसि विष्णोः
क्रांतमसि विष्णोर्विक्रांतमस्यंकौन्यंकावभितारथंयोध्वांतंवाताग्रमनुसंचरं
तौदूरेहेतिरिंद्रियावान्पतत्रीतेनोग्नयः पप्रयः पारयंतु॥२॥ अफ्कान्यंकोपंचदश
च॥७॥ ॥देवस्याहꣳसवितुःप्रसवेब्रहस्पतिनावाजजितावाजंजेषंदेवस्याहꣳस
वितुःप्रसवेब्रहस्पतिनावाजजितावर्षिष्ठंनाकꣳरुहेयमिंद्रायवाचंवदतेंद्रंवाजंजाप
यतेंद्रोवाजमजयित्॥ अश्वाजनिवाजिनिवाजेषुवाजिनीवत्यश्वान्त्समत्सुवा
जय॥ अर्वासिसप्तिरसिवाज्यसिवाजिनोवाजंधावतमरुतांप्रसवेजयतव्योज दि
नामिमीध्वमध्वनस्कभ्नीत॥१॥ काष्ठांगच्छतवाजेवाजेवतवाजिनोनोधने

ते

विप्राअमृताऋतज्ञाः॥अस्यमध्वःपिबतमादयध्वंतृप्तायातपथिभिर्देवयानैः॥
तेनोअर्वंतोहवनश्रूहवंविश्वेशृण्वंतुवाजिनः॥मितद्रवःसहस्रसामेधसातास
निष्यवः॥महोयेरत्नꣳसमिथेषुजभ्रिरेशंनोभवंतुवाजिनोहवेषु॥देवताता
मितद्रवःस्वर्काः॥जंभयंतोहिंवृकꣳरक्षाꣳसिसनेम्यस्मद्युयवन्॥२॥अ
मीवाः॥एषस्यवाजीक्षिपणिंतुरण्यतिग्रीवायांबद्धोअपिकक्षआसनि॥
क्रतुंदधिक्राअनुसंतवीत्वत्पथामंकाꣳस्यन्वापनीफणत्॥उतस्मास्यद्रवतस्तु
रण्यतःपर्णंनवेरनुवातिप्रगर्धिनः॥श्येनस्येवध्रजतोअंकसंपरिदधिक्राव्णः
सहोर्जातरित्रतः॥आमावाजस्यप्रसवोजगम्यादाद्यावापृथिवीविश्वरूपे॥आ

अरातयः ।। अप द्वेषांस्या कृतं युयुतं सूर्यादधि ।। इंद्राग्नी युवोरपि व
सु दिव्यानि पार्थिवा । आ न इह प्र यच्छतं रयिं विश्वायुपोषसं ।।
इंद्राग्नी उक्थवाहसा स्तोमेभिर्हवनश्रुता ।। विश्वाभि[illegible]र्गीर्भि
रा गतमस्य सोमस्य [illegible] पीतये ।। २६ ।। श्नथद्वृत्रमुत सनोति
वाजमिंद्रा यो अग्नी सहुरी सपर्यात् । इरज्यंता वसव्यस्य भूरेः सहस्तमा
सहसा वाजयंता ।। ता योधिष्टमभि गा इंद्र नूनमपः स्वरुषसो अग्न ऊढाः ।।
दिशः स्वरुषस इंद्र चित्रा अपो गा अग्ने युवसे नियुत्वान् ।। आ वृत्रहणा वृत्र
हभिः शुष्मैरिंद्र यातं नमोभिरग्ने अर्वाक् ।। युवं राधोभिरकवेभिरिंद्रा अ
ग्नेस्मे भवतमुत्तमेभिः ।। ता हुवे ययोरिदं पप्ने विश्वं पुरा कृतं । इंद्राग्नी न मर
धतः ।। उग्रा विघनिना मृध इंद्राग्नी हवामहे ।। ता नो मृळात ईदृशे ।। २७ ।।

हतोवृत्राण्यार्याहतोदासानिसत्पती॥हतोविश्वाअपद्विषः॥इंद्राग्नी
युवामिमेऽभिस्तोमाअनूषत॥पिबतंशंभुवासुतं॥यावांसंतिपुरुस्पृ
होनियुतोदाशुषेनरा॥इंद्राग्नीताभिरागतं॥ताभिरागछतंनरोपेदंस
वनंसुतं॥इंद्राग्नीसोमपीतये॥तमीळिष्वयोअर्चिषावनाविश्वापरि
ष्वजत्॥कृष्णाकृणोतिजिह्वया॥यइद्धआविवासतिसुम्नमिंद्रस्य
मर्त्यः॥द्युम्नायसुतराअपः॥तानोवाजवतीरिषआशून्पिपृतमर्वतः॥
इंद्रमग्निंचवोळ्हवे॥उभावामिंद्राग्नीआहुवध्याउभाराधसःसहमा
दयध्यै॥उभादाताराविषांरयीणामुभावाजस्यसातयेहुवेवां॥आनो
गव्येभिरश्व्यैर्वसव्यैऽरुपगछतं॥सखायौदेवौसख्यायशंभुवेंद्रा
ग्नीताहवामहे॥इंद्राग्नीशृणुतंहवंयजमानस्यसुन्वतः॥वीतंहव्या

न्यागतं पिबतं सोम्यं मधु ॥२॥ इयमददाद्रभसमृणच्युतं दिवोदासं
वध्र्यश्वाय दाशुषे ॥ या शश्वंतमाचखादावसं पणिं ता ते दात्राणि तवि
षा सरस्वति ॥१॥ इयं शुष्मेभिर्बिसखा इवारुजत्सानु गिरीणां तविषेभि
रूर्मिभिः ॥ पारावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमा विवासेम धीति
भिः ॥ सरस्वति देवनिदो नि बर्हय प्रजां विश्वस्य बृसयस्य मायिनः ॥ उ
त क्षितिभ्यो वनीरविंदो विषमेभ्यो अस्रवो वाजिनीवति ॥ प्र णो देवी स
रस्वती वाजेभिर्वाजिनीवती ॥ धीनामवित्र्यवतु ॥ यस्त्वा देवि सरस्व
त्युप ब्रूते धने हिते ॥ इंद्रं न वृत्रतूर्ये ॥५॥ त्वं देवि सरस्वत्यवा वाजेषु वा
जिनि ॥ रदा पूषेव नः सनिं ॥ उत स्या नः सरस्वती घोरा हिरण्यवर्तनिः ॥
वृत्रघ्नी वष्टि सुष्टुतिं ॥ यस्या अनंतो अह्रुतस्त्वेषश्चरिष्णुरर्णवः ॥ अ

मश्चरति रोरुवत्॥सानोविश्वाअति द्विषःस्वसॄरन्याऋतावरी॥अ
तन्नहेवसूर्यः॥उतनःप्रियाप्रियासुसप्तस्वसासुजुष्टा॥सरस्वतीस्तोम्या
भूत्॥२१॥आपप्रुषीपार्थिवान्युरुरजोअंतरिक्षं॥सरस्वतीनिदस्पा
तु॥त्रिषधस्थासप्तधातुःपंचजातावर्द्धयंती॥वाजेवाजेहव्याभूत्॥
प्रयामहिम्नामहिनासुचेकितेद्युम्नेभिरन्याअपसामपस्तमा॥रथ
इवबृहतीविभ्वनेकृतोपस्तुत्याचिकितुषासरस्वती॥सरस्वत्यभि
नोनेषिवस्योमापस्फरीःपयसामानआधक्॥जुषस्वनःसख्या
वेश्याचमात्वत्क्षेत्राण्यरणानिगन्म॥ ७॥इतिचतुर्थाष्टकेअष्टमो
ध्यायः॥ ॥श्रीअमतलेश्वरार्पणमस्तु॥शुभंभवतु॥ ॥ ७५॥

संहितापंचमाष्टकप्रारंभः॥

सं॰पं॰
१

श्रीगणेशायनमः॥ हरिः ओम्॥ सावित्राणिजुहोतिप्रसूत्यैचतुर्गृहीतेनजुहोतिचतुःष्पादःपश
वःपशूनेवावरुंधेचतस्रोदिशोदिक्ष्वेवप्रतितिष्ठतिछंदाꣳसिदेवेभ्योपाक्रामन्नवोभागानिहव्यंव
क्ष्यामइतितेभ्यएतच्चतुर्गृहीतमधारयन्पुरोनुवाक्यायैयाज्यायैदेवतायैवषट्काराययच्चतुर्गृही
तंजुहोतिछंदाꣳस्येवतत्प्रीणातितान्यस्यप्रीतानिदेवेभ्योहव्यंवहंतियंकामयेत॥ १ ॥ पापीया
न्स्यादित्यैकैकंतस्यजुहुयादाहुतीभिरेवैनमपगृह्णातिपापीयान्भवतियंकामयेतवसीया
न्स्यादितिसर्वाणितस्यानुद्रुत्यजुहुयादाहुत्यैवैनमभिक्रमयतिवसीयान्भवत्यथोयज्ञस्यैवै
षाभिक्रांतिरेतिवाएषयज्ञमुखादृध्यायोग्नेर्देवतायाएत्यष्टावेतानिसावित्राणिभवंत्यष्टाक्ष
रागायत्रीगायत्रः॥ २ ॥ अग्निस्तेनैवयज्ञमुखादृध्याअग्नेर्देवतायैनैत्यष्टौसावित्राणि
भवंत्याहुतिर्नवमीत्रिवृतमेवयज्ञमुखेवियातयतियदिकामयेतछंदाꣳसियज्ञयशसेनार्प

राम
१

येयमित्यृचमंतमांकुर्याच्छंदांस्येवयज्ञयशसेनार्पयतियदिकामयेतयजमानंयज्ञयशसेना
र्पयेयमितियजुरंतमंकुर्याद्यजमानमेवयज्ञयशसेनार्पयत्यृचास्तोमं समर्धयेति॥ ३॥ आ
हसमृध्यैचतुर्भिरभ्रिमादत्तेचत्वारिछंदांसिछंदोभिरेवदेवस्यत्वासवितुःप्रसवइत्याहप्रसूत्या
अग्निर्देवेभ्योनिलायतसवेणुंप्राविशत्सएतामूतिमनुसमचरद्यद्वेणोःसुषिरंसुषिराभ्रिर्भव
तिसयोनित्वायसयत्रयत्रावसत्तत्कृष्णमभवत्कल्माषीभवतिरूपसमृध्याउभयतःक्ष्णुद्भवती
तश्चामुतश्चार्कस्यावरुध्यैव्याममात्रीभवत्येतावद्वैपुरुषेवीर्यंवीर्यसम्मितापरिमिताभवत्यपरि
मितस्यावरुध्यैयोवनस्पतीनांफलग्रहिःसएषांवीर्यावान्फलग्रहिर्वेणुर्वैणवीभवतिवीर्यस्या
वरुध्यै॥ ४॥ कामयेतगायत्र्योर्धयेतिवसमतविंशतिश्च॥ १॥ ॥ व्यृद्धंवाएतद्यज्ञस्ययदयजुष्के
णक्रियतइमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्तेयजुष्कृत्यैयज्ञस्यसमृध्यैप्रतूर्तंवा

सं·पं·
२

जिन्वाद्द्रवेत्यश्वमभिदधातिरूपमेवास्यैतन्महिमानंव्याचष्टेयुंजाथाꣳरासभंयुवमितिगर्द्दभमसत्ये
वगर्द्दभंप्रतिष्ठापयतितस्मादश्वाद्गर्द्दभोसत्तरोयोगेयोगेतवस्तरमित्याह॥ १ ॥ योगेयोगएवैनंयुं
क्तेवाजेवाजेहवामहइत्याहान्नंवैवाजोन्नमेवावरुंधेसखायइंद्रमूतयइत्याहेंद्रियमेवावरुंधेग्नि
र्देवेभ्योनिलायततंप्रजापतिरन्वविंदत्प्राजापत्योश्वोश्वेनसंभरत्यनुवित्त्यैपापवस्यसंवाएतत्क्रि
यतेयच्छ्रेयसानुपापीयसान्वेसमानंकर्मकुर्वतिपापीयान्॥ २ ॥ ह्यश्वाद्गर्द्दभोश्वंपूर्वंनयंतिपा
पवस्यसस्यव्यावृत्त्यैतस्माच्छ्रेयाꣳसंपापीयान्पश्चादन्वेतिबहुर्वैभवतोभ्रातृव्योभवतीवखलुवा
एषयोग्निंचिनुतेवज्र्यश्वःप्रतूर्वन्नेह्यवक्रामन्नशस्तीरित्याहवज्रेणैवपाप्मानंभ्रातृव्यमव
क्रामतिरुद्रस्यगाणपत्यादित्याहरौद्रावैपशवोरुद्रादेव॥ ३ ॥ पशून्निर्याच्यात्मनेकर्मकुरुतेपू
ष्णासयुजासहेत्याहपूषावाअध्वनाꣳसन्नेतासमष्ट्यैपुरीषायतनोवाएषयदग्निरंगिरसोवाए

राम
२

तमग्रेदेवतानाꣳसमभरत्पृथिव्याःसधस्थादग्निंपुरीष्यमंगिरस्वदच्छेहीत्याहसायतनमेवैनंदे
वताभिःसंभरत्यग्निंपुरीष्यमंगिरस्वदच्छेमइत्याहयेन॥ ४ ॥संगच्छतेवाजमेवास्यतद्वृंक्तेप्रजा
पतयेप्रतिप्रोच्याग्निःसंभृत्यइत्याहइयंवैप्रजापतिस्तस्याएतच्छ्रोत्रंयद्वल्मीकोग्निंपुरीष्यमं
गिरस्वद्भरिष्यामइतिवल्मीकवपामुपतिष्ठतेसाक्षादेवप्रजापतयेप्रतिप्रोच्याग्निꣳसंभरत्यग्निं
पुरीष्यमंगिरस्वद्भरामइत्याहयेनसंगच्छतेवाजमेवास्यतद्वृंक्तेन्वग्निरुषसामग्रं॥ ५ ॥अख्यदि
त्याहाख्यात्या आगत्यवाज्यध्वनआक्रम्यवाजिन्पृथिवीमित्याहेच्छत्येवैनंपूर्वयाविंदत्युत्त
रयाद्वाभ्यामाक्रमयतिप्रतिष्ठित्या अनुरूपाभ्यांतस्मादनुरूपाःपशवःप्रजायंतेद्यौस्तेपृष्ठं
पृथिवीसधस्थमित्याहैभ्योवाएतंलोकेभ्यःप्रजापतिःसमैरयद्रूपमेवास्यैतन्महिमानंव्याच
य ष्टेवज्रीवाएषयदश्वोदद्भिरन्यतोदतोभ्यन्यान्लोमभिरुभयादतोयंद्विष्यात्तमधस्पदंध्यायेद्वज्रे

णैवैनꣳस्तृणुते ॥ ६ ॥ आहपापीयान्रुद्राद्देवयेनाग्नंवज्रीवैसन्नदग्नान्व ॥ २ ॥ ॥ उत्क्रामोदक्रमीदिति
द्वाभ्यामुत्क्रमयतिप्रतिष्ठित्याअनुरूपाभ्यांतस्मादनुरूपाःपशवःप्रजायंतेपउपसृजतियत्रवाआ
पउपगच्छंतितदोषधयःप्रतितिष्ठंत्योषधीःप्रतितिष्ठंतीःपशवोनुप्रतितिष्ठंतिपशून्यज्ञोयज्ञंय
जमानोयजमानंप्रजास्तस्माद्पउपसृजतिप्रतिष्ठित्यैयदध्वर्युरनग्नावाहुतिंजुहुयादंधोध्व
र्युः ॥ १ ॥ स्याद्रक्षाꣳसियज्ञꣳहन्युर्हिरण्यमुपास्यजुहोत्यग्निवत्येवजुहोतिनांधोध्वर्युर्भवतिनय
ज्ञꣳरक्षाꣳसिघ्नंतिजिघर्म्यग्निंमनसाघृतेनेत्याहमनसाहिपुरुषोयज्ञमभिगच्छतिप्रतिक्ष्यंतंभु
वनानिविश्वेत्याहसर्वꣳह्येषप्रत्यङ्क्षेतिपृथुंतिरश्चावयसाबृहंतमित्याहाल्पोह्येषजातोमहान्
॥ २ ॥ भवतिव्यचिष्ठमन्नꣳरभसंविदानमित्याहान्नमेवास्मैस्वदयतिसर्वमस्मैस्वदतेयएवंवे
दात्वाजिघर्मिवचसाघृतेनेत्याहतस्माद्यत्पुरुषोमनसाभिगच्छतितद्वाचावदत्यरक्षसेत्याहरक्षसा

मपहत्यैमर्यश्रीस्पृहैद्वर्णोअग्निरित्याहापवितिमेवास्मिंदधात्यपवितिमान्भवतियएवं॥ ३॥
वेदमनसात्वैतामाप्तु ×य× मर्हतियामध्वर्युरनग्नावाहुतिंजुहोतिमनस्वतीभ्यांजुहोत्याहुत्यो।
रात्यैद्वाभ्यांप्रतिष्ठित्यैयज्ञमुखेयज्ञमुखेवैक्रियमाणेयज्ञꣳरक्षाꣳसिजिघाꣳसंत्येतर्हिखलु
वाएतद्यज्ञमुखंयर्ह्येनदाहुतिरश्नुतेपरिलिखतिरक्षसामपहत्यैतिस्रःपरिलिखतित्रिवृद्वा
अग्निर्यावानेवाग्निस्तस्माद्रक्षाꣳस्यपहंति॥ ४॥ गायत्रियापरिलिखतितेजोवैगायत्रीतेज
सैवैनंपरिगृह्णातित्रिष्टुभापरिलिखतींद्रियंवैत्रिष्टुगिंद्रियेणैवैनंपरिगृह्णात्यनुष्टुभापरिलि
खत्यनुष्टुप्सर्वाणिछंदाꣳसिपरिभूःपर्याप्त्यैमध्यतोनुष्टुभावाग्वाअनुष्टुप्तस्मान्मध्यतोवा
वावदामोगायत्रियाप्रथमयापरिलिखत्यथानुष्टुभाथत्रिष्टुभातेजोवैगायत्रीयज्ञोनुष्टुगिंद्रि
यंत्रिष्टुप्तेजसाचैवेंद्रियेणचोभयतोयज्ञंपरिगृह्णाति॥ ५॥ अंधोध्वर्युर्महान्भवतियएवꣳहे

तित्रिष्टुभातेजोवैगायत्रीत्रयोदशच॥३॥ ॥देवस्यत्वासवितुःप्रसवइतिखनतिप्रसूत्याअथोधूममे
वैतेनजनयतिज्योतिष्मंतंत्वाग्नेसुप्रतीकमित्याहज्योतिरेवैतेनजनयतिसोग्निर्जातःप्रजाःशुचा
र्पयत्तंदेवाअर्धर्चेनाशमयंछिवंप्रजाभ्योहिꣳसंतमित्याहप्रजाभ्यएवैनꣳशमयतिद्वाभ्यांखन
तिप्रतिष्ठित्याअपांपृष्ठमसीतिपुष्करपर्णमा॥१॥हरत्यपांवाएतत्पृष्ठंयत्पुष्करपर्णꣳरूपेणैवै
नदाहरतिपुष्करपर्णेनसंभरतियोनिर्वाअग्नेःपुष्करपर्णꣳसयोनिमेवाग्निꣳसंभरतिकृष्णाजि
नेनसंभरतियज्ञोवैकृष्णाजिनंयज्ञेनैवयज्ञꣳसंभरतियद्ग्राम्याणांपशूनांचर्मणासंभरेद्ग्राम्या
न्पशूञ्छुचार्पयेत्कृष्णाजिनेनसंभरत्यारण्यानेवपशून्॥२॥शुचार्पयतितस्मात्समावत्पशूनांप्र
जायमानानामारण्याःपशवःकनीयाꣳसःशुचाह्यृतालोमतःसंभरत्यतोह्यस्यमेध्यंकृष्णाजिनं
चपुष्करपर्णंचसꣳस्तृणातीयंवैकृष्णाजिनमसौपुष्करपर्णमाभ्यामेवैनमुभयतःपरिगृह्णात्यु

ग्निर्देवेभ्योनिलायततमथर्वान्वपश्यदथर्वात्वाप्रथमोनिरमंथदग्नइति ॥ ३ ॥ आह्वयएवैनमन्व
पश्यत्तेनैवैनꣳसंभरतित्वामग्नेपुष्करादधीत्याहपुष्करपर्णेह्येनमुपश्रितमविंदत्तमुत्वादध्यङ्ङृषि
रित्याहदध्यङ्वाआथर्वणस्तेजस्व्यासीत्तेजएवास्मिंदधातितमुत्वापाथ्योवृषेत्याहपूर्वमेवोदि
तमुत्तरेणाभिगृणाति ॥ ४ ॥ चतसृभिःसंभरतिचत्वारिछंदाꣳसिछंदोभिरेवगायत्रीभिर्ब्राह्मण
स्यगायत्रोहिब्राह्मणस्त्रिष्टुग्भीराजंन्यस्यत्रैष्टुभोहिराजंन्योयंकामयेतवसीयान्त्स्यादित्युभ
यीभिस्तस्यसंभरेत्तेजश्चैवास्माइंद्रियंचसमीचीदधात्यष्टाभिःसंभरत्यष्टाक्षरागायत्रीगायत्रो
ग्निर्यावानेवाग्निस्तꣳसंभरतिसीदहोतरित्याहदेवताएवास्मैसꣳसादयतिनिहोतेतिमनुष्या
न्त्सꣳसीदस्वेतिवयाꣳसिजनिष्वाहिजेन्योअग्रेअह्नामित्याहदेवमनुष्यानेवास्मैसꣳसन्नान्प्र
जनयति ॥ ५ ॥ एवपश्रूनितिगृणातिहोतरितिसप्तविꣳशतिश्च ॥ ४ ॥ ॥ क्रूरमिववाअस्याएतत्क

रोतियत्त्वन्न्युप्तउपसृजत्यापोवैशांताःशांताभिरेवास्यैशुचꣳशमयतिसंतेवायुर्मातरिश्वादधा
त्वित्याहप्राणोवैवायुःप्राणेनैवास्यैप्राणꣳसंदधातिसंतेवायुरित्याहतस्माद्वायुप्रच्युतादिवोवृ
ष्टिरीर्तेतस्मैचदेववषडस्त्व॥१॥तुभ्यमित्याहषड्वाऋतवऋतुष्वेववृष्टिंदधातितस्मात्सर्वानृतू
न्वर्षतियद्वषट्कुर्या×व×द्यातयामास्यवषट्कारस्याद्यन्नवषट्कुर्याद्रक्षाꣳसियज्ञꣳहन्युर्वडित्याह
परोक्षमेववषट्करोतिनास्ययातयामावषट्कारोभवतिनयज्ञꣳरक्षाꣳसिघ्नंतिसुजातोज्योतिषा
सहेत्यनुष्टुभोपनह्यत्यनुष्टुप्॥२॥सर्वाणिछंदाꣳसिछंदाꣳसिखलुवाअग्नेःप्रियातनूःप्रिय
यैवैनंतनुवापरिदधातिवेदुकोवासोभवतियएवंवेदवारुणोवाअग्निरुपनद्धउदुत्तिष्ठस्वध्वरोर्ध्व
ऊषुणऊतयइतिसावित्रीभ्यामुन्निष्ठतिसवितृप्रसूतएवास्योर्ध्वांवरुणमेनिमुत्सृजतिद्वाभ्यांप्र
तिष्ठित्यैसजातोगर्भोअसि॥३॥रोदस्योरित्याहेमेवैरोदसीतयोरेषगर्भोयदग्निस्तस्मादेवमा

हाग्नेर्वारुर्विकृतओषधीष्वित्याहयदाहैतंविभरंत्यथवारुतरोभवतिप्रमातृभ्योअधिकनिक्रद
ङ्गाइत्याहौषधयोवाअस्यमातरस्ताभ्यएवैनंप्रच्यावयतिस्थिरोभववीड्वंगइतिगर्दभआसाद
यति॥४॥सन्नह्यत्येवैनमेतयास्थेम्नेगर्दभेनसंभरतितस्माद्गर्दभः पशूनांभारभारितमोग
र्दभेनसंभरतितस्माद्गर्दभोप्यनालेशेत्यन्यान्पशून्मेद्यत्यन्नꣳह्येनेनार्कꣳसंभरतिगर्दभेनसं
भरतितस्माद्गर्दभोद्विरेताःसन्कनिष्ठंपशूनांप्रजायतेग्निर्ह्यस्ययोनिंनिर्दहतिप्रजासुवाएष
एतर्ह्यारूढः॥५॥सईश्वरःप्रजाःशुचाप्रदहःशिवोभवप्रजाभ्यइत्याहप्रजाभ्यएवैनꣳशमय
तिमानुषीभ्यस्त्वमंगिरइत्याहमानव्योहिप्रजामाद्यावापृथिवीअभिशूशुचोमांतरिक्षंमाव
नस्पतीनित्याहैभ्यएवैनंलोकेभ्यःशमयतिप्रैतुवाजीकनिक्रददित्याहवाजीह्येषनानदद्रास
भःपत्वेति॥६॥अहरासभइतिहैतमृषयोवदन्भरन्नग्निंपुरीष्यमित्याहाग्निꣳह्येषभरतिमा

सं·पं·
८

पाह्यायुषः पुरेत्याहायुरेवास्मिंदधातितस्माद्धर्दभः सर्वमायुरेतितस्माद्धर्दभेपुरायुषःप्रमीतेबि
भ्यतिवृषाग्निंवृषणंभरन्नित्याहवृषाह्येषवृषाग्निरपांगर्भे ॥ ७ ॥ समुद्रियमित्याहापांह्येष
गर्भोयदग्निरग्नआयाहिवीतयइतिवाइमौलोकौव्यैतामग्नआयाहिवीतयइतियदाहानयोर्लो
कयोर्वीत्यैप्रच्युतोवाएषआयतनादगतःप्रतिष्ठांसएतर्ह्यध्वर्युंचयजमानंचध्यायत्यृतंसत्य
मित्याहेयंवाऋतमसौ ॥ ८ ॥ सत्यमनयोरेवैनंप्रतिष्ठापयतिनार्तिमार्छत्यध्वर्युर्नयजमानोवरु
णोवाएषयजमानमभ्यैतियदग्निरुपनद्धओषधयःप्रतिगृह्णीताग्निमेतमित्याहशांत्यैव्यस्य
न्विश्वाअमतीररातीरित्याहरक्षसामपहत्यैनिषीदन्नोअपदुर्मतिंहनदित्याहप्रतिष्ठित्याओ
षधयःप्रतिमोदध्वं ॥ ९ ॥ एनमित्याहौषधयोवाअग्नेर्भागधेयंताभिरेवैनंसमर्धयतिपुष्पावतीः
सुपिप्पलाइत्याहतस्मादोषधयःफलंगृह्णंत्य ×अ× यंवोगर्भऋत्वियःप्रत्नंसधस्थमासददित्या

राम
६

हृयाभ्युएवैनंप्रच्यावयतितास्वेवैनंप्रतिष्ठापयतिद्वाभ्यामुपावहरतिप्रतिष्ठित्यै॥१०॥अस्त्वनुष्टु
बेसांसिदयत्यारूढःपत्वेतिगर्भमसौमोरध्वंद्धिवत्वारिꣳशाच्च॥५॥ ॥वारुणोवाअग्निरुपनद्धो
विपाजसेतिविस्रꣳसयतिसवितृप्रसूतएवास्यविषूचींवरुणमेनिंविसृजत्यपउपसृजत्यापोवै
शांताःशांताभिरेवास्यशुचꣳशमयतितिसृभिरुपसृजतित्रिवृद्धाअग्निर्यावानेवाग्निस्तस्य
शुचꣳशमयतिमित्रःसꣳसृज्यपृथिवीमित्याहमित्रोवैशिवोदेवानांतेनैव॥१॥एनꣳसꣳसृज
तिशांत्यैयद्ग्राम्याणांपात्राणांकपालैःसꣳसृजेद्ग्राम्याणिपात्राणिशुचार्पयेदर्मकपालैःसꣳ
सृजत्येतानिवाअनुपजीवनीयानितान्येवशुचार्पयतिशर्कराभिःसꣳसृजतिधृत्याअथोशंत्वा
याजलोमैःसꣳसृजत्येषावाअग्नेःप्रियातनूर्यदजाप्रिययैवैनंतनुवासꣳसृजत्यथोतेजसा
कृष्णाजिनस्यलोमभिःसं॥२॥सृजतियज्ञोवैकृष्णाजिनंयज्ञेनैवयज्ञꣳसꣳसृजतिरुद्राःसंभृ

त्वपृथिवीमित्याहैतावाएतंदेवताअग्रेसमभरंताभिरेवैनꣳसंभरतिमखस्यशिरोसीत्याहयज्ञोवैमख
स्तस्यैतच्छिरोयदुखातस्मादेवमाहयज्ञस्यपदेस्थइत्याहयज्ञस्यह्येते॥३॥पदेअथोप्रतिष्ठित्यैप्रां
न्याभिर्यच्छत्यन्वन्यैर्मंत्रयतेमिथुनत्वायत्र्युधिंकरोतित्रयइमेलोकाएषांलोकानामाप्त्यैछंदोभिःक
रोतिवीर्यंवैछंदाꣳसिवीर्येणैवैनांकरोतियजुषाबिलंकरोतिव्यावृत्त्याइयतींकरोतिप्रजापतिनाय
ज्ञमुखेनसंमितांद्विस्तनांकरोतिद्यावापृथिव्योर्दोहायचतुस्तनांकरोतिपशूनांदोहायाष्टास्तनां
करोतिछंदसांदोहायनवाश्रिमभिचरतःकुर्यात्त्रिवृतमेववज्रꣳसंभृत्यभ्रातृव्यायप्रहरतिस्तृत्यैकृ
त्वायसामहीमुखामितिनिदधातिदेवतास्वेवैनांप्रतिष्ठापयति॥४॥तेनैवलोमभिःसमेतेअभिच
रतएकविꣳशाभ्र॥६॥ ॥सप्तभिर्धूपयतिसप्तवैशीर्षण्याःप्राणाःशिरएतद्यज्ञस्ययदुखाशीर्षन्नेव
यज्ञस्यप्राणांदधातितस्मात्सप्तशीर्षन्प्राणाअश्वशकेनधूपयतिप्राजापत्योवाअश्वःसयोनित्वाया

श्र

दितिस्त्वेत्याहेयंवाअदितिरदित्यैवादित्यांखनत्यस्याअक्रूरंकारायनहिस्वस्वꣳहिनस्तिदेवानांत्वाप
त्नीरित्याहदेवानां॥१॥वाएतांपत्नयोग्रेकुर्वताभिरेवैनांदधातिधिषणास्त्वेत्याहविद्यावैधिषणावि
द्याभिरेवैनामभींधेग्नास्त्वेत्याहछंदाꣳसिवैग्नाश्छंदोभिरेवैनाꣳश्रपयतिवरूत्रयस्त्वेत्याहहोत्रा
वैवरूत्रयोहोत्राभिरेवैनांपचतिजनयस्त्वेत्याहदेवानांवैपत्नीः॥२॥जनयस्ताभिरेवैनांपचतिषड्भिः
पचतिषड्वाऋतवऋतुभिरेवैनांपचतिद्विःपचंत्वित्याहतस्माद्द्विःसंवत्सरस्यसस्यंपच्यतेवारुण्युखा
भीद्धामैत्रियोपैतिशांत्यैदेवस्त्वासवितोद्वपत्वित्याहसवितृप्रसूतएवैनांब्रह्मणादेवताभिरुद्वप
त्यपद्यमानापृथिव्याशादिशआपृण॥३॥इत्याहतस्मादग्निःसर्वादिशोनुविभात्युत्तिष्ठबृहती
भवोर्ध्वातिष्ठध्रुवात्वमित्याहप्रतिष्ठित्याअसुर्यंपात्रमनाछृण्णमाछृणत्तिदेवत्राकरजक्षीरेणा
छृणत्तिपरमंवाएतत्पयोयदजक्षीरंपरमेणैवैनांपयसाछृणत्तियजुषाव्यावृत्यैछंदोभिराछृणत्ति

छंदोभिर्वाएषाक्रियतेछंदोभिरेवछंदाꣳस्याछृणत्ति॥४॥आहृदेवानांवैपत्नीःपृणोषाषट्व॥७॥ ॥
एकविꣳशत्यामाषैःपुरुषशीर्षमच्छैत्यमेध्यावैमाषाअमेध्यंपुरुषशीर्षममेध्यैरेवास्यामेध्यन्निर
वदायमेध्यंकृत्वाहरत्येकविꣳशतिर्भवंत्येकविꣳशोवैपुरुषःपुरुषस्याप्त्यैव्यृद्धंवाएतत्प्राणैरमेध्यं
यत्पुरुषशीर्षꣳसप्तधावितृण्णांवल्मीकवपांप्रतिनिदधातिसप्तवैशीर्षण्याःप्राणाःप्राणैरेवैनत्स
मर्धयतिमेध्यत्वाययावंतः॥१॥वैमृत्युबंधवस्तेषांयमआधिपत्यंपरीयाययमगाथाभिःपरिगाय
तियमादेवैनद्वृङ्क्तेतिसृभिःपरिगायतित्रयइमेलोकाएभ्यएवैनल्लोकेभ्योवृंक्तेतस्माद्गायतेनदेयंगा
थाहितद्वृङ्क्तेग्निभ्यःपशूनालभतेकामावाअग्नयःकामानेवावरुंधेयत्पशून्नालभेतानवरुद्धाअस्य
॥२॥पशवस्युर्यत्पर्यग्निकृतानुत्सृजेद्यज्ञवेशसंकुर्याद्यत्सꣳस्थापयेद्यातयामानिशीर्षाणिस्युर्य
त्पशूनालभतेतेनैवपशूनवरुंधेयत्पर्यग्निकृतानुत्सृजतिशीर्ष्णामयातयामत्वायप्राजापत्येनसꣳस्था

पयतियज्ञोवैप्रजापतिर्यज्ञएवयज्ञंप्रतिष्ठापयतिप्रजापतिःप्रजाअसृजतसरिरिचानोमन्यतस
एताआप्रीरपश्यत्ताभिर्वैसमुखतः॥ ३ ॥आत्मानमाप्रीणीतयदेताआप्रियोभवंतियज्ञोवैप्रजाप
तिर्यज्ञमेवैताभिर्मुखतआप्रीणात्यपरिमितछंदसोभवंत्यपरिमितःप्रजापतिःप्रजापतेराप्त्याऊ
नातिरिक्तामिथुनाःप्रजात्यैलोमशंवैनामैतछंदःप्रजापतेःपशवोलोमशाःपशूनेवावरुंधेसर्वा
णिवाएतारूपाणिसर्वाणिरूपाण्यग्नौचित्येक्रियंतेतस्मादेताअग्नेश्चित्यस्य॥ ४ ॥भवंत्येकविं
शतिंसामिधेनीरन्वाहरुग्वाएकविंशोरुचमेवगच्छत्यथोप्रतिष्ठामेवप्रतिष्ठाह्येकविंशश्चतुर्विं
शतिमंन्वाहचतुर्विंशतिरर्धमासाःसंवत्सरःसंवत्सरोग्निर्वैश्वानरःसाक्षादेववैश्वानरमवरुंधे
पराचीरंन्वाहपराङिवहिसुवर्गोलोकःसमास्त्वाग्नऋतवोवर्धयंत्वित्याहसमाभिरेवाग्निंवर्धय
ति॥ ५ ॥ऋतुभिःसंवत्सरंविश्वाआभाहिप्रदिशःपृथिव्याइत्याहतस्मादग्निःसर्वादिशोनुविभा

सं·पं·
१

तिमत्यैहुतामश्विनामृत्युमस्मादित्याहमृत्युमेवास्मादपनुदत्युद्वयंतमसस्परीत्याहपाप्मावैतमःपा
प्मानमेवास्मादपहत्यगन्मज्योतिरुत्तममित्याहासौवाआदित्योज्योतिरुत्तममादित्यस्यैवसायुज्यं
गच्छतिनसंवत्सरस्तिष्ठतिनास्यश्रीस्तिष्ठतियस्यैताःक्रियंतेज्योतिष्मतीमुत्तमामन्वाहज्योतिरेवा
स्मादुपरिष्टाद्दधातिसुवर्गस्यलोकस्यानुख्यात्यै॥६॥ यावंतोस्यमुखतश्चित्यस्यवर्धेयत्यादि
त्योष्टाविꣳशतिश्च॥८॥ ॥षड्भिर्दीक्षयतिषड्वाऋतवऋतु[illegible]भिरेवैनंदीक्षयतिसप्तभिर्दीक्षयति
सप्तछंदाꣳसिछंदोभिरेवैनंदीक्षयतिविश्वेदेवस्यनेतुरित्यनुष्टुभोत्तमयाजुहोतिवाग्वाअनुष्टुप्
तस्मात्प्राणानांवागुत्तमैकस्मादक्षरादनाप्तंप्रथमंपदंतस्माद्यद्वाचोनाप्तंतन्मनुष्याउपजीवं
तिपूर्णयाजुहोतिपूर्णइवहिप्रजापतिः॥१॥प्रजापतेराप्त्यैन्यूनयाजुहोतिन्यूनाद्धिप्रजापतिःप्रजा
असृजतप्रजानाꣳसृष्टैयदर्चिषिप्रवृंज्याद्भूतमवरुंधीतयदंगारेषुभविष्यदंगारेषुप्रवृणक्तिभवि

राम्
१

ष्यदेवावरुंधेभविष्यद्धिभूयोभूताद्द्वाभ्यांप्रवृणक्तिद्विपाद्यजमानःप्रतिष्ठित्यैब्रह्मणावाएषाय
जुषासंभृतायदुखासायद्भिद्येतार्तिमार्छेत्॥ २॥ यजमानोहंन्येतास्ययज्ञोमित्रैतामुखांतपेत्याह
ब्रह्मवैमित्रोब्रह्मन्नेवैनांप्रतिष्ठापयतिनार्तिमार्छतियजमानोनास्ययज्ञोहंन्यतेयदिभिद्येततैरे
वकपालैःसꣳसृजेत्सैवततःप्रायश्चित्तिर्योगतश्रीस्यान्मथित्वातस्यावदध्याद्भूतोवाएषसस्वां॥३॥
देवतामुपैतियोभूतिकामस्याद्यउखायैसंभवेत्सएवतस्यस्यादतोह्येषसंभवत्येषवैस्वयंभूर्नामभ
वत्येवंयंकामयेतभ्रातृव्यमस्मैजनयेयमित्यन्यतस्तस्याहृत्यावदध्यात्साक्षादेवास्मैभ्रातृव्यंजन
यत्यबरीषादन्नकामस्यावदध्यादंबरीषेवाअन्नंभ्रियतेसयोन्येवान्नं॥ ४॥ अवरुंधेमुंजानवद
धात्यूर्ग्वैमुंजाऊर्जमेवास्माअपिदधात्यग्निर्देवेभ्योनिलायतसक्रुमुकंप्राविशत्क्रुमुकमवदधा
तियदेवास्यतत्रन्यक्तंतदेवावरुंधआज्येनसंयौत्येतद्वाअग्नेःप्रियधामयदाज्यंप्रियेणैवैनंधा

सं॰पं॰
१०

म्नासमर्धयत्यथोतेजसा॥ ५॥ वैकंकतीमादधातिभाएवावरुंधेशमीमयीमादधातिशांत्यैसीद
त्वंमातुरस्याउपस्थइतितिसृभिर्जातमुपतिष्ठतेत्रयइमेलोकाएष्वेवलोकेष्वाविदंगच्छत्यथोप्राण
नेवात्मंधत्ते॥ ६॥ प्रजापतिर्ऋच्छेत्स्वामेवान्नंतेजसाचतुस्त्रिꣳरात्रं॥ ७॥ ॥नहस्मवैपुराग्निरप
रशुवृक्णंदहतितदस्मैप्रयोगएवर्षिरस्वदयद्यदग्नेयानिकानिचेतिसमिधमादधात्यपरशुवृक्ण
मेवास्मैस्वदयतिसर्वमस्मैस्वदतेयएवंवेदौदुंबरीमादधात्यूर्ग्वाउदुंबरऊर्जमेवास्माअपिदधातिप्रजा
पतिरग्निमसृजततꣳसृष्टꣳरक्षाꣳसि॥ १॥ अजिघाꣳसन्त्सएतद्रक्षोघ्नमपश्यत्तेनवैसरक्षाꣳ
स्यपाहतयद्राक्षोघ्नंभवत्यग्नेरेवतेनजाताद्रक्षाꣳस्यपहंत्याश्वत्थीमादधात्यश्वत्थोवैवनस्प
तीनाꣳसपत्नसाहोविजित्यैवैकंकतीमादधातिभाएवावरुंधेशमीमयीमादधातिशांत्यैसꣳ
शितंमेब्रह्मोदेषांबाहूअतिरमित्युत्तमेऔदुंबरी॥ २॥ वाचयतिब्रह्मणैवक्षत्रꣳसꣳश्यतिद्व

राम
१०

त्रेणब्रह्मतस्माद्ब्राह्मणोराजंन्यवानत्यंन्यंब्राह्मणंतस्माद्राजंन्योब्राह्मणवानत्यंन्यꣳराजन्यं
मृत्युर्वाएषयदग्निरमृतꣳहिरण्यꣳरुक्ममंतरंप्रतिमुंचतेमृतमेवमृत्योरंतर्धत्तएकविꣳशतिनि
र्बाधोभवत्येकविꣳशतिर्वैदेवलोकाद्वादशमासाःपंचर्तवःस्त्रयइमेलोकाअसावादित्यः॥३॥
एकविꣳशएतावंतोवैदेवलोकास्तेभ्यएवभ्रातृव्यमंतरेतिनिर्बाधैर्वैदेवाअसुरान्निर्बाधेकुर्वत
तन्निर्बाधानांनिर्बाधत्वंनिर्बाधीभवतिभ्रातृव्यानेवनिर्बाधेकुरुतेसावित्रियाप्रतिमुंचतेप्रसू
त्यैनक्तोषासेत्युत्तरयाहोरात्राभ्यामेवैनमुद्यच्छतेदेवाअग्निंधारयंद्रविणोदाइत्याहप्राणावै
देवाद्रविणोदाअहोरात्राभ्यामेवैनमुद्यत्य॥४॥प्राणैर्दाधारासीनःप्रतिमुंचतेतस्मादासी
नाःप्रजाःप्रजायंतेकृष्णाजिनमुत्तरंतेजोवैहिरण्यंब्रह्मकृष्णाजिनंतेजसाचैवैनंब्रह्मणाचोभय
तःपरिगृह्णातिषडुद्यामꣳशिक्यंभवतिषड्वाऋतवऋतुभिरेवैनमुद्यच्छतेयद्द्वादशोद्यामꣳसंव

त्सरेणैवमौंजंभवत्यूर्ग्वैमुंजाऊर्जैवैनꣳसमर्धयतिसुपर्णोसिगरुत्मानित्यवेक्षतेरूपमेवास्यैतन्महिमा
नंव्याचष्टेदिवंगच्छसुवःपतेत्याहसुवर्गमेवैनंल्लोकंगमयति॥५॥रक्षाꣳस्योदुंबरीआदित्यउद्य
त्यसन्वतुर्विꣳशतिश्च॥१०॥ ॥समिद्धोअंजन्कृदरंमतीनांघृतमग्नेमधुमत्पिन्वमानः।वाजीवहन्वाजिनं
जातवेदोदेवानांवक्षिप्रियमासधस्थं।घृतेनांजन्त्संपथोदेवयानान्प्रजानन्वाज्यप्येतुदेवान्।अनुत्वा
सप्तेप्रदिशःसचंताꣳस्वधामस्मैयजमानायधेहि।ईड्यश्चासिवंद्यश्चवाजिन्नाशुश्चासिमेध्यश्चस
प्ते।अग्निष्ट्वा॥१॥देवैर्वसुभिःसजोषाःप्रीतंवह्निंवहतुजातवेदाः॥स्तीर्णंबर्हिःसुष्टरीमाजुषाणोरु
पृथुप्रथमानंपृथिव्यां।देवेभिर्युक्तमदितिःसजोषाःस्योनंकृण्वानासुवितेदधातु।एताउवःसुभगा
विश्वरूपाविपक्षोभिःश्रयमाणाउदातैः।ऋष्वाःसतीःकवषःशुंभमानाद्वारोदेवीःसुप्रायणाभवंतु।
अंतरामित्रावरुणाचरंतीमुखंयज्ञानामभिसंविदाने।उषासावां॥२॥सुहिरण्येसुशिल्पेऋतस्ययो

नोविहृसादयामि। प्रथमावाꣳसरथिनासुवर्णादेवौपश्यंतौभुवनानिविश्वा। अपिप्रयंचोदनावांमि
मानाहोताराज्योतिःप्रदिशादिशंता। आदित्यैर्नोभारतीवष्टुयज्ञꣳसरस्वतीसहरुद्रैर्नआवीत्। इडो
पहूतावसुभिःसजोषायज्ञन्नोदेवीरमृतेषुधत्त। त्वष्टावीरंदेवकामंजजानत्वष्टुरर्वाजायतआशुर
श्वः॥ ३॥ त्वष्टेदंविश्वंभुवनंजजानबहोःकर्तारमिहयक्षिहोतः। अश्वोघृतेनत्मन्यासमक्तउपदेवाꣳ
ऋतुशःपाथएतु। वनस्पतिर्देवलोकंप्रजानन्नग्निनाहव्याःस्वदितानिवक्षत्। प्रजापतेस्तपसावावृ
धानःसद्योजातोदधिषेयज्ञमग्ने। स्वाहाकृतेनहविषापुरोगायाहिसाध्याहविरदंतुदेवाः॥ ४॥ अग्नि
ष्वावामश्वोहिन्वत्वारिꣳशञ्च॥ ११॥ ॥ सावित्राणिव्यृध्यमुत्क्रामदेवस्यखनतिक्रूरंवारुणःसप्तभिरे
कविꣳशत्याषड्भिर्नहस्मसमिद्धोअंजन्नेकादश॥ ११॥ ॥ सावित्राण्युत्क्रामंक्रूरंवारुणःपुनश्चवसुर्न
हस्मनवपंचाशत्॥ ५९॥ ॥ हरिःओम्॥ विष्णुमुखावैदेवाश्छंदोभिरिमान्लोकाननपजेय्यमभ्यजय

सं·पं·
१२
पृथिवी

न्यद्विष्णुक्रमान्क्रमतेविष्णुरेवभूत्वायजमानश्छंदोभिरिमान्लोकाननपजय्यमभिजयतिविष्णोःक्रमो
स्यभिमातिहेत्याहगायत्रीवैत्रैष्टुभमंतरिक्षंजागतीद्यौरानुष्टुभीर्दिशश्छंदोभिरेवेमान्लोकान्यथा
पूर्वमभिजयतिप्रजापतिरग्निमसृजतसोस्मात्सृष्टः॥१॥पराङैत्तमेतयान्वैदक्रंददितितयावैसोग्नेः
प्रियंधामावारुंधयदेतामन्वाहाग्नेरेवैतयाप्रियंधामावरुंधईश्वरोवाएषपराङ्प्रदघोयोविष्णुक्रमान्क्र
मतेचतसृभिरावर्ततेचत्वारिछंदांसिछंदांसिखलुवाअग्नेःप्रियातनूःप्रियामेवास्यतनुवमभि
॥२॥पर्यावर्ततेदक्षिणापर्यावर्ततेस्वमेववीर्यमनुपर्यावर्ततेतस्माद्दक्षिणोर्धआत्मनोवीर्यावत्त
रोथोआदित्यस्यैवावृतमनुपर्यावर्ततेशुनःशेपमाजीगर्तिंवरुणोगृह्णात्सएतांवारुणीमपश्यत्त
यावैसआत्मानंवरुणपाशादमुंचद्वरुणोवाएतंगृह्णातियउखांप्रतिमुंचतउदुत्तमंवरुणपाशमस्म
दित्याहात्मानमेवैतया॥३॥वरुणपाशान्मुंचत्यात्वाहार्षमित्याहाह्येनंहरतिध्रुवस्तिष्ठाविचाच

राम
१२

लिरित्याहप्रतिष्ठित्यैविशस्त्वासर्वावांछंत्वित्याहविशैवैनꣳसमर्धयत्यस्मिन्राष्ट्रमधिश्रयेत्याहरा
ष्ट्रमेवास्मिंध्रुवमकर्यंकामयेतराष्ट्रꣳस्यादितितंमनसाध्यायेद्राष्ट्रमेवभवति॥४॥अग्रेबृहन्नुष
सामूर्ध्वोअस्थादित्याहाग्रमेवैनꣳसमानानांकरोतिनिर्जग्मिवांतमसइत्याहतमएवास्मादप
हंतिज्योतिषागादित्याहज्योतिरेवास्मिन्दधातिचतसृभिःसादयतिचत्वारिछंदाꣳसिछंदोभिरेवा
तिछंदसोत्तमयावर्ष्मवाएषाछंदसांयदतिछंदावर्ष्मैवैनꣳसमानानांकरोतिसद्वती॥५॥भवतिस
त्वमेवैनंगमयतिवात्सप्रेणोपतिष्ठतएतेनवैवत्सप्रीर्भालंदनोग्नेःप्रियंधामावारुंधाग्नेरेवैतेनप्रि
यंधामावरुंधएकादशंभवत्येकधैवयजमानेवीर्यंदधातिस्तोमेनवैदेवाअस्मिन्लोकआर्ध्नुवंछं
दोभिरमुष्मिन्स्तोमस्येवखलुवाएतद्रूपंयद्वात्सप्रंयद्वात्सप्रेणोपतिष्ठते॥६॥इममेवतेनलोकम
भिजयतियद्विष्णुक्रमान्क्रमतेमुमेवतैर्लोकमभिजयतिपूर्वेद्युःप्रक्रामत्युत्तरेद्युरुपतिष्ठतेतस्मा

द्योगेन्यासांप्रजानांमनःक्षेमेन्यासांतस्माद्यायावरःक्षेम्यस्येशेतस्माद्यायावरःक्षेम्यमध्यवस्यति
मुष्टीकरोतिवाचंयच्छतियज्ञस्यधृत्यै॥७॥स्पृष्टोअभ्यैतयाभवतिसद्वत्युपतिष्ठद्वितैचत्वारिꣳश
च्च॥१॥ ॥अन्नपतेन्नस्यनोदेहीत्याहाग्निर्वाअन्नपतिःसएवास्माअन्नंप्रयच्छत्यनमीवस्यशुष्मि
णइत्याहायक्ष्मस्येतिवावैतदाहप्रप्रदातारंतारिषऊर्जंनोधेहिद्विपदेचतुष्पदइत्याहाशिषमेवै
तामाशास्तउदुत्वाविश्वेदेवाइत्याहप्राणावैविश्वेदेवाः॥१॥प्राणैरेवैनमुद्यच्छतेग्नेभरंतुचित्तिभि
रित्याहयस्माएवैनंचित्तायोद्यच्छतेतेनैवैनꣳसमर्धयतिचतसृभिरासादयतिचत्वारिछंदाꣳसिछं
दोभिरेवातिछंदसोत्तमयावर्ष्मवाएषाछंदसांयदतिछंदावर्ष्मैवैनꣳसमानानांकरोतिसद्वतीभव
तिसत्वमेवैनंगमयतिप्रेदग्नेज्योतिष्मान्॥२॥याहीत्याहज्योतिरेवास्मिंदधातितनुवावाएष
हिनस्तियꣳहिनस्तिमाहिꣳसीस्तनुवाप्रजाइत्याहप्रजाभ्यएवैनꣳशमयतिरक्षाꣳसिवाएतद्यज्ञꣳ

सर्व्वंतेयदनउत्सर्जत्यकं ददित्यन्वाहरक्षसामपहत्याअनसावहंत्यपचितिमेवास्मिंदधातितस्मा
दनस्वीचरथीचातिथीनामपचिततमौ ॥३॥ अपचितिमान्भवतियएवंवेदसमिधाग्निंदुवस्यतेति
घृतानुषिक्तामवसितेसमिधमादधातियथातिथयआगतायसर्पिष्वदातिथ्यंक्रियतेतादृगेवतद्गा
यत्रियाब्राह्मणस्यगायत्रोहिब्राह्मणस्त्रिष्टुभाराजंन्यस्यत्रैष्टुभोहिराजंन्योप्सुभस्मप्रवेशयत्य
प्सुयोनिर्वाअग्निःस्वामेवैनंयोनिंगमयतितिसृभिःप्रवेशयतित्रिवृद्वै ॥४॥ अग्निर्यावानेवाग्निस्तं
प्रतिष्ठांगमयतिपरावाएषोग्निंवपतियोप्सुभस्मप्रवेशयतिज्योतिष्मतीभ्यामवदधातिज्योतिरेवा
स्मिन्दधातिद्वाभ्यांप्रतिष्ठित्यैपरावाएषप्रजांपशून्वपतियोप्सुभस्मप्रवेशयतिपुनरूर्जासहरय्ये
तिपुनरुदैतिप्रजामेवपशूनात्मंधत्तेपुनस्त्वादित्याः ॥५॥ रुद्रावसवःसमिंधतामित्याहैतावाएतंदे
वताऽग्नयेसमैंधतताभिरेवैनंसमिंधेबोधासबोधीत्युपतिष्ठतेबोधयत्येवैनंतस्मात्सुप्त्वाप्रजाःप्र

बुध्यंतेयथास्थानमुपतिष्ठतेतस्माद्यथास्थानंपशवः पुनरेत्योपतिष्ठंते॥६॥ वैविश्वेदेवाज्योतिष्मा
नपवित्ततमौत्रिवृद्वाआदित्याद्विचत्वारिꣳशच्च॥२॥ ॥यावतीवैपृथिवीतस्यैयमआधिपत्यंपरीया
ययोवैयमंदेवयजनमस्याअनिर्याच्याग्निंचिनुतेयमायैनꣳसचिनुतेपेतेत्यध्यवसाययतियम
मेवदेवयजनमस्यैनिर्याच्यात्मनेग्निंचिनुतइष्टयेणवाअस्याअनामृतमिच्छंतोनाविंदंतेदेवाए
तद्यजुरपश्यन्नपतातियदेतेनाध्यवसाययति॥१॥अनामृतएवाग्निंचिनुतउद्धंतियदेवास्याअमे
ध्यंतदपहत्यपोवोक्षतिशांत्यैसिकतानिवपत्येतद्वाअग्नेर्वैश्वानरस्यरूपꣳरूपेणैववैश्वानरमवरुंध
ऊषान्निवपतिपुष्टिर्वाएषाप्रजननंयदूषाः पुष्ट्यामेवप्रजननेग्निंचिनुतेथोसंज्ञानएवसंज्ञानꣳह्ये
तत्॥२॥पशूनांयदूषाद्यावापृथिवीसहास्तांतेवियतीअब्रूतामस्त्वेवनौसहयज्ञियमितियदमु
ष्याययज्ञियमासीत्तदस्यामदधात्तऊषाअभवन्यदस्यायज्ञियमासीत्तदमुष्यामदधात्तददश्चंद्रम

सिकृत्स्नमूषान्निवपन्नुदोध्यायेद्यावापृथिव्योरेवयज्ञियेग्निंचिनुतेयꣳसोअग्निरितिविश्वामित्रस्य
॥३॥ सूक्तंभवत्येतेनवैविश्वामित्रोग्नेःप्रियंधामावारुंधाग्नेरेवैतेनप्रियंधामावरुंधेछंदोभिर्वैदेवाः
सुवर्गन्लोकमायंश्चतस्रःप्राचीरुपदधातिचत्वारिछंदाꣳसिछंदोभिरेवतद्यजमानःसुवर्गन्लोकमे
तितेषाꣳसुवर्गन्लोकंयतांदिशःसमव्लीयंततेद्वेपुरस्तात्समीचीउपादधतद्वे॥४॥पश्चात्समीची
ताभिर्वैतेदिशोदृꣳहन्यद्द्वेपुरस्तात्समीचीउपदधातिद्वेपश्चात्समीचीदिशांविधृत्याअथोपशवो
वैछंदाꣳसिपशूनेवास्मैसमीचोदधात्यष्टावुपदधात्यष्टाक्षरागायत्रीगायत्रोग्निर्यावानेवाग्नि
स्तंचिनुतेष्टावुपदधात्यष्टाक्षरागायत्रीगायत्रीसुवर्गन्लोकमंजसावेदसुवर्गस्यलोकस्य॥५॥
प्रज्ञात्यैत्रयोदशलोकंपृणाउपदधात्येकविꣳशतिःसंपद्यंतेप्रतिष्ठावाएकविꣳशःप्रतिष्ठागार्ह
पत्यएकविꣳशस्यैवप्रतिष्ठांगार्हपत्यमनुप्रतितिष्ठतिप्रत्यग्निंचिक्यानस्तिष्ठतियएवंवेदपंचचि

सं॰पं॰
१५

तीकंचिन्वीतप्रथमंचिन्वानःपांक्तोयज्ञःपांक्ताःपशवोयज्ञमेवपशूनवरुंधेत्रिचितीकंचिन्वीतद्विती
यंचिन्वानस्त्रयइमेलोकाएष्वेवलोकेषु॥६॥प्रतितिष्ठत्येकचितीकंचिन्वीततृतीयंचिन्वानएकधावै
सुवर्गोलोकएकवृतैवसुवर्गंलोकमेतिपुरीषेणाभ्यूहतितस्मान्माꣳसेनास्थिछन्नंनदुश्चर्माभवति
यएवंवेदपंचचितयोभवंतिपंचभिःपुरीषैरभ्यूहतिदशसंपद्यंतेदशाक्षराविराडन्नंविराड्विराज्ये
वान्नाद्येप्रतितिष्ठति॥७॥ऊर्ध्ववसाययतिह्येतद्विश्वामित्रस्यादधतद्वैलोकस्यलोकेषुसप्तचत्वा
रिꣳशच्च॥३॥ ॥विवाएतौद्विषातेयश्चपुराग्निर्यश्चोखायाꣳसमितमितिचतसृभिःसन्निवपति
चत्वारिछंदाꣳसिछंदाꣳसिखलुवाअग्नेःप्रियातनूःप्रिययैवैनौतनुवासꣳशास्तिसमितमित्या
हतस्माद्ब्रह्मणाक्षत्रꣳसमेतियत्समन्युप्यविहरतितस्माद्ब्रह्मणाक्षत्रंव्येत्यृतुभिः॥१॥वाएतं
दीक्षयंतिसऋतुभिरेवविमुच्योमातेवपुत्रंपृथिवीपुरीष्यमित्याहर्तुभिरेवैनंदीक्षयित्वर्तुभिर्वि

राम
१५

मुंचतिवैश्वानर्याशिक्यमादत्तेस्वदयत्येवैनंनैर्ऋतीःकृष्णाः स्तिस्रःस्तुषपक्वाभवंतिनिर्ऋत्यैवाए
तद्भागधेयंयत्तुषानिर्ऋत्यैरूपंकृष्णꣳरूपेणैवनिर्ऋतिन्निरवदयतइमांदिशंयंत्येषा॥२॥वैनि
र्ऋत्यैदिक्स्वायामेवदिशिनिर्ऋतिन्निरवदयतेस्वकृतइरिणउपदधातिप्रदरेवैतद्धनिर्ऋत्याआयतनꣳ
स्वएवायतनेनिर्ऋतिन्निरवदयतेशिक्यमभ्युपदधातिनैर्ऋतोवैपाशःसाक्षादेवैनंनिर्ऋतिपाशा
न्मुंचतितिस्रउपदधातित्रेधाविहितोवैपुरुषोयावानेवपुरुषस्तस्मान्निर्ऋतिमवयजतेपराचीरूप
॥३॥दधातिपराचीमेवास्मान्निर्ऋतिंप्रणुदतेप्रतीक्षमायंतिनिर्ऋत्याअंतर्हित्यैमार्जयित्वोपति
ष्ठंतेमेध्यूत्वायगार्हपत्यमुपतिष्ठंतेनिर्ऋतिलोकएवचरित्वाम्रतादेवलोकमुपावर्त्ततएकयोपति
ष्ठंतएकधैवयजमानेवीर्यंदधातिनिवेशनःसंगमनोवसूनामित्याहप्रजावैपशवोवसुप्रजयैवैनं
पशुभिःसमर्धयंति॥४॥कृतुभिरेषापराचीरूपाष्टाचत्वारिꣳशाञ्ज॥४॥ ॥पुरुषमात्रेणविमिमीते

यज्ञेनवैपुरुषः संमितोयज्ञपरुषैवैनंविमिमीतेयावान्पुरुषऊर्ध्वबाहुस्तावान्भवत्येतावद्धिपुरुषेवी
र्यंवीर्येणैवैनंविमिमीतेपक्षीभवतिनह्यपक्षः पतितुमर्हत्यरत्निनापक्षौद्राघीयाꣳसौभवतस्तस्मा
त्पक्षप्रवयाꣳसिवयाꣳसिव्याममात्रौपक्षौचपुच्छंचभवत्येतावद्धिपुरुषेवीर्यं॥१॥वीर्यसम्मितोवेणु
नाविमिमीतआग्नेयोवैवेणुः सयोनित्वाययजुषायुनक्तियजुषाकृषतिव्याहृत्यैषड्गवेनकृषतिषड्वा
ऋतवऋतुभिरेवैनंकृषतियद्द्वादशगवेनसंवत्सरेणैवयवाअश्नरातिदाहादबिभेत्सैतद्द्विगुणमुपनय
त्श्लक्ष्णंवाश्लक्ष्णंवततोवाइमान्नात्यदहद्यच्छ्लक्ष्णंवाश्लक्ष्णंव॥२॥भवत्यस्याअनतिदाहायद्विगुणत्वाअ
ग्निमुद्यंतुमर्हतीत्याहुर्यच्छ्लक्ष्णंवाश्लक्ष्णंवभवत्यग्नेरुद्यत्याएतावंतोवैपशवोद्विपाश्चैवचतुष्पादश्चता
न्युत्सावउत्सृजेद्रुद्रायापिदध्याद्यद्दक्षिणापितृभ्योनिधुवेद्यत्प्रतीचीरक्षाꣳसिहन्युरुदीचउत्सृजत्ये
षावैदेवमनुष्याणाꣳशांतादिक्॥३॥तामेवैनाननुत्सृजत्यथोखल्विमांदिशमुत्सृजत्यसौवाआदि

त्यः प्राणः प्राणमेवैनाननूत्सृजति दक्षिणापर्यावर्त्तते स्वमेव वीर्यमनुपर्यावर्त्तते तस्माद्दक्षिणोर्धआ
त्मनोवीर्यावत्तरोथो आदित्यस्यैवावृतमनुपर्यावर्त्तते तस्मात्परांचः पशवो वितिष्ठंते प्रत्यंच आवर्त्त
न्ते तिस्रस्तिस्रः सीताः ॥ ४ ॥ कृषति त्रिवृतमेव यज्ञमुखे वियातयत्योषधीर्वपति ब्रह्मणान्नमवरुंधे
र्केर्कश्चीयते चतुर्दशभिर्वपति सप्तग्राम्या ओषधयः सप्तारण्या उभयीषामवरुध्या अन्नस्यान्न
स्य वपत्यन्नस्यान्नस्यावरुध्यै कृष्टे वपति कृष्टे ह्योषधयः प्रतितिष्ठंत्यनुसीतं वपति प्रजात्यै द्वादश
सु सीतासु वपति द्वादश मासाः संवत्सरः संवत्सरेणैवास्मा अन्नं पचति यदग्निश्चित् ॥ ५ ॥ अनव
रुद्धस्याश्नीयादवरुद्धेन व्यृध्येत ये वनस्पतीनां फलग्रहयस्तानिध्मेपि प्रोक्षेदनवरुद्धस्यावरुध्यै
दिग्भ्यो लोष्टान्त्समस्यति दिशामेव वीर्यमवरुध्य दिशां वीर्येग्निं चिनुते यं द्विष्याद्यत्र स स्यात्तस्यै दि
शो लोष्टमाहरेदिषमूर्जमहमित आदद इतीषमेवोर्जं तस्यै दिशोवरुंधे क्षोधुको भवति यस्तस्यां

सं॰पं॰
१७

दिशोभवत्युत्तरवेदिमुपवपत्युत्तरवेद्यांᳪह्यग्निश्चीयतेथोपशवोवाउत्तरवेदिःपशूनेवावरुंधेथोयज्ञ
परुषोनंतरित्यै॥६॥त्रुभवत्येतावद्वैपुरुषेवीर्यंयत्प्रष्टंबाह्वोःप्रष्टंवदिक्सीता अग्निर्देवविवृपंचविᳪशति
श्च॥५॥ ॥अग्नेतवश्रवोवयइतिसिकतानिवपत्येतद्वाअग्नेर्वैश्वानरस्यसूक्तᳪसूक्तेनैववैश्वानर
मवरुंधेषड्भिर्निवपतिषड्वाऋतवःसंवत्सरःसंवत्सरोग्निर्वैश्वानरःसाक्षादेववैश्वानरमवरुंधेस
मुद्रंवैनामैतच्छंदःसमुद्रमनुप्रजाःप्रजायंतेयदेतेनसिकतानिवपतिप्रजानांप्रजननायेंद्रः॥१॥
रथ वृत्रायवज्रंप्राहरत्सत्रेधाव्यभवत्स्फ्यस्तृतीयᳪस्तृतीयंयूपस्तृतीयंयेंतःशराअशीर्यंतताःशर्क
राअभवंतच्छर्कराणांᳪशर्करत्वंवज्रोवैशर्कराःपशुरग्निर्यच्छर्कराभिरग्निंपरिमिनोतिवज्रेणैवा
स्मैपशून्परिगृह्णातितस्माद्वज्रेणपशवःपरिगृहीतास्तस्मात्स्थेयानस्थेयसोनापहरतेत्रिसप्ता
भिःपशुकामस्य॥२॥परिमिनुयात्सप्तवैशीर्षण्याःप्राणाःप्राणाःपशवःप्राणैरेवास्मैपशून

राम्
१७

वरुंधेत्रिणवाभिर्भ्रातृव्यवतस्त्रिवृतमेववज्रꣳसंभृत्यभ्रातृव्यायप्रहरतिस्तृत्याअपरिमिताभिःप
रिमिनुयादपरिमितस्यावरुध्यैयंकामयेतापशुस्यादित्यपरिमित्यतस्यशर्कराःसिकताव्यूहेद
परिगृहीतएवास्यविषूचीनꣳरेतःपरासिंचत्यपशुरेवभवति॥३॥यंकामयेतपशुमान्त्स्यादिति
परिमित्यतस्यशार्कराःसिकताव्यूहेत्परिगृहीतएवास्मैसमीचीनꣳरेतःसिंचतिपशुमानेवभव
तिसौम्याव्यूहतिसोमोवैरेतोधारेतएवतद्दधातिगायत्रियाब्राह्मणस्यगायत्रोहिब्राह्मणस्त्रि
ष्टुभाराजंन्यस्यत्रैष्टुभोहिराजंन्यःशंयुंबार्हस्पत्यंमेधोनोपानमत्सोग्निंप्राविशत्॥४॥सोग्नेः
कृष्णोरूपंकृत्वोदायतसोश्वंप्राविशत्सोश्वस्यावांतरशफोभवद्यदश्वमाक्रमयतियएवमेधोश्वं
प्राविशत्तमेवावरुंधेप्रजापतिनाग्निश्चेतव्यइत्याहुःप्राजापत्योश्वोयदश्वमाक्रमयतिप्रजापति
नैवाग्निंचिनुतेपुष्करपर्णमुपदधातियोनिर्वाअग्नेःपुष्करपर्णꣳसयोनिमेवाग्निंचिनुतेपांपृष्ठम

सं·पं·
१८

सीत्युपदधात्यपांवाएतत्पृष्ठंयत्पुष्करपर्णꣳरूपेणैवैनदुपदधाति॥५॥इंद्रःपशुकामस्यभवत्यवि
शृत्सयोनिंविꣳशृतिश्च॥६॥ ॥ब्रह्मजज्ञानमितिरुक्ममुपदधातिब्रह्ममुखावैप्रजापतिःप्रजा
असृजतब्रह्ममुखाएवतत्प्रजायमानःसृजतेब्रह्मजज्ञानमित्याहतस्माद्ब्राह्मणोमुख्योमुख्यो
भवतियएवंवेदब्रह्मवादिनोवदं४ज४तिनपृथिव्यान्नांतरिक्षेनदिव्यग्निश्चैतव्यइतियत्पृथिव्यांवि
न्वीतपृथिवीꣳशुचार्पयेन्नौषधयोनवनस्पतयः॥१॥प्रजायेरन्यदंतरिक्षेविन्वीतांतरिक्षꣳशुचा
र्पयेन्नवयाꣳसिप्रजायेरन्यद्दिविविन्वीतदिवꣳशुचार्पयेन्नपर्जन्योवर्षेद्रुक्ममुपदधात्यमृतंवैहिर
ण्यममृतएवाग्निंविनुतेप्रजात्यैहिरण्मयंपुरुषमुपदधातियजमानलोकस्यविधृत्यैयदिष्टका
याआतृण्णमनूपदध्यात्पशूनांचयजमानस्यचप्राणमपिदध्याद्दक्षिणतः॥२॥प्रांचमुपदधा १८
तिदाधारयजमानलोकन्नपशूनांचयजमानस्यचप्राणमपिदधात्यथोखल्विष्टकायाआत राम

ण्णमन्नूपदधातिप्राणानामुत्सृष्ट्यैद्रप्सश्चस्कंदेत्यभिमृशतिहोत्रास्वेवैनंप्रतिष्ठापयतिस्रुचावु
पदधात्याज्यस्यपूर्णांकार्ष्मर्यमयींदध्नःपूर्णामौदुंबरीमियंवैकार्ष्मर्यमय्यसावौदुंबरीमेएवोप
धत्ते॥३॥तूष्णीमुपदधातिनहीमेयजुषाप्तुमर्हंतिदक्षिणांकार्ष्मर्यमयीमुत्तरामौदुंबरींस्मातद
स्याअसावुराज्यस्यपूर्णांकार्ष्मर्यमयीवज्रोवाआज्यंवज्रःकार्ष्मर्योवज्रेणैवयज्ञस्यदक्षिणतो
रक्षाꣳस्यश्न×पहंतिदध्नःपूर्णामौदुंबरींपशवोवैदध्यूर्गौदुंबरःपशुष्वेवोर्जंदधातिपूर्णेउपदधा
तिपूर्णएवैनं॥४॥अमुष्मिंल्लोकउपतिष्ठेतेविराज्यग्निश्चेतव्यइत्याहुःस्रुग्वैविराड्यत्स्रुचावुप
दधातिविराज्येवाग्निंचिनुतेयज्ञमुखेयज्ञमुखेवैक्रियमाणेयज्ञꣳरक्षाꣳसिजिघाꣳसंतियज्ञमु
खꣳरुक्मोयद्रुक्मंव्याघारयतियज्ञमुखादेवरक्षाꣳस्यपहंतिपंचभिर्व्याघारयतिपांक्तोयज्ञोया
वानेवयज्ञस्तस्माद्रक्षाꣳस्यपहत्यक्ष्णयाव्याघारयतितस्मादक्ष्णयापशवोंगानिप्रहरंतिप्रति

ष्ठित्यै ॥ ५ ॥ वनस्पतयोदक्षिणतोधत्तएनंतस्मादक्ष्णयापंचव ॥ ७ ॥ ॥ स्वयमातृण्णामुपदधाती
यंवैस्वयमातृण्णेमामेवोपधत्तेश्वमुपघ्रापयतिप्राणमेवास्यांदधात्यथोप्राजापत्योवाअश्वःप्र
जापतिनैवाग्निंचिनुतेप्रथमेष्टकोपधीयमानापशूनांचयजमानस्यचप्राणमपिदधातिस्वय
मातृण्णाभवतिप्राणानामुत्सृष्ट्याअथोसुवर्गस्यलोकस्यानुख्यात्याअग्नावग्निश्चेतव्यइत्या
हुरेषवै ॥ १ ॥ अग्निर्वैश्वानरोयद्ब्राह्मणस्तस्मैप्रथमामिष्टकांयजुष्कृतांप्रयच्छेत्तांब्राह्मणश्चोप
दध्यातामग्नावेवतदग्निंचिनुतईश्वरोवाएषआर्तिमार्तोर्योविद्वानिष्टकामुपदधातित्रीन्वरांद
द्यात्त्रयोवैप्राणाःप्राणानाꣳस्पृत्यैद्वावेवदेयौद्वौहिप्राणावेकएवदेयएकोहिप्राणःपशुः ॥ २ ॥
वाएषयदग्निर्नखलुवैपशवआयवसेरमंतेदूर्वेष्टकामुपदधातिपशूनांधृत्यैद्वाभ्यांप्रतिष्ठित्यै
कांडात्कांडात्प्ररोहंतीत्याहकांडेनकांडेनह्येषाप्रतितिष्ठत्येवानोदूर्वेप्रतनुसहस्रेणशतेनचे

स्याहसाहस्रः प्रजापतिः प्रजापतेराप्त्यैदेवलक्ष्मंवैत्र्यालिखितातामुत्तरलक्ष्माणंदेवाउपादधता
धरलक्ष्माणमसुरायं॥ ३॥ कामयेतवसीयान्त्स्यादित्युत्तरलक्ष्माणंतस्योपदध्याद्वसीयानेवभ
वतियंकामयेतपापीयान्त्स्यादित्यधरलक्ष्माणंतस्यो×त्तं×पदध्यादसुरयोनिमेवैनमनुपराभा
वयतिपापीयान्भवतित्र्यालिखिताभवतीमेवैलोकास्त्र्यालिखितेभ्यएवलोकेभ्योभ्रातृव्यमंत
रेत्यंगिरसः सुवर्गंल्लोकंयतः पुरोडाशः कूर्मोभूत्वानुप्रासर्पत्॥ ४॥ यत्कूर्ममुपदधातियथाक्षे
त्रविदंजसानयत्येवमेवैनंकूर्मः सुवर्गंल्लोकमंजसानयतिमेधोवाएषपशूनांयत्कूर्मोयत्कूर्ममु
पदधातिस्वमेवमेधंपश्यंतः पशवउपतिष्ठंतेश्मशानंवाएतत्क्रियतेयन्मृतानांपशूनाꣳशीर्षा
ण्युपधीयंतेयज्जीवंतंकूर्ममुपदधातितेनाश्मशानविद्वास्तव्योवाएषयत्॥ ५॥ कूर्मोमधुवा
ताऋतायतइतिदध्नामधुमिश्रेणाभ्यनक्तिस्वदयत्येवैनंग्राम्यंवाएतदन्नंयद्दध्यारण्यंमधुयद्

ध्नामधुमिश्रेणाभ्युनक्त्युभयस्यावरुध्यैमहीद्यौःपृथिवीचनइत्याहाभ्यामेवैनमुभयतःपरिगृह्णा
तिप्रांचमुपदधातिसुवर्गस्यलोकस्यसमष्ट्यैपुरस्तात्प्रत्यंचमुपदधातितस्मात् ॥६॥ पुरस्तात्प्रत्यंचः
पशवोमेध्यमुपतिष्ठंतेयोवाअपनाभिमग्निंचिनुतेयजमानस्यनाभिमनुप्रविशतिसएनमीश्वरो
हिꣳसितोरुलूखलमुपदधात्येषावाअग्नेर्नाभिःसनाभिमेवाग्निंचिनुतेहिꣳसायाऔदुंबरंभ
वत्यूर्ग्वाउदुंबरऊर्जमेवावरुंधेमध्यतउपदधातिमध्यतएवास्माऊर्जंदधातितस्मान्मध्यतऊर्जा
भुंजतइयद्भवतिप्रजापतिनायज्ञमुखेनसम्मितंवमहंत्यन्नमेवाकर्वैष्णव्यर्चोपदधातिविष्णुर्वै
यज्ञोवैष्णवावनस्पतयोयज्ञएवयज्ञंप्रतिष्ठापयति ॥७॥ एषवैपशुर्यमेनसर्पदेषयन्तस्मात्तस्मा
त्सप्तविंध्नातिश्व ॥८॥ ॥ एषांवाएतल्लोकानांज्योतिःसंभृतंयदुखायदुखामुपदधात्येभ्यएव
लोकेभ्योज्योतिरवरुंधेमध्यतउपदधातिमध्यतएवास्मैज्योतिर्दधातितस्मान्मध्यतोज्योति

रूपास्मैदृसिकताभिः पूरयत्येतद्वाअग्नेवैश्वानरस्यरूपꣳरूपेणैववैश्वानरमवरुंधेयंकामयेतक्षो
धुकस्यादित्यूनांतस्योप ॥१॥ दध्यात्क्षोधुकएवभवतियंकामयेतानुपदस्यदन्नमद्यादितिपूर्णां
तस्योपदध्यादनुपदस्यदेवान्नमत्तिसहस्रंवैप्रतिपुरुषः पशूनांयछतिसहस्रमन्येपशवोमध्ये
पुरुषशीर्षमुपदधातिसवीर्यत्वायोखायामपिदधातिप्रतिष्ठामेवैनद्गमयतिव्यृद्धंवाएतत्प्राणै
रमेध्यंयत्पुरुषशीर्षममृतंखलुवैप्राणाः ॥२॥ अमृतꣳहिरण्यंप्राणेषुहिरण्यशल्कान्प्रत्यस्य
तिप्रतिष्ठामेवैनद्गमयित्वाप्राणैः समर्धयतिदध्नामधुमिश्रेणपूरयतिमधव्योसानीतिशृता
तंक्येनमेध्यत्वायग्राम्यंवाएतदन्नंयद्दध्यारण्यंमधुयद्दध्नामधुमिश्रेणपूरयत्युभयस्यावरु
ध्यैपशुशीर्षाण्युपदधातिपशवोवैपशुशीर्षाणिपशूनेवावरुंधेयंकामयेतापशुःस्यादिति ॥३॥
विषूचीनानितस्योपदध्याद्विषूचएवास्मात्पशून्दधात्यपशुरेवभवतियंकामयेतपशुमान्स्या

सं·पं·
२१

दितिसमीचीनानितस्योपदध्यात्समीचएवास्मैपशून्दधातिपशुमानेवभवतिपुरस्तात्प्रतीचीनम
श्वस्योपदधातिपश्चात्प्राचीनमृषभस्यापशवोवाअन्येगोअश्वेभ्यःपशवोगोअश्वानेवास्मैस
मीचोदधात्येतावन्तोवैपशवः॥४॥ ॥द्विपादश्चचतुष्पादश्चतान्वाएतदग्नौप्रदधातियत्पशुशीर्षा
ण्युपदधात्यमुमारण्यमनुतेदिशामीत्याहग्राम्येभ्यएवपशुभ्यआरण्यान्पशूꣳछुचमनूत्सृज
तितस्मात्समावत्पशूनांप्रजायमानानामारण्याःपशवःकनीयाꣳसश्शुचाह्यृताःसर्पशीर्षमुपद
धातियैवसर्पेत्विषिस्तामेवावरुन्धे॥५॥यत्समीचीनंपशुशीर्षैरुपदध्याद्ग्राम्यान्पशून्दꣳशुकास्यु
र्यद्विषूचीनमारण्यान्यजुरेववदेदवतांत्विषिꣳरुन्धेयासर्पेनग्राम्यान्पशून्हिनस्तिनारण्यानथोख
लूपधेयमेवयदुपदधातितेननात्विषिमवरुन्धेयासर्पेयद्यजुर्वदतितेनशातं॥६॥ऊनांतस्योप
प्राणास्यादितिवैपशवोवरुन्धेचतुश्चत्वारिꣳशच्च॥१॥ ॥पशुर्वाएषयदग्निर्योनिःखलुवाएषाप

राम्
२१

ग्रोर्विक्रियतेयत्प्राचीनमैष्टकाद्यजुःक्रियतेरेतोपस्याअपस्याउपदधातियोनावेवरेतोदधातिपंचो
पदधातिपांक्ताःपशवःपशूनेवास्मैप्रजनयतिपंचदक्षिणतोवज्रोवाअपस्यावज्रेणैवयज्ञस्य
दक्षिणतोरक्षाꣳस्यपहंतिपंचपश्चात्॥१॥प्राचीरुपदधातिपश्चाद्वैप्राचीनꣳरेतोधीयतेपश्चादे
वास्मैप्राचीनꣳरेतोदधातिपंचपुरस्तात्प्रतीचीरुपदधातिपंचपश्चात्प्राचीस्तस्मात्प्राचीनꣳरेतोधीयते
प्रतीचीःप्रजाजायंतेपंचोत्तरतश्छंदस्याःपशवोवैछंदस्याःपशूनेवप्रजातान्त्स्वमायतनमभिपर्यूहतद्
यंवाअग्नेरतिदाहादबिभेत्तस्मैता॥२॥अपस्याअपश्यत्ताउपाधत्तततोवाइमान्नात्यदहद्यदपस्याउप
दधात्यस्याअनतिदाहायोवावेहयमदादित्सब्रह्मणान्नंयस्यैताउपधीयंतेयउचैनाएवंवेददितिप्राण
भृतउपदधातिरेतस्येवप्राणांदधातितस्माद्धदंन्प्राणन्पश्यंशृण्वन्पशुर्जायतेयंपुरः॥३॥भुवइति
पुरस्तादुपदधातिप्राणमेवैताभिर्दाधारायंदक्षिणाविश्वकर्मेतिदक्षिणतोमनएवैताभिर्दाधारायं

पश्चाद्विश्वव्यचाइतिपश्चाच्चक्षुरेवैताभिर्दाधारेदमुत्तरात्सुवरित्युत्तरतःश्रोत्रमेवैताभिर्दाधारेयमुपरि
मतिरित्युपरिष्टाद्वाचमेवैताभिर्दाधारदशदशोपदधातिसवीर्यत्वायाक्ष्णया॥४॥उपदधातितस्माद
क्ष्णयापशवोंगानिप्रहरंतिप्रतिष्ठित्यैयाःप्राचीस्ताभिर्वसिष्ठआर्ध्नोद्यादक्षिणाताभिर्भरद्वाजोयाःप्र
तीचीःस्ताभिर्विश्वामित्रोयाउदीचीस्ताभिर्जमदग्निर्याऊर्ध्वास्ताभिर्विश्वकर्मायएवमेतासामृद्धिंवे
दर्ध्नोत्येवयआसामेवंबंधुतांवेदबंधुमान्भवतियआसामेवंक्लृप्तिंवेदकल्पते॥५॥अस्मैयआसामेव
मायतनंवेदायतनवान्भवतियआसामेवंप्रतिष्ठांवेदप्रत्येवतिष्ठतिप्राणभृतउपधायसंयतउप
दधातिप्राणानेवास्मिंधित्वासंयद्भिःसंयच्छतितत्संयतांःसंयत्त्वमथोप्राणएवापानंदधातितस्मा
त्प्राणापानौसंचरतोविषूचीरुपदधातितस्माद्विष्वंचौप्राणापानौयद्वाअग्नेरसंयतं॥६॥असुवर्ग्य
मस्यतत्सुवर्ग्योग्निर्यत्संयतउपदधातिसमेवैनंयच्छतिसुवर्ग्यमेवाकरथविर्वयःकृतमयानामित्या

हृवयोग्निरेवायानवरुंधेयैर्वयाꣳसिसर्वतोवायुमतीर्भवंतितस्मादयꣳसर्वतःपवते॥ ७॥ पुश्चाद्देताः
पुरोक्ष्णायाकल्पतेसंयतुपंचत्रिꣳशाश्च॥१०॥ ॥ गायत्रीत्रिष्टुप्जगत्यनुष्टुक्पङ्क्त्यासह। बृहत्युष्णि
हाककुत्सूचीभिःशिम्यंतुत्वा। द्विपदायाश्चतुष्पदास्त्रिपदायाश्चषट्पदा। सच्छंदायाश्चविच्छंदाःसूची
भिःशिम्यंतुत्वा। महानाम्नीरेवतयोविश्वाआशाःप्रभूवरीः। मेघ्याविद्युतोवाचःसूचीभिःशिम्यं
तुत्वा। रजताहरिणीःसीसायुजोयुज्यंतेकर्मभिः। अश्वस्यवाजिनस्त्वचिसूचीभिःशिम्यंतुत्वा। ना
रीः॥ १॥तेपत्न्योलोमविचिन्वंतुमनीषया। देवानांपत्नीर्दिशःसूचीभिःशिम्यंतुत्वा। कुविदंगय
वमंतोयवंचिद्यथादांत्यनुपूर्वंवियूय। इहेहैषांकृणुतभोजनानियेबर्हिषोनमउक्तिंयजंति॥
॥२॥नारीस्त्रिꣳशाश्च॥११॥ ॥ कस्त्वाछ्यतिकस्त्वाविशास्तिकस्तेगात्राणिशिम्यति। कउतेशमिता
कविः। ऋतवस्तऋतुधापरुःशमितारोविशासतु। संवत्सरस्यधायसाशिमीभिःशिम्यंतुत्वा। दे

सं॰पं॰
२३

ब्यो अध्वर्युर्यवस्खाद्धंतुविवृशासतु। गात्रोपर्वशस्तेशिमाः कृण्वंतुशिम्यंतः। अर्धमासाः परूंषिवेमा
सा॑छ्यंतुशिम्यंतः। अहोरात्राणिमरु×णि×तोविलिष्टं॥१॥ सूदयंतुते। पृथिवीतेंतरिक्षेणवायुश्छि
द्रंभिषज्यतु। द्यौस्तेनक्षत्रैः सहरूपंकृणोतुसाधुया। शंतेपरेभ्योगात्रेभ्यः शमस्त्ववरेभ्यः। शमस्थभ्यो
मज्जभ्यः शम्वंततन्वेतुवत॥२॥ विलिष्टंत्रिंशाद्व॥१२॥ ॥विष्णुमुखाअन्नपतेयावतीवैविवेस्तुरु
षमात्रेणाग्नेतवृश्रवोवयाब्रह्मजज्ञानं स्वयमातृण्णामृषांवैपुरुषंगायत्रीकस्खाद्धादश॥१२॥ ॥
विष्णुमुखाअपर्वचितिमान्विवाअग्नेतवृश्रवोवयः स्वयमातृण्णाविषूचीनानिगायत्रीवृतुः षष्टिः॥६४
॥ ॥हरिः ओम्॥ उत्सन्नयज्ञोवाएषयदग्निः किंवाहेतस्यक्रियतेकिंवानयद्वैयज्ञस्यक्रियमाण
स्यांतर्यंतिप्रत्यग्निवाअस्यतदाश्विनीरुपदधात्यश्विनौवैदेवानांभिषजौताभ्यामेवास्मैभेषजंकु
रोतिपंचोपदधातिपांक्तोयज्ञोयावानेवयज्ञ। स्तस्मैभेषजंकरोत्यृतव्याउपदधात्यृतूनांकॢप्त्यै॥१॥

राम्
२३

पंचोपदधातिपंचवाऋतवोयावंतएवर्तवस्तान्कल्पयतिसमानप्रभृतयोभवंतिसमानोदर्कास्तस्मा
त्समानाऋतवएकेनपदेनव्यावर्ततेतस्मादृतवोव्यावर्ततेप्राणभृतउपदधात्यृतुष्वेवप्राणांदधा
तितस्मात्समानाःसंतऋतवोनजीर्यंत्यथोप्रजनयत्येवैनानेषवैवायुर्यत्प्राणोयदृतव्याउपधाय
प्राणभृतः॥२॥उपदधातितस्मात्सर्वानृतूननुवायुरावरीवर्तिवृष्टिसनीरुपदधातिवृष्टिमेवावरुंधे
यदेकधोपदध्यादेकमृतुंवर्षेदनुपरिहारंसादयतितस्मात्सर्वानृतून्वर्षतियत्प्राणभृतउपधाय
वृष्टिसनीरुपदधातितस्माद्वायुप्रच्युतादिवोवृष्टिरीर्तेपशवोवैवयस्यानानामनसःखलुवैपशवो
नानाव्रतास्तआपएवाभिसमनसः॥३॥यंकामयेतापशुःस्यादितिवयस्यास्तस्योपधायापस्याउप
दध्यादसंज्ञानमेवास्मैपशुभिःकरोत्यपशुरेवभवतियंकामयेतपशुमान्त्स्यादित्यपस्यास्तस्यो
पधायवयस्याउपदध्यात्संज्ञानमेवास्मैपशुभिःकरोतिपशुमानेवभवतिचतस्रःपुरस्तादुपदधा

सं॰पं॰
२४

तिनस्माद्बहुलारिन्नस्तुषोरूपाणिद्वस्तुक्केदूलुह्ले ॥ ४ ॥ मूर्धन्वतीर्भवंति तस्मात्पुरस्तान्मूर्धा पंचदक्षि
णायाꣳ श्रोण्यामुपदधाति पंचोत्तरस्यां तस्मात्पश्चाद्वर्षीयान्पुरस्तात्प्रवणः पशुर्बस्तोवयइतिद
क्षिणेꣳसउपदधाति वृष्णिर्वयइत्युत्तरेꣳसेविवम्प्रतिदधाति व्याघ्रोवयइतिदक्षिणेपक्षउपदधाति
सिꣳहोवयइत्युत्तरेपक्षयोरेववीर्यंदधाति पुरुषोवयइतिमध्ये तस्मात्पुरुषः पशूनामधिपतिः ॥५
॥ कृत्स्नाउपधायप्राणभृतः समनसः कृत्स्नेपुरुषोवयइतिपंचैव ॥१॥ ॥ इंद्राग्नी अव्यथमानामि
ति स्वयमातृण्णामुपदधातींद्राग्निभ्यांवाइमौलोकौविधृतावनयोर्लोकयोर्विधृत्याअधृतेववा
एषायन्मध्यमाचितिरंतरिक्षमिववाएषैंद्राग्नीइत्याहेंद्राग्नीवैदेवानामोजोभृतावोजसैवैनामं
तरिक्षेविनुतेधृत्यैस्वयमातृण्णामुपदधात्यंतरिक्षंवैस्वयमातृण्णांतरिक्षमेवापधत्तेश्वमुप ॥१॥
घ्रापयतिप्राणमेवास्यांदधात्यथोप्राजापत्योवाअश्वः प्रजापतिनैवाग्निंचिनुतेस्वयमातृ

राम
२४

ष्याभवतिप्राणानामुत्सृष्ट्याअथोसुवर्गस्यलोकस्यानुख्यात्यैदेवानांवैसुवर्गंल्लोकंयतांदिशः
द समव्लीयंततएतादिश्याअपश्यन्ताउपाधत्ततताभिर्वैतेदिशोदृꣳहंन्यदिश्याउपदधातिदिशांवि
धृत्यैदशप्राणभृतःपुरस्तादुप॥२॥दधातिनववैपुरुषेप्राणानाभिर्दशमीप्राणानेवपुरस्ताधत्ते
तस्मात्पुरस्तात्प्राणाज्योतिष्मतीमुत्तमामुपदधातितस्मात्प्राणानांवाग्ज्योतिरुत्तमादशोपदधा
त्ति तिदशाक्षराविराड्विराट्छंदसांज्योतिर्ज्योतिरेवपुरस्ताधत्तेतस्मात्पुरस्ताज्ज्योतिरुपास्महेछंदाꣳसि
पशुष्वाजिमयुस्तान्बृहत्युदजयत्तस्माद्बार्हताः॥३॥पशवउच्यंतेमाछंदइतिदक्षिणतउपद
धातितस्माद्दक्षिणावृतोमासाःपृथिवीछंदइतिपश्चात्प्रतिष्ठित्याअग्निर्देवतेत्युत्तरतओजोवा
अग्निरोजएवोत्तरतोधत्तेतस्मादुत्तरतोभिप्रयायीजयतिषट्त्रिꣳशत्संपद्यंतेषट्त्रिꣳशदक्षराबृह
तीबार्हताःपशवोबृहत्यैवास्मैपशूनवरुंधेबृहतीछंदसाꣳस्वाराज्यंपरीयाययस्यैताः॥४॥उप

धीयंतेगछतिस्वाराज्यꣳसप्तवालखिल्याःपुरस्तादुपदधातिसप्तपश्चात्सप्तवैशीर्षण्याःप्राणाद्वाववां
चौप्राणानाꣳसवीर्यत्वायमूर्धासिराडितिपुरस्तादुपदधातियंत्रीराडितिपश्चात्प्राणानेवास्मैसमी
चोदधाति॥५॥अश्वमुपपुरस्तादुपबार्हताएताःश्चतुस्त्रिꣳशद्राज्ञ॥२॥ ॥देवावैयद्यज्ञेकुर्वततदसु
राअकुर्वतंतेदेवाएताअक्ष्णयास्तोमीयाअपश्यन्ताअन्यथानूक्यान्यथोपादधततदसुरानान्ववायं
ततोदेवाअभवन्परासुरायदक्ष्णयास्तोमीयाअन्यथानूक्यान्यथोपदधातिभ्रातृव्याभिभूत्यैभवत्या
त्मनापरास्यभ्रातृव्योभवत्याशुस्त्रिवृदितिपुरस्तादुपदधातियज्ञमुखंवैत्रिवृत्॥१॥यज्ञमुखमेव
पुरस्ताद्वियातयतिव्योमसप्तदशइतिदक्षिणतोन्नंवैव्योमान्नꣳसप्तदशोन्नमेवदक्षिणतोधत्तेतन
स्माद्दक्षिणेनान्नमद्यतेधरुणएकविꣳशइतिपश्चात्प्रतिष्ठावाएकविꣳशःप्रतिष्ठित्यैभांतःपंचदश
इत्युत्तरतओजोवैभांतओजःपंचदशओजएवोत्तरतोधत्तेतस्मादुत्तरतोभिप्रयायीजयतिप्रत्

र्तिरष्टादशाइतिपुरस्तात्॥२॥ उपदधातित्रिवृद्वैत्रिवृतावग्निर्हर्वैयज्ञमुखेवियातयत्यभिवर्तःसविꣳशा
इतिदक्षिणतोन्नंवाअभिवर्तोन्नꣳसविꣳशोन्नमेवदक्षिणतोधत्तेतस्माद्दक्षिणेनान्नमद्यतेवर्चो
द्वाविꣳशाइतिपश्चाद्यद्द्विꣳशातिर्द्वैतेनविराजोयद्द्वेप्रतिष्ठातेनविराजोरेवाभिपूर्वमन्नाद्यम्प्रतिति
ष्ठतितपोनवदशाइत्युत्तरतस्तस्मात्सव्यः॥३॥ हस्तयोस्तपस्वितरोयोनिश्चतुर्विꣳशाइतिपुरस्ता
दुपदधातिचतुर्विꣳशात्यक्षरागायत्रीगायत्रीयज्ञमुखंयज्ञमुखमेवपुरस्ताद्वियातयतिगर्भाःपंच
विꣳशाइतिदक्षिणतोन्नंवैगर्भाअन्नंपंचविꣳशोन्नमेवदक्षिणतोधत्तेतस्माद्दक्षिणेनान्नमद्यत
ओजस्त्रिणवइतिपश्चादिमेवैलोकास्त्रिणवएष्वेवलोकेषुप्रतितिष्ठतिसंभरणस्त्रयोविꣳशाइ
ति॥४॥उत्तरतस्तस्मात्सव्योहस्तयोःसंभार्यतरक्रतुरेकत्रिꣳशाइतिपुरस्तादुपदधातिवाग्वैक्रतु
र्यज्ञमुखंवाग्यज्ञमुखमेवपुरस्ताद्वियातयतिब्रध्नस्यविष्टपंचतुस्त्रिꣳशाइतिदक्षिणतोसौवाआदि

त्योब्रध्नस्यविष्टपंब्रह्मवर्चसमेवदक्षिणतोधत्तेतस्माद्दक्षिणोर्धोब्रह्मवर्चसितरःप्रतिष्ठात्रयस्त्रिꣳ
शइतिपश्चात्प्रतिष्ठित्यैनाकःषट्त्रिꣳशइत्युत्तरतःसुवर्गोवैलोकोनाकःसुवर्गस्यलोकस्यसमष्ट्यै
॥५॥वैत्रिवृदितिपुरस्तात्सव्युःस्त्रयोविꣳशादितिसुवर्गोवैपंचत्र॥३॥ ॥अग्नेर्भागोसीतिपुरस्तादु
पदधातियज्ञमुखंवाअग्निर्यज्ञमुखंदीक्षायज्ञमुखंब्रह्मयज्ञमुखंत्रिवृद्यज्ञमुखमेवपुरस्ताद्वि
यातयतिनृचक्षसांभागोसीतिदक्षिणतःशुश्रुवाꣳसोवैनृचक्षसोन्नंधाताजातायैवास्माअन्न
मपिदधातितस्माज्जातोन्नमत्तिजनित्रꣳस्पृतꣳसप्तदशस्तोमइत्याहान्नंवैजनित्रं॥१॥अन्नꣳस
प्तदशोन्नमेवदक्षिणतोधत्तेतस्माद्दक्षिणेनान्नमद्यतेमित्रस्यभागोसीतिपश्चात्प्राणोवैमित्रोपानो
वरुणःप्राणापानावेवास्मिंदधातिदिवोवृष्टिर्वातास्पृताएकविꣳशस्तोमइत्याहप्रतिष्ठावाएकविꣳ
शःप्रतिष्ठित्याइंद्रस्यभागोसीत्युत्तरतओजोवाइंद्रओजोविष्णुरोजःक्षत्रमोजःपंचदशः॥२॥ओ

ज एवोत्तरतोधत्तेतस्मादुत्तरतोभिप्रयायीजयतिवसूनांभागोसीतिपुरस्तादुपदधातियज्ञमुखंवैवस
वोयज्ञमुखꣳरुद्रायज्ञमुखंचतुर्विꣳशोयज्ञमुखमेवपुरस्ताद्वियातयत्यादित्यानांभागोसीतिदक्षि
णतोन्नंवाआदित्याअन्नंमरुतोन्नंगर्भाअन्नंपंचविꣳशोन्नमेवदक्षिणतोधत्तेतस्माद्दक्षिणेनान्न
मद्यतेदित्यैभागः॥३॥असीतिपश्चात्प्रतिष्ठावाअदितिःप्रतिष्ठापूषाप्रतिष्ठात्रिणवःप्रतिष्ठित्यैदे
वस्यसवितुर्भागोसीत्युत्तरतोब्रह्मवैदेवःसविताब्रह्मबृहस्पतिर्ब्रह्मचतुष्टोमोब्रह्मवर्चसमेवोत्त
रतोधत्तेतस्मादुत्तरोर्धोब्रह्मवर्चसितरःसावित्रवतीभवतिप्रसूत्यैतस्माद्ब्राह्मणानामुदीचीस
निःप्रसूताधर्त्र श्चतुष्टोमइतिपुरस्तादुपदधातियज्ञमुखंवैधर्त्रः॥४॥यज्ञमुखंचतुष्टोमोयज्ञमु
खमेवपुरस्ताद्वियातयतियावानांभागोसीतिदक्षिणतोमासावैयावाअर्धमासाअयावास्तस्मा
द्दक्षिणावृतोमासाअन्नंवैयावाअन्नंप्रजाअन्नमेवदक्षिणतोधत्तेतस्माद्दक्षिणेनान्नमद्यतऋ

णांभागोसीतिपश्चात्प्रतिष्ठित्यैविश्वज्योतिषंचत्वारिꣳशादित्युत्तरतोनयोर्लोकयोः सवीर्यत्वायतस्मादि
मौलोकौसमावद्वीर्यौ ॥५॥ यस्यमुख्यवतीःपुरस्तादुपधीयंतेमुख्यएवभवत्यास्यमुख्योजायते
यस्यान्नवतीर्दक्षिणतोत्त्यन्नमास्यान्नादोजायतेयस्यप्रतिष्ठावतीः पश्चात्प्रत्येवतिष्ठतियस्यौ
जस्वतीरुत्तरतओजस्व्येवभवत्यास्यौजस्वीजायतेर्कोवाएषयदग्निस्तस्यैतदेवस्तोत्रमेतच्छस्त्रं
यदेषाविधा ॥६॥ विधीयतेर्कएवतदर्क्यमनुविधीयतेत्त्यन्नमास्यान्नादोजायतेयस्यैषाविधा
विधीयतेयउचैनामेवंवेदसृष्टीरुपदधातियथासृष्टमेवावरुंधेनवाइदंदिवाननक्तमासीदव्यावृत्तं
तेदेवाएताव्युष्टीरपश्यन्ताउपादधततोवाइदंव्यौछद्यस्यैताउपधीयंतेव्येवास्माउछत्यथोतम
एवापहते ॥७॥ वैज्ञानिर्त्रंपंचदशोदित्यैभागोवैधृत्रंःसमावद्वीर्यौविधाततोवाइदंचतुर्दशाव ॥८॥
अग्नेजातान्प्रणुदानःसपत्नानितिपुरस्तादुपदधातिजातानेवभ्रातृव्यान्प्रणुदतेसहसाजानिति

तिपश्चाज्जनिष्यमाणानेवप्रतिनुदते चतुश्चत्वारिꣳशस्तोमइतिदक्षिणतोब्रह्मवर्चसंवैचतुश्चत्वा
रिꣳशोब्रह्मवर्चसमेवदक्षिणतोधत्तेतस्माद्दक्षिणोर्धोब्रह्मवर्चसितरः षोडशस्तोमइत्युत्तरतओ
जोवैषोडशओजएवोत्तरतोधत्तेतस्मात् ॥१॥ उत्तरतोभिप्रयायीजयतिवज्रोवैचतुश्चत्वारिꣳशोवज्रःषो
डशोयदेते ×ओज× इष्टकेउपदधातिजाताꣳश्चैवजनिष्यमाणाꣳश्चभ्रातृव्यान्प्रणुद्यवज्रमनुप्रह
रतिस्तृत्येपुरीषवतींमध्यउपदधातिपुरीषंवैमध्यमात्मनःसात्मानमेवाग्निंचिनुतेसात्माअमुष्मिँल्लो
केभवतियएवंवेदैतावाअसपत्नानामेष्टकायस्यैताउपधीयन्ते ॥२॥ नास्यसपत्नोभवतिपशुर्वाए
षयदग्निर्विराडुत्तमायांचित्यामुपदधातिविराजमेवोत्तमांपशुषुदधातितस्मात्पशुमानुत्तमां
वाचंवदतिदशदशोपदधातिसवीर्यत्वायाक्ष्णयोपदधातितस्मादक्ष्णयापशवोङ्गानिप्रहरन्तिप्र
तिष्ठित्यैयानिवैछंदाꣳसिसुवर्ग्याण्यासंस्तैर्देवाःसुवर्गंल्लोकमायंतेनर्षयः ॥३॥ अश्राम्यंतेतपोत

प्यंततानितपसापश्यन्तेभ्यएताइष्टकानिरमिमतविश्वंछंदोवरिवश्छंदइतिताउपादधतताभिर्वैतेसु
वर्गंल्लोकमायन्यदेताइष्टकाउपदधातियान्येवछंदाꣳसिसुवर्ग्याणितैरेवयजमानःसुवर्गंल्लोक
मेतियज्ञेनवैप्रजापतिःप्रजाअसृजततास्तोमभागैरेवासृजतयत्॥४॥स्तोमभागाउपदधातिप्र
जाएवतद्यजमानःसृजतेबृहस्पतिर्वाएतद्यज्ञस्यतेजःसमभरद्यत्स्तोमभागायत्स्तोमभागाउपद
धातिसतेजसमेवाग्निंचिनुतेबृहस्पतिर्वाएतांयज्ञस्यप्रतिष्ठामपश्यद्यत्स्तोमभागायत्स्तोमभा
गाउपदधातियज्ञस्यप्रतिष्ठित्यैसप्तसप्तोपदधातिसवीर्यत्वायतिस्रोमध्येप्रतिष्ठित्यै॥५॥उत्तर
तोधत्तेतस्मादुपधीयतऋषयोसृजतयत्रिचत्वारिꣳशच्च॥५॥ ॥रश्मिरित्येवादित्यमसृजतप्रेतिरि
तिधर्ममन्वितिरितिदिवꣳसंधिरित्यंतरिक्षंप्रतिधिरितिपृथिवींविष्टंभइतिवृष्टिंप्रवेत्यहरनुवेतिरा
त्रिमुशिगितिवसून्प्रकेतइतिरुद्रान्त्सुदीतिरित्यादित्यानोजइतिपितॄꣳस्तन्तुरितिप्रजाःपृतनाषाडि

तिपश्रोत्रेवदित्योषधीरभिजिदसियुक्तग्रावा ॥१॥ इंद्रायत्वेंद्रंजिन्वेत्येवदक्षिणतोवज्रंपर्यौहदभिजित्यैताः
प्रजाअपप्राणाअसृजतता स्वधिपतिरसीत्येवप्राणमदधाद्यंतेत्यपानꣳसꣳसर्पइतिचक्षुर्वयोधाइ
तिश्रोत्रंताःप्रजाःप्राणतीरपानतीःपश्यंतीःशृण्वतीर्नमिथुनीअभवन्तासुत्रिवृदसीत्येवमिथुनम
दधात्ताःप्रजामिथुनी ॥२॥ भवंतीर्नप्राजायंतताःरोहोसिनीरोहोसीत्येवप्राजनयत्ताःप्रजाःप्रजा
तानप्रत्यतिष्ठंतावसुकोसिवेषश्रिरसिवस्यष्टिरꣳसꣳसीत्येवैषुलोकेषुप्रत्यस्थापयद्यदाहवसु
कोसिवेषश्रिरसिवस्यष्टिरसीतिप्रजाएवप्रजाताएषुलोकेषुप्रतिष्ठापयतिसात्मांतरिक्षꣳरोहति
सप्राणोमुष्मिँल्लोकेप्रतितिष्ठत्यव्यर्धुकःप्राणापानाभ्यांभवतियएवंवेद ॥३॥ युक्तग्रावाप्रजा
मिथुन्यंतरिक्षंसंद्वादशाच ॥६॥ ॥नाकसद्भिर्वैदेवाःसुवर्गंल्लोकमायंतन्नाकसदांनाकसत्वंयन्ना
कसदउपदधातिनाकसद्भिरेवतद्यजमानःसुवर्गंल्लोकमेतिसुवर्गोवैलोकोनाकोयस्यैताउपधी

सं·पं·
२९

यंतेनास्माअकंभवतियजमानायतनंवैनाकसदोयन्नाकसदउपदधात्यायतनमेवतद्यजमानः
कुरुतेपृष्ठानांवाएतत्तेजः संभृतंयन्नाकसदोयन्नाकसदः॥१॥उपदधातिपृष्ठानामेवतेजोवरुंधेपं
चचोडाउपदधात्यप्सरसएवैनमेताभूताअमुष्मिंल्लोकउपशेरेथोतनूपानीर्वैतायजमानस्ययं
द्विष्यात्तमुपदधध्यायेदेताभ्यएवैनंदेवताभ्यआवृश्चतिताजगार्तिमार्छत्युत्तरानाकसद्भ्यउपदधा
तियथाजायामानीयगृहेषुनिषादयतितादृगेवतत्॥२॥पश्चात्प्राचीमुत्तमामुपदधातितस्मात्प
श्चात्प्राचीपत्न्यन्वास्तेस्वयमातृण्णांचविकर्णींचोत्तमेउपदधातिप्राणोवैस्वयमातृण्णायुर्विकर्णीप्रा
णंचैवायुश्चप्राणानामुत्तमौधत्तेतस्मात्प्राणश्चायुश्चप्राणानामुत्तमौनान्यामुत्तरामिष्टकामु
पदध्याद्यदन्यामुत्तरामिष्टकामुपदध्यात्पशूनां॥३॥चयजमानस्यचप्राणंचायुश्चापिदध्यात्त
स्मान्नान्योत्तरेष्टकोपधेयास्वयमातृण्णामुपदधात्यसौवैस्वयमातृण्णाममेवोपधत्तेश्वमुपघ्रा

राम
२९

पयतिप्राणमेवास्यांदधात्यथोप्राजापत्योवाऽश्वः प्रजापतिनैवाग्निंचिनुतेस्वयमातृण्णाभवतिप्रा
णानामुत्सृष्ट्याअथोसुवर्गस्यलोकस्यानुख्यात्याएषावैदेवानांविक्रांतिर्यद्विकर्णीयद्विकर्णीमुपद
धातिदेवानामेवविक्रांतिमनुविक्रमतउत्तरतउपदधातितस्मादुत्तरतउपचारोऽग्निर्वायुमतीभ
वतिसमिद्ध्यै॥ ४॥ संभृतंयन्नाकसदोयन्नाकसदस्तत्पंचनामेषावैद्वाविंशतिश्च॥ ७॥ ॥ छंदांस्यु
पदधातिपशवोवैछंदांसिपशूनेवावरुंधेछंदांसिवैदेवानांवामंपशवोवाममेवपशूनवरुंधएतां
हवैयज्ञसेनश्चैत्रियायणश्चितिंविदांचकारतयावैसपशूनवारुंधयदेतामुपदधातिपशूनेवावरुंधे
गायत्रीःपुरस्तादुपदधातितेजोवैगायत्रीतेजएव॥ १॥ मुखतोधत्तेमूर्धन्वतीर्भवंतिमूर्धानमेवैनं
समानानांकरोतित्रिष्टुभउपदधातींद्रियंवैत्रिष्टुगिंद्रियमेवमध्यतोधत्तेजगतीरुपदधातिजागता
वैपशवःपशूनेवावरुंधेनुष्टुभउपदधातिप्राणावाऽनुष्टुप्प्राणानामुत्सृष्ट्यैबृहतीरुष्णिहाःपंक्ती

रक्षरपंक्तीरितिविषुरूपाणिच्छंदांꣳस्युपदधातिविषुरूपावैपशवःपशवः ॥२॥ छंदांꣳसिविषुरूपाण्ये
वपशूनवरुंधेविषुरूपमस्यगृहेदृश्यतेयस्यैताउपधीयंतेयउचैनाएवंवेदातिच्छंदसमुपदधात्यति
छंदावैसर्वाणिच्छंदांꣳसिसर्वेभिरेवैनंछंदोभिश्चिनुतेवर्ष्मवाएषाछंदसांयदतिछंदायदतिच्छंदसमु
पदधातिवर्ष्मैवैनꣳसमानानांकरोतिद्विपदाउपदधातिद्विपाद्यजमानःप्रतिष्ठित्यै ॥३॥ तेउएवप
शवःपशवोयजमानएकैव ॥४॥ ॥ सर्वाभ्योवैदेवताभ्योग्निश्चीयतेयत्सयुजोनोपदध्याद्देवताअ
स्याग्निंवृंजीरन्यत्सयुजउपदधात्यात्मनैवैनꣳसयुजंचिनुतेनाग्निनाव्यृध्यतेयोयथापुरुषःस्ना
वभिःसंततएवमेवैताभिरग्निःसंततोग्निनावैदेवाःसुवर्गंल्लोकमायन्ताअमूःकृत्तिकाअभवन्य
स्यैताउपधीयंतेसुवर्गमेव ॥१॥ लोकमेतिगच्छतिप्रकाशंचित्रमेवभवतिमंडलेष्टकाउपदधाती
मेवैलोकामंडलेष्टकाइमेखलुवैलोकादेवपुरादेवपुराएवप्रविशतिनार्तिमार्छत्यग्निंचिक्यानोबि

भृज्योतिषउपदधातीमानेवैताभिर्लोकांज्योतिष्मतः कुरुतेथोप्राणानेवैतायजमानस्यदाध्रत्येता
वैदेवताः सुवर्ग्याः स्ताएवान्वारभ्यसुवर्गन्लोकमेति ॥ २ ॥ सुवर्गमेवैताएवचत्वारिंच ॥ ९ ॥ ॥ वृष्टि
सनीरुपदधातिवृष्टिमेवावरुंधेयदेकधोपदध्यादेकमृतुंवर्षेदनुपरिहारꣳ सादयतितस्मात्सर्वानृ
तून्वर्षतिपुरोवातुसनिरसीत्याहैतद्वैवृष्ट्यैरूपꣳ रूपेणैववृष्टिमवरुंधेसंयानीभिर्वैदेवाइमान्लोका
न्त्समयुस्तत्संयानीनाꣳ संयानित्वंयत्संयानीरुपदधातियथाप्सुनावासंयात्येवं ॥ १ ॥ एवैताभि
र्यजमानइमान्लोकान्त्संयातिप्लवोवाएषोग्नेर्यत्संयानीर्यत्संयानीरुपदधातिप्लवमेवैतमग्नयउ
पदधात्युतयस्यैतासूपहितास्वापोग्निꣳ हरंत्यहुतएवास्याग्निरादित्येष्टकाउपदधात्यादित्यावा
एतंभूत्यैप्रतिनुदंतेयोलंभूत्यैसन्भूतिन्नप्राप्नोत्यादित्याः ॥ २ ॥ एवैनंभूतिंगमयंत्यसौवाएतस्या
दित्योरुचमादत्तेयोग्निंचित्वानरोचतेयदादित्येष्टकाउपदधात्यसावेवास्मिन्नादित्योरुचंदधाति

सं॰प॰
३१

थायेसौदेवानाꣳरोचतएवमेवैषमनुष्याणाꣳरोचतेघृतेष्टकाउपदधात्येतद्वाअग्नेःप्रियंधामयद्घृतं
प्रियेणैवैनंधाम्नासमर्धयति॥३॥अथोतेजसानुपरिहारꣳसादयत्यपरिवर्गमेवास्मिन्तेजोदधा
तिप्रजापतिरग्निमचिनुतसयत्रासाव्याध्यंतसएतायत्रोदाअपश्यत्ताउपाधत्तताभिर्वैसयत्राआ
त्मंनधत्तयद्यत्रोदाउपदधातियत्राएवतान्निर्यजमानआत्मंधत्तेपञ्चोपदधातिपांक्तःपुरुषोयावा
नेवपुरुषःस्तस्मिन्यत्रोदधाति॥४॥एवंआप्नोत्यादित्याअर्धयत्येकान्नपञ्चाशत्॥१०॥ ॥देवासु
राःसंयत्ताआसन्कनीयाꣳसोदेवाआसन्भूयाꣳसोसुरास्तेदेवाएताइष्टकाअपश्यन्ताउपादधत
भूयस्कृदसीत्येवभूयाꣳसोभवन्वनस्पतिभिरोषधीभिर्वरिवस्कृदसीतीमामजयन्प्राच्यसीतिप्रा
चींदिशमजयन्नूर्ध्वासीत्यमूमजयन्नंतरिक्षसदस्यंतरिक्षेसीदेत्यंतरिक्षमजयन्ततोदेवाअभ
वन्॥१॥परासुरायस्यैताउपधीयंतेभूयानेवभवत्यभीमांल्लोकांजयतिभवत्यात्मनापरास्यभ्रा

राम
३१

तृव्योभवत्यप्सुषदसिश्येनसदसीत्याहैतद्वाअग्नेरूपꣳस्वेनैवाग्निमवरुंधेपृथिव्यास्त्वाद्रविणेसा
दयामीत्याहेमानेवैतांल्लोकांद्रविणावतःकुरुतआयुष्याउपदधात्यायुरेव॥२॥अस्मिन्दधास्
न्नेयत्तेपरꣳहृन्नामेत्याहैतद्वाअग्नेःप्रियंधामप्रियमेवास्यधामोपाप्नोतितावेहिसꣳरभावहाइत्या
हव्यैवैनेनपरिधत्तेपांचजन्येष्वप्येध्यग्नइत्याहैषवाअग्निःपांचजन्योयःपंचचितीकस्तस्मादेवमा
हर्तव्याउपदधात्येतद्वाऋतूनांप्रियंधामयदृतव्याऋतूनामेवप्रियंधामावरुंधेसुमेकइत्याहसंवत्स
रोवैसुमेकःसंवत्सरस्यैवप्रियंधामोपाप्नोति॥३॥अन्नवन्नायुरेवर्तव्याउपषड्विꣳशतिश्च॥११॥ ॥
प्रजापतेरक्ष्यश्वयत्तत्परापतत्तदश्वोभवद्यदश्वयत्तदश्वस्याश्वत्वंतद्देवाअश्वमेधेनैवप्रत्यदधुरे
षवैप्रजापतिꣳसर्वंकरोतियोऽश्वमेधेनयजतेसर्वएवभवतिसर्वस्यवाएषाप्रायश्चित्तिःसर्वस्यभेष
जꣳसर्वंवाएतेनपाप्मानंदेवाअतरन्नपिवाएतेनब्रह्महत्यामतरन्त्सर्वंपाप्मानं॥१॥तरतिरंतति

सं·पं·
३२

ब्रह्महत्यांयोश्वमेधेनयजतेयउचैनमेवंवेदोत्तरंवैतत्प्रजापतेरक्ष्युच्छ्वयत्तस्मादश्वस्योत्तरतोवद्यंतिद
क्षिणतोन्येषांपशूनांवैतसःकटोभवत्यप्सुयोनिर्वाअश्वोप्सुजोवेतसःस्वएवैनंयोनौप्रतिष्ठापयति
चतुष्टोमस्तोमोभवतिसरड्वाअश्वस्यसक्थ्यावृहत्तद्देवाश्चतुष्टोमेनैवप्रत्यदधुर्यच्चतुष्टोमस्तोमो
भवत्यश्वस्यसर्वत्वाय॥२॥सर्वंपाप्मानमवहद्द्वादशच॥१२॥ ॥उत्सन्नयज्ञइंद्राग्नीदेवावाअक्ष्ण
यास्तोमीयाअग्नेर्भागोस्यग्नेजातान्रश्मिरितिनाकसद्भिःश्छंदाꣳसिसर्वाभ्योवृष्टिवनीर्देवासुराः
कनीयाꣳसःप्रजापतिरक्षिद्वादश॥१२॥ ॥उत्सन्नयज्ञोदेवावैयस्यमुख्यवतीर्नाकसद्भिरेवैतान्नि
रष्टाचत्वारिꣳशत्॥४८॥ ॥हरिःओम्॥देवासुराःसंयत्ताआसन्तेनव्यजयंतसएताइंद्रःस्तनूर
पश्यत्ताउपाधत्तताभिर्वैसतनुवमिंद्रियंवीर्यमात्मन्नधत्ततोदेवाअभवन्परासुरायदिंद्रतनूरु
पदधातितनुवमेवताभिरिंद्रियंवीर्यंयजमानआत्मंधत्तेथोसेंद्रमेवाग्निꣳसतनुंचिनुतेभवत्यात्म

राम
३२

नापरास्यभ्रातृव्यः॥१॥ भवतियज्ञोदेवेभ्योपाक्रामत्तमवरुधुन्नाशक्नुवंत एतायज्ञतनूरपश्यन्ता
उपादधतताभिर्वैतेयज्ञमवारुंधतयद्यज्ञतनूरुपदधातियज्ञमेवताभिर्यजमानोवरुंधेत्रयस्त्रिꣳ
शतमुपदधातित्रयस्त्रिꣳशद्वैदेवतादेवताएवावरुंधेथोसात्मानमेवाग्निꣳसतनुंचिनुतेसात्मामुष्मि
न्लोके॥२॥ भवतियएवंवेदज्योतिष्मतीरुपदधातिज्योतिरेवास्मिन्दधात्येताभिर्वाअग्निश्चितोज्व
लतिताभिरेवैनꣳसमिंधउभयोरस्मैलोकयोर्ज्योतिर्भवतिनक्षत्रेष्टकाउपदधात्येतानिवैदिवोज्योतीꣳ
षितान्येवावरुंधेसुकृतांवाएतानिज्योतीꣳषियन्नक्षत्राणितान्येवाप्नोत्यथोअनुकाशमेवैतानि॥३॥
ज्योतीꣳषिकुरुतेसुवर्गस्यलोकस्यानुख्यात्यैयत्सꣳस्पृष्टाउपदध्याद्वृष्ट्यैलोकमपिदध्यादवर्षुकः
पर्जन्यस्याद्यदसꣳस्पृष्टाउपदधातिवृष्ट्याएवलोकंकरोतिवर्षुकःपर्जन्योभवतिपुरस्तादन्याःप्रतीची
रुपदधातिपश्चादन्याःप्राचीस्तस्मात्प्राचीनानिचप्रतीचीनानिचनक्षत्राण्यावर्तंते॥४॥ भ्रातृव्या

लोकएवैतान्येकचत्वारिꣳशच्च॥१॥ ॥ऋतव्याउपदधात्यृतूनांकॢप्त्यैद्वंद्वमुपदधातितस्माद्द्वंद्वमृतवोधृते
वाएषायन्मध्यमाचितिरंतरिक्षमिववाएषाद्वंद्वमन्यासुचितीषूपदधातिचतस्रोमध्यायांधृत्याअंतःश्लेष
णंवाएताश्चितीनांयदृतव्यायदृतव्याउपदधातिचितीनांविधृत्याअवकामनूपदधात्येषावाअग्नेर्योनिः
सयोनिं॥१॥एताग्निंचिनुतउवाचहविश्वामित्रोददित्सब्रह्मणान्नंयस्यैताउपधीयांतैयउचैनाएवं
वेददितिसंवत्सरोवाएतंप्रतिष्ठायैनुदतेयोग्निंचित्वानप्रतितिष्ठतिपंचपूर्वाश्चितयोभवंत्यथषष्ठींचि
तिंचिनुतेषड्वाऋतवःसंवत्सरऋतुष्वेवसंवत्सरेप्रतितिष्ठत्येतावै॥२॥अधिपत्नीर्नामेष्टकायस्यैताउ
पधीयंतेधिपतिरेवसमानानांभवतियंद्विष्यात्तमुपदधध्यायेदेताभ्यएवैनंदेवताभ्यआवृश्चति
ताजगार्त्तिमार्छत्यंगिरसःसुवर्गंलोकंयतोयायज्ञस्यनिष्कृतिरासीत्तामृषिभ्यःप्रत्यौहंतद्धिरण्य
मभवद्यद्धिरण्यनाल्कैःप्रोक्षतियज्ञस्यनिष्कृत्याअथोभेषजमेवास्मैकरोति॥३॥अथोरूपेणैवैनꣳ

समर्धयत्यथोहिरण्यज्योतिषैवसुवर्गंल्लोकमेतिसाहस्रवताप्रोक्षतिसाहस्रःप्रजापतिःप्रजापतेरा
प्त्याइमामेअग्नइष्टकाधेनवःसंत्वित्याहधेनूरेवैनाःकुरुतेताएनंकामदुघाअमुत्रामुष्मिंल्लोकउ
पतिष्ठंते॥४॥सयोनिमेतावैकरोत्येकान्नचत्वारिंशच्च॥२॥ ॥रुद्रोवाएषयदग्निःसएतर्हिजातो
यर्हिसर्वश्चितःसयथावत्सोजातस्तनंप्रेप्सत्येवंवाएषएतर्हिभागधेयंप्रेप्सतितस्मैयदाहुतिंनजु
हुयादध्वर्युंचयजमानंचध्यायेच्छतरुद्रीयंजुहोतिभागधेयेनैवैनंशमयतिनार्तिमार्च्छत्यध्वर्युर्न
यजमानोयद्ग्राम्याणांपशूनां॥१॥पयसाजुहुयाद्ग्राम्यान्पशूंछुचार्पयेद्यदारण्यानामारण्यांज
र्तिलयवाग्वावाजुहुयाद्गवीधुकयवाग्वावानग्राम्यान्पशून्हिनस्तिनारण्यानथोखल्वाहुरनाहुतिर्वै
जर्तिलाश्चगवीधुकाश्चेत्यजक्षीरेणजुहोत्याग्नेयीवाएषायदजाआहुत्यैवजुहोतिनग्राम्यान्पशून्हि
नस्तिनारण्यानंगिरसःसुवर्गंल्लोकंयंतः॥२॥अजायांघर्मंप्रासिंचन्साशोचंतीपर्णंपराजिहीतसो१

सं·पं·
३४

ओर्कोन्नवत्तदर्कस्यार्कत्वमर्कपर्णेनजुहोतिसयोनित्वायोदुङ्ङिःष्ठंजुहोत्येषावैरुद्रस्यदिक्स्वायामेवदि
शिरुद्रन्निरवदयतेचरमायामिष्टकायांजुहोत्यंततएवरुद्रन्निरवदयतेत्रेधाविभक्तंजुहोतित्रयइमेलो
काइमानेवलोकान्समावद्वीर्यान्करोतीयत्यग्रेजुहोति॥३॥अथेयत्यथेयतित्रयइमेलोकाएभ्यएवैन
ल्लोकेभ्यःशमयतितिस्रउत्तराआहुतीर्जुहोतिषट्संपद्यंतेषड्वाऋतवऋतुभिरेवैनंशमयतियद
नुपरिक्रामंजुहुयादंतरवचारिणंरुद्रंकुर्यादथोखल्वाहुःकस्यांवाहदिशिरुद्रःकस्यांवेत्यनुपरि
क्राममेवहोतव्यमपरिवर्गमेवैनंशमयति॥४॥एतावैदेवताःसुवर्ग्यायाउत्तमास्तायजमानंवाचय
तितान्निरेवैनंसुवर्गंल्लोकंगमयतियंद्विष्यात्तस्यसंचरेपशूनांन्यस्येद्यःप्रथमःपशुरभितिष्ठतिस
आर्तिमार्छति॥५॥पशूनांयंतोग्रेजुहोत्यपरिवर्गमेवैनंशमयतित्रिःशाह्म॥३॥ ॥अश्मन्नूर्जमि
तिपरिषिंचतिमार्जयत्येवैनमथोतर्पयत्येवसएनंतृप्तोक्षुध्यन्नरोगन्नमुष्मिंल्लोकउपतिष्ठततदप्य

राम
३४

तिप्रजयापशुभिर्यएवंवेदतान्लदूषमूर्जंधत्तमरुतःसꣳरराणइत्याहान्नंवाऊर्गन्नंमरुतोन्नमेवावरुं
धेश्मꣳस्तेक्षुदमुंतेशुक्॥१॥ऋच्छतुयंद्विष्मइत्याहयमेवद्वेष्टितमस्यक्षुधाचशुचाचार्पयतित्रिःपरि
षिंचन्पर्येतित्रिवृद्वाअग्निर्यावानेवाग्निस्तस्यशुचꣳशमयतित्रिःपुनःपर्येतिषट्संपद्यंतेषड्वाऋत
वऋतुभिरेवास्यशुचꣳशमयत्यपांवाएतत्पुष्पंयद्वेतसोपां॥२॥शरोवकावेतसशाखयाचावका
भिश्चविकर्षत्यापोवैशांताःशांताभिरेवास्यशुचꣳशमयतियोवाअग्निंचि[illegible]तंप्रथमःपशुरधिक्रा
मतीश्वरोवैतꣳशुचाप्रदहोमंडूकेनविकर्षत्येषवैपशूनामनुपजीवनीयोनवाएषग्राम्येषुपशुषु
हितोनारण्येषुतमेवशुचार्पयत्यष्टाभिर्विकर्षति॥३॥अष्टाक्षरागायत्रीगायत्रोग्निर्यावानेवाग्नि
स्तस्यशुचꣳशमयतिपावकवतीभिरन्नंवैपावकोन्नेनैवास्यशुचꣳशमयतिमृत्युर्वाएषयदग्नि
र्ब्रह्मणएतद्रूपंयत्कृष्णाजिनंकार्ष्णीउपानहावुपमुंचतेब्रह्मणैवमृत्योरंतर्धत्तेंतर्मृत्योर्धत्तेंतरन्ना

सं·पं·
३५

घादित्याहुरन्यामुपमुंचतेन्यांनांतः॥४॥ एवमृत्योर्धृत्वेवान्नाद्यꣳरुंधेनमस्तेहरसेशोचिषइत्याह
नमस्कृत्यहिवसीयाꣳसमुपचरंत्यन्यंतेअस्मत्तपंतुहेतयइत्याहयमेवद्वेष्टितमस्यशुचार्पयतिपाव
कोअस्मभ्यꣳशिवोभवेत्याहान्नंवैपावकोन्नमेवावरुंधेद्वाभ्यामभिक्रामतिप्रतिष्ठित्याअपश्व्यवती
भ्याꣳशांत्यै॥५॥ शुम्वेतसोपामेष्टानिर्विकर्षतिनांतरेकान्नपंचाशच्च॥४॥ ॥नृषदेवडितिव्याघा
रयतिपंक्त्याहुत्यायज्ञमुखमारभतेक्ष्णयाव्याघारयतितस्मादक्ष्णयापशवोंगानिप्रतिष्ठित्यैय
द्वषट्कुर्याद्यातयामास्यवषट्कारस्याद्यन्नवषट्कुर्याद्रक्षाꣳसियज्ञꣳहन्युर्वडित्याहप×प्रहरंति×रोक्ष
मेववषट्करोतिनास्ययातयामावषट्कारोभवतिनयज्ञꣳरक्षाꣳसिघ्नंतिहुतादोवाअन्येदेवाः॥ १॥अ
हुतादोन्येतानग्निविद्देवोभयान्प्रीणातियेदेवादेवानामितिदध्नामधुमिश्रेणावोक्षतिहुतादश्चैवदेवा
नहुतादश्चयजमानःप्रीणातितेयजमानंप्रीणातिदध्नैवहुतादःप्रीणातिमधुषाहुतादोग्राम्यंवाएतद

राम्
३५

न्नंयद्दध्यारण्यंमधुयद्दध्नामधुमिश्रेणावोक्षत्युभयस्यावरुध्यैमुष्टिनावोक्षतिप्राजापत्यः॥२॥
वैमुष्टिःसयोनित्वायद्वाभ्यांप्रतिष्ठित्याअनुपरिचारमवोक्षत्यपरिवर्गमेवैनान्श्रीणातिदिवाएषप्रा
णैःप्रजयापशुभिर्ऋध्यतेयोऽग्निंचिन्वन्नधिक्रामतिप्राणदाअपानदाइत्याहप्राणानेवात्मन्धत्तेव
र्चोदावरिवोदाइत्याहप्रजावैवर्चःपशवोवरिवःप्रजामेवपशूनात्मन्धत्तइन्द्रोवृत्रमहन्तंवृत्रः॥३॥हतः
षोडशभिर्भोगैरसिनात्सएतामग्नयेनीकवतआहुतिमपश्यत्तामजुहोत्तस्याग्निरनीकवान्त्स्वेनभा
गधेयेनप्रीतःषोडशधावृत्रस्यभोगानप्यदहद्वैश्वकर्मणेनपाप्मनोनिरमुच्यतयदग्नयेनीकवतआ
हुतिंजुहोत्यग्निरेवास्यानीकवान्त्स्वेनभागधेयेनप्रीतःपाप्मानमपिदहतिवैश्वकर्मणेनपाप्मनो
निर्मुच्यतेयंकामयेतचिरंपाप्मनः॥४॥निर्मुच्येतेत्येकैकंतस्यजुहुयाच्चिरमेवपाप्मनोनिर्मुच्यते
यंकामयेतताजक्पाप्मनोनिर्मुच्येतेतिसर्वाणितस्यानुद्रुत्यजुहुयात्ताजगेवपाप्मनोनिर्मुच्यतेथोख

सं·पं·

३६ लुनानैवस्रुक्काभ्यांजुहोतिनानैवस्रुक्कयोर्वीर्यंदधात्यथोप्रतिष्ठित्यै॥५॥देवाःप्राजापत्यावृत्रश्चिरं
पाप्मनेश्वत्वात्रि॰शाद्ध॥५॥ ॥उदेनमुत्तरान्नयेतिसमिधआदधातित्यथाजनयतेवसंकरोतितां
हृग्वतत्तिस्रआदधातित्रिवृद्वाअग्निर्यावानेवाग्निस्तस्मैभागधेयंकरोत्यौदुंबरीर्भवंत्यूर्ग्वाउदुंब
रऊर्जमेवास्माअपिदधात्युदुत्वाविश्वेदेवाइत्याहप्राणावैविश्वेदेवाःप्राणैः॥१॥एवैनमुद्यछतेग्ने
भरंतुचित्तिभिरित्याहयस्माएवैनंचित्तायोद्यछतितेनैवैनं॰समर्धयतिपंचदिशोदैवीर्यज्ञमवंतुदेवी
रित्याहदिशोह्येषोनुप्रच्यवतेपामतिंदुर्मतिंबाधमानाइत्याहरक्षसामपहत्यैरायस्पोषेयज्ञपति
माभजंतीरित्याहपशवोवैरायस्पोषः॥२॥पशूनेवावरुंधेषड्भिर्हरतिषड्वाऋतवऋतुभिरेवैनं॰ह
रतिद्विःपरिगृह्यवतीभवतोरक्षसामपहत्यैसूर्यरश्मिर्हरिकेशःपुरस्तादित्याहप्रसूत्यैततःपावकाआ राम
शिषोनोजुषंतामित्याहान्नंवैपावकोन्नमेवावरुंधेदेवासुराःसंयत्ताआसंतेदेवाएतदप्रतिरथमपश्य ३६

न्तेनैवैतेप्रति॥३॥असुरानजयंतदप्रतिरथस्याप्रतिरथत्वंयदप्रतिरथंद्वितीयोहोतान्वाहाप्रत्येवते

नयजमानोभ्रातृव्यांजयत्यथोअनभिजितमेवाभिजयतिदशर्चंभवतिदशाक्षराविराड्विराडिमौलो
कौविधृतावनयोर्लोकयोर्विधृत्याअथोदशाक्षराविराडन्नंविराड्विराज्येवान्नाद्येप्रतितिष्ठत्यसदि
ववाअंतरिक्षमंतरिक्षमिवाग्नीध्रमाग्नीध्रे॥४॥अश्मानंनिदधातिसत्वायदृढाभ्यांप्रतिष्ठित्यैविमा
नएषदिवोमध्यआस्तइत्याहव्येवैतयामिमीतेमध्येदिवोनिहितःपृश्निरश्मेत्याहान्नंवैपृश्न्यन्नमेवा
वरुंधेचतसृभिरापुछादेतिचत्वारिछंदाꣳसिछंदोभिरेवेदंविश्वाअवीवृधन्नित्याहवृद्धिमेवोपावर्तते
वाजानाꣳसत्पतिंपतिं॥५॥इत्याहान्नंवैवाजोन्नमेवावरुंधेसुम्नहूर्यज्ञोदेवाꣳआचवक्षदित्याहप्र
जावैपशवःसुम्नंप्रजामेवपशूनात्मंधत्तेयक्षदग्निर्देवोदेवाꣳआचवक्षदित्याहस्वगाकृत्यैवाजस्य
माप्रसवेनोद्ग्राभेणोदग्रभीदित्याहासौवाआदित्यउद्यन्नुद्ग्राभएषनिम्रोचंनिग्राभोब्रह्मणैवात्मा

सं·पं·
३७

नमुद्वहत्याति ब्रह्मणा भ्रातृव्यन्निर्दहति ॥ ६ ॥ प्राणेः पोषौऽसृत्याग्नीध्रे पतिमिषदन्नाव ॥ ६ ॥ ॥ प्राची
मनुप्र दिशं प्रेहि विद्वानित्याह देवलोकमेवैतयोपावर्तते क्रमध्वमग्निना नाकमित्याहेमानेवैतया लो
कान्क्रमते पृथिव्या अहमुदंतरिक्षमारुहमित्याहेमानेवैतयाल्लोकान्समारोहति सुवर्यंतो नापेक्षंत
इत्याह सुवर्गमेवैतया लोकमेत्यग्ने प्रेहि ॥ १ ॥ प्रथमो देवयतामित्याहोभयेष्वेवैतया देवमनुष्येषु चक्षु
र्दधाति पंचभिरधि क्रामति पांक्तो यज्ञो यावानेव यज्ञस्तेन सह सुवर्गंल्लोकमेति नक्तोषासेति पुरो
नुवाक्यामन्वाह प्रत्त्या अग्ने सहस्राक्षेत्याह साहस्रः प्रजापतिः प्रजापतेराप्त्यै तस्मै ते विधेम वाजा
य स्वाहेत्याहान्नं वै वाजोऽन्नमेवाव ॥ २ ॥ रुंधे दध्नः पूर्णामौदुंबरीं स्वयमातृण्णायां जुहोत्यूर्ग्वै द
ध्यूर्गुदुंबरोऽसौ स्वयमातृण्णामुष्यामेवोर्जं दधाति तस्मादमुतोऽर्वाचीमूर्जमुपजीवामस्तिसृभिः
सादयति त्रिवृद्वा अग्निर्यावानेवाग्निस्तं प्रतिष्ठां गमयति प्रेद्धो अग्ने दीदिहि पुरो न इत्यौदुंबरीमाद

रामू
३७

धात्येषावैसूर्मीकर्णकावत्येतयाहस्म ॥ ३ ॥ वैदेवाअसुराणाꣳशततर्हाꣳस्तृꣳहंतियदेतयासमिध
मादधातिवज्रमेवैतच्छतघ्नींयजमानोभ्रातृव्यायप्रहरतिस्तृत्याअछंबट्कारंविधेमतेपरमेजन्म
न्नग्नइतिवैकंकतीमादधातिभाएवावरुंधेताꣳसवितुर्वरेण्यस्यचित्रामितिशमीमयीꣳशांत्याअ
ग्निर्वाहवाअग्निचितंदुदुहेग्निर्विद्वाग्निंदुदुहेतं ॥ ४ ॥ सवितुर्वरेण्यस्यचित्रामित्याहेषवाअग्नेर्दोह
स्तमस्यकण्वएवश्रायसोवेत्तेनहस्मैनꣳसंदुहेयदेतयासमिधमादधात्यग्निविदेवतदग्निंदुहेस
प्ततेअग्नेसमिधःसप्तजिह्वाइत्याहसप्तैवास्यसाप्तानिप्रीणातिपूर्णयाजुहोतिपूर्णइवहिप्रजा
पतिःप्रजापतेः ॥ ५ ॥ आप्त्यैन्यूनयाजुहोतिन्यूनाद्धिप्रजापतिःप्रजाअसृजतप्रजानाꣳसृष्ट्याअग्नि
र्देवेभ्योनिलायतसदिशोनुप्राविशज्जुह्वन्मनसादिशोध्यायेद्दिग्भ्यएवैनमवरुंधेदध्नापुरस्ताज्जु
होत्याज्येनोपरिष्टात्तेजश्चैवास्माइंद्रियंचसमीचीदधातिद्वादशकपालोवैश्वानरोभवतिद्वादशमा

सं॰पं॰
३८

सा: संवत्सर: संवत्सरोग्निर्वैश्वानर: साक्षात् ॥ ६ ॥ एववैश्वानरमवरुंधेयत्प्रयाजानूयाजान्कुर्याद्वि
कस्तिः सायज्ञस्यदर्विहोमंकरोतियज्ञस्यप्रतिष्ठित्यैराष्ट्रंवैवैश्वानरोविण्मरुतोवैश्वानरꣳहुत्वामारु
तांज्जुहोतिराष्ट्रएवविशमनुबध्नात्युच्चैर्वैश्वानरस्याश्रावयत्युपाꣳशुमारुतांज्जुहोतितस्माद्राष्ट्रंविश
मतिवदतिमारुताभवंतिमरुतोवैदेवानांविशोदेवविशेनैवास्मैमनुष्यविशमवरुंधेसप्तभवंतिस
प्तगणावैमरुतोगणशएवविशमवरुंधेगणेनगणमनुद्रुत्यजुहोतिविशमेवास्माअनुवर्त्मानंक
रोति ॥ ७ ॥ अग्नेप्रेह्यथवस्मद्दुहएतान्प्रजापतेः साक्षान्मनुष्यविशमेकविꣳशतिश्च ॥ ८ ॥ ॥ वसोर्धारां
जुहोतिवसोर्मेधारासदितिवाएषाह्वयतेघृतस्यवाएनमेषाधारामुष्मिन्लोकेपिन्वमानोपतिष्ठत
आज्येनजुहोतितेजोवाआज्यंतेजोवसोर्धारातेजसैवास्मैतेजोवरुंधेयोकामावैवसोर्धाराकामाने
वावरुंधेयंकामयेतप्राणानस्यान्नाद्यंवि ॥ १ ॥ च्छिंद्यामितिविग्राहंतस्यजुहुयात्प्राणानेवास्यान्ना

राम
३८

द्यंविछिन्नत्तियंकामयेतप्राणानस्यान्नाद्यꣳसंतनुयामितिसंततांतस्यजुहुयात्प्राणानेवास्यान्नाद्यꣳ
संतनोतिद्वादशद्वादशानिजुहोतिद्वादशमासाः संवत्सरः संवत्सरेणैवास्मा अन्नमवरुंधेन्नंचमेक्षु
श्चमइत्याहैतद्वै॥२॥अन्नस्यरूपꣳरूपेणैवान्नमवरुंधेग्निश्चमआपश्चमइत्याहैषावाअन्नस्ययोनिः
सयोन्येवान्नमवरुंधेर्धेंद्राणिजुहोतिदेवताएवावरुंधेयत्सर्वेषामर्धमिंद्रःप्रतितस्मादिंद्रोदेवतानांभू
यिष्ठभाक्तमइंद्रमुत्तरमाहेंद्रियमेवास्मिन्नुपरिष्टाद्दधातियज्ञायुधानिजुहोतियज्ञः॥३॥वैयज्ञायु
धानियज्ञमेवावरुंधेथोएतद्वैयज्ञस्यरूपꣳरूपेणैवयज्ञमवरुंधेवभृथश्चमेस्वगाकारश्चमइत्याहस्व
गाकृत्याअग्निश्चमेघर्मश्चमइत्याहैतद्वैब्रह्मवर्चसस्यरूपꣳरूपेणैवब्रह्मवर्चसमवरुंधऋक्चमसा
मचमइत्याह॥४॥एतद्वैछंदसाꣳरूपꣳरूपेणैवछंदाꣳस्यवरुंधेगर्भाश्चमेवत्साश्चमइत्याहैतद्वैपशू
नाꣳरूपꣳरूपेणैवपशूनवरुंधेकल्पांजुहोत्यकॢप्तस्यकॢप्त्यैयुग्मदयुजंजुहोतिमिथुनत्वायोत्तरावती

भवतोभिक्रांत्याएकाचमेतिस्रश्चमइत्याहदेवछंदसंवाएकाचतिस्रश्च॥५॥ मनुष्यछंदसंचतस्रश्चा
ष्टौचदेवछंदसंचैवमनुष्यछंदसंचावरुंधआत्रयस्त्रिंशतोज्जुहोतित्रयस्त्रिंशद्वैदेवतादेवताएवा
वरुंधआष्टाचत्वारिंशतोज्जुहोत्यष्टाचत्वारिंशदक्षराजगतीजागताःपशवोजगत्यैवास्मैपशून
वरुंधेवाजश्चप्रसवश्चेतिद्वादशंज्जुहोतिद्वादशमासाःसंवत्सरःसंवत्सरएवप्रतितिष्ठति॥६॥ वि
वैयृद्धःसामचमइत्याहचतिस्रश्चैकान्नपंचाशच्च॥७॥ ॥अग्निर्देवेभ्योपाक्रामद्भागधेयमिच्छमा
नस्तंदेवाअब्रुवन्नुपनआवर्तस्वहव्यंनोवहेतिसोब्रवीद्वरंवृणैमह्यमेववाजप्रसवीयंजुहवन्निति
तस्मादग्नयेवाजप्रसवीयंज्जुह्वतियद्वाजप्रसवीयंज्जुहोत्यग्निमेवतद्भागधेयेनसमर्धयत्यथोअ
भिषेकएवास्यसचतुर्दशभिर्जुहोतिसप्तग्राम्याओषधयःसप्त॥१॥ आरण्याउभयीषामवरुध्या
अन्नस्यान्नस्यजुहोत्यन्नस्यान्नस्यावरुध्याऔदुंबरेणस्रुवेणजुहोत्यूर्ग्वाउदुंबरऊर्गन्नमूर्जैवास्मा

ऊर्जमन्नमवरुंधेग्निर्वैदेवानामभिषिक्तोग्निचिन्मनुष्याणांतस्मादग्निचिद्वर्षतिनधावेदवरुद्धꣳह्य
स्यान्नमन्नमिवखलुवैवर्षंयद्धावेदन्नाद्याद्धावेदुपावर्त्तेतान्नाद्यमेवाभि ॥ २ ॥ उपावर्त्ततेनक्तोषासे
तिकृष्णायैश्वेतवत्सायैपयसाजुहोत्यह्नैवास्मैरात्रिंप्रदापयतिरात्र्याहरहोरात्रेएवास्मैप्रत्तेकाम
मन्नाद्यंदुहातेराष्ट्रभृतोजुहोतिराष्ट्रमेवावरुंधेषड्जुहोतिषड्वाऋतवऋतुष्वेवप्रतितिष्ठतिभुवन
स्यपतइतिरथमुखेपंचाहुतीर्जुहोतिवज्रोवैरथोवज्रेणैवदिशः ॥ ३ ॥ अभिजयत्यग्निचितꣳहवा
अमुष्मिंल्लोकेवातोभिपवतेवातनामानिजुहोत्यभ्येवैनममुष्मिंल्लोकेवातःपवतेत्रीणिजुहोति
त्रयइमेलोकाएभ्यएवलोकेभ्योवातमवरुंधेसमुद्रोसिनभस्वानित्याहैतद्वैवातस्यरूपꣳरूपेणै
ववातमवरुंधेंजलिनाजुहोतिनह्येतेषामन्यथाहुतिरवकल्पते ॥ ४ ॥ ओषधयःसमाभिर्दिशोन्य
थाहैव ॥ ९ ॥ ॥ सुवर्गायवैलोकायदेवरथोयुज्यतेयत्राकूतायमनुष्यरथएषखलुवैदेवरथोयदग्निर

सं·पं
४०

न्निंयुनज्मिन्नावसाघृतेनेत्याहयुनक्त्येवैनꣳसएनंयुक्तः सुवर्गन्लोकमुभिवहतियत्सर्वाभिः पंच
भिर्युंज्याद्युक्तोस्याग्निः प्रच्युतस्यादप्रतिष्ठिताआहुतयस्युरप्रतिष्ठितास्तोमाअप्रतिष्ठितान्युक्था
नितिसृभिः प्रातःसवनेभिमृशतित्रिवृत॥१॥वाअग्निर्वीर्येणनिवाग्निस्तंयुनक्तियथानसियुक्त
आधीयतएवमेवतत्प्रत्याहुतयस्तिष्ठंतिप्रतिस्तोमाः प्रत्युक्थानियज्ञायज्ञियस्यस्तोत्रेद्वाभ्यामभि
मृशत्येतावान्वैयज्ञोयावानग्निष्टोमोभूमात्वाअस्यातऊर्ध्वंः क्रियतेयावानेवयज्ञस्तमंततोन्वारो
हतिद्वाभ्यांप्रतिष्ठित्याएकयाप्रस्तुतंभवत्यथ॥२॥अभिमृशत्युपैनमुत्तरोयज्ञोनमत्यथोसंत
त्यैप्रवाएषोस्माल्लोकाच्यवतेयोग्निंचिनुतेनवाएतस्यानिष्टकआहुतिरवकल्पतेयांवाएषोनिष्ट
कआहुतिंजुहोतिस्रवतिवैसाताꣳस्रवंतींयज्ञोनुपराभवतियज्ञंयजमानोयत्पुनश्चितिंचिनुत
आहुतीनांप्रतिष्ठित्यैप्रत्याहुतयस्तिष्ठंति॥३॥नयज्ञःपराभवतिनयजमानोष्टावुपदधात्य

राम
४०

ष्टाक्षरागायत्रीगायत्रेणैवैनंछंदसाचिनुतेयदेकादशत्रैष्टुभेनयद्द्वादशजागतेनछंदोभिरेवैनंचिनु
तेनपात्कोवैनामैषोग्निर्यत्पुनश्चितिर्यएवंविद्वान्पुनश्चितिंचिनुतआतृतीयात्पुरुषादन्नमत्तियथा
वैपुनराधेयएवंपुनश्चितिर्योग्न्याधेयेननृ॥४॥ऋध्नोतिसपुनराधेयमाधत्तेयोग्निंचित्वानर्ध्नोति
सपुनश्चितिंचिनुतेयत्पुनश्चितिंचिनुतऋध्याअथोखल्वाहुर्नचेतव्येतिरुद्रोवाएषयदग्निर्यथाव्या
घ्रःसुप्तंबोधयतितादृगेवतदथोखल्वाहुश्चेतव्येतियथावसीयांसंभागधेयेनबोधयतितादृगे
वतन्मनुरग्निमचिनुततेननार्ध्नोत्सएतांपुनश्चितिमपश्यत्तामचिनुततयावैसआर्ध्नोद्यत्पुनश्चि
तिंचिनुतऋध्यै॥५॥त्रिवृद्दध्यतितिष्ठेत्यग्न्याधेयेननाचिनुतसप्तदशच॥१०॥ ॥छंदश्चितंचिन्वीत
पशुकामःपशवोवैछंदांसिपशुमानेवभवतिश्येनचितंचिन्वीतसुवर्गकामःश्येनोवैवयसांप
तिष्ठःश्येनएवभूत्वासुवर्गंल्लोकंपततिकंकचितंचिन्वीतयःकामयेतशीर्षण्वानमुष्मिंल्लोकेस्या

सं·पं·
५१

मितिशीर्षण्वानेवामुष्मिन्लोकेभवत्यलजचितंचिन्वीतचतुःसीतंप्रतिष्ठाकामश्चतस्रोदिशोदिक्ष्वे
वप्रतितिष्ठतिप्रउगचितंचिन्वीतभ्रातृव्यवान्प्र॥१॥एवभ्रातृव्यान्नुदतउभयतःप्रउगंचिन्वीतयः
कामयेतप्रजातान्भ्रातृव्यान्नुदेयप्रतिजनिष्यमाणानितिप्रैवजातान्भ्रातृव्यान्नुदतेप्रतिजनिष्य
माणान्रथचक्रचितंचिन्वीतभ्रातृव्यवान्वज्रोवैरथोवज्रमेवभ्रातृव्येभ्यःप्रहरतिद्रोणचितंचिन्वी
तान्नकामोद्रोणेवाअन्नंभ्रियतेसयोन्येवान्नमवरुंधेसमूह्यंचिन्वीतपशुकामःपशुमानेवभ
वति॥२॥परिचाय्यंचिन्वीतग्रामकामोग्राम्येवभवतिश्मशानचितंचिन्वीतयःकामयेतपितृलो
कऋध्नुयामितिपितृलोकएवर्ध्नोतिविश्वामित्रजमदग्नीवसिष्ठेनास्पर्धेतांसएताजमदग्निर्विह
व्याअपश्यत्ताउपाधत्तताभिर्वैसवसिष्ठस्येंद्रियंवीर्यमवृंक्तयद्विहव्याउपदधातींद्रियमेवताभिर्वी
र्यंयजमानोभ्रातृव्यस्यवृंक्तेहोतुर्धिष्णियउपदधातियजमानायतनंवै॥३॥होतास्वएवास्मा

राम
५१

आयतनद्इंद्रियंवीर्यमवरुंधेद्वादशोपदधातिद्वादशाक्षराजगतीजागताःपशवोजगत्यैवास्मैप
शूनवरुंधेष्टावष्टावन्येषुधिष्ण्येषूपदधात्यष्टाशफाःपशवःपशूनेवावरुंधेषण्मार्जालीयेषड्
ऋतवऋतवःखलुवैदेवाःपितरऋतूनेवदेवान्पितॄन्प्रीणाति॥५॥ प्रभवतियजमानायतनंवाअ
ष्टाचत्वारिंशच्च॥११॥ ॥ पवस्ववाजसातयइत्यनुष्टुबग्रेपङ्क्तिवतीतिस्रोनुष्टुभश्चतस्रोगायत्रि
योयत्तिस्रोनुष्टुभ[illegible]स्मादश्वस्त्रिभिस्तिष्ठंस्तिष्ठतियच्चतस्रोगायत्रियस्तस्मात्सर्वांश्चतुरःपदः
प्रतिदधत्पलायते×स्त× परमावाएषाछंदसांयदनुष्टुप्परमश्चतुष्टोमस्तोमानांपरमस्त्रिरात्रो
यज्ञानांपरमोश्वःपशूनांपरमेणैवैनंपरमतांगमयत्येकविंशमहर्भवति॥१॥ यस्मिन्नश्वआ
लभ्यतेद्वादशमासाःपंचर्तवस्त्रयइमेलोकाअसावादित्यएकविंशएषप्रजापतिःप्राजापत्योश्वः
स्तमेवसाक्षादृध्नोतिशक्वरयःपृष्ठंभवंत्यन्यदन्यछंदोन्येन्येवाएतेपशवआलभ्यंतउतेवग्राम्या

सं॰पं॰
४२

उतेवारंण्यायलछक्करयः एष्वंभवंत्यश्वस्यसर्वत्वायपार्थुरश्मंब्रह्मसामंभवतिरश्मिनावाअश्वः॥२॥
यन्तईश्वरोवाअश्वोयतोप्रतिष्ठितःपरांपरावतंगंतोर्यत्पार्थुरश्मंब्रह्मसामंभवत्यश्वस्ययत्यैधृत्यैसं
कृत्यच्छावाकसामंभवत्युत्सन्नयज्ञोवाएषयदश्वमेधः कस्तद्वेदेत्याहुर्यदिसर्वोवाक्रियतेनवासर्वइ
तियत्संकृत्यच्छावाकसामंभवत्यश्वस्यसर्वत्वायपर्याप्त्याअनंतरायायसर्वस्तोमोतिरात्रउत्तमम
हर्भवतिसर्वस्याप्त्यैसर्वस्याजित्यैसर्वमेवतेनाप्नोतिसर्वंजयति॥३॥अहर्भवतिवाअश्वोहर्भवति
दन्नान्व॥१२॥ ॥देवासुरास्तेनर्तव्यारुद्रोत्रमन्युषदेवदुदेनंप्राचीमितिवसोर्धारामग्निर्देवेभ्यःसुव
र्गाययत्राकूतायछंदश्चितंपवस्वद्वादश॥१२॥ ॥देवासुराअजायांवैसुमुष्टिःप्रथमोदेवयता
मेतद्वैछंदसामध्यात्युष्टोपवादात्॥५८॥ ॥हरिःओम्॥ यदेकेनसंस्थापयतियज्ञस्यसंतत्या
अविच्छेदायैंद्राःपत्रावायेमुष्करायदैंद्राःसंतोग्निभ्यआलभ्यंतेदेवताभ्यःसमदंदधात्याग्नेयीस्त्रि

राम
४२

ष्टुभौयाज्यानुवाक्याःकुर्याद्यदाग्नेयीस्तेनाग्नेयायत्त्रिष्टुभस्तेनैंद्राःसमृध्येनदेवताभ्यःसमर्दद्धया
तिवायवेनियुत्वतेतूपरमालभेततेजोग्नेर्वायुस्तेजसएषआलभ्यतेतस्माद्यद्रियंङ्वायुः॥१॥वाति
तद्रियंङ्ङग्निर्द्दहतिस्वमेवतत्तेजोन्वेतियन्नियुत्वतेस्याद्दुन्माद्येद्यजमानोनियुत्वतेभवतियजमान
स्यानुंन्मादायवायुमती श्वेतवती याज्यानुवाक्येभवतःसतेजस्त्वायहिरण्यगर्भःसमवर्ततताग्रइ
त्याघारमाघारयतिप्रजापतिर्वैहिरंण्यगर्भःप्रजापतेरनुरूपत्वायसर्वाणिवाएषरूपाणिपशूनां
प्रत्यालभ्यतेयच्छ्मश्रुणस्तत्॥२॥पुरुषाणाꣳरूपंयत्तूपरस्तदश्वानांयदन्यतोदंतद्गवांयदव्याइवश
फास्तदवीनांयदजस्तदजानांवायुर्वैपशूनांप्रियंधामयद्वायव्योभवत्येतमेवैनमभिसंजानानाः
पशवउपतिष्ठंतेवायव्यःकार्याः३प्राजापत्या३इत्याहुर्यद्वायव्यंकुर्यात्प्रजापतेरियाद्यत्प्राजापत्यं
कुर्याद्वायोः॥३॥इयाद्यद्वायव्यःपशुर्भवतितेनवायोर्नैतियत्प्राजापत्यःपुरोडाशोभवतितेनप्रजा

सं·पं
६२

पतेवैनैतियद्द्वादशकपालस्तेनवैश्वानरान्नैत्याग्नावैष्णवमेकादशकपालंनिर्वपतिदीक्षिष्यमाणोग्निः
सर्वादेवताविष्णुर्यज्ञोदेवताश्चैवयज्ञंचारभतेग्निरवमोदेवतानांविष्णुःपरमोयदाग्नावैष्णवमेकादश
कपालंनिर्वपतिदेवताः॥४॥एवोभयतःपरिगृह्ययजमानोवरुन्धेपुरोडाशेनवैदेवाअमुष्मिन्लोकआ
र्ध्नुवंवरुणास्मिन्यःकामयेतामुष्मिन्लोकऋध्नुयामितिसपुरोडाशंकुर्वीतामुष्मिन्नेवलोकऋध्नो
तियदष्टाकपालस्तेनाग्नेयोयत्त्रिकपालस्तेनवैष्णवःसमृध्यैयःकामयेतास्मिन्लोकऋध्नुयामिति
सचरुंकुर्वीताग्नेर्घृतंविष्णोस्तंडुलास्तस्मात्॥५॥चरुःकार्योस्मिन्नेवलोकऋध्नोत्यादित्योभवती
यंवाअदितिरस्यामेवप्रतितिष्ठत्यथोअस्यामेवाधियज्ञंतनुतेयोवैसंवत्सरमुख्यमभृत्वाग्निंचि
नुतेयथासामिगर्भोविपद्यतेतादृगेवतदार्तिमार्छेद्वैश्वानरंद्वादशकपालंपुरस्तान्निर्वपेत्संवत्स
रोवाअग्निर्वैश्वानरोयथासंवत्सरमाप्त्वा॥६॥कालआगतेविजायतएवमेवसंवत्सरमाप्त्वाका

राम
४२

नु१ लआगतेग्निंचितेनार्तिमार्छेत्येषावाअग्नेःप्रियातनूर्यद्वैश्वानरःप्रियामेवास्यतनुमवरुंधेत्रीण्येता
निर्हवींषिभवंतित्रयइमेलोकाएषांलोकानांरोहाय॥७॥यद्ध्रियद्भुायुरश्मश्रु×व×पास्तद्धायोर्नि
र्वपतिदेवतास्तस्मादाह्वाष्टात्रिंशाद्व॥१॥ ॥प्रजापतिःप्रजाःसृष्ट्वाप्रेणानुप्राविशत्ताभ्यःपुनःसं
भवितुंनाशक्नोत्सोब्रवीदृध्नवदित्सयोमेतःपुनःसंचिनवदितितंदेवाःसमचिन्वंस्ततोवैतआर्ध्नुव
न्यत्समचिन्वंस्तच्चित्यस्यचित्यत्वंयएवंविद्वानग्निंचिनुतऋध्नोत्येवकस्मैकमग्निश्चीयतइत्याहुर
ग्निवान्॥१॥असानीतिवाअग्निश्चीयतेग्निवानेवभवतिकस्मैकमग्निश्चीयतइत्याहुर्देवामावे
दन्नितिवाअग्निश्चीयतेविदुरेनंदेवाःकस्मैकमग्निश्चीयतइत्याहुर्गृह्यसानीतिवाअग्निश्चीयते
गृह्येवभवतिकस्मैकमग्निश्चीयतइत्याहुःपशुमानसानीतिवाअग्निः॥२॥चीयतेपशुमानेवभ
वतिकस्मैकमग्निश्चीयतइत्याहुःसप्तमापुरुषाउपजीवानितिवाअग्निश्चीयतेत्रयःप्रांचस्त्रयः

सं॰पं॰
४४

प्रत्यंत्वआत्मासप्तमएतावंतएवैनममुष्मिन्लोकउपजीवंतिप्रजापतिरग्निमचिकीषततंपृथिव्यब्र
वीन्नमय्यग्निंचेष्यसेतिमाधक्ष्यतिसात्वातिदह्यमानाविधविष्ये॥३॥सपापीयान्भविष्यसीतिसो
ब्रवीत्तथावाअहंकरिष्यामियथात्वानातिधक्ष्यतीतिसइमामभ्यमृशत्प्रजापतिस्त्वासादयतुत
याद्देवतयांगिरस्वद्ध्रुवासीदितीमामेवेष्टकांकृत्वोपाधत्तानतिदाहाययत्त्वेत्यग्निंचिन्वीततदभि
मृशेत्प्रजापतिस्त्वासादयतुतयादेवतयांगिरस्वद्ध्रुवासीद॥४॥इतीमामेवेष्टकांकृत्वोपधत्तेनति
दाहायप्रजापतिरकामयतप्रजायेयेतिसएतमुख्यमपश्यत्तꣳसंवत्सरमबिभस्ततोवैसप्राजा
यततस्मात्संवत्सरंभार्यःप्रैवजायतेतंवसवोब्रुवन्प्रत्वमजनिष्ठावयंप्रजायामहाइतितंवसुभ्यःप्रा
यच्छंस्तंत्रीण्यहान्यबिभरुस्तेन॥५॥त्रीणिवैशतान्यसृजंतत्रयस्त्रिꣳशातंवतस्मात्र्यहंभार्यः
प्रैवजायतेतान्रुद्राअब्रुवन्प्रत्वमजनिद्वयंप्रजायामहाइतितꣳरुद्रेभ्यःप्रायच्छंस्तꣳषडहान्य

राम
४४

बिभरुस्तेनत्रीणिचशतान्यसृजंतत्रयस्त्रिꣳशतंचतस्मात्षडहंभार्यःप्रैवजायतेतानादित्याअब्रु
वन्मयूयमजनिद्वुवयं॥६॥प्रजायामहाइतितमादित्येभ्यःप्रायच्छंस्तंद्वादशाहान्यबिभरुस्ते
नत्रीणिचशतान्यसृजंतत्रयस्त्रिꣳशतंचतस्माद्द्वादशाहंभार्यःप्रैवजायतेतेनवैतेसहस्रमसृज
नोखाꣳसहस्रतमीयएवमुख्यꣳसाहस्रंवेदप्रसहस्रंपशूनाप्नोति॥७॥अग्निर्वान्पशुमानसानी
तिवाअग्निर्धिविष्यमृतोत्प्रजापतिस्त्वासादयत्तुतयादेवतयांगिरस्वद्ध्रुवासीदेतेनतानादित्याअब्रु
वन्मयूयमजनिद्वुवयंचत्वारिꣳशच्च॥२॥ ॥यजुषावाएषाक्रियतेयजुषापच्यतेयजुषाविमुच्यतेय
दुखासावाएषेतर्हियातयाम्नीसानपुनःप्रयुज्येत्याहुरग्नेयुक्ष्वाहियेतवयुक्ष्वाहिदेवहूतमाꣳइ
त्युखायांजुहोतितेनैवैनांपुनःप्रयुंक्तेऽनायातयाम्नीयोवाअग्निंयोगआगतेयुनक्तियुंक्तेयुंजा
नेष्वग्ने॥१॥युक्ष्वाहियेतवयुक्ष्वाहिदेवहूतमाꣳइत्याहैषवाअग्नेर्योगस्तेनैवैनंयुनक्तियुंक्तेयुंजा

सं·पं·
४५

नेषुब्रह्मवादिनोवदंतिन्यङ्ङग्निश्चेतव्या३उत्ताना३इतिवयसांवाएषप्रतिमयाचीयतेयदग्निर्यन्न्यंचं
चिनुयात्पृष्टितएनमाहुतयऋच्छेयुर्यदुत्तानंनपतितुꣳशक्नुयादसुवर्ग्योस्यस्यात्प्राचीनमुत्तानं
॥२॥ पुरुषशीर्षमुपदधातिमुखतएवैनमाहुतयऋच्छंतिनोत्तानंचिनुतेसुवर्ग्योस्यभवतिसौर्याजु
होतिचक्षुरेवास्मिन्प्रतिदधातिद्विर्जुहोतिद्वेहिचक्षुषीसमान्याजुहोतिसमानꣳहिचक्षुःसमृध्यै
देवासुराःसंयत्ताआसंतेवामंवसुसंन्यदधततद्देवावामभृतावृंजततद्वामभृतोवामभृत्त्वंयद्वाम
भृतमुपदधातिवाममेवतयावसुयजमानोभ्रातृव्यस्यवृंक्तेहिरण्यमूर्ध्नीभवतिज्योतिर्वैहिरण्यंज्यो
तिर्वामंज्योतिषैवास्यज्योतिर्वामंवृंक्तेद्वियजुर्भवतिप्रतिष्ठित्यै॥३॥ युंजानेष्वग्नेप्राचीनमुत्तानंवा
मभृतंचक्षुर्विꣳशतिश्च॥३॥ ॥आपोवरुणस्यपत्नयआसन्ताअग्निरभ्यध्यायत्ताःसमभवत्त
स्यरेतःपरापतत्तदियमभवद्यद्द्वितीयंपरापतत्तदसावभवदियंवैविराडसौस्वराड्यद्विराजावु

राम
४५

पुदधातीमेएवोपधत्तेयद्वाअसौरेतःसिंचतितदस्यांप्रतितिष्ठतितत्प्रजायतेताओषधयः॥१॥वीरु
धोभवंतिताअग्निरत्तीतियएवंवेदन्नैवजायतेन्नादोभवतियोरेतस्वीस्यात्प्रथमायांतस्यचित्यामुभे
उपदध्यादिमेएवास्मैसमीचीरेतःसिंचतोयःसिक्तरेतास्यात्प्रथमायांतस्यचित्यामन्यामुपदध्या
दुत्तमायामन्याꣳरेतोस्यसिक्तमाभ्यामुभयतःपरिगृह्णातिसंवत्सरंनकं॥२॥वनस्पत्यवरोहेन्नही
मेकंवनस्पत्यवरोहन्न[illegible]एवा×स्तदेनयोर्वृतंयोवाअपशीर्षाणमग्निंचिनुतेपशीर्षामुष्मिँल्लोकेभव
तियःसशीर्षाणंचिनुतेसशीर्षामुष्मिँल्लोकेभवतिचित्तिंजुहोमिमनसाघृतेनयथादेवाइहागमन्वी
तिहोत्राऋतावृधःसमुद्रस्यवयुनस्यपत्मंजुहोमिविश्वकर्मणेविश्वाहामर्त्यꣳहविरितिस्वयमातृ
ण्णामुपधायजुहोति॥३॥एतद्वाअग्नेःशिरःसशीर्षाणमेवाग्निंचिनुतेसशीर्षामुष्मिँल्लोकेभवति
यएवंवेदसुवर्गायवाएषलोकायचीयतेयदग्निस्तस्ययदयथापूर्वंक्रियतेसुवर्ग्यमस्यतत्सुवर्ग्यं

ग्निश्चितिमुपधायाभिमृशेच्चित्तिमचित्तिंचिनवद्विविद्वान्पृष्ठेववीतावृजिनाचमर्तान्रायेचनस्वपत्या
यदेवदितिंचरास्वादितिमुरुष्येतियथापूर्वमेवैनामुपधत्तेप्रांचमेनंचिनुतेसुवर्ग्योस्यभवति॥४॥ओ
षधयःकंजुहोतिस्वपत्यायायाष्टादशान्व॥४॥ ॥विश्वकर्मादिशांपतिःसनःपशून्पातुसोस्मान्पातु
तस्मैनमःप्रजापतीरुद्रोवरुणोग्निर्दिशांपतिःसनःपशून्पातुसोस्मान्पातुतस्मैनमएतावैदेवता
एतेषांपशूनामधिपतयस्ताभ्योवाएषआवृश्च्यतेयःपशुशीर्षाण्युपदधातिहिरण्येष्टकाउपद
धात्येताभ्यएवदेवताभ्योनमस्करोतिब्रह्मवादिनः॥१॥वदंत्यग्नौग्राम्यान्पशून्प्रदधातिशुचार
ण्यानर्पयतिकिंततउच्छिꣳषतीतियद्धिरण्येकाउपदधात्यमृतंवैहिरण्यममृतेनैवग्राम्येभ्यःप
शुभ्योभेषजंकरोतिनैनान्हिनस्तिप्राणोवैप्रथमास्वयमातृण्णाव्यानोद्वितीयापानस्तृतीयानु
प्राण्यात्प्रथमाꣳस्वयमातृण्णामुपधायप्राणेनैवप्राणꣳसमर्धयतिव्यंन्यात्॥२॥द्वितीयामुप

धायव्यानेनैवव्यानꣳसमर्धयत्यपान्यात्तृतीयामुपधायापानेनैवापानꣳसमर्धयत्यथोप्राणैरेवै
नꣳसमिंधेभूर्भुवःसुवरितिस्वयमातृण्णाउपदधातीमेवैलोकास्वयमातृण्णाएताभिःखलुवैव्याहृ
तीभिःप्रजापतिःप्राजायतयदेताभिर्व्याहृतीभिःस्वयमातृण्णाउपदधातीमानेवलोकानुपधायैषु
॥३॥लोकेष्वधिप्रजायतेप्राणायव्यानायापानायवाचेत्वाचक्षुषेत्वातयादेवतयांगिरस्वद्ध्रुवासी
दाग्निनावैदेवाःसुवर्गंल्लोकमजिगाꣳसंतेनुपतितुन्नाशक्नुवंतएताश्चतस्रस्वयमातृण्णाअपश्य
न्तादिक्षूपादधततेनसर्वतश्चक्षुषासुवर्गंल्लोकमायन्यच्चतस्रस्वयमातृण्णादिक्षूपदधातिसर्वत
श्चक्षुषैवतदग्निनायजमानःसुवर्गंल्लोकमेति॥४॥ब्रह्मवादिनोव्यन्यादेषुयजमानस्त्रीणिव
॥५॥ ॥अग्नआयाहिवीतयइत्याहाह्वतैवैनमग्निंदूतंवृणीमहइत्याहहुत्वैवैनंवृणीतेग्निना
ग्निःसमिध्यतइत्याहसमिंधएवैनमग्निर्वृत्राणिजंघनदित्याहसमिधएवास्मिन्निंद्रियंदधा

सं·पं·
४७

त्यग्नेस्तोमंमनामहइत्याहमनुतएवैनमेतानिवाअन्हाꣳरूपाणि॥१॥अन्वहमेवैनंचिनुतेवान्हाꣳरू
पाणिरुंधेब्रह्मवादिनोवदंतिकस्मात्सत्याद्यातयाम्नीरन्याइष्टकाअयातयाम्नीलोकंपृणेत्यैंद्राग्नीहि
बार्हस्पत्येतिब्रूयादिंद्राग्नीवहिदेवानांबृहस्पतिश्चायातयामानोनुचरवतीभवत्यजामित्वायानुष्टु
भानुचरत्यात्मावैलोकंपृणाप्राणोनुष्टुप्तस्मात्प्राणःसर्वाण्यंगान्यनुसंचरतिताअस्यसूददोहसः
॥२॥इत्याहतस्मात्परुषिपरुषिरसःसोमꣳश्रीणंतिपृश्नयइत्याहान्नंवैपृश्न्यन्नमेवावरुंधेर्कोवा
अग्निरर्कोन्नमन्नमेवावरुंधेजन्मंदेवानांविशस्त्रिष्वारोचनेदिवइत्याहेमानेवास्मैलोकांज्योति
ष्मतःकरोतियोवाइष्टकानांप्रतिष्ठांवेदप्रत्येवतिष्ठतितयादेवतयांगिरस्वद्ध्रुवासीदेत्याहैषावाइ
ष्टकानांप्रतिष्ठायएवंवेदप्रत्येवतिष्ठति॥३॥रूपाणिसूददोहसस्तयाषोडशच॥६॥ ॥सुवर्गा
यवाएषलोकायचीयतेयदग्निर्वज्रएकादशिनीयदग्नावेकादशिनींमिनुयाद्वज्रेणैनꣳसुवर्गा

राम
४७

ल्लोकादंतर्दध्याद्यन्नमिनुयात्स्वरुभिःपशून्व्यर्धयेदेकयूपंमिनोतिनैनंवज्रेणसुवर्गाल्लोकादंतर्दधा
तिनस्वरुभिःपशून्व्यर्धयतिविवाएषइंद्रियेणवीर्येणर्ध्यतेयोग्निंचिन्वन्नधिक्रामत्यैंद्रिया॥१॥
ऋचाक्रमणंप्रतीष्टकामुपदध्यान्नेंद्रियेणवीर्येणव्यृध्यतेरुद्रोवाएषयदग्निस्तस्यतिस्रःशरव्याः
प्रतीचीतिरश्च्यनूचीताभ्योवाएषआवृश्च्यतेयोग्निंचिनुतेग्निंचित्वातिसृधन्वमयाचितंब्राह्मणा
यदद्यात्ताभ्यएवनमस्करोत्यथोताभ्यएवात्मानंनिष्क्रीणीतेयत्तेरुद्रपुरः॥२॥धनुस्तद्वातोअनुते
तस्मैतेरुद्रसंवत्सरेणनमस्करोमियत्तेरुद्रदक्षिणाधनुस्तद्वातोअनुवातुतेतस्मैतेरुद्रपरिवत्स
रेणनमस्करोमियत्तेरुद्रपश्चाद्धनुस्तद्वातोअनुवातुतेतस्मैतेरुद्रेदावत्सरेणनमस्करोमियत्ते
रुद्रोत्तराधनुस्तत्॥३॥वातोअनुवातुतेतस्मैतेरुद्रेदुवत्सरेणनमस्करोमियत्तेरुद्रोपरिधनुस्तद्वा
तोअनुवातुतेतस्मैतेरुद्रवत्सरेणनमस्करोमिरुद्रोवाएषयदग्निःसयथाव्याघ्रःक्रुद्धस्तिष्ठत्येवं

सं॰पं॰
४८

वाएषएतर्हिसंचितमेतेरूपतिष्ठतेनमस्कारैरेवैनꣳशमयतियेग्नयः ॥४॥ पुरीष्याःप्रदिशःपृथिवी
मनु। तेषांत्वमस्युत्तमःप्रणोजीवातवेसुव। आपंत्वाग्नेमनसापंत्वाग्नेतपसापंत्वाग्नेदीक्षयापंत्वाग्न
उपसद्भिरापंत्वाग्नेसुत्ययापंत्वाग्नेदक्षिणाभिरापंत्वाग्नेवभृथेनापंत्वाग्नेवशायापंत्वाग्नेस्वगाकारे
णेत्याहैषावाअग्नेराप्तिस्तयैवैनमाप्नोति ॥५॥ ऐंद्रियापुरउत्तराधनुस्तृदग्नयआहाशेव ॥७॥ ॥
गायत्रेणपुरस्तादुपतिष्ठतेप्राणमेवास्मिन्दधातिबृहद्रथंतराभ्यांपक्षावोजएवास्मिंदधात्यृतुस्था
यज्ञायज्ञियेनपुछमृतुष्वेवप्रतितिष्ठतिपृष्ठैरुपतिष्ठतेतेजोवैपृष्ठानितेजएवास्मिन्दधातिप्रजापति
रग्निमसृजतसोस्मात्सृष्टःपराङैत्तंवारवंतीयेनावारयततद्वारवंतीयस्यवारवंतीयत्वꣳश्यैतेनश्ये
तीअकुरुततछ्यैतस्यश्यैतत्वं ॥१॥ यद्वारवंतीयेनोपतिष्ठतेवारयतएवैनꣳश्यैतेनश्येतीकुरुतेप्र
जापतेर्हृदयेनापिपक्षंप्रत्युपतिष्ठतेप्रेमाणमेवास्यगछतिप्राच्यात्वादिशासादयामिगायत्रेणछं

राम
४८

दसाग्निनादेवतयाग्नेःशीर्ष्णाग्नेःशिरउपदधामिदक्षिणयात्वादिशासादयामित्रैष्टुभेनछंदसेंद्रेण
देवतयाग्नेःपक्षेणाग्नेःपक्षमुपदधामिप्रतीच्यात्वादिशासादयामि॥२॥जागतेनछंदसासवित्रा
देवतयाग्नेःपुच्छेनाग्नेःपुच्छमुपदधाम्युदीच्यात्वादिशासादयाम्यानुष्टुभेनछंदसामित्रावरुणाभ्यां
देवतयाग्नेःपक्षेणाग्नेःपक्षमुपदधाम्यूर्ध्वयात्वादिशासादयामिपांक्तेनछंदसाबृहस्पतिनादेव
तयाग्नेःपृष्ठेनाग्नेःपृष्ठमुपदधामियोवाअपात्मानमग्निंचिनुतेपात्मामुष्मिँल्लोकेभवतियःसा
त्मानंचिनुतेसात्मामुष्मिँल्लोकेभवत्यात्मेष्टकाउपदधात्येषवाअग्नेरात्मासात्मानमेवाग्निंचिनु
तेसात्मामुष्मिँल्लोकेभवतियएवंवेद॥३॥द्यैतत्वंप्रतीच्यात्वादिशासादयामियःसात्मानंचिनु
तेद्वाविंशतिश्च॥८॥ ॥अग्नउदधेयातइषुर्युवानामतयानोमृडतस्यास्तेनमस्तस्यास्तउपजी
वेतोभूयास्माग्नेदुध्रगह्यकिंशिलवन्ययातइषुर्युवानामतयानोमृडतस्यास्तेनमस्तस्यास्तउ

सं॰पं॰
४९

पजीवंतोस्त्वयास्मुपंचवाएतेग्नयोयश्चितयउदधिरेवनामप्रथमोदुध्रः॥१॥द्वितीयोगह्यस्तृतीयः
किंःशिलश्चतुर्थोवन्यःपंचमःस्तेभ्योयदाहुतीर्नजुहुयादध्वर्युंचयजमानंचप्रदहेयुर्यदेताआहुती
र्जुहोतिभागधेयेनैवैनांछमयतिनार्तिमार्छत्यध्वर्युर्नयजमानोवाङ्मआसन्नसोःप्राणोक्ष्योश्चक्षुः
कर्णयोःश्रोत्रंबाह्वोर्बलमूरुवोरोजोरिष्टाविश्वान्यंगानितनूः॥२॥तनुवामेसहनमस्तेअस्तुमामाहिंः
सीरपवाएतस्मात्प्राणाःक्रामंतियोग्निंचिन्वन्नधिक्रामतिवाङ्मआसन्नसोःप्राणइत्याहप्राणानेवा
त्मंधत्तेयोरुद्रोअग्नौयोअप्सुयओषधीषुयोरुद्रोविश्वाभुवनानिविवेशतस्मैरुद्रायनमोअस्त्वाहुति
भागावाअन्येरुद्राहविर्भागाः॥३॥अन्यत्रातरुद्रीयंःहुत्वागावीधुकंचरुमेतेनयजुषाचरमायामि
ष्टकायान्निदध्याद्भागधेयेनैवैनंःशमयतितस्यत्वैशतरुद्रीयंःहुतमित्याहुर्यस्यैतदग्नौक्रियतइ
तिवसवस्त्वारुद्रैःपुरस्तात्पांतुपितरस्त्वायमराजानःपितृभिर्दक्षिणतःपांत्वादित्यास्त्वाविश्वैर्देवैः

रामू
४९

पश्चात्पातुद्युतानस्त्वामारुतोमरुद्भिरुत्तरतः पातु ॥ ४ ॥ देवास्त्वेंद्रज्येष्ठावरुणराजानोधस्ताच्चोपरिष्टा
च्चपातुनवाएतेनपूतोनमेध्योनप्रोक्षितोयदेनमतः प्राचीनंप्रोक्षतियत्संचितमाज्येनप्रोक्षतितेनपू
तस्तेनमेध्यस्तेनप्रोक्षितः ॥ ५ ॥ दुध्रस्तनूर्द्विविर्भागाः पातुद्वात्रिꣳशच्च ॥ १ ॥ ॥ समीचीनामासिप्रा
चीदिक्तस्यास्तेग्निरधिपतिरसितोरक्षितायश्चाधिपतिर्यश्चगोप्ताताभ्यांनमस्तौनोमृडयतांतेयंद्वि
ष्मोयश्चनोद्वेष्टितंवांजंभेदधाम्योजस्विनीनामासिदक्षिणादिक्तस्यास्तइंद्रोधिपतिः पृदाकुः प्राची
नामासिप्रतीचीदिक्तस्यास्त ॥ १ ॥ सोमोधिपतिः स्वजोवस्थावानामास्युदीचीदिक्तस्यास्तेवरुणोधि
पतिस्तिरश्चराजीरधिपत्नीनामासिबृहतीदिक्तस्यास्तेबृहस्पतिरधिपतिः श्वित्रोवशिनीनामासी
यंदिक्तस्यास्तेयमोधिपतिः कल्माषग्रीवोरक्षितायश्चाधिपतिर्यश्चगोप्ताताभ्यांनमस्तौनोमृडय
तांतेयंद्विष्मोयश्च ॥ २ ॥ नोद्वेष्टितंवांजंभेदधाम्येतावैदेवताअग्निंचितꣳरसंतिताभ्योयदाहुतीर्नजु

सं॰प॰
५०

हुयादध्वर्युंचयजमानंचध्यायेयुर्यदेताआहुतीर्जुहोतिभागधेयेनैवैनाञ्छमयतिनार्तिमार्छत्यध्वर्यु
र्नयजमानोहेतयोनामस्थतेषांवः पुरोगृहाअग्निर्वइषवः सलिलोनिलिंपानाम ॥ ३ ॥ स्थतेषांवोदक्षि
णागृहाः पितरोवइषवः सगरोवज्रिणोनामस्थतेषांवः पश्चाद्गृहाः स्वप्नोवइषवोगह्वरोवस्थावानोना
मस्थतेषांवउत्तराद्गृहाआपोवइषवः समुद्रोधिपतयोनामस्थतेषांवउपरिगृहावर्षंवइषवोवस्वान्कुल्या
नामस्थपार्थिवास्तेषांवइहगृहाः ॥ ४ ॥ अन्नंवइषवोनिमिषोवातनामंतेभ्योवोनमस्तेनोमृडयततंय
द्विष्मोयश्चनोद्वेष्टितंवोजंभेदधामिहुतादोवाअन्येदेवाअहुतादोन्येतानग्निचिदेवोभयान्प्रीणातिद
ध्नामधुमिश्रेणैताआहुतीर्जुहोतिभागधेयेनैवैनान्प्रीणात्यथोखल्वाहुरिष्टकावैदेवाअहुतादइति
॥ ५ ॥ अनुपरिक्रामंजुहोत्यपरिवर्गमेवैनान्प्रीणातीमंस्तनमूर्जस्वंतंधयापांप्रप्यातमग्नेसरिरस्यम
ध्ये। उत्संजुषस्वमधुमंतमूर्वसमुद्रियंसदनमाविशस्व ॥ योवाअग्निंप्रयुज्यनविमुंचतियथाश्वोयुक्तो

राम
५०

विमुच्यमानःक्षुध्यन्पराभवत्येवमस्याग्निःपराभवंतितंपराभवंतंयजमानोनुपराभवतिसोग्निंवि
त्वालूक्षः॥६॥भवतीमꣳस्तनुमूर्जस्वंतंथयापामित्याज्यस्यपूर्णाꣳस्रुचंजुहोत्येषवाअग्निर्विमोके
विमुच्यैवास्मा अन्नमपिदधातितस्मादाहुर्यश्चैवंवेदयश्चनसुधायꣳहैवाजीसुहितोदधातीत्य
ग्निर्वाववाजीतमेवतत्प्रीणातिसएनंप्रीतःप्रीणातिवसीयान्भवति॥७॥प्रतीचीदिक्तस्यास्तेद्विष्मा
यश्चनिर्लिंपानामेहस्तद्धाइतिलूक्षोवसीयान्भवति॥१०॥ ॥इंद्रायराज्ञेसूकरोवरुणायराज्ञेकृष्णो
यमायराज्ञऋश्यऋषभायराज्ञेगवयःशार्दूलायराज्ञेगौरःपुरुषराजायमर्कटःक्षिप्रश्येनस्यवर्ति
कानीलंगोःक्रिमिःसोमस्यराज्ञःकुलुंगःसिंधोःशिꣳशुमारोहिमवतोहस्ती॥१॥इंद्रायाष्टाविꣳशा
तिः॥११॥ ॥मयुःप्राजापत्यऊलोहलीक्ष्णोवृषदꣳशास्तेधातुःसरस्वत्यैशारिःश्येतापुरुषवाक्सर
स्वतेशुकःश्येतःपुरुषवागारण्योजोनकुलःशाकातेपौष्णावाचेक्रौंचः॥१॥मयुस्त्रयोविꣳशतिः॥१२॥

अपान्नप्त्रेझषोनाक्रोमकरः कुलीकयस्तेकूपारस्यवाचेपैंगराजोभगायकुषीतकआतीवाहसोदर्वि
दातेवायव्यादिग्भ्यश्चक्रवाकः ॥ १ ॥ अपामेकान्नविंशतिः ॥ १३ ॥ ॥ बलायाजगरआखुःसृजयाश
यंडकस्तेमैत्रामृत्यवेसितोमन्यवेस्वजः कुंभीनसः पुष्करसादोलोहिताहिस्तेत्वाष्ट्राः प्रतिश्रुत्कायै
वाहसः ॥ १ ॥ पुरुषमृगश्चंद्रमसेगोधाकालकादार्वाघाटस्तेवनस्पतीनामेण्यन्हेकृष्णोरात्रियैपि
कः क्ष्विंकानीलशीर्ष्णीतेर्यम्णेधातुः कत्कटः ॥ २ ॥ सौरीबलाकर्श्योमयूरः श्येनस्तेगंधर्वाणांवसूनां
कपिंजलोरुद्राणांतित्तिरीरोहित्कुंडृणाचीगोलत्तिकाताअप्सरसामरण्यायसृमरः ॥ ३ ॥ पृषतोवैश्व
देवः पित्वोन्यंकुः कशस्तेनुमत्याअन्यवापोर्धमासानांमासांकश्यपः क्वयिः कुटरुर्दात्यौहस्तेसिनीवा
ल्यैबृहस्पतयेशित्पुटः ॥ ४ ॥ शकाभौमीपांत्रः कशोमांथीलवस्तेपितृणामृतूनांजहकासंवत्सरा
यलोपाकपोतउलूकः शशस्तेनैर्ऋताः कृकवाकुः सावित्रः ॥ ५ ॥ बलायपुरुषमृगः शकाष्टादशा

गौरिमृगलः

दश॥१८॥ ॥रुरूरौद्रःकृकलासःशकुनिःपिप्पकातेशरव्यायैहरिणोमारुतोब्रह्मणेशार्गस्तरक्षुः
कृष्णश्वाचतुरक्षोगर्दभस्तइतरजनानामग्नयेधूंक्ष्णा॥१॥ रुरुर्विंशतिः॥१९॥ ॥अलजआंतरि
क्षउद्रोमद्गुःप्लवस्तेपामदित्यैहंससाचिरिंद्राण्यैकीर्शागृध्रःशितिकक्षीवार्ध्राणसस्तेदिव्याद्या
वापृथिव्याश्वावित्॥१॥२०॥ सुपर्णःपार्जन्योहंसोवृकोवृषदंशस्तऐंद्राअपामुद्रोर्यम्णेलोपा
शःसिंहोनकुलोव्याघ्रस्तेमहेंद्रायकामायपरस्वान्॥१॥२१॥आग्नेयःकृष्णग्रीवःसारस्वतीमे
षीबभ्रुःसौम्यःपौष्णःश्यामःशितिपृष्ठोबार्हस्पत्यःशिल्पोवैश्वदेवऐंद्रोरुणोमारुतःकल्माषऐं
द्राग्नःसंहितोधोरामःसावित्रोवारुणःपेत्वः॥१॥२२॥ अश्वःस्तूपरोगोमृगस्तेप्राजापत्याआ
ग्नेयौकृष्णग्रीवौत्वाष्ट्रौलोमशसक्थौशितिपृष्ठौबार्हस्पत्यौधात्रेपृषोदरःसौर्योबलक्षःपेत्वः॥१॥
अश्वःषोडश॥२३॥ ॥अग्नयेनीकवतेरोहितांजिरनड्वानधोरामौसावित्रौपौष्णोरजतनाभीवैश्व

द्वौपित्र्यांगौत्वपुरोमारुतः कुल्माषआग्नेयः कृष्णोजः सारस्वतीमेषीवारुणः कृष्णएकशितिपात्पेत्वः॥१॥
अग्नयेनीकवतेद्वाविꣳशतिः॥२४॥ ॥यदेकेनप्रजापतिर्यज्ञुषापोविश्वकर्मावन आयाहिसुवर्गायव
ज्योगायत्रेणाग्नउदधेसमीचींद्रायमयुरपांबलायपुरुषमृगः सौरीपृषतः शाकारैरूरलजः सुपर्ण
आग्नेयोश्वोग्नयेनीकवतेचतुर्विꣳशतिः॥२४॥ ॥यदेकेनसपापीयानेतद्वाअग्नेर्धनुस्तद्देवास्त्वेंद्र
ज्येष्ठाअपान्नभ्रेष्वः स्तृपुरोद्विषष्टिः॥६२॥ ॥हरिः ओम्॥ हिरण्यवर्णाः शुचयः पावकायासुजातः
कश्यपोयास्विंद्रः॥ अग्निंयागर्भंदधिरेविरूपास्तानआपश्शꣳस्योनाभवंतु। यासाꣳराजावरुणोया
तिमध्येसत्यानृतेअवपश्यंजनानां॥ मधुश्चुतः शुचयोयाः पावकास्तानआपश्शꣳस्योनाभवंतु॥
यासांदेवादिविकृण्वंतिभक्षंयाअंतरिक्षेबहुधाभवंति। याः पृथिवींपयसोंदंति॥१॥ शुक्रास्तानआपः
शꣳस्योनाभवंतु॥ शिवेनमाचक्षुषापश्यतापः शिवयातनुवोपस्पृशतत्वचंमे॥ सर्वाꣳअग्नीꣳरप्सु

षदोहुवेवोमय्यिवर्चोबलमोजोनिधत्त।यददःसंप्रयतीरहावनदताहते॥तस्मादानद्योनामस्थता
वोनामानिसिंधवः।यत्प्रेषितावरुणेनताःच्छीभँसमवल्गत॥२॥तदाप्नोदिंद्रोवोयतीस्तस्मादा
पोअनुस्ठन।अपकामँस्पंदमानाअवीवरतवोहिकं।इंद्रोवःशक्तिभिर्देवीस्तस्माद्वार्णामवोहि
तं।एकोदेवोअप्यतिष्ठत्स्पंदमानायथावशं।उदानिषुर्महीरितितस्मादुदकमुच्यते।आपोभद्राघृ
तमिदापआसुरग्नीषोमौबिभ्रत्यापइत्ताः।तीव्रोरसोमधुपृचां॥३॥अरंगमआमाप्राणेनसहवर्च
सागन्।आदित्पश्याम्युतवाशृणोम्यामाघोषोगच्छतिवाङ्आसां।मन्येभेजानोअमृतस्यतर्हिहि
रण्यवर्णाअतृपंयदावः।आपोहिष्ठामयोभुवस्तानऊर्जेदधातन।महेरणायचक्षसे।योवःशिवत
मोरसस्तस्यभाजयतेहनः।उशतीरिवमातरः।तस्माअरंगमामवोयस्यक्षयायजिन्वथ।आपो
जनयथाचनः।दिविश्रयस्वांतरिक्षेयतस्वपृथिव्यासंभवब्रह्मवर्चसमसिब्रह्मवर्चसायत्वा॥४॥

सं·पं·
५३

उदंतिसमवल्गतमधुष्वंमातरोह्वाविᳫंशतिश्च ॥१॥ ॥अपांयद्ग्रहांगृह्णात्येतद्वावराजसूयंयदेतेग्र
हाः सर्वोग्निर्वरुणसवोराजसूयमग्निसवश्चित्यस्ताभ्यामेवस्सूयतेथोउभावेवलोकावभिजयतिय
श्चराजसूयेनेजानस्ययश्चाग्निचितआपोभवंत्यापोवाअग्नेर्भ्रातृव्यायदपोग्नेरधस्तादुपदधाति
भ्रातृव्याभिभूत्यैभवत्यात्मनापरास्यभ्रातृव्योभवत्यमृतं॥१॥औवोपुस्तस्मादद्भिर्वंतातमभि
षिंचंतिनार्तिमार्छतिसर्वमायुरेतियस्यैताउपधीयंतेयउचैनाएवंवेदान्नंवाआपःपशवआपोन्नंपशवो
न्नादःपशुमान्भवतियस्यैताउपधीयंतेयउचैनाएवंवेदद्वादशभवंतिद्वादशमासाःसंवत्सरःसंवत्सरे
णैवास्मै॥२॥अन्नमवरुंधेपात्राणिभवंतिपात्रेवाअन्नमद्यतेसयोन्येवान्नमवरुंधआद्वादशात्पुरुषा
दन्नमत्त्यथोपात्रान्नच्छिद्यतेयस्यैताउपधीयंतेयउचैनाएवंवेदकुंभाश्चकुंभीश्चमिथुनानिभवंतिमिथु
नस्यप्रजात्यैप्रप्रजयापशुभिर्मिथुनैर्जायतेयस्यैताउपधीयंतेयउ॥३॥चैनाएवंवेदस्रुग्वाअग्निःसौ

राम
५३

ध्वर्युंयजमानंप्रजाःशुचार्पयतियदपउपदधातिशुचमेवास्यतन्नामयतिनार्तिमार्छत्यध्वर्युर्नयजमानःन्नां
म्यंतिप्रजायचैताउपधीयंतेपांवाएतानिहृदयानियदेताआपोयदेताअपउपदधातिदिव्याभिरेवैनाःसं
सृजतिवर्षुकःपर्जन्यः ॥ ४ ॥ भवतियोवाएतासामायतनंक्लृप्तिंवेदायतनवान्भवतिकल्पतेस्माअनुसी
तमुपदधात्येतद्वाआसामायतनमेषाक्लृप्तिर्यएवंवेदायतनवान्भवतिकल्पतेस्मैद्वंद्वमन्याउपदधाति
वतस्तोमध्येघ्टवाअन्नंवाइष्टकाएतत्खलुवैसाक्षादन्नंयदेषचरुर्यदेतंचरुमुपदधातिसाक्षात् ॥ ५ ॥
एवास्माअन्नमवरुंधेमध्यतउपदधातिमध्यतएवास्माअन्नंदधातितस्मान्मध्यतोन्नमद्यतेबार्हस्प
त्योभवतिब्रह्मवैदेवानांबृहस्पतिर्ब्रह्मणैवास्माअन्नमवरुंधेब्रह्मवर्चसमसिब्रह्मवर्चसायत्वेत्याह
तेजस्वीब्रह्मवर्चसीभवतियस्यैषउपधीयतेयउचैनमेवंवेद ॥ ६ ॥ भूतमस्मैजायतेयस्यैताउपधीयं
तेयउपर्जन्यउपदधातिसाक्षात्सप्तचत्वारिंशच्च ॥ २ ॥ ॥ भूतेष्टकाउपदधात्यत्रात्रैवमृत्युर्जायतेयत्र

यत्रैवम्मृत्युर्जायतितततएवैनमभ्यजंतेतस्मादग्निंचित्सर्वंयुमोरेतिसर्वंह्यस्यमृत्यवोवेष्टास्तस्मादग्नि
चिन्नाभिचरितवैप्रत्यगेनमभिचारस्तृणुतेसूयतेवाएषयोग्निंचिनुतेदेवसुवामेतानिहवीꣳषिभवंत्ये
तावंतोवैदेवानाꣳसवास्तएव॥१॥अस्मैसवान्प्रयच्छंतितएनꣳसुवतेसवोग्निर्वरुणसवोराजसूयंब्र
ह्मसवश्चित्योदेवस्यत्वासवितुःप्रसवइत्याहसवितृप्रसूतएवैनंब्रह्मणादेवताभिरभिषिंचत्यन्नस्या
न्नस्याभिषिंचत्यन्नस्यान्नस्यावरुध्येपुरस्तात्प्रत्यंचमभिषिंचतिपुरस्ताद्धिप्रतीचीनमन्नमद्यतेशी
र्षतोभिषिंचतिशीर्षतोह्यन्नमद्यतआमुखादन्ववस्रावयति॥२॥मुखतएवास्माअन्नाद्यंदधात्यग्ने
स्त्वासाम्राज्येनाभिषिंचामीत्याहैषवाअग्नेःसवस्तेनैवैनमभिषिंचतिबृहस्पतेस्त्वासाम्राज्येनाभिषिंचा
मीत्याहब्रह्मवैदेवानांबृहस्पतिर्ब्रह्मणैवैनमभिषिंचतींद्रस्यत्वासाम्राज्येनाभिषिंचामीत्याहेंद्रियमे
वास्मिन्नुपरिष्टाद्दधात्येतत्॥३॥वैराजसूयस्यरूपंयएवंविद्वानग्निंचिनुतउभावेवलोकावभिजयति

पशवेराजसूयेनेजानस्ययश्चाग्निंचिन्वितइंद्रस्यसुषुवाणस्यदशधेंद्रियंवीर्यंपरापतत्तद्देवाःसौत्रामण्या
समभरन्त्सयतेवाएषयोग्निंचिनुतेग्निंचित्वासौत्रामण्यायजतेंद्रियमेववीर्यंसंभृत्यात्मंधत्ते॥
॥४॥ तएवान्ववस्रावयत्येतदष्टाचत्वारिंशच्च॥३॥ ॥ सजूरब्दोयावभिःसजूरुषाअरुणीभिःसजूः
सूर्यएतशेनसजोषावश्विनादंसोभिःसजूरग्निर्वैश्वानरइडाभिर्घृतेनस्वाहासंवत्सरोवाअब्दोमासा
अयावाउषाअरुणीसूर्यएतशइमेअश्विनासंवत्सरोग्निर्वैश्वानरःपशवइडापशवोघृतंसंवत्सरं
पशवोनुप्रजायंतेसंवत्सरेणैवास्मैपशून्प्रजनयतिदर्भस्तंबेजुहोतियत्॥१॥ वाअस्याअमृतंय
द्वीर्यंतद्दर्भास्तस्मिंजुहोतिस्वैवजायतेन्नादोभवतियस्यैवंजुह्वत्येतावैदेवताअग्नेःपुरस्ताद्भागाः
स्ताएवप्रीणात्यथोचक्षुरेवाग्नेःपुरस्तात्प्रतिदधात्यनंधोभवतियएवंवेदापोवाइदमग्रेसलिलमासीत्स
प्रजापतिःपुष्करपर्णेवातोभूतोलेलायत्सः॥२॥प्रतिष्ठान्नाविंदतसएतदपांकुलायमपश्यत्तस्मिन्नग्नि

मश्चिनुततदियमभवत्ततोवैसप्रत्येतिष्ठद्यांपुरस्तादुपादधात्तच्छिरोभवत्साप्राचीदिग्भ्यांदक्षिणतउपाद
धात्सदक्षिणःपक्षोभवत्सादक्षिणादिग्यांपश्चादुपादधात्तत्पुछमभवत्साप्रतीचीदिग्यामुत्तरत
उपादधात॥४॥सउत्तरःपक्षोभवत्सोदीचीदिग्यामुपरिष्टादुपादधात्तत्पृष्ठमभवत्सोर्ध्वादिगियंवाअ
ग्निःपंचेष्टकस्तस्माद्यदस्यांखनंत्यभीष्टकांतृंदंत्यभिशर्करांऽसर्वावाइयंवयोभ्योनक्तंदुह्रेदीप्यतेत
स्मादिमांवयांऽसिनक्तंनाध्यासतेयएवंविद्वानग्निंचिनुतेप्रत्येव॥५॥तिष्ठत्यभिदिशोजयत्याग्नेयो
वैब्राह्मणस्तस्माद्ब्राह्मणायसर्वासुदिक्ष्वर्धुकंऽस्वामेवतद्दिशमन्वेत्यपांवाअग्निःकुलायंतस्मादापो
ग्निंऽहारुकाःस्वामेवतद्योनिंप्रविशंति॥६॥यद्देलेलायुत्सउत्तरतउपादधादेवद्वात्रिंऽशद्ब्र॥४॥ ॥सं
वत्सरमुख्यंभृत्वाद्वितीयेसंवत्सरआग्नेयमष्टाकपालन्निर्वपेदैंद्रमेकादशकपालंवैश्वदेवंद्वादश
कपालंबार्हस्पत्यंचरुंवैष्णवंत्रिकपालंतृतीयेसंवत्सरेभिजितायजेतयदृष्टाकपालोवैभैत्युष्टाक्षरा

गायत्र्याग्नेयंगायत्रंप्रातःसवनंप्रातःसवनमेवतेनदाधारगायत्रींछंदोयदेकादशकपालोभवत्ये
कादशाक्षरात्रिष्टुगैंद्रंत्रैष्टुभंमाध्यंदिनꣳसवनंमाध्यंदिनमेवसवनंतेनदाधारत्रिष्टुभं॥१॥छंदोय
द्वादशकपालोभवतिद्वादशाक्षराजगतीवैश्वदेवंजागतंतृतीयसवनंतृतीयसवनमेवतेनदाधार
जगतींछंदोयद्बार्हस्पत्यश्चरुर्भवतिब्रह्मवैदेवानांबृहस्पतिर्ब्रह्मैवतेनदाधारयद्वैष्णवस्त्रिकपालो
भवतियज्ञोवैविष्णुर्यज्ञमेवतेनदाधारयत्तृतीयेसंवत्सरेभिजितायजतेभिजित्यैयत्संवत्सरमुख्यंबि
भर्तीममेव॥२॥तेनलोकꣳस्पृणोतियद्द्वितीयेसंवत्सरेग्निंचिनुतेंतरिक्षमेवतेनस्पृणोतियत्तृतीयेसं
वत्सरेयजतेमुमेवतेनलोकꣳस्पृणोत्येतंवैपरआट्णारःकक्षीवाꣳऔशिजोवीतहव्यःश्रायसःत्रस
दस्युःपौरुकुत्स्यःप्रजाकामाअचिन्वतततोवैतेसहस्रꣳसहस्रंपुत्रानविंदंतप्रथतेप्रजयापशुभिः
स्तांमात्रामाप्नोतियांतेगच्छन्यएवंविद्वानेतमग्निंचिनुते॥३॥दाधारत्रिष्टुभमिममेवैवंचत्वारिच॥५॥

सं·पं·
५८

प्रजापतिरग्निमचिनुतँस्क्षुरपविर्भूत्वातिष्ठत्तंदेवाबिभ्यतोनोपायंतेछंदोभिरात्मानंछादयित्वोपायंत
छंदसांछंदस्त्वंब्रह्मवै×स×छंदांꣳसिब्रह्मणएतद्रूपंयत्कृष्णाजिनंकार्ष्णीउपानहावुपमुंचतेछंदोभि
रेवात्मानंछादयित्वाग्निमुपचरत्यात्मनोहिꣳसायैदेवनिधिर्वाएषनिधीयतेयदग्निः॥१॥अन्येवावै
निधिमगुप्तंविंदंतिनवाप्रतिप्रजानात्युखामाक्रामत्यात्मानमेवाधिपांकुरुतेगुप्त्याअथोखल्वाहुर्ना

नि·५

क्रम्येतिनैर्ऋत्युखायदाक्रामेन्नैर्ऋत्याआत्मानमपिदध्यात्तस्मान्नाक्रम्यापुरुषशीर्षमुपदधातिगु
प्त्याअथोयथाब्रूयादेतन्मेगोपायेतितादृगेवतत्॥२॥प्रजापतिर्वाअथर्वाग्निरेवदध्यङ्ङाथर्वणस्त
स्येष्टकाअस्थान्येतꣳहवावतदृषिरभ्यनूवाचेंद्रोदधीचोअस्थभिरितियदिष्टकाभिरग्निंचिनोतिसा
त्मानमेवाग्निंचिनुतेसात्मामुष्मिंल्लोकेभवतियएवंवेदशरीरंवाएतदग्नेर्यच्चित्यआत्मावैश्वानरो
यच्चितेवैश्वानरंजुहोतिशरीरमेवसꣳस्कृत्य॥३॥अभ्यारोहतिशरीरंवाएतद्यजमानःसꣳस्कुरुते

राम
५६

यदग्निंचिनुतेयच्चितेवैश्वानरंजुहोतिशरीरमेवसꣳस्कृत्यात्मनाभ्यारोहतितस्मात्तस्यनावद्यंतिजी
वन्नेवदेवानप्येतिवैश्वानर्यापुरीषमुपदधातीयंवाअग्निर्वैश्वानरस्तस्यैषाचितिर्यत्पुरीषमग्निमे
वैवैश्वानरंचिनुतएषावाअग्नेःप्रियातनूर्यद्वैश्वानरःप्रियामेवास्यतनुवमवरुंधे॥४॥अग्निस्तत्सꣳ
स्कृत्याग्नेर्देवान्॥६॥ ॥अग्नेर्वैदीक्षयोदेवाविराजमाप्नुवंतितिस्रोरात्रीर्दीक्षितस्यात्त्रिपदाविराड्विरा
जमाप्नोतिषड्रात्रीर्दीक्षितस्यात्षड्वाऋतवःसंवत्सरःसंवत्सरोविराड्विराजमाप्नोतिदशरात्रीर्दीक्षि
तस्याद्दशाक्षराविराड्विराजमाप्नोतिद्वादशरात्रीर्दीक्षितस्याद्द्वादशमासाःसंवत्सरःसंवत्सरोविराड्वि
राजमाप्नोतित्रयोदशरात्रीर्दीक्षितस्यात्त्रयोदश॥१॥मासाःसंवत्सरःसंवत्सरोविराड्विराजमाप्नो
तिपंचदशरात्रीर्दीक्षितस्यात्पंचदशवाअर्धमासस्यरात्रयोर्धमासशःसंवत्सरआप्यतेसंवत्सरोवि
राड्विराजमाप्नोतिसप्तदशरात्रीर्दीक्षितस्याद्द्वादशमासाःपंचर्तवःससंवत्सरःसंवत्सरोविराड्विराज

माप्नोतिचतुर्विꣳशतिꣳरात्रीर्दीक्षितस्याच्चतुर्विꣳशतिरर्धमासाः संवत्सरः संवत्सरोविराड्विराजमाप्नो
तित्रिꣳशतꣳरात्रीर्दीक्षितस्यात्॥ २॥ त्रिꣳशदक्षराविराड्विराजमाप्नोतिमासंदीक्षितस्याद्योमासः सꣳ
वत्सरः संवत्सरोविराड्विराजमाप्नोतिचतुरोमासोदीक्षितस्याच्चतुरोवाएतंमासान्वसवोबिभरुस्तेपृथि
वीमाजयन्गायत्रींछंदोष्टौरुद्रास्तेंतरिक्षमाजयंत्रिष्टुभंछंदोद्वादशादित्यास्तेदिवमाजयंजगतींछंद
स्ततोवैतेव्यावृतमगच्छंछ्रैष्ठ्यंदेवानांतस्माद्द्वादशमासोभृत्वाग्निंचिन्वीतद्वादशमासाः संवत्सरः संवत्स
रोग्निश्चित्यस्तस्याहोरात्राणीष्टकाआप्तेष्टकमेनंचिनुतेथोव्यावृतमेवगच्छतिश्रैष्ठ्यꣳसमानानां॥ ३॥
स्यात्त्रयोदशत्रिꣳशतꣳरात्रीर्दीक्षितस्याद्द्वेतेष्टाविꣳशतिश्च॥ ७॥ ॥सुवर्गायवाएषलोकायचीयते
यदग्निस्तंयन्नान्वारोहेत्सुवर्गाल्लोकाद्यजमानोहीयेतपृथिवीमाक्रमिषंप्राणोमामाहासीदंतरिक्षमा
क्रमिषंप्रजामामाहासीद्दिवमाक्रमिषꣳसुवरगन्मेत्याहेषवाअग्नेरन्वारोहस्तेनैवैनमन्वारोहतिसुवर्ग

स्यलोकस्यसमष्ट्यैयत्सहस्रसंमितांमिनुयात्॥१॥कनीयाꣳसंयज्ञक्रतुमुपेयात्पापीयस्यस्यात्मनःप्रजा
स्याद्वेदिसंमितांमिनोतिज्यायाꣳसमेवयज्ञक्रतुमुपैतिनास्यात्मनःपापीयसीप्रजाभवतिसाहस्रंचि
न्वीतप्रथमंचिन्वानःसहस्रसंमितोवाअयंलोकइममेवलोकमभिजयतिद्विषाहस्रंचिन्वीतद्वितीयं
चिन्वानोद्विषाहस्रंवाअंतरिक्षमंतरिक्षमेवाभिजयतित्रिषाहस्रंचिन्वीततृतीयंचिन्वानः॥२॥त्रिषाह
स्रोवाअसौलोकोमुमेवलोकमभिजयतिजानुदघ्नंचिन्वीतप्रथमंचिन्वानोगायत्रियैवेमंलोकमभ्या
रोहतिनाभिदघ्नंचिन्वीतद्वितीयंचिन्वानस्त्रिष्टुभैवांतरिक्षमभ्यारोहतिग्रीवदघ्नंचिन्वीततृतीयंचि
न्वानोजगत्यैवामुंलोकमभ्यारोहतिनाग्निंचित्वारामामुपेयादयोनौरेतोधास्यामीतिनद्वितीयंचित्वा
न्यस्यस्त्रियं॥३॥उपेयान्नतृतीयंचित्वाकांचनोपेयाद्रेतोवाएतन्निधत्तेयदग्निंचिनुतेयदुपेयाद्रेत
साव्यृध्येताथोखल्वाहुरप्रजस्यंतद्यन्नोपेयादितियद्रेतःसिचावुपदधातितेएवयजमानस्यरेतोबि

सं·पं·
५८

भर्तुस्तस्मादुपेयाद्रेतसोस्कंदाय त्रीणि वाव रेतांसि पिता पुत्रः पौत्रः ॥४॥ यद्वेरेतःसिचावुपदध्याद्रेतो
स्यविछिंद्यात्तिस्रउपदधातिरेतसः संतत्याइयंवावप्रथमारेतःसिग्वाग्वाइयंतस्मात्पश्यंतीमांपश्यंतिवा
चंवदंतीमंतरिक्षंद्वितीयाप्राणोवा अंतरिक्षंतस्मान्नांतरिक्षंपश्यंतिनप्राणमसौतृतीयाचक्षुर्वाअसौ
तस्मात्पश्यंत्यमूंपश्यंतिचक्षुर्यजुष्मांत्र ॥५॥ अमूंत्वोपदधातिमनसामध्यमामेषांल्लोकानांकृत्या
अथोप्राणानामिष्टायज्ञोभृगुभिराशीर्दावसुभिस्तस्यतइष्टस्यवीतस्यद्रविणेहभक्षीयेत्याहस्तुतश
स्त्रेएवैतेनदुहेपितामातरिश्वाछिद्रापदाधा अछिद्राउशिजःपदानुतक्षुः सोमोविश्वविन्नेतानेषद्बृ
हस्पतिरुक्थामदानिशंसिषदित्यद्वैतद्वा अग्नेरुक्थंतेनैवैनमनुशंसति ॥६॥ सिनुयात्तृतीयंचिन्वा
नस्त्रियंपौत्रश्चैवैसप्तमंत्र ॥७॥ ॥ स्रयतेवाएषोग्नीनांयउखायांभ्रियतेयदधःसादयेद्गर्भाः प्रपादुका
स्युरथोयथासवात्प्रत्यवरोहेदितितादृगेवतदासंदीसादयतिगर्भाणांधृत्याअप्रपादायाथोसवमेवैनं

राम
५८

करोतिगर्भोवाएषयदुख्योयोनिःशिक्यंयच्छिक्यादुखान्निरूहेद्योनेर्गर्भंन्निर्हण्यात्षडुद्यामंशिक्यं
भवतिषोढाविहितोवै॥१॥पुरुषआत्माचशिरश्चचत्वार्यंगान्यात्मन्नेवैनंबिभर्तिप्रजापतिर्वाएषय
दग्निस्तस्योखाचोलूखलंचस्तनौतावस्यप्रजाउपजीवंतियदुखांचोलूखलंचोपदधातिताभ्यामेव
यजमानोमुष्मिंल्लोकेग्निंदुहेसंवत्सरोवाएषयदग्निस्तस्यत्रेधाविहिताइष्टकाःप्राजापत्यावैष्णवीः
॥२॥वैश्वकर्मणीरहोरात्राण्येवास्यप्राजापत्यायदुख्यंबिभर्तिप्राजापत्याएवतदुपधत्तेयत्समिध
आदधातिवैष्णवावैवनस्पतयोवैष्णवीरेवतदुपधत्तेयदिष्टकाभिरग्निंचिनोतीयंवैविश्वकर्मावैश्व
कर्मणीरेवतदुपधत्तेतस्मादाहुस्त्रिवृदग्निरितितंवाएतंयजमानएवचिन्वीतयदस्यान्यश्चिनुया
द्यत्तंदक्षिणाभिर्नराधयेदग्निमस्यवृंजीतयोस्याग्निंचिनुयात्तंदक्षिणाभीराधयेदग्निमेवतत्स्पृणो
ति॥३॥षोढाविहितोवैवैष्णवीरन्याविंशतिश्च॥१॥ ॥प्रजापतिरग्निमचिनुतर्तुभिःसंवत्सरंवसं

सं·पं·
५९

तेनैवास्यपूर्वार्धम्चिनुतेग्रीष्मेणदक्षिणंपक्षंवर्षाभिःपुछꣳशरदोत्तरंपक्षꣳहेमंतेनमध्यंब्रह्मणावा
अस्यतत्पूर्वार्धम्चिनुतेक्षत्रेणदक्षिणंपक्षंपशुभिःपुछंविशोत्तरंपक्षमाशयामध्यंयएवंविद्वानग्निं
चिनुतऋतुभिरेवैनंचिनुतेथोएतदेवसर्वमव ॥१॥ रुंधेशृण्वंत्येनमग्निंचिक्यानमत्यन्नꣳशैवतद्
यंवावप्रथमाचितिरोषधयोवनस्पतयःपुरीषमंतरिक्षंद्वितीयावयाꣳसिपुरीषमसौतृतीयानक्ष
त्राणिपुरीषंयज्ञश्चतुर्थीदक्षिणापुरीषंयजमानःपंचमीप्रजापुरीषंयत्त्रिचितीकंचिन्वीतयज्ञंदक्षि
णामात्मानंप्रजामंतरियात्तस्मात्पंचचितीकश्चेतव्यएतदेवसर्वꣳस्पृणोतियत्तिस्रश्चितयः ॥२॥ त्रि
वृध्यग्निर्यद्वेद्विपाद्यजमानःप्रतिष्ठित्यैपंचचितयोभवंतिपांक्तःपुरुषआत्मानमेवस्पृणोतिपंच
चितयोभवंतिपंचभिःपुरीषैरभ्यूहतिदशसंपद्यंतेदशाक्षरोवैपुरुषोयावानेवपुरुषस्तꣳस्पृणो
त्यथोदशाक्षराविराडन्नंविराड्विराज्येवान्नाद्येप्रतितिष्ठतिसंवत्सरोवैषष्ठीचितिर्ऋतवःपुरीषꣳषड्

राम
५९

तयोभवंतिषड्डुरीषाणिद्वादशसंपद्यंतेद्वादशमासाःसंवत्सरःसंवत्सरएवप्रतितिष्ठति॥३॥अवृवि
तयःपुरीषंपंचदशाव॥१०॥ ॥रोहितोधूम्ररोहितःकर्कंधुरोहितस्तेप्राजापत्याबभ्रुररुणबभ्रुःशु
कबभ्रुःस्तेरौद्राःश्येतःश्येताक्षःश्येतग्रीवस्तेपितृदेवत्यास्तिस्रःकृष्णावशावारुण्यःस्तिस्रःश्वेताव
शाःसौर्योमैत्राबार्हस्पत्याधूम्रललामास्तूपराः॥१॥११॥पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्तेमारु
ताःफल्गूर्लोहितोर्णीबलक्षीताःसारस्वत्यःपृषतीस्थूलपृषतीक्षुद्रपृषतीतावैश्वदेव्यस्तिस्रःश्या
मावशाःपौष्णियःस्तिस्रोरोहिणीर्वशामैत्रियऐंद्राबार्हस्पत्याअरुणाललामास्तूपराः॥१॥रोहि
तःपृश्निःषड्डुःशातिःषड्डुःशातिः॥१२॥ ॥शितिबाहुरन्यतःशितिबाहुःसमंतशितिबाहुस्तऐंद्रवायु
वाःशितिरंध्रोन्यतःशितिरंध्रःसमंतशितिरंध्रस्तेमैत्रावरुणाःशुद्धवालःसर्वशुद्धवालोमणिवा ल
स्तआश्विनाःस्तिस्रःशिल्पावशावैश्वदेव्यस्तिस्रःश्येनीःपरमेष्ठिनेसोमापौष्णाःश्यामललामास्तू प

सं·पं·
६०

रा: ॥१॥ शितिबाहुः पंचविꣳशतिः ॥१३॥ ॥ उन्नतऋषभोवामनस्तऐंद्रावरुणाः शितिककुच्छितिपृष्ठः
शितिभसस्तऐंद्राबार्हस्पत्याः शितिपाच्छित्योष्ठः शितिभ्रुस्तऐंद्रावैष्णवाः स्तिस्रः सिध्मावृशावैश्वकर्म
ण्यः स्तिस्रोधात्रेपृषोदराऐंद्रापौष्णाश्येतललामास्तूपराः ॥१॥ उन्नतः पंचविꣳशतिः ॥१४॥ ॥ कृष्णा
स्त्रयोयामाः सौम्यास्त्रयः श्वितिंगाअग्नयेयविष्ठायत्रयोनकुलास्तिस्रोरोहिणीस्त्र्यव्यस्तावसूनां
तिस्रोरुणादित्यौहस्तारुद्राणाꣳ सोमैंद्राबभ्रुललामास्तूपराः ॥१॥ कृष्णास्त्रयोविꣳशतिः ॥१५॥ ॥
शुंठास्त्रयोवैष्णवाअधीलाधुकर्णास्त्रयोविष्णवउरुक्रमायलप्सुदिनस्त्रयोविष्णवउरुगायायपंचावी
स्तिस्रआदित्यानांत्रिवत्सास्तिस्रोंगिरसामैंद्रावैष्णवागौरललामास्तूपराः ॥१॥ शुंठाविꣳशतिः ॥१६॥
इंद्रायराज्ञेत्रयः शितिपृष्ठाइंद्रायाधिराजायत्रयः शितिककुदइंद्रायस्वराज्ञेत्रयः शितिभसदास्ति
स्रस्तुर्यौह्यः साध्यानांतिस्रः पष्ठौह्योविश्वेषांदेवानामाग्नेंद्राः कृष्णललामास्तूपराः ॥१॥ इंद्रायद्वा

राम
६०

विंशतिः॥१७॥ ॥अदित्यैत्रयोरोहिनैताइंद्राण्यैत्रयःकृष्णैताःकुह्वैत्रयोरुणेतास्तिस्रोधेनवोराकायैत्र
योनड्वाहःसिनीवाल्याआग्नावैष्णवारोहितललामास्तूपराः॥१॥ अदित्याअष्टादश॥१८॥ ॥सौम्यास्त्र
यःपिशंगाःसोमायराज्ञेत्रयःसारंगाःपार्जन्यानभोरूपाःस्तिस्रोजामल्हाइंद्राण्यैस्तिस्रोमेष्यआदि
त्याद्यावापृथिव्यामालंगास्तूपराः॥१॥ सौम्याएकान्नविंशतिः॥१९॥ ॥वारुणास्त्रयःकृष्णललामा
वरुणायराज्ञेत्रयोरोहितललामावरुणायरिशादसेत्रयोरुणललामाःशिल्पास्त्रयोवैश्वदेवास्त्रयः
पृश्नयःसर्वदेवत्याऐंद्रास्सूराःश्येतललामास्तूपराः॥१॥ वारुणाविंशतिः॥२०॥ ॥सोमायस्वराज्ञे
नोवाहावनड्वाहाविंद्राग्निभ्यामोजोदाभ्यामुष्टाराविंद्राग्निभ्यांबलदाभ्यांः सीरवाहाववीद्वेधेनूभौ
मीदिग्भ्योवडबेद्वेधेनूभौमीवैराजीपुरुषीद्वेधेनूभौमीवायवआरोहणवाहावनड्वाहौवारुणीकृष्णेवशे
अराज्यौदिव्यावृषभौपरिमरौ॥१॥ सोमायस्वराज्ञेतुवस्त्रिंशत्॥२१॥ ॥एकादशप्रातर्गव्याःपशव

आलभ्यंतेछगलःकल्माषःकिकिदीविर्विदीगयस्तेत्वाष्ट्राःसौरीर्नवश्वेतावशाअनूबंध्याभवंत्याग्ने
यैंद्राग्न आश्विनस्तेविशालयूपआलभ्यंते॥१॥एकादशापंचविंशतिः॥२२॥ ॥पिशंगास्त्रयोवा
संताःसारंगास्त्रयोग्रैष्माःपृषतस्त्रयोवार्षिकाःपृश्नयस्त्रयःशारदाःपृश्निसक्थास्त्रयोहैमंतिकाअव
लिप्तास्त्रयःशैशिराःसंवत्सरायनिवक्षसः॥१॥पिशंगाविंशतिः॥२३॥ ॥हिरण्यवर्णाअपांग्र
हान्भृतेष्टकाःसजूःसंवत्सरमुख्यंप्रजापतिःसक्षुरपविरग्नेर्वैदीक्षयासुवर्गायतंयन्नसृयतेप्रजाप
तिर्क्रतुर्भिशोहितःपृश्निःशितिबाहुरुन्नतःकृष्णाःश्वुंवाइंद्रायादित्यैसौम्यावारुणासोमायैकादशापि
शंगास्त्रयोविंशतिः॥२३॥ ॥हिरण्यवर्णाभृतेष्टकाश्छंदोयत्कनीयाःसंत्रिवृध्यग्निर्वीरूपाश्चतुःपं
चाशत्॥५४॥ ॥हरिःओम्॥योवाअयथादेवतमग्निंचिनुतआदेवताभ्योवृश्च्यतेपापीयान्भवतियोय
थादेवतन्नदेवताभ्यआवृश्च्यतेवसीयान्भवत्याग्नेय्यागायत्रियाप्रथमांचितिमभिमृशेत्त्रिष्टुभाद्विती

यांजगत्यातृतीयामनुष्टुभाचतुर्थींपंक्त्यापंचमींयथादेवतमेवाग्निंचिनुतेनदेवताभ्यआवृश्च्यतेवसी
यान्भवतीडायैवाएषाविभक्तिःपशवइडापशुभिरेनं॥१॥चिनुतेयोवैप्रजापतयेप्रतिप्रोच्याग्निंचिनो
तिनार्तिमार्छत्यश्वावभितस्तिष्ठेतांकृष्णउत्तरतःश्वेतोदक्षिणतस्तावालभ्येष्टकाउपदध्यादेतद्वैप्रजाप
तेरूपंप्राजापत्योश्वःसाक्षादेवप्रजापतयेप्रतिप्रोच्याग्निंचिनोतिनार्तिमार्छत्येतद्वाअन्होरूपंयच्छ्वेतो
श्वोरात्रियैकृष्णएतदन्हः॥२॥रूपंयदिष्टकारात्रियैपुरीषमिष्टकाउपधास्यञ्छ्वेतमश्वमभिमृशेत्पुरी
षमुपधास्यन्कृष्णमहोरात्राभ्यामेवैनंचिनुतेहिरण्यपात्रंमधोःपूर्णंददातिमधव्योसानीतिसौर्याचि
त्रवत्यावेक्षतेचित्रमेवभवतिमध्यंदिनेश्वमवघ्रापयत्यसौवाआदित्यइंद्रएषप्रजापतिःप्राजापत्योश्व
स्तमेवसाक्षादृध्नोति॥३॥एनमेतदन्होश्चत्वारिꣳशच्च॥१॥ ॥त्वामग्नेवृषभंचेकितानंपुनर्युवानंज
नयन्नुपागां। अस्थूरिणोगार्हपत्यानिसंतुतिग्मेननोब्रह्मणासꣳशिशाधि। पशवोवाएतेयदिष्टकाश्चि

सं·पं·
६२

त्वांवित्यामृषभमुपदधातिमिथुनमेवास्यतद्यज्ञेकरोतिप्रजननायतस्माद्यूथेयूथऋषभः।संवत्सरस्य
प्रतिमांयांत्वारात्र्युपासते।प्रजाꣳसुवीरांकृत्वाविश्वमायुर्व्यश्नवत्।प्राजापत्यां॥१॥एतामुपदधातीयंवावै
षैकाष्टकायदेवैकाष्टकायामन्नंक्रियतेतदेवैतयावरुंधएषावैप्रजापतेःकामदुघातयैवयजमानोमुष्मि
ल्लोकेग्निंदुहेयेनदेवाज्योतिषोर्ध्वाउदायन्येनादित्यावसवोयेनरुद्राः।येनांगिरसोमहिमानमानशुस्ते
नैतुयजमानःस्वस्ति।सुवर्गायवाएषलोकाय॥२॥चीयतेयदग्निर्येनदेवाज्योतिषोर्ध्वाउदायन्नित्युख्यꣳ
समिंधइष्टकाएवैताउपधत्तेवानस्पत्याःसुवर्गस्यलोकस्यसमष्ट्यैशतायुधायशतवीर्यायशतोतये
भिमातिषाहे।शतंयोनःशरदोअजीतानिंद्रोनेषदतिदुरितानिविश्वा।येचत्वारःपथयोदेवयानाअंतरा
द्यावापृथिवीवियंति।तेषांयोअज्यानिमजीतिमावहात्तस्मैनोदेवाः॥३॥परिदत्तेहसर्वे।ग्रीष्मोहेमंत
उतनोवसंतःशरद्वर्षाःसुवितन्नोअस्तु।तेषामृतूनाꣳशतशारदानांनिवातएषामभयेस्याम।इदुव

राम
६२

त्सरायपरिवत्सरायसंवत्सरायकृणुताबृहन्नमः। तेषांवयꣳसुमतौयज्ञियानांज्योगजीताअहतास्या
म। भद्रान्नःश्रेयःसमनैष्टदेवास्त्वयावसेनसमशीमहित्वा। सनोमयोभूःपितो॥ ४॥ आविशस्वशं
तोकायतनुवेस्योनः। अज्यानीरेताउपदधात्येतावैदेवताअपराजितास्ताएवप्रविशतिनैवजीयते
ब्रह्मवादिनोवदंतियदर्धमासामासाऋतवःसंवत्सरओषधीःपचंत्यथकस्मादन्याभ्योदेवताभ्यआ
ग्रयणन्निरुप्यतइत्येताहितद्देवताउदजयन्यदृतुभ्योनिर्वपेद्देवताभ्यःसमदंदध्यादाग्रयणंनिरुप्यै
ताआहुतीर्जुहोत्यर्धमासानेवमासानृतून्त्संवत्सरंप्रीणातिनदेवताभ्यःसमदंदधातिभद्रान्नः
श्रेयःसमनैष्टदेवाइत्याहहुताद्याययजमानस्यापराभावाय॥ ५॥ प्राजापत्यान्लोकायदेवाःपितो
दध्यादाग्रयणंपंचविꣳशतिश्च॥ २॥ ॥ इंद्रस्यवज्रोसिवार्त्रघ्नस्तनूपानःप्रतिस्पशः। योनःपुरस्ता
द्दक्षिणतःपश्चादुत्तरतो[illegible]घायुरभिदासत्येतꣳसोश्मानमृच्छतु। देवासुराःसंयत्ताआसंतेसुरा

सं·पं·
६३

दिग्भ्य आबाधंततांदेवाइष्वावज्रेणापानुदंतयद्वज्रिणीरुपदधातीष्वैवतद्वज्रेणयजमानोभ्रा
तृव्यानपनुदतेदिक्षूप॥१॥दधातिदेवपुराएवैतास्तनूपानीःपर्यूहतेग्नाविष्णूसजोषसेमावर्धंतुवां
गिरः।द्युम्नैर्वाजेभिरागतं।ब्रह्मवादिनोवदंतियन्नदेवतायैजुह्वत्यथकिंदेवत्यावसोर्धारेत्यग्निर्वसु
स्तस्यैषाधाराविष्णुर्वसुस्तस्यैषाधाराग्नावैष्णव्यर्चावसोर्धारांजुहोतिभागधेयेनैवैनौसमर्धयत्य
थोएतां॥२॥एवाहुतिमायतनवतींकरोतियत्कामएनांजुहोतितदेवावरुंधेरुद्रोवाएषयदग्निस्त
स्यैतेतनुवौघोरान्याशिवान्यायच्छतरुद्रीयंजुहोतियैवास्यघोरातनूस्तांतेनशमयतियद्वसोर्धा
रांजुहोतियैवास्यशिवातनूस्तांतेनप्रीणातियोवैवसोर्धारायै॥३॥प्रतिष्ठांवेदप्रत्येवतिष्ठतियदा
ज्यमुच्छिष्येततस्मिन्ब्रह्मौदनंपचेत्तंब्राह्मणाश्चत्वारःप्राश्नीयुरेषवाअग्निर्वैश्वानरोयद्ब्राह्मणए
षाखलुवाअग्नेःप्रियातनूर्यद्वैश्वानरःप्रियायामेवैनांतनुवांप्रतिष्ठापयतिचतस्रोधेनूर्दद्यात्ताभि

राम
६३

रेवयजमानोमुष्मिन्लोकेग्निंदुहे ॥४॥ उपैतांधारयैषड्वारिꣳशच्च ॥३॥ ॥ वित्तिंजुहोमिमनसाघृते
नेत्याहादाभ्योवैनामैषाहुतिर्वैश्वकर्मणीनैनंविक्यानंभ्रातृव्योदभ्नोत्यथोदेवताएवावरुंधेग्नेतमद्य
तिपंक्त्याजुहोतिपंक्त्याहुत्यायज्ञमुखमारभतेसप्ततेअग्नेसमिधःसप्तजिह्वाइत्याहहोत्राएवावरु
धेग्निर्देवेभ्योपाक्रामद्भागधेयं ॥१॥ इच्छमानस्तस्माएतद्भागधेयंप्रायच्छन्नेतद्वाअग्नेरग्निहोत्रमे
तर्हिखलुवाएषजातोयर्हिसर्वश्चितोजातायैवास्माअन्नमपिदधातिसएनंप्रीतःप्रीणातिवसीया
न्भवतिब्रह्मवादिनोवदंतियदेषगार्हपत्यश्चीयतेथक्वास्याहवनीयइत्यसावादित्यइतिब्रूयादेत
स्मिन्हिसर्वाभ्योदेवताभ्योजुह्वति ॥२॥ यएवंविद्वानग्निंचिनुतेसाक्षादेवदेवताऋध्नोत्यग्नेयशस्वि
न्यशसेममर्पयेंद्रावतीमपचितीमिहावह।अयंमूर्धापरमेष्ठीसुवर्चाःसमानानामुत्तमश्लोको
अस्तु।भद्रंपश्यंतउपसेदुरग्रेतपोदीक्षामृषयःसुवर्विदः।ततःक्षत्रंबलमोजश्चजातंतदस्मैदेवा

अभिसन्नमंतु। धाताविधातापरमा॥३॥ उतसंदृक्प्रजापतिःपरमेष्ठीविराजा। स्तोमाश्छंदाꣳसिनिवि
दोमआहूरेतस्मैराष्ट्रमभिसन्नमाम। अभ्यावर्तध्वमुपमेतसाकमयꣳशास्ताधिपतिर्वोअस्तु। अस्य
विज्ञानमनुसꣳरभध्वमिमंपश्चादनुजीवाथसर्वे। राष्ट्रभृतएताउपदधात्येषावाअग्नेश्चितीराष्ट्रभृत्तयै
वास्मिन्राष्ट्रंदधातिराष्ट्रमेवभवतिनास्माद्राष्ट्रंभ्रꣳशते॥४॥ भागधेयंजुहोतिपरमाराष्ट्रंदधातिसप्त
च॥४॥ ॥यथावैपुत्रोजातोम्रियतएवंवाएषम्रियतेयस्याग्निरुख्यउद्वायतियन्निर्मथ्यंकुर्याद्विच्छिंद्या
द्भ्रातृव्यमस्मैजनयेत्सएवपुनःपरीध्यस्स्वादेवैनंयोनेर्जनयतिनास्मैभ्रातृव्यंजनयतितमोवाएतंगृह्णा
तियस्याग्निरुख्यउद्वायतिमृत्युस्तमःकृष्णंवासःकृष्णाधेनुर्दक्षिणातमसा॥१॥ एवतमोमृत्युमपह
तेहिरण्यंददातिज्योतिर्वैहिरण्यंज्योतिषैवतमोपहतेथोतेजोवैहिरण्यंतेजएवात्मंधत्तेसुवर्णंघर्मंस्वा
हासुवर्णार्कंस्वाहासुवर्णंशुक्रंस्वाहासुवर्णंज्योतिस्वाहासुवर्णंसूर्यंस्वाहार्कोवाएषयदग्निरसावादित्यः

॥२॥अश्वमेधोयदेताआहुतीर्जुहोत्यर्कोश्वमेधयोरेवज्योतीꣳषिसंदधात्येषह्वाअर्कोश्वमेधीय
स्यैतदग्नौक्रियतआपोवाइदमग्रेसलिलमासीत्सएतांप्रजापतिःप्रथमांचितिमपश्यत्तामुपाधत्त
तदियमभवत्तंविश्वकर्माब्रवीदुपत्वायानीतिनेहलोकोस्तीति॥३॥अब्रवीत्सएतांद्वितीयांचिति
मपश्यत्तामुपाधत्ततदंतरिक्षमभवत्सयज्ञःप्रजापतिमब्रवीदुपत्वायानीतिनेहलोकोस्तीत्यब्रवी
त्सविश्वकर्माणमब्रवीदुपत्वायानीतिकेनमोपैष्यसीतिदिश्याभिरित्यब्रवीत्तंदिश्याभिरुपैत्ताउ
पाधत्ततादिशः॥४॥अभवन्त्सपरमेष्ठीप्रजापतिमब्रवीदुपत्वायानीतिनेहलोकोस्तीत्यब्रवीत्स
विश्वकर्माणंचयज्ञंचाब्रवीदुपवामायानीतिनेहलोकोस्तीत्यब्रूताꣳसएतांतृतीयांचितिमपश्य
त्तामुपाधत्ततदसावभवत्सआदित्यःप्रजापतिमब्रवीदुपत्वा॥५॥आयानीतिनेहलोकोस्तीत्य
ब्रवीत्सविश्वकर्माणंचयज्ञंचाब्रवीदुपवामायानीतिनेहलोकोस्तीत्यब्रूताꣳसपरमेष्ठिनमब्रवी

सं·पं·
६५

दुपत्वायानीतिकेनमोपैष्यसीतिलोकंपृणयेत्यब्रवीत्तंलोकंपृणयोपैत्तस्मादयातयाम्नीलोकंपृणा।
यातयामाह्यसौ॥६॥आदित्यस्तानृषयोऽब्रुवन्नुपत्वआयामेतिकेननउपैष्यथेतिभूम्नेत्यब्रुवन्तांद्वा
भ्यांचितीभ्यामुपायन्त्सपंचचितीकःसमपद्यतयएवंविद्वानग्निंचिनुतेभूयानेवभवत्यभीमांल्लो
कांजयतिविदुरेनंदेवाअथोएतासामेवदेवतानाꣳसायुज्यंगच्छति॥७॥तमसादित्योस्तीतिद्वि।
आदित्यःप्रजापतिमब्रवीदुपत्वासौपंचचत्वारिꣳशच्च॥५॥ ॥वयोवाअग्निर्यदग्निचित्पक्षिणो
ऽश्नीयात्तमेवाग्निमद्यादार्तिमार्छेत्संवत्सरंव्रतंचरेत्संवत्सरꣳहिव्रतंनातिपशुर्वाएषयदग्निर्हिन
स्तिखलुवैतंपशुर्यएनंपुरस्तात्प्रत्यंचमुपचरतितस्मात्पश्चात्प्राङुपचर्यआत्मनोऽहिꣳसायैतेजो
सितेजोमेयच्छपृथिवींयच्छ॥१॥पृथिव्यैमापाहिज्योतिरसिज्योतिर्मेयच्छांतरिक्षंयच्छांतरिक्षान्मा
पाहिसुवरसिसुवर्मेयच्छदिवंयच्छदिवोमापाहीत्याहैताभिर्वाइमेलोकाविधृतायदेताउपदधात्ये

राम
६५

षांलोकानांविधृत्यैस्वयमातृष्णाउपधायहिरंण्येष्टकाउपदधातीमेवैलोकास्वयमातृष्णाज्योतिर्हि
रण्यंयत्स्वयमातृष्णाउपधाय॥२॥ हिरंण्येकाष्टउपदधातीमानेवैताभिर्लोकांज्योतिष्मतःकुरुते
थोएताभिरेवास्माइमेलोकाःप्रभांतियास्तेअग्नेसूर्येरुचउद्यतोदिवमातन्वंतिरश्मिभिः।ताभिः
सर्वाभीरुचेजनायनस्कृधि।यावोदेवाःसूर्येरुचोगोष्वश्वेषुयारुचः।इंद्राग्नीताभिःसर्वाभीरुचन्नो
धत्तबृहस्पते।रुचन्नोधेहि॥३॥ ब्राह्मणेषुरुचꣳराजसुनस्कृधि।रुचंविश्येषुशूद्रेषुमयिधेहिरुचा
रुचं॥ द्वेधावाअग्निंचिक्यानस्ययशइंद्रियंगछत्यग्निंवाचितमीजानंवायदेताआहुतीर्जुहोत्यात्म
न्नेवयशइंद्रियंधत्तईश्वरोवाएषआर्तिमार्तोर्योग्निंचिन्वन्नधिक्रामतितत्वायामिब्रह्मणावंदमा
नइतिवारुण्यर्चा॥४॥ जुहुयाछांतिरेवैषाग्नेर्गुप्तिरात्मनोहविष्कृतोवाएषयोग्निंचिनुतेयथावैहवि
स्कंदत्येवंवाएषस्कंदतियोग्निंचित्वास्त्रियमुपैतिमैत्रावरुण्यामिक्षयायजेतमैत्रावरुणतामेवोपै

त्यात्मनोऽस्कंदाययोवाअग्निमृतुस्थांवेदर्तुर्ऋतुरस्मैकल्पमानएतिप्रत्येवतिष्ठतिसंवत्सरोवाअग्निः
॥५॥ऋतुस्थास्तस्यवसंतःशिरोग्रीष्मोदक्षिणःपक्षोवर्षाःपुछꣳशरदुत्तरःपक्षोहेमंतोमध्यंपूर्वप
क्षाश्चितयोपरपक्षाःपुरीषमहोरात्राणीष्टकाएषवाअग्निर्ऋतुस्थायएवंवेदर्तुर्ऋतुरस्मैकल्पमान
एतिप्रत्येवतिष्ठतिप्रजापतिर्वाएतंज्यैष्ठ्यकामोन्यधत्ततततोवैसज्यैष्ठ्यमगछद्यएवंविद्वानग्निंचिनु
तेज्यैष्ठ्यमेवगछति॥६॥पृथिवींयछयन्त्वयमातृणाउपधायधेहत्वाग्निश्चिनुतत्रीणिच॥६॥ ॥
यदाकृतात्समसुस्रोहृदोवामनसोवासंभृतंचक्षुषावा।तमनुप्रेहिसुकृतस्यलोकंयत्रर्षयःप्रथमजा
येपुराणाः।एतꣳसधस्थपरितेददामियमावहाच्छेवधिंजातवेदाः।अन्वागंतायज्ञपतिर्वोअत्रतꣳस्म
जानीतपरमेव्योमन्।जानीतादेनंपरमेव्योमंदेवाःसधस्थाविदरूपमस्य।यदागछात्॥१०॥पथिभि
र्देवयानैरिष्टापूर्तेकृणुतादाविरस्मै।संप्रच्यवध्वमनुसंप्रयाताग्नेपथोदेवयानान्कृणुध्वं।अस्मिन्त्स

धस्त्वेअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत। प्रस्तरेणपरिधिनास्रुचावेद्याचबर्हिषा। ऋचेमंयज्ञं
न्नोवहसुवर्देवेषुगंतवे। यदिष्टंयत्परादानंयद्दत्तंयाचदक्षिणा। तत॥२॥ अग्निर्वैश्वकर्मणः सुवर्दे
वेषुनोदधत्। येनासहस्रंवहसियेनाग्नेसर्ववेदसं। तेनेमंयज्ञंन्नोवहसुवर्देवेषुगंतवे। येनाग्नेदक्षिणा
युक्तायज्ञंवहंत्यृत्विजः। तेनेमंयज्ञंन्नोवहसुवर्देवेषुगंतवे। येनाग्नेसुकृतःपथामधोर्धाराव्यानशुः
। तेनेमंयज्ञंन्नोवहसुवर्देवेषुगंतवे। यत्रधाराअनपेतामधोर्घृतस्यचयाः। तदग्निर्वैश्वकर्मणः सुवर्दे
वेषुनोदधत॥३॥ आगच्छातव्यानशुस्तेनेमंयज्ञंन्नोवहसुवर्देवेषुगंतवेचतुर्दशान्न॥७॥ ॥यास्तेअ
ग्नेसमिधोयानिधामयाजिह्वाजातवेदोयोअर्चिः। येतेअग्नेमेडयोयइंदवस्तेभिरात्मानंचिनुहिप्र
जानन्। उत्सन्नयज्ञोवाएषयदग्निः। किंवाहैतस्यक्रियतेकिंवानयद्वाअध्वर्युरग्नेःश्चिन्वन्नंतरेत्यात्म
नोवैतदंतरेति। यास्तेअग्नेसमिधोयानि॥१॥ धामेत्याहैषावाअग्नेःस्वयंचितिरग्निरेवतदग्निंचिनो।

तिनाध्वर्युरात्मनोंतरेतिव्रतेस्त्व आनूगाः प्रवरंस्त्वग्नय इमन्नोयज्ञन्नयतुप्रजानन्। घृतंपिन्वन्नजरꣳ
सुवीरꣳब्रह्मसमिद्भवत्याहुतीनां। सुवर्गायवाएषलोकायोपधीयतेयत्कूर्मश्चतस्त्व आनूगाः प्रवरंस्त्वग्नय
इत्याह॥ २॥ दिशएवैतेनप्रजानातीमन्नोयज्ञन्नयतुप्रजानन्नित्याहसुवर्गस्यलोकस्याभिनीत्यैब्रह्म
समिद्भवत्याहुतीनामित्याहब्रह्मणावैदेवाःसुवर्गँल्लोकमायन्यद्ब्रह्मण्वत्योपदधातिब्रह्मणैवतद्य
जमानःसुवर्गँल्लोकमेतिप्रजापतिर्वाएषयदग्निस्तस्यप्रजाःपशवश्छंदाꣳसिरूपꣳसर्वान्वर्णानिष्ट
कानांकुर्याद्रूपेणैवप्रजाःपशूंश्छंदाꣳस्यवरुंधेथोप्रजाभ्यएवैनंपशुभ्यश्छंदोभ्योवरुध्यचिनुते॥ ३॥ ए
तियास्तेअग्नेसमिधोयान्यग्नय इत्याहेष्टकानाꣳषोडशरात्र॥ ४॥ ॥ मयिगृह्णाम्यग्रेअग्निꣳरायस्पो
षायसुप्रजास्त्वायसुवीर्याय। मयिप्रजांमयिवर्चोदधाम्यरिष्टास्यामतनुवासुवीराः। योनोअग्निःपि
तरोहृत्स्वंतरमर्त्योमर्त्याꣳआविवेश। तमात्मन्परिगृह्णीमहेवयम्मासोअस्माꣳअवहायपरागात्।

यदध्वर्युरात्मन्नग्निमगृहीत्वाग्निंचिनुयाद्योस्यस्वोग्निस्तमपि॥१॥यजमानायचिनुयादग्निंखलुवै
पशवोनूपतिष्ठंतेपक्रामुकाअस्मात्पशवस्युर्मयिगृह्णाम्यग्रेअग्निमित्याहात्मन्नेवस्वमग्निंदाधार
नास्मात्पशवोपक्रामंतिब्रह्मवादिनोवदंतियन्मृच्चापश्चाग्नेरनाद्यमथकस्मान्मृदाचाद्भिश्चाग्निश्चीयत
इतियदद्भिःसंयौति॥२॥आपोवैसर्वादेवतादेवताभिरेवैनꣳसꣳसृजतियन्मृदाचिनोतीयंवाअ
ग्निर्वैश्वानरोग्निनैवतदग्निंचिनोतिब्रह्मवादिनोवदंतियन्मृदाचाद्भिश्चाग्निश्चीयतथकस्मादग्निरुच्य
तइतियच्छंदोभिश्चिनोत्यग्नयोवैछंदाꣳसितस्मादग्निरुच्यतेथोइयंवाअग्निर्वैश्वानरोयत्॥३॥मृदा
चिनोतितस्मादग्निरुच्यतेहिरण्येष्टकाउपदधातिज्योतिर्वैहिरण्यंज्योतिरेवास्मिन्दधात्यथोतेजो
वैहिरण्यंतेजएवात्मंधत्तेयोवाअग्निꣳसर्वतोमुखंचिनुतेसर्वासुप्रजाःस्वन्नमत्तिसर्वादिशोभिज
यतिगायत्रींपुरस्तादुपदधातित्रिष्टुभंदक्षिणतोजगतींपश्चादनुष्टुभमुत्तरतःपंक्तिंमध्यएषवाअग्निः

२

श्री

सं·पं·
६

सर्वतोमुखस्त्वंयएवंविद्वाꣳश्चिनुतेसर्वासुप्रजाःस्वन्नमत्तिसर्वादिशोभिजयत्यथोदिन्र्येवदिन्नांप्रवयति
तस्माद्दिशिदिक्क्रोता॥४॥अपिसंयौतिवैश्वानरोयद्दृषवैपंचविंꣳशतिश्च॥१॥ ॥प्रजापतिरग्निमसृ
जतसोस्मात्सृष्टःप्राङ्क्राद्रवत्तस्माअश्वंप्रत्यास्यत्सदक्षिणावर्तततस्मैवृष्णिंप्रत्यास्यत्सप्रङ्ङात्येवर्त
ततस्माऋषभंप्रत्यस्यत्सउदङ्ङावर्तततंतस्मैबस्तंप्रत्यास्यत्सऊर्ध्वोद्रवत्तस्मैपुरुषंप्रत्यास्यद्यत्पशुशी
र्षाण्युपदधातिसर्वतएवैनं॥१॥अवरुध्यचिनुतएतावैप्राणभृतश्चक्षुष्मतीरिष्टकायत्पशुशीर्षाणि
यत्पशुशीर्षाण्युपदधातिताभिरेवयजमानोमुष्मिंल्लोकेप्राणित्यथोताभिरेवास्माइमेलोकाःप्रभां
तिमृदाभिलिप्योपदधातिमेध्यत्वायपशुर्वाएषयदग्निरन्नंपशवएषखलुवाअग्निर्यत्पशुशीर्षाणि
यंकामयेतकनीयोस्यान्नं॥२॥स्यादितिसंतरांतस्यपशुशीर्षाण्युपदध्यात्कनीयएवास्यान्नंभवति
यंकामयेतसमावदस्यान्नꣳस्यादितिमध्यतस्तस्योपदध्यात्समावदेवास्यान्नंभवतियंकामयेतभू

राम
६८

योस्यान्नꣳस्यादित्यंतेषुतस्यव्युदूह्योपदध्यादंततएवास्माअन्नमवरुंधेभूयोस्यान्नंभवति॥ ३॥ एन
मस्यान्नंभूयोस्यान्नंभवति॥१०॥ ॥स्तेगांदꣳष्ट्राभ्यांमंडूकांजंभ्येभिरादकांखादेनोर्जꣳसꣳसूदेनार
ण्यंजांबीलेनमृदंबर्स्वेभिः शर्कराभिरवकामवकाभिः शर्करामुत्सादेनजिह्वामवक्रंदेनतालुꣳसरस्व
तींजिह्वाग्रेण॥१॥स्तेगान्द्वाविꣳशतिः॥११॥ ॥वाजꣳहनूभ्यामपआस्येनादित्यांछ्मश्रुभिरुपयामम
धरेणौष्ठेनसदुत्तरेणांतरेणानूकाशंप्रकाशेनबाह्यꣳस्तनयित्नुंनिर्बाधेनसूर्याग्नीचक्षुर्भ्यांविद्यु
तौकनीनकाभ्यामशनिंमस्तिष्केणबलंमज्जभिः॥१॥ वाजंपंचविꣳशतिः॥१२॥ ॥कूर्मांछफैरच्छ्ला
भिःकपिंजलान्त्सामकुष्ठिकाभिर्जवंजंघाभिरगदंजानुभ्यांवीर्यंकुहाभ्यांभयंप्रचालाभ्यांगुहोप
पक्षाभ्यामश्विनावꣳसाभ्यामदितिꣳशीर्ष्णानिर्ऋतिंनिर्जाल्मकेनशीर्ष्णा॥१॥ कूर्मांस्त्रयोविꣳशतिः
॥१३॥ ॥योक्त्रंगृध्राभिर्युगमानतेनचित्तंमन्याभिः संक्रोशान्प्राणैः प्रकाशेनत्वचंपराकाशेनांतरां

सं·पं·
६९

मन्याकान्केनौरिंद्रꣳस्वपसावहेनबृहस्पतिꣳशकुनिसादेनरथमुष्णिहाभिः॥१॥योक्त्रमेकविꣳशतिः॥१४॥
मित्रावरुणौश्रोणीभ्यामिंद्राग्नीशिखंडाभ्यामिंद्राबृहस्पतीऊरुभ्यामिंद्राविष्णूअष्ठीवद्भ्याꣳसवितारंपुच्छे
नगंधर्वाञ्छेपेनाप्सरसोमुष्काभ्यांपवमानंपायुनापवित्रंपोत्राभ्यामाक्रमणꣳस्थूराभ्यांप्रतिक्रमणंकुष्ठा
भ्यां॥१॥मित्रावरुणौद्वाविꣳशतिः॥१५॥ ॥इंद्रस्यक्रोडोदित्यैपाजस्यंदिशांजत्रवोजीमूतान्हृदयौप
शाभ्यामंतरिक्षंपुरिततानभउदर्येणेंद्राणींप्लीह्नावल्मीकान्क्लोम्नागिरीन्प्लाशिभिःसमुद्रमुदरेणवैश्वा
नरंभस्मना॥१॥पूष्णोवनिष्ठुरंधाहेस्थूरगुदासर्पान्गुदाभिर्ऋतून्पृष्टीभिर्दिवंपृष्ठेनवसूनांप्रथमाकी
कसारुद्राणांद्वितीयादित्यानांतृतीयांगिरसांचतुर्थीसाध्यानांपंचमीविश्वेषांदेवानाꣳषष्ठी॥२॥पूष्ण
श्चतुर्विꣳशतिः॥१७॥ ॥ओजोग्रीवाभिर्निर्ऋतिमस्थभिरिंद्रꣳस्वपसावहेनरुद्रस्यविचलःस्कंधोहोरात्र
योर्द्वितीयोर्धमासानांतृतीयोमासांचतुर्थऋतूनांपंचमःसंवत्सरस्यषष्ठः॥१॥ओजोविꣳशतिः॥१८॥ ॥

राम
६९

आनंदंनंदथुनाकामंप्रत्यासाभ्यांभयꣳशितीमभ्यांप्रशिषंप्रशासाभ्याꣳसूर्याचंद्रमसौवृक्याभ्याꣳश्या
मशबलौमतस्नाभ्यांव्युष्टिꣳरूपेणनिम्रुक्तिमरूपेण॥१॥आनंदꣳषोडश॥१९॥ ॥अहर्माꣳसेनरात्रिं
पीवसापोयूषेणघृतꣳरसेनश्यांवसयादूषीकाभिर्ह्रादुनिमश्रुभिःपृष्वांदिवꣳरूपेणनक्षत्राणिप्रतिरू
पेणपृथिवींचर्मणाछवींछव्योपाकृतायस्वाहालब्धायस्वाहाहुतायस्वाहा॥१॥२०॥ ॥अग्नेःपक्षतिःसर
स्वत्यैनिपक्षतिःसोमस्यतृतीयापांचतुर्थ्योषधीनांपंचमीसंवत्सरस्यषष्ठीमरुताꣳसप्तमीबृहस्पतेर
ष्टमीमित्रस्यनवमीवरुणस्यदशमींद्रस्यैकादशीविश्वेषांदेवानांद्वादशीद्यावापृथिव्योःपार्श्वंयमस्य
पाटूरः॥१॥२१॥ ॥वायोःपक्षतिःसरस्वतोनिपक्षतिश्चंद्रमसस्तृतीयानक्षत्राणांचतुर्थीसवितुःपंचमी
रुद्रस्यषष्ठीसर्पाणाꣳसप्तम्यर्यम्णोष्टमीत्वष्टुर्नवमीधातुर्दशमींद्राण्याएकादश्यदित्यैद्वादशीद्यावा
पृथिव्योःपार्श्वंयम्यैपाटूरः॥१॥वायोरष्टाविꣳशतिः॥२२॥ ॥पंथामनूवृग्भ्याꣳसंततिꣳस्नावन्याभ्याꣳ

शुकान्पित्तेनहरिमाणंयुक्नाहलीक्ष्णान्पापवातेनकूल्मांछकभिः श्वावर्तान्वध्येनशुनोविशसनेनसर्पा
न्लोहितगंधेनवयाꣳसिपक्वगंधेनपिपीलिकाः प्रशादेन॥१॥ पंथांद्वाविꣳशतिः॥२३॥ ॥कौमेरस्त्यक
मीढ्वाजीविश्वैर्देवैर्यज्ञियैः संविदानः॥सनोनयसुकृतस्यलोकंतस्यतेवयꣳस्वधयामदेम॥१॥कौमेर
शादश॥२४॥ ॥द्यौस्तेपृष्ठंपृथिवीसधस्थमात्मांतरिक्षꣳसमुद्रोयोनिः सूर्यस्तेचक्षुर्वातः प्राणश्चंद्र
माश्श्रोत्रंमासाश्चार्धमासाश्चपर्वाण्यृतवोंगानिसंवत्सरोमहिमा॥१॥द्यौः पंचविꣳशतिः॥२५॥ ॥
अग्निः पशुरासीत्तेनायजंतसएतन्लोकमजयद्यस्मिन्नग्निः सतेलोकस्तंजेष्यस्यथावजिघ्रवायुः
पशुरासीत्तेनायजंतसएतन्लोकमजयद्यस्मिन्वायुः सतेलोकस्तस्मात्वांतरेष्यामियदिनावजिघ्र
स्यादित्यः पशुरासीत्तेनायजंतसएतन्लोकमजयद्यस्मिन्नादित्यः सतेलोकस्तंजेष्यसियदवजि
घ्रसि॥१॥यस्मिन्नष्टौच॥२६॥ ॥योवाअग्नयथादेवतंत्वामग्नइंद्रस्यविचित्तिंयथावैवयोवैयदाकूनाधा

स्तेमयिगृह्णामिप्रजापतिस्तेगांवाजेंकुर्मायोक्रौंमित्रावरुणाविंद्रस्यपृक्षओजेआनंदंमहस्गेनेःवियोः
पंथांक्रैमैद्यौस्तेग्निःपुस्तुःषड्ङ्गुःशातिः॥२६॥ ॥योवाएवाद्भुतिरभवन्पुभ्भुभिरवरुध्यानंदमुशेपंचाश
त्॥५८॥ ॥हरिःओम्॥ ॥शाके१६९२विकृतिनामसंवत्सरेवैशाखशुद्धचतुर्दशीभौम्यवासरेदंपु
स्तकंसमाप्तं॥ ॥भग्नपृष्टिकटिग्रीवस्तब्धदृष्टिरधोमुखं॥कष्टेनलिखितंग्रंथंयत्नेनप्रतिपालयेत्
॥शुभंभवतु॥श्रीलक्ष्मायनमः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

सं.पं.
७१

राम
७१

इतिसंहितापंचमाष्टकसमाप्तः॥

त्रिवेदी रम

संहिताषष्ठमाष्टकप्रारंभःशुभंभवतु॥

सं·ष·
१

श्रीगणेशायनमः॥ ॥हरिःओम्॥ प्राचीनवꣳशंकरोतिदेवमनुष्यादिशोव्यभजंतप्राचींदेवादक्षि
णापितरःप्रतीचींमनुष्याउदीचीँरुद्रायत्प्राचीनवꣳशंकरोतिदेवलोकमेवतद्यजमानउपावर्तते
परिश्रयत्यंतर्हितोहिदेवलोकोमनुष्यलोकान्नास्माल्लोकात्स्वेतव्यमिवेत्याहुःकोहितद्वेदयद्य
मुष्मिन्ल्लोकेस्तिवानवेतिदिक्ष्वतीकाशान्करोति॥१॥उभयोर्लोकयोरभिजित्यैकेशश्मश्रुवपते
नखानिनिकृंततेमृतावाएषात्वगमेध्यायत्केशश्मश्रुमृतामेवत्वचममेध्यामपहत्ययज्ञियो
भूत्वामेधमुपैत्यंगिरसःसुवर्गन्लोकंयंतोप्सुदीक्षातपसीप्रावेशयन्नप्सुस्नातिसाक्षादेवदीक्षा
तपसीअवरुंधेतीर्थेस्नातितीर्थेहितेतांप्रावेशयंतीर्थेस्नाति॥२॥तीर्थमेवसमानानांभवत्यपो
श्नात्यंतरतएवमेध्योभवतिवाससादीक्षयतिसौम्यंवैक्षौमंदेवतयासोममेषदेवतामुपैतियोदी
क्षतेसोमस्यतनूरसितनुवंमेपाहीत्याहस्वामेवदेवतामुपैत्यथोआशिषमेवैतामाशास्तेग्नेस्तू

राम
१

षाधानंवायोर्वातपानंपितॄणांनीविरोषधीनांप्रघातः॥ ३ ॥ आदित्यानांप्राचीनतानोविश्वेषांदेवा
नामोतुर्नक्षत्राणामतीकाशास्तद्वाएतत्सर्वदेवत्यंयद्वासोयद्वाससादीक्षयतिसर्वाभिरेवैनंदेव
ताभिर्दीक्षयतिबहिःप्राणोवैमनुष्यस्तस्याशनंप्राणोश्नातिसप्राणएवदीक्षतआशितोभव
तियावानेवास्यप्राणस्तेनसहमेधमुपैतिघृतंदेवानांमस्तुपितॄणांनिष्पक्वंमनुष्याणांतद्वै॥ ४ ॥
एतत्सर्वदेवत्यंयन्नवनीतंयन्नवनीतेनाभ्यंक्तेसर्वाएवदेवताःप्रीणातिप्रच्युतोवाएषोस्माल्लो
कादगतोदेवलोकंयोदीक्षितोंतरेवनवनीतंतस्मान्नवनीतेनाभ्यंक्तेनुलोमंयजुषाव्यावृत्या
इंद्रोवृत्रमहंतस्यकनीनिकापरापतत्तदांजनमभवद्यदांक्तेचक्षुरेवभ्रातृव्यस्यवृंक्तेदक्षिणंपू
र्वमांक्ते॥ ५ ॥ सव्यंहिपूर्वंमनुष्याआंजतेननिधावतेनीवद्धिमनुष्याधावंतेपंचकृत्वआंक्तेपं
चाक्षरापंक्तिःपांक्तोयज्ञोयज्ञमेवावरुंधेपरिमितमांक्तेपरिमितंहिमनुष्याआंजतेसतूलयांक्ते

सं॰घ॰
२

पतूलयाहिमनुष्याआंजतेव्यावृत्त्यैयदपतूलयांजीतवज्रइवस्यात्सतूलयांक्तेमित्रत्वाय॥६॥
इंद्रोवृत्रमहन्त्सो१ऽपो१ऽभ्यम्रियततासांयन्मेध्यंयज्ञियꣳसदेवमासीत्तदपोदक्रामत्तेदर्भा
अभवन्यद्दर्भपुंजीलैःपवयतियाएवमेध्यायज्ञियाःसदेवाआपस्ताभिरेवैनंपवयतिद्वाभ्यांपवय
त्यहोरात्राभ्यामेवैनंपवयतित्रिभिःपवयतित्रयइमेलोकाएभिरेवैनन्लोकैःपवयतिपंचभिः॥
॥७॥पवयतिपंचाक्षरापंक्तिःपांक्तोयज्ञोयज्ञायैवैनंपवयतिषड्भिःपवयतिषड्वाऋतवऋतुभिरे
वैनंपवयतिसप्तभिःपवयतिसप्तछंदाꣳसिछंदोभिरेवैनंपवयतिनवभिःपवयतिनववैपुरुषेप्रा
णाःसप्राणमेवैनंपवयत्येकविꣳशत्यापवयतिदशहस्त्याअंगुलयोदशपद्याआत्मैकविꣳशो
यावानेवपुरुषस्तमपरिवर्गं॥८॥पवयतिचित्पतिस्त्वापुनात्वित्याहमनोवैचित्पतिर्मनसैवैनं
पवयतिवाक्पतिस्त्वापुनात्वित्याहवावैवैनंपवयतिदेवस्त्वासवितापुनात्वित्याहसवितृप्रसूत

५२

राम
२

एवैनंपवयतितस्यतेपवित्रपतेपवित्रेणयस्मैकंपुनेतच्छकेयमित्याहाशिषमेवैतामाशास्ते॥१॥अ
तीकाशान्करोत्यवेनायंतीर्थैस्नातिप्रघातोमनुष्याणांतद्धाआंक्ते मित्रत्वायपंचभिरपरिवर्गमष्टा
चत्वारिꣳशाञ्च॥१॥ ॥यावंतोवैदेवायज्ञायापुनततएवाभवन्यएवंविद्वान्यज्ञायपुनीतेभवत्येवब
हिःपवयित्वांतःप्रपादयतिमनुष्यलोकएवैनंपवयित्वापूतंदेवलोकंप्रणयत्यदीक्षितएकयाहुत्ये
त्याहुःस्रुवेणचतस्रोजुहोतिदीक्षितत्वायस्रुवापंचमींपंचाक्षरापंक्तिःपांक्तोयज्ञोयज्ञमेवावरुं
धेआकूत्यैप्रयुजेग्नये॥१॥ स्वाहेत्याहाकूत्याहिपुरुषोयज्ञमभिप्रयुंक्तेयजेयतिमेधायैमनसे
ग्नयेस्वाहेत्याहमेधयाहिमनसापुरुषोयज्ञमभिगच्छतिसरस्वत्यैपूष्णेग्नयेस्वाहेत्याहवाग्वैसर
स्वतीपृथिवीपूषावाचैवपृथिव्यायज्ञंप्रयुंक्तआपोदेवीर्बृहतीर्विश्वशंभुवइत्याहयावैवर्ष्यास्ताः॥२॥
आपोदेवीर्बृहतीर्विश्वशंभुवोयदेतद्यजुर्नब्रूयाद्दिव्याआपोशांताइमन्लोकमागच्छेयुरापोदेवीर्बृह

सं.ष.
३

तीर्विश्विनां भुवदित्याहास्मा एवैनालोकाय शमयति तस्मात्खांताद्दूमंल्लोकमागछंति द्यावापृथिवीइत्या
हद्यावापृथिव्योर्हियज्ञउर्वंतरिक्षमित्याहांतरिक्षेह्वियज्ञोबृहस्पतिर्नोहविषावृधातु ॥ ३ ॥ इत्याह
ब्रह्मवैदेवानांबृहस्पतिर्ब्रह्मणैवास्मैयज्ञमवरुंधेयद्ब्रूयाद्विधेरितियज्ञस्थाणुमृच्छेद्वृधात्वित्याह
श्र यँस्थाणुमेवपरिवृणक्तिप्रजापतिर्यज्ञमसृजतसोस्मात्सृष्टः पराङैत्सप्रयजुरव्लीनात्प्रसामत
मृगुदयछद्यदृगुदयछत्तदौद्ग्रहणस्यौद्ग्रहणत्वमृचा ॥ ४ ॥ जुहोतियज्ञस्योद्धृत्याअनुष्टुप्छंदसा
मुदयछदित्याहुस्मास्तदनुष्टुभाजुहोतियज्ञस्योद्धृत्यैद्वादशवात्सबंधान्युदयछन्नित्याहुस्तस्मा
द्वादशभिर्वात्सबंधविदोदीक्षयंतिसावाएषर्गनुष्टुग्वागनुष्टुग्यदेतयर्चादीक्षयतिवाचैवैनं सर्व
यादीक्षयतिविश्वेदेवस्यनेतुरित्याहसावित्र्येतेनमर्तोवृणीतसख्यं ॥ ५ ॥ इत्याहपितृदेवत्यैतेनवि राम ३
श्वेरायइषुध्यसीत्याहवैश्वदेव्येतेनद्युम्नंवृणीतपुष्यसइत्याहपौष्ण्येतेनसावाएषर्क्सर्वदेवत्याय

देतयुर्वादीक्षयतिसर्वाभिरेवैनंदेवताभिर्दीक्षयतिसप्ताक्षरंप्रथमंपदमष्टाक्षराणित्रीणियानित्री
णितान्यष्टावुपयंतियानिचत्वारितान्यष्टौयदष्टाक्षरातेन ॥ ६ ॥ गायत्रीयदेकादशाक्षरातेनत्रिष्टु
ग्यद्द्वादशाक्षरातेनजगतीसावाएषासर्वाणिछंदांसियदेतयर्वादीक्षयतिसर्वैरेवैनंछंदोभि
र्दीक्षयतिसप्ताक्षरंप्रथमंपदंसप्तपदाश[illegible]रीपशवःशक्वरीपशूनेवावरुंधएकस्मादक्षरादनाप्तंप्र
थमंपदंतस्माद्यद्वाचोनाप्तंतन्मनुष्याउपजीवंतिपूर्णयाजुहोतिपूर्णइवहिप्रजापतिःप्रजापतेराप्त्यै
न्यूनयाजुहोतिन्यूनाद्धिप्रजापतिःप्रजाअसृजतप्रजानांसृष्ट्यै ॥ ७ ॥ अग्नयेतादृधात्वासख्य
तेनजुहोतिपंचदशच ॥ २ ॥ ॥ ऋक्सामेवैदेवेभ्योयज्ञात्तिष्ठमानेकृष्णोरूपंकृत्वापक्रम्यातिष्ठतांते पा
मन्यंतयंवाइमेउपावर्त्स्यतःसइदंभविष्यतीतितेउपामंत्रयंततेअहोरात्रयोर्महिमानमुपनिधायदे
वानुपावर्ततामेषवाऋचोवर्णोयच्छुक्लंकृष्णाजिनस्यैषसाम्नोयत्कृष्णमृक्सामयोःशिल्पेस्थइत्याह

क्सामेएवावरुंधएषः॥१॥वाअन्योवर्णोयच्छुक्लंकृष्णाजिनस्यैषरात्रियायत्कृष्णंयदेवैनयोस्तत्रन्यक्तंत
देवावरुंधेकृष्णाजिनेनदीक्षयतिब्रह्मणोवाएतद्रूपंयत्कृष्णाजिनंब्रह्मणैवैनंदीक्षयतीमांधियꣳशि
क्षमाणस्यदेवेत्याहयथायजुरेवैतद्गर्भोवाएषयद्दीक्षितउल्बंवासःप्रोर्णुतेतस्मात्॥२॥गर्भाःप्रावृता
जायंतेनपुरासोमस्यक्रयादपोर्ण्वीतयत्पुरासोमस्यक्रयादपोर्ण्वीतगर्भाःप्रजानांपरापातुकाःस्युः
क्रीतेसोमेपोर्णुतेजायतएवतदथोयथावसीयाꣳसंप्रत्यपोर्णुतेतादृगेवतदंगिरसःसुवर्गंलोकंयंत
ऊर्जंव्यभजंततततोयदत्यशिष्यततेशराअभवन्नूर्ग्वैशरायच्छरमयी॥३॥मेखलाभवत्यूर्जमेवावरुंधेम
ध्यतःसंनह्यतिमध्यएवास्माऊर्जंदधातितस्मान्मध्यतऊर्जाभुंजतऊर्ध्वंवैपुरुषस्यनाभ्यैमेध्यमवाची
नममेध्यंयन्मध्यतः×त× संनह्यतिमेध्यंचैवास्यामेध्यंचव्यावर्तयतींद्रोवृत्रायवज्रंप्राहरत्सत्रेधा
व्यभवत्स्फ्यस्तृतीयꣳरथस्तृतीयंयूपस्तृतीयं॥४॥येंतःशराअशीर्यंततेशराअभवंतच्छराणाꣳश

रलंवज्रोवैशराः क्षुत्खलुवैमनुष्यस्यभ्रातृव्योयच्छरमयीमेखलाभवतिवज्रेणैवसाक्षात्क्षुधंभ्रा
तृव्यंमध्यतोपहतेत्रिवृद्भवतित्रिवृद्वैप्राणस्त्रिवृतमेवप्राणंमध्यतोयजमानेदधातिपृथ्वीभवति
रज्जूनांव्यावृत्त्यैमेखलयायजमानंदीक्षयतियोक्त्रेणपत्नींमिथुनत्वाय॥ ५ ॥ यज्ञोदक्षिणामभ्य
ध्यायत्ताꣳसमभवत्तदिंद्रोचायत्सोमन्यतयोवाइतोजनिष्यतेसइदंभविष्यतीतितांप्राविशत्तस्या
इंद्रएवाजायतसोमन्यतयोवैमदितोपरोजनिष्यतेसइदंभविष्यतीतितस्याअनुमृश्ययोनिमाच्छि
नत्सासूतवशाऽभवत्तत्सूतवशायैजन्म॥ ६ ॥ ताꣳहस्तेन्यवेष्टयततांमृगेषुन्यदधात्साकृष्णविषा
णाभवदिंद्रस्ययोनिरसिमामाहिꣳसीरितिकृष्णविषाणांप्रयच्छतिसयोनिमेवयज्ञंकरोतिसयोनिं
दक्षिणाꣳसयोनिमिंद्रꣳसयोनित्वायकृष्यैत्वासुसस्यायाइत्याहतस्मादकृष्टपच्याओषधयःपच्यं
तेसुपिप्पलाभ्यस्त्वौषधीभ्यइत्याहतस्मादोषधयःफलंगृह्णंतियद्धस्तेन॥ ७ ॥ कंडूयेतपामनंभावु

सं·ष·
५

काः प्रजाःस्युर्यत्स्मयेतनग्नंभावुकाः कृष्णविषाणयाकंडूयतेपिगृह्यस्मयतेप्रजानांगोपीथायनपुरा
दक्षिणाभ्योनेतोः कृष्णविषाणामवचृतेद्यत्पुरादक्षिणाभ्योनेतोः कृष्णविषाणामवचृतेद्योनिःप्रजानां
परापातुकास्यान्नीतासुदक्षिणासुचात्वालेकृष्णविषाणांप्रास्यतियोनिर्वैयज्ञस्यचात्वालंयोनिःकृ
ष्णविषाणायोनावेवयोनिंदधातियज्ञस्यसयोनित्वाय॥८॥ रुंधएषतस्माच्छरमयीमूपस्ततीयंमि
थुनत्वाययजन्महस्तेनाश्यान्चत्वारिंशच्च॥३॥ ॥वाग्वैदेवेभ्योपाक्रामद्यज्ञायातिष्ठमानासावनस्पती
न्प्राविशत्सैषावाग्वनस्पतिषुवदतियादुंदुभौयातूणवेयावीणायांयद्दीक्षितदंडंप्रयच्छतिवाचमेवाव
रुंधऔदुंबरोभवत्यूर्ग्वाउदुंबरऊर्जमेवावरुंधेमुखेनसंमितोभवतिमुखतएवास्माऊर्जंदधातितस्मा
न्मुखतऊर्जाभुंजते॥१॥ क्रीतेसोमेमैत्रावरुणायदंडंप्रयच्छतिमैत्रावरुणोहिपुरस्तादृत्विग्भ्योवा
चंविभजतितामृत्विजोयजमानेप्रतिष्ठापयंतिस्वाहायज्ञंमनसेत्याहमनसाहिपुरुषोयज्ञमभि

राम
५

छति स्वाहा द्यावापृथिवीभ्यामित्याह द्यावापृथिव्योर्हि यज्ञः स्वाहोरोरंतरिक्षादित्याहांतरिक्षे हि यज्ञः
स्वाहा यज्ञं वातादारभ इत्याहायं ॥ २ ॥ वाव यः पवते स यज्ञस्तमेव साक्षादारभते मुष्टी करोति वाचंय
छति यज्ञस्य धृत्या अदीक्षिष्टायं ब्राह्मण इति त्रिरुपांꣳश्वाह देवेभ्य एवैनं प्राह त्रिरुच्चैरुभयेभ्य एवैनं देव
मनुष्येभ्यः प्राह न पुरा नक्षत्रेभ्यो वाचं विसृजेद्यत्पुरा नक्षत्रेभ्यो वाचं विसृजेद्यज्ञं विच्छिंद्यात् ॥ ३ ॥ उदि
तेषु नक्षत्रेषु व्रतं कृणुतेति वाचं विसृजति यज्ञव्रतो वै दीक्षितो यज्ञमेवाभि वाचं विसृजति यदि विसृजे
द्वैष्णवीमृचमनुब्रूयाद्यज्ञो वै विष्णुर्यज्ञेनैव यज्ञꣳ संतनोति दैवीं धियं मनामह इत्याह यज्ञमेव तन्म्रदय
ति सुपारा नो असद्वश इत्याह व्युष्टिमेवाव रुंधे ॥ ४ ॥ ब्रह्मवादिनो वदंति होतव्यं दीक्षितस्य गृ
हा३ इ न होतव्या३मिति हविर्वै दीक्षितो यज्जुहुयाद्यजमानस्यावदाय जुहुयाद्यन्न जुहुयाद्यज्ञप
रुरंतरियाद्ये देवा मनोजाता मनोयुज इत्याह प्राणा वै देवा मनोजाता मनोयुजस्तेष्वेव परोक्षं जुहोति

सं॰ष॰
६

तन्नेवकृतन्नेवाकृतꣳस्वपंतंवैदीक्षितꣳरक्षाꣳसिजिघाꣳसंत्यग्निः॥ ५॥ खलुवैरक्षोहाग्नेत्वꣳसुजा
गृहिवयꣳसुमंदिषीमहीत्याहाग्निमेवाधिपांकृत्वास्वपितिरक्षसामपहत्या अव्रत्यमिववाएषकरोति
योदीक्षितःस्वपितित्वमग्नेव्रतपाअसीत्याहाग्निर्वैदेवानांव्रतपतिःसएवैनंव्रतमालंभयतिदेवआ
मर्त्येष्वेत्याहदेवः॥ ६॥ ह्येषसन्मर्त्येषुयंयत्तेषीऊर्जस्त्याहेतꣳहियज्ञेष्वीडतेपवैदीक्षितात्सुषुपु
षइंद्रियंदेवताःक्रामंतिविश्वेदेवाअभिमामाववृत्रन्नित्याहेंद्रियेणैवैनंदेवताभिःसन्नयतियदेतं
यजुर्नब्रूयाद्यावतएवपशूनभिदीक्षेततावंतोस्यपशवःस्यूरास्वेयत॥ ७॥ सोमाभूयोभरेत्याहापरि
मितानेवपशूनवरुंधेचंद्रमसिममभोगायभवेत्याहयथादेवताभ्यएवैनाःप्रतिगृह्णातिवायवेत्वावरुणा
यत्वेतियदेवमेतानानुदिशेदयथादेवतंदक्षिणागमयेदादेवताभ्योवृश्च्येतयदेवमेताअनुदिशतिय
थादेवतमेवदक्षिणागमयतिनदेवताभ्यआ॥ ८॥ वृश्च्यतेदेवीरापोअपान्नपादित्याहयद्वो

राम
६

मेध्यंयज्ञियꣳसदेवंतद्धोमावक्रमिषुर्मितिवावैतदाहाच्छिन्नंतंतुंपृथिव्याअनुगेषमित्याहसेतुमेवतत्कृ
त्वात्येति॥ ३॥ भुंजतेयंद्विष्याद्दुंध्येग्निराहिदेवदूयंद्देवताभ्यआवृश्चयस्त्रिꣳशश्च॥४॥ ॥देवावैदेवयज
नमध्यवसायदिशोनप्राजानंते ऽन्योन्यमुपाधावंस्त्वयाप्रजानामत्वयेतितेदित्याꣳसमध्रियंत
त्वयाप्रजानामेतिसाब्रवीद्वरंवृणैमत्प्रायणाएववोयज्ञामदुदयनाअसन्नितितस्मादादित्यःप्राय
णीयोयज्ञानामादित्यउदयनीयःपंचदेवतायजतिपंचदिशोदिशांप्रज्ञात्यै॥ १ ॥अथोपंचाक्षरा
पंक्तिःपांक्तोयज्ञोयज्ञमेवावरुंधेपथ्याꣳस्वस्तिमयजन्प्राचीमेवतयादिशंप्राजानन्नग्निनादक्षि
णासोमेनप्रतीचीꣳसवित्रोदीचीमदित्योर्ध्वांपथ्याꣳस्वस्तिंयजतिप्राचीमेवतयादिशंप्रजानाति
पथ्याꣳस्वस्तिमिष्ट्वाग्नीषोमौयजतिचक्षुषीवाएतेयज्ञस्ययदग्नीषोमौताभ्यामेवानुपश्यति॥२॥
अग्नीषोमाविष्ट्वासवितारंयजतिसवितृप्रसूतएवानुपश्यतिसवितारमिष्ट्वादितिंयजतीयंवाअ

सं·ष·
७

दितिरस्यामेवप्रतिष्ठायानुपश्यत्यदितिमिष्ट्वामारुतीमृचमन्वाहमरुतोवैदेवानांविशोदेवविशंख
लुवैकल्पमानंमनुष्यविशमनुकल्पतेयन्मारुतीमृचमन्वाहविशांक्लृप्त्यैब्रह्मवादिनोवदंतिप्रयाज
वदननूयाजंप्रायणीयंकार्यमनूयाजवत्॥ ३ ॥ अप्रयाजमुदयनीयमितीमेवैप्रयाजाअमीअनू
याजाःसैवसायज्ञस्यसंततिस्तत्तथानकार्यमात्मावैप्रयाजाःप्रजानूयाजायत्प्रयाजानंतरिया
दात्मानमंतरियाद्यदनूयाजानंतरियात्प्रजामंतरियाद्यतःखलुवैयज्ञस्यविततस्यनक्रियतेतद
नुयज्ञःपराभवतियज्ञंपराभवंतंयजमानोनु॥ ४ ॥ पराभवतिप्रयाजवदेवानूयाजवत्प्रायणीयं
कार्यंप्रयाजवदनूयाजवदुदयनीयंनात्मानमंतरेतिनप्रजान्नयज्ञःपराभवतिनयजमानःप्रा
यणीयस्यनिष्कासउदयनीयमभिनिर्वपतिसैवसायज्ञस्यसंततिर्याःप्रायणीयस्ययाज्यायत्ता
उदयनीयस्ययाज्याःकुर्यात्पराङ्मुंलोकमारोहेत्प्रमायुकस्याद्याःप्रायणीयस्यपुरोनुवाक्या

राम
७

स्ताउदयनीयस्ययाज्याः करोत्यस्मिन्नेवलोकेप्रतितिष्ठति ॥ ५ ॥ प्रज्ञात्यैपूर्वपत्यन्नूयाजवद्यजमा
नोनुपु×यु×रोनुवाक्यास्ताअष्टेव ॥ ५ ॥ ॥ कद्रूश्चवैसुपर्णीचात्मरूपयोरस्पर्धेताꣳसाकद्रूः सुप
र्णीमजयत्साब्रवीत्तृतीयस्यामितोदिविसोमस्तमाहरतेनात्मानंनिष्क्रीणीष्वेतीयंवैकद्रूरसौसु
पर्णीछंदाꣳसिसौपर्णेयाः साब्रवीदस्मैवैपितरौपुत्रान्बिभृतस्तृतीयस्यामितोदिविसोमस्तमाह
रतेनात्मानंनिष्क्रीणीष्व ॥ १ ॥ इतिमाकद्रूरवोचदितिजगत्युदपतच्चतुर्दशाक्षरासतीसाप्राप्यंन्यव
र्ततस्यैद्वेअक्षरेअमीयेताꣳसापशुभिश्चदीक्षयाचागच्छत्तस्माज्जगतीछंदसांपशव्यतमात
स्मात्पशुमंतंदीक्षोपनमतित्रिष्टुगुदपतत्त्रयोदशाक्षरासतीसाप्राप्यन्यवर्तततस्यैद्वेअक्षरेअ
मीयेताꣳसादक्षिणाभिश्च ॥ २ ॥ तपसाचागच्छत्तस्मात्त्रिष्टुभोलोकेमाध्यंदिनेसवनेदक्षिणानी
यतएतत्खलुवावतपइत्याहुर्यः स्वंददातीतिगायत्र्युदपतच्चतुरक्षरासत्यजयाज्योतिषातमस्या

अजाभ्यरुंधतदजायाअजत्वꣳसासोमंमाहरच्चत्वार्यक्षराणिसात्र्यक्षरासमपद्यतब्रह्मवादिनोव
दंति ॥ ३ ॥ कस्मात्सत्याद्गायत्रींकनिष्ठाछंदसाꣳसतीयज्ञमुखंपरीयायेतियदेवादःसोममाहरत्तस्माद्यज्ञ
मुखंपर्यैत्तस्मात्तेजस्विनीतमापद्भ्यांद्वेसवनेसमगृह्णान्मुखेनैकंयन्मुखेनसमगृह्णात्तदधयत्तस्माद्द्वेस
वनेशुक्रवतीप्रातःसवनंचमाध्यंदिनंचतस्मात्तृतीयसवनऋजीषमभिषुण्वंतिधीतमिवहिमंन्यंते
॥ ४ ॥ आशिरमवनयतिसशुक्रत्वायाथोसंभरत्येवैनत्तꣳसोममाह्रियमाणंगंधर्वोविश्वावसुःपर्यमु
ष्णात्सतिस्रोरात्रीःपरिमुषितोवसत्तस्मात्तिस्रोरात्रीःक्रीतःसोमोवसतितेदेवाअब्रुवन्स्त्रीकामावैग
धर्वास्स्त्रियानिष्क्रीणामेतितेवाचꣳस्त्रियमेकहायनींकृत्वातयानिरक्रीणन्त्सारोहिद्रूपंकृत्वागंध
र्वेभ्यः ॥ ५ ॥ अपक्रम्यातिष्ठत्तद्रोहितोजन्मतेदेवाअब्रुवन्नपयुष्मदक्रमीन्नास्मानुपावर्ततेविह्वया
महाइतिब्रह्मगंधर्वाअवदन्नगायन्देवाःसादेवान्गायतउपावर्ततततस्माद्गायंतꣳस्त्रियःकामयंते

कामुकाएनꣳस्त्रियोभवंतियएवंवेदाथोयएवंविद्वानपिजन्येषुभवतितेभ्यएवददत्युतयद्बहुतयाः
॥ ६ ॥ भवंत्येकहायंन्याक्रीणातिवाचैवैनꣳसर्वयाक्रीणातितस्मादेकहायनामनुष्यावाचंवदंत्य
कूटयाकर्णयाकाणयाश्लोणयासप्तशफयाक्रीणातिसर्वयैवैनंक्रीणातियच्छ्वेतयाक्रीणीयाद्दुश्च
र्मायजमानस्यायत्कृष्णयानुस्तरणीस्यात्प्रमायुकोयजमानस्यायद्द्विरूपयावार्त्रघ्नीस्यात्सवान्यं
जिनीयात्तंवान्योजिनीयादरुणयापिंगाक्ष्याक्रीणात्येतद्वैसोमस्यरूपꣳस्वयैवैनंदेवतयाक्रीणाति
॥ ७ ॥ निष्क्रीणीष्वदक्षिणाभिश्चवदंतिमन्यंतेगंधर्वेभ्योबहुतयापिंगाक्ष्याद्दशाच ॥ ६ ॥ ॥ तद्धिरण्य
मभवत्तस्मादद्भ्योहिरण्यंपुनंतिब्रह्मवादिनोवदंतिकस्मात्सत्यादनस्थिकेनप्रजाःप्रवीयंतेस्थन्व
तीर्जायंतइतियद्धिरण्यंघृतेवधायजुहोतितस्मादनस्थिकेनप्रजाःप्रवीयंतेस्थन्वतीर्जायंतएतद्वा
अग्नेःप्रियंधामयद्घृतंतेजोहिरण्यमियंतेशुक्रतनूरिदंवर्चइत्याहसतेजसमेवैनꣳसतनुं ॥ १ ॥ करो

सं·ष
९

त्सथोसंभरत्येवैनंयद्बभ्रुमवदध्याद्गर्भाः प्रजानांपरापातुकास्युर्बभ्रुमवदधातिगर्भिणांधृत्यैनिष्ट
र्क्यंबध्नातिप्रजानांप्रजननायवाग्वाएषायत्सोमक्रयणीजूरसीत्याहयद्धिमनसाजवतेतद्वाचा
वदतिधृतामनसेत्याहमनसाहिवाग्धृताजुष्टाविष्णवइत्याह॥ २॥ यज्ञोवैविष्णुर्यज्ञायैवैनांजुष्टांक
रोतितस्यास्तेसत्यसवसःप्रसवइत्याहसवितृप्रसूतामेवैनामवरुंधेकांडेकांडेवैक्रियमाणेयज्ञꣳ
रक्षाꣳसिजिघाꣳसंत्येषखलुवाअरक्षोहतःपंथायोग्नेश्चसूर्यस्यचसूर्यस्यचक्षुरारुहमग्नेरक्ष्णः
कनीनिकामित्याहयएवाअरक्षोहतःपंथास्तꣳसमारोहति॥ ३॥ वाग्वाएषायत्सोमक्रयणीवि
दसिमनासीत्याहशास्त्येवैनामेतत्तस्माच्छिष्टाः प्रजाजायंतेचिदसीत्याहयद्धिमनसाचेतयंतेतद्वा
चावदतिमनासीत्याहयद्धिमनसाभिगच्छतितत्करोतिधीरसीत्याहयद्धिमनसाध्यायतितद्वाचा
॥ ४॥ वदतिदक्षिणासीत्याहदक्षिणाह्येषायज्ञियासीत्याहयज्ञियामेवैनांकरोतिक्षत्रियासीत्याह

राम
९

क्षत्रियाह्येषादितिरस्युभयतःशीर्ष्णीत्याहयदेवादित्यःप्रायणीयोयज्ञानामादित्यउदयनीयस्तस्मा
देवमाहयदबद्धास्यादयतास्याद्यत्पदिबद्धानुस्तरणीस्यात्प्रमायुकोयजमानस्यात् ॥ ५ ॥ यत्कर्ण
गृहीतावार्त्रघ्नीस्यात्सवान्यंजिनीयात्तंवान्योजिनीयान्मित्रस्त्वापदिबध्नात्वित्याहमित्रोवैशिवोदेवा
नांतेनैवैनांपदिबध्नातिपूषाध्वनःपात्वित्याहेयंवैपूषेमामेवास्याअधिपामकःसमष्ट्याइंद्रायाध्य
क्षायेत्याहेंद्रमेवास्याअध्यक्षंकरोति॥ ६ ॥अनुत्वामातामन्यतामनुपितेत्याहानुमतयैवैनयाक्री
णातिसादेविदेवमच्छेहीत्याहदेवीह्येषादेवःसोमइंद्रायसोममित्याहेंद्रायहिसोमआह्रियतेय
देतद्यजुर्नब्रूयात्पराच्येवसोमक्रयणीयाद्रुद्रस्त्वावर्तयत्वित्याहरुद्रोवैक्रूरः॥ ७ ॥देवानांतमेवा
स्यैपरस्ताद्दधात्यावृत्त्यैक्रूरमिववाएतत्करोतियद्रुद्रस्यकीर्तयतिमित्रस्यपथेत्याहशांत्यैवाचावा
एषविक्रीणीतेयःसोमक्रयण्यास्वस्तिसोमसखापुनरेहिसहरय्येत्याहवाचैवविक्रीयपुनरात्म

न्वाचंधत्तेनुपदासुकास्यवाग्भवातियएवंवेद॥८॥सतनुंविश्लिष्टवइत्याहसमारोहतिध्यायतितद्वावा
यजमानस्यात्करोतिक्रूरोवेद॥७॥॥षड्दान्यनुनिक्रामतिषडहंवानातिवदत्युतसंवत्सरस्यायनेया
वत्येववाचमवरुंधेसप्तभिपदैर्जुहोतिसप्तपदाशाक्वरीपशवःशाक्वरीपशूनेवावरुंधेसप्तग्राम्याःप
शवःसप्तारण्याःसप्तछंदांस्युभयस्यावरुद्ध्यैवस्व्यसिरुद्रासीत्याहरूपमेवास्याएतन्महिमानं॥
॥१॥व्याचष्टेबृहस्पतिस्त्वासुम्नेरण्वत्वित्याहब्रह्मवैदेवानांबृहस्पतिर्ब्रह्मणैवास्मैपशूनवरुंधेरुद्रो
वसुभिराचिकित्वित्याहावृत्यैपृथिव्यास्त्वामूर्धन्नाजिघर्मिदेवयजनइत्याहपृथिव्याह्येषमूर्धाय
द्देवयजनमिडायाःपदइत्याहेडायैह्येतत्पदंयत्सोमक्रयण्यैघृतवतिस्वाहा॥२॥इत्याहयदेवास्यैप
दाद्घृतमपीड्यततस्मादेवमाहयदध्वर्युरनग्नावाहुतिंजुहुयादंधोध्वर्युःस्याद्रक्षांसियज्ञंहन्युर्हि
रण्यमुपास्यजुहोत्यग्निवत्येवजुहोतिनयज्ञंरक्षांसि×या×घ्नंतिकांडेकांडेवैक्रियमाणेयज्ञंर

नांधोध्वर्युर्भवति

क्षाꣳसिजिघाꣳसंतिपरिलिखितꣳरक्षःपरिलिखिताअरातयइत्याहरक्षसामपहत्यै॥३॥इदमहꣳरक्षसोग्रीवाअपिकृंतामियोस्मांद्वेष्टियंचवयंद्विष्मइत्याहद्वौवावपुरुषौयंचैवद्वेष्टियश्चैनंद्वेष्टितयोरेवानंतरायंग्रीवाःकृंततिपशवोवैसोमक्रयण्यैपदंयावत्मूतꣳसंवपतिपशूनेवावरुंधेस्मेरायइतिसंवपत्यात्मानमेवाध्वर्युः॥४॥पशुभ्योनांतरेतित्वेरायइतियजमानायप्रयच्छतियजमानएवरयिंदधातितोतेरायइतिपत्नियाअर्धोवाएषआत्मनोयत्पत्नीयथागृहेषुनिधत्तेतादृगेवतत्त्वष्टीमतीतेसपेयेत्याहत्वष्टावैपशूनांमिथुनानाꣳरूपकृद्रूपमेवपशुषुदधात्यस्मैवैलोकायगार्हपत्यआधीयतेमुष्माआ[illegible]वनीयोयद्गार्हपत्यउपवपेदस्मिंल्लोकेपशुमान्स्याद्यदाहवनीयेमुष्मिंल्लोकेपशुमान्स्यादुभयोरुपवपत्युभयोरेवैनंलोकयोःपशुमंतंकरोति॥५॥महिमानꣳस्वापहृत्याअध्वर्युर्धीयतेनदुर्विꣳशांतिश्च॥६॥ ॥ब्रह्मवादिनोवदंतिविचित्यःसोमा३नविचित्या३इतिसो

सं·ष·
११

मोवाओषधीनाꣳराजातस्मिन्यदापन्नंग्रसितमेवास्यतद्यद्विचिनुयाद्यथास्याद्ग्रसितंनिष्खिदतिता
दृगेवतद्यन्नविचिनुयाद्यथाक्षन्नापन्नंविधावतितादृगेवतत्क्षोधुकोध्वर्युस्यात्क्षोधुकोयजमानः
सोमविक्रयिन्सोमꣳशोधयेत्येवब्रूयाद्यदीतरं॥१॥यदीतरमुभयेनैवसोमविक्रयिणमर्पयतित
स्मात्सोमविक्रयीक्षोधुकोरुणोहस्माहौपवेशिःसोमक्रयणएवाहंतृतीयसवनमवरुंधइतिपशू
नांचर्मन्मिमीतेपशूनेवावरुंधेपशवोहितृतीयꣳसवनंयंकामयेतापशुस्यादित्यृक्षतस्तस्यमिमी
तर्क्षंवाअपशव्यमपशुरेवभवतियंकामयेतपशुमान्त्स्यात्॥२॥इतिलोमतस्तस्यमिमीतैतद्वैपशू
नाꣳरूपꣳरूपेणैवास्मैपशूनवरुंधेपशुमानेवभवत्यपामंतेक्रीणातिसरसमेवैनंक्रीणात्यमात्योसी
त्याहामैवैनंकुरुतेशुक्रस्तेग्रहइत्याहशुक्रोह्यस्यग्रहोनसाछयातिमहिमानमेवास्याछयात्यन
सा॥३॥अछयातितस्मादनोवाह्यꣳसमेजिवनंयत्रखलुवाएतꣳशीर्ष्णाहरंतितस्माछीर्षहार्यंगि

राम्
११

रौजीवनमभित्यंदेवꣳसावितारमित्यतिछंदसर्वाभिमीतेतिछंदावैसर्वाणिछंदाꣳसिसर्वैर्भिरेवैनंछंदो
भिर्मिमीतेवर्ष्मवाएषाछंदसांयदतिछंदायदतिछंदसर्वाभिमीतवर्ष्मैवैनꣳसमानानांकरोत्येकये
कयोत्सर्गं॥ ४ ॥मिमीतेयातयाम्नियायातयाम्नियैवैनंमिमीतेतस्मान्नानावीर्याअंगुलयःसर्वा
स्वंगुष्ठमुपनिगृह्णातितस्मात्समावद्वीर्योन्याभिरंगुलिभिस्तस्मात्सर्वाअनुसंचरतियत्सहसर्वाभि
र्मिमीतसꣳश्लिष्टाअंगुलयोजायेरन्नेकयेकयोत्सर्गंमिमीतेतस्माद्विभक्ताजायंतेपंचकृत्वोयजु
षामिमीतेपंचाक्षरापंक्तिःपांक्तोयज्ञोयज्ञमेवावरुंधेपंचकृत्वस्तूष्णीं॥ ५ ॥दशसंपद्यंतेदशाक्षरा
विराडन्नंविराड्विराजैवान्नाद्यमवरुंधेयजुषामिमीतेभूतमेवावरुंधेयत्तूष्णींभविष्यद्यद्वैतावानेवसो
मस्याद्यावंतंमिमीतेयजमानस्यैवस्या×द्यू×न्नापिसदस्यानांप्रजाभ्यस्त्वेत्युपसम्नह्यतिसदस्याने
वान्वाभजतिवाससोपनह्यतिसर्वदेवत्यंवै॥ ६ ॥वासःसर्वाभिरेवैनंदेवताभिःसमर्धयतिपशवो

वैसोमःप्राणायत्वेत्युपनह्यतिप्राणमेवपशुषुदधातिव्यानायत्वेत्यनुश्रंथयतिव्यानमेवपशुषुदधा
तितस्मात्स्वपंतंप्राणानजहति॥७॥इतरंपशुमान्त्स्याद्यात्यनसोत्सर्गंतूष्णीं सर्वदेवत्यंवैत्रयुस्त्रिः
शाक्व॥९॥ ॥यत्कलयातेशफेनतेक्रीणानीतिपणेतागोअर्घंसोमंकुर्याद्गोअर्घंयजमानमगोअर्घ
मध्वर्युंगोस्तुमहिमानंनावतिरेद्गवातेक्रीणानीत्येवब्रूयाद्गोअर्घमेवसोमंकरोतिगोअर्घंयजमानं
गोअर्घमध्वर्युंनगोर्महिमानमवतिरत्यजयाक्रीणातिसतपसमेवैनंक्रीणातिहिरण्येनक्रीणाति
सशुक्रमेव॥१॥एनंक्रीणातिधेन्वाक्रीणातिसाशिरमेवैनंक्रीणात्यृषभेणक्रीणातिसेंद्रमेवैनंक्री
णात्यनडुहाक्रीणातिवन्हिर्वाअनड्वान्वन्हिनैववन्हियज्ञस्यक्रीणातिमिथुनाभ्यांक्रीणातिमिथु
नस्यावरुध्यैवाससाक्रीणातिसर्वदेवत्यंवैवासःसर्वाभ्यएवैनंदेवताभ्यःक्रीणातिदशसंपद्यंतेद
शाक्षराविराडन्नंविराड्विराजैवान्नाद्यमवरुंधे॥२॥तपसस्तनूरसिप्रजापतेर्वर्णइत्याहपशुभ्य

एवतदध्वर्युर्न्निन्हुतआत्मनोनात्र्स्कायगच्छतिश्रियंप्रपशूनाप्नोतियएवंवेदशुक्रंतेशुक्रेणक्रीणा
मीत्याहयथायजुरेवैतद्देवावैयेनहिरण्येनसोमम्अक्रीणंतदभीषहापुनराददतकोहितेजसाविक्रेष्य
तइतियेनहिरण्येन॥३॥सोमंक्रीणीयात्तदभीषहापुनराददीततेजएवात्मन्धत्तेस्मेज्योतिःसोमवि
क्रयिणितमइत्याहज्योतिरेवयजमानेदधातितमसासोमविक्रयिणमर्पयतियदनुपग्रथ्यहन्याद्दंद
शूकास्ताꣳसमाꣳसर्पास्युरिदमहꣳसर्पाणांदंदशूकानांग्रीवाउपग्रथ्नामीत्याहादंदशूकास्ताꣳसमाꣳ
सर्पाभवंतितमसासोमविक्रयिणंविध्यतिस्वान॥४॥भ्राजेत्याहैतेवाअमुष्मिन्लोकेसोमम्अरक्षंते
भ्योधिसोमम्आहरन्यदेतेभ्यःसोमक्रयणान्नानुदिशेदक्रीतोस्यसोमःस्यान्नास्यैतेमुष्मिन्लोकेसो
मꣳरक्षेयुर्यदेतेभ्यःसोमक्रयणाननुदिशतिक्रीतोस्यसोमोभवत्येतेस्यामुष्मिन्लोकेसोमꣳरक्षंति
॥५॥सस्शुक्रमेवरुंधइतियेनहिरंण्येनस्वानवलुश्वलारिꣳरात्र॥१०॥ ॥वारुणोवैक्रीतःसोमउपनद्धो

मित्रोनएहिसुमित्रधाइत्याहशांत्याइंद्रस्योरुमाविशदक्षिणमित्याहदेवावैयꣳसोममक्रीणंतमिंद्रस्योरौ
दक्षिणआसादयन्नेषखलुवाएतर्हींद्रोयोयजतेतस्मादेवमाहोदायुषास्वायुषेत्याहदेवताएवान्वारभ्यात्
॥ १ ॥ तिष्ठत्युर्वंतरिक्षमन्विहीत्याहांतरिक्षदेवत्योह्येतर्हिसोमोदित्याःसदोस्यदित्याःसदआसीदेत्या
हयथायजुरेवैतद्विवाएनमेतदर्धयतियद्वारुणꣳसंतंमैत्रंकरोतिवारुण्यर्चासादयतिस्वयैवैनंदेवत
यासमर्धयतिवाससापर्यानह्यतिसर्वदेवत्यंवैवासःसर्वाभिरेव ॥ २ ॥ एनंदेवताभिःसमर्धयत्यथोर
क्षसामपहत्यैवनेषुव्यंतरिक्षंततानेत्याहवनेषुहिव्यंतरिक्षंततानवाजमर्वत्स्वित्याहवाजꣳह्यर्वत्सुप
योअघ्नियास्वित्याहपयोह्यघ्नियासुहृत्सुक्रतुमित्याहहृत्सुहिक्रतुंवरुणोविक्ष्वग्निमित्याहवरुणोहि
विक्ष्वग्निंदिविसूर्यं ॥ ३ ॥ इत्याहदिविहिसूर्यꣳसोममद्रावित्याहग्रावाणोवाअद्रयस्तेषुवाएषसोमं
दधातियोयजतेतस्मादेवमाहोदुत्यंजातवेदसमितिसौर्यर्चाकृष्णाजिनंप्रत्यानह्यतिरक्षसामपहत्या

उस्रावेतंधूर्षाहावित्याहयथायजुरेवैतत्प्रच्यवस्वभुवस्पतइत्याहभूतानाꣳहि॥ ४ ॥एषपतिर्विश्वा
न्यभिधामानीत्याहविश्वानिह्ये१ एषोभिधामानिप्रच्यवतेमात्वापरिपरीविदंदित्याहयदेवादःसोम
माह्रियमाणंगंधर्वोविश्वावसुःपर्यमुष्णात्तस्मादेवमाहापरिमोषाययजमानस्यस्वस्त्ययन्यसीत्या
हयजमानस्यैवैषयज्ञस्यान्वारंभोनवच्छित्यैवरुणोवाएषयजमानमभ्यैतियत्॥ ५ ॥क्रीतःसोमउ
पनद्धोनमोमित्रस्यवरुणस्यचक्षसइत्याहशांत्याआसोमंवहंत्यग्निनाप्रतितिष्ठतेतौसंभवंतौय
जमानमभिसंभवतःपुराखलुवावैषमेधायात्मानमारभ्यचरतियोदीक्षितोयदग्नीषोमीयंपशुमा
लभतआत्मनिष्क्रयणएवास्यसतस्मात्तस्यनाश्यंपुरुषनिष्क्रयणइवह्यथोखल्वाहुरग्नीषोमा
भ्यांवाइंद्रोवृत्रमहन्नितियदग्नीषोमीयंपशुमालभतेवार्त्रघ्नएवास्यसतस्माद्वाश्यंवारुण्यर्चापरि
चरतिस्वयैवैनंदेवतयापरिचरति॥ ६ ॥अन्वारभ्योत्सर्वाभिरेवसूर्यंभूतानाꣳह्येतियदाहुःसप्तविꣳ

सं॰ष॰ १४

न्नातिष्ठ॥ ११॥ ॥प्राचीनवꣳशंयावंतऋक्सामेवैवाग्वैदेवावैदेवयजनंकृष्णश्शृतंहिरण्यꣳषड्दानिर्ब्रह्म
वादिनोविविवित्यायकलयातेवारुणोवैक्रीतःसोमएकादश॥ ११॥ ॥प्राचीनवꣳशꣳस्वाहेत्याहदूयंतःश
राद्येषसंतपसानुयत्कर्णगृह्णातितिलोमतोवारुणः षट्सप्ततिः॥ ७६॥ ॥हरिः ओम्॥ ॥यदुभौवि
मुच्यातिथ्यंगृह्णीयाद्यज्ञंविछिंद्याद्यदुभावविमुच्ययथानागतायातिथ्यंक्रियतेतादृगेवतद्विमुक्तो
न्योनड्वान्भवत्यविमुक्तोन्यायातिथ्यंगृह्णातियज्ञस्यसंतत्यैपत्न्यन्वारभतेपत्नीहिपारीणह्यस्येशे
पत्नियैवानुमतन्निर्वपतियद्वैपत्नीयज्ञस्यकरोतिमिथुनंतदथोपत्नियाएव॥ १॥ एषयज्ञस्यान्वा
रंभोनवछित्त्यैयावद्भिर्वैराजानुचरैरागच्छतिसर्वेभ्योवैतेभ्यआतिथ्यंक्रियतेछंदाꣳसिखलुवैसोम
स्यराज्ञोनुचराण्यग्नेरातिथ्यमसिविष्णवेत्वेत्याहगायत्रियाएवैतेनकरोतिसोमस्यातिथ्यमसि
विष्णवेत्वेत्याहत्रिष्टुभएवैतेनकरोत्यतिथेरातिथ्यमसिविष्णवेत्वेत्याहजगत्यै॥ २॥ एवैतेनकरोत्य

राम १५

ग्नयेत्वारायस्पोषदाव्नेविष्णवेत्वेत्याहानुष्टुभएवैतेनकरोतिश्येनायत्वासोमभृतेविष्णवेत्वेत्याहगा
यत्रियाएवैतेनकरोतिपंचकृत्वोगृह्णातिपंचाक्षरापंक्तिःपांक्तोयज्ञोयज्ञमेवावरुंधेब्रह्मवादिनोव
दंतिकस्मात्सत्याद्गायत्रियाउभयतआतिथ्यस्यक्रियतइतियदेवादःसोममा॥ ३ ॥अहरत्तस्माद्गा
यत्रियाउभयतआतिथ्यस्यक्रियतेपुरस्ताच्चोपरिष्टाच्चशिरोवाएतद्यज्ञस्ययदातिथ्यंनवकपालः
पुरोडाशोभवतितस्मान्नवधाशिरोविष्यूतन्नवकपालःपुरोडाशोभवतितेत्रयस्त्रिकपालास्त्रि
वृतास्तोमेनसंमितास्तेजस्त्रिवृत्तेजएवयज्ञस्यशीर्षंदधातिनवकपालःपुरोडाशोभवतितेत्रय
स्त्रिकपालास्त्रिवृताप्राणेनसंमितास्त्रिवृद्वै॥ ४ ॥प्राणस्त्रिवृत्तमेवप्राणमभिपूर्वंयज्ञस्यशीर्षं
दधातिप्रजापतेर्वाएतानिपक्ष्माणियदश्ववालाऐक्षवीतिरश्चीयदाश्ववालःप्रस्तरोभवत्यैक्षवी
तिरश्चीप्रजापतेरेवतच्चक्षुःसंभरतिदेवावैयाआहुतीरजुहवुस्ताअसुरानिष्कावमादंतेदेवाःकार्ष्म

सं·ष·
१५

यैमपन्नयन्कर्मण्योवैकमैनेनकुर्वीतेतितेकाष्मर्यमयान्परिधीन्॥ ५॥ अकुर्वतेवैनैरक्षाꣳस्यपा
घ्नतयत्कार्ष्मर्यमयाः परिधयोभवंतिरक्षसामपहत्यैसꣳस्पर्शयतिरक्षसामनन्ववचारायनपु
रस्तात्परिदधात्यादित्योह्येवोद्यन्पुरस्ताद्रक्षाꣳस्यपहंत्यूर्ध्वेसमिधावादधात्युपरिष्टादेवरक्षाꣳस्य
पहंतियजुषान्यांतूष्णीमन्यांमिथुनत्वायद्वेआदधातिद्विपाद्यजमानः प्रतिष्ठित्यैब्रह्मवादिनोव
दंति॥ ६॥ अग्निश्चवाएतौसोमश्चकथासोमायातिथ्यंक्रियतेनाग्नयइतियदग्नावग्निंमथित्वाप्र
हरतितेनैवाग्नयआतिथ्यंक्रियतेथोखल्वाहुरग्निःसर्वादेवताइतियद्धविरासाद्याग्निंमंथतिहव्या
यैवासन्नायसर्वादेवताजनयति॥ ७॥ पत्नियाएवञ्जगत्याआत्रिवृद्धेपरिधीन्वदंत्येकंचत्वारिꣳश
च्च॥ १॥ ॥ देवासुराः संयत्ताआसंतेदेवामिथोविप्रियाआसंतेऽन्योन्यस्मैज्यैष्ठ्यायातिष्ठमानाः
पंचधाव्यक्रामन्नग्निर्वसुभिः सोमोरुद्रैरिंद्रोमरुद्भिर्वरुणआदित्यैर्बृहस्पतिर्विश्वैर्देवैस्तेमन्यंत

राम
१५

सुरेभ्योवाइदंभ्रातृव्येभ्योरध्यामोयन्मिथोविप्रियास्मोयानइमाःप्रियास्तनुवःस्ताःसमवद्यामहै
ताभ्यःसनिर्ऋछाद्यः॥१॥नःप्रथमोऽन्योन्यस्मैद्रुह्यादितितस्माद्यःसतानूनप्त्रिणांप्रथमो
द्रुह्यतिसआर्तिमार्छतियत्तानूनप्त्रंसमवद्यतिभ्रातृव्याभिभूत्यैभवत्यात्मनापरास्यभ्रातृव्योभ
वतिपंचकृत्वोवद्यतिपंचधाहितेतत्समवाद्यंताथोपंचाक्षरापंक्तिःपांक्तोयज्ञोयज्ञमेवावरुंधआ
पतयेत्वागृह्णामीत्याहप्राणोवै॥२॥आपतिःप्राणमेवप्रीणातिपरिपतयइत्याहमनोवैपरिपति
र्मनएवप्रीणातितनूनप्त्रइत्याहतनुवोहितेताःसमवाद्यंतशाक्वरायेत्याहशक्त्यैहितेताःसमवाद्यं
तशक्मन्नोजिष्ठायेत्याहौजिष्ठंहितेतदात्मनःसमवाद्यंतानाधृष्टमस्यनाधृष्यमित्याहानाधृ
ष्टंह्येतदनाधृष्यंदेवानामोजः॥३॥इत्याहदेवानांह्येतदोजोभिशस्तिपाअनभिशस्तेन्यमित्या
हाभिशस्तिपाह्येतदनभिशस्तेन्यमनुमेदीक्षांदीक्षापतिर्मन्यतामित्याहयथायजुरेवैतद्घृतंवैदे

वावज्रंकृत्वासोममघ्नंनंतिकमिवखलुवाअस्यैतच्चरंतियत्तानूनप्त्रेणप्रचरंत्यꣳशुरꣳशुस्तेदेवसोमा
प्यायतामित्याहयत्॥ ४ ॥ एवास्याप्रुवायतेयन्मीयतेतदेवास्यैतेनाप्याययत्यातुभ्यमिंद्रः प्यायता
मात्वमिंद्रायप्यायस्वेत्याहोभावेवेंद्रंचसोमंचाप्याययत्याप्याययसखीन्त्सन्यामेधयेत्याहर्त्विजो
वाअस्यसखायस्तानेवाप्याययतिस्वस्तितेदेवसोमसुत्यामशीय॥ ५ ॥ इत्याहाशिषमेवैतामाशा
स्तेप्रवाएतेस्माल्लोकाच्यवंतेयेसोममाप्याययंत्यंतरिक्षदेवत्योहिसोमआप्यायितएष्टारायः प्रेषेभ
गायेत्याहद्यावापृथिवीभ्यामेवनमस्कृत्यास्मिन्लोकेप्रतितिष्ठंतिदेवासुराः संयत्ताआसंतेदेवाबि
भ्यतोग्निंप्राविशंतस्मादाहुरग्निः सर्वादेवताइतिते॥ ६ ॥ अग्निमेववरूथंकृत्वासुरानभ्यभवन्नग्नि
मिवखलुवाएषप्रविशतियोवांतरदीक्षामुपैतिभ्रातृव्याभिभूत्यैभवत्यात्मनापरास्यभ्रातृव्योभव
त्यात्मानमेवदीक्षयापातिप्रजामवांतरदीक्षयासंतरांमेखलाꣳसमायच्छतेप्रजाह्यात्मनोंतरतरात्

मज्ञतोभवतिमदंतीभिर्मार्जयंतेनिर्हृग्निःशीतेनवायतिसमिध्यैयातेअग्नेरुद्रियातनूरित्याहस्वयै
वैनद्देवतयाव्रत पत्तिसयोनित्वायशांत्यै॥ ७ ॥ योवाओजआहृयदशीयेतितेग्नएकादशाव॥ २॥ ॥
तेषामसुराणांतिस्रःपुरआसन्नयस्मैयवमाथरजताथहरिणीतादेवाजेतुन्नाशक्नुवंताउपसदै
वाजिगीषंतस्मादाहुर्यश्चैवंवेदयश्चनोपसदावैमहापुरंजयंतीतितइषुꣳसमस्कुर्वताग्निमनीकꣳ
सोमꣳशल्यंविष्णुंतेजनंतेब्रुवन्कइमामसिष्यतीति॥ १॥ रुद्रइत्यब्रुवंरुद्रोवैक्रूरःसोस्यत्वितिसो
ब्रवीद्वरंवृणाअहमेवपशूनामधिपतिरसानीतितस्माद्रुद्रःपशूनामधिपतिस्ताꣳरुद्रोवासृज
त्सतिस्रःपुरोभित्वैभ्योलोकेभ्योसुरान्प्राणुदतयदुपसदउपसद्यंतेभ्रातृव्यपराणुत्यैनान्यामा
हुतिंपुरस्ताज्जुहुयाद्यदन्यामाहुतिंपुरस्ताज्जुहुयात्॥ २ ॥ अन्यन्मुखंकुर्यात्स्रुवेणाघारमाघार
यतियज्ञस्यप्रज्ञात्यैपराङतिक्रम्यजुहोतिपराचएवैभ्योलोकेभ्योयजमानोभ्रातृव्यान्प्रणुदते

सं·ष· पुनरत्याक्रम्योपसदंजुहोतिप्रणुद्यैवैभ्योलोकेभ्योभ्रातृव्यांजित्वाभ्रातृव्यलोकमभ्यारोहतिदेवावै
१७ याःप्रातरुपसदउपासीदंनन्हस्ताभिरसुरान्प्राणुदंतयाःसायꣳरात्रियैताभिर्यत्सायंप्रातरुपसदः॥३॥
उपसद्यंतेहोरात्राभ्यामेवतद्यजमानोभ्रातृव्यान्प्रणुदतेयाःप्रातर्याज्यास्युस्ताःसायंपुरोनुवाक्याः
कुर्यादयातयामत्वायतिस्रउपसदउपैतित्रयइमेलोकाइमानेवलोकान्प्रीणातिषट्संपद्यंतेषड्वा
ऋतवऋतूनेवप्रीणातिद्वादशाहीनेसामाउपैतिद्वादशमासाःसंवत्सरःसंवत्सरमेवप्रीणातिचतु
र्विꣳशतिःसं॥४॥पद्यंतेचतुर्विꣳशतिरर्धमासाअर्धमासानेवप्रीणात्याराग्रामवांतरदीक्षामुपेया
द्यःकामयेतास्मिन्मेलोकेर्धुकꣳस्यादित्येकमग्रेथद्वावथत्रीनथचतुरएषावाआराग्रावांतरदीक्षा
स्मिन्नेवास्मैलोकेर्धुकंभवतिपरोवरीयसीमवांतरदीक्षामुपेयाद्यःकामयेतामुष्मिन्मेलोकेर्धुकꣳ राम
स्यादितिचतुरोग्रेथत्रीनथद्वावथैकमेषावैपरोवरीयस्यवांतरदीक्षामुष्मिन्नेवास्मैलोकेर्धुकंभव १७

ति॥५॥असिध्यतीतिद्दुद्ध्यात्सायंप्रातरुपसदश्चतुर्विꣳशतिः संवत्सरोग्रेषोडशाच॥३॥ ॥सुवर्गंवाएते
लोकंयंतियउपसदउपयंतितेषांयउन्नयतेहीयतएवसनोदनेषीतिसून्नीयमिवयोवैस्वार्थेतांयताꣳ
श्रांतोहीयतउतसनिष्ट्यायसहवसतितस्मात्सकृदुन्नीयनापरमुन्नयेतदध्नोन्नयेतैतद्वैपशूनाꣳ
रूपꣳरूपेणैवपशूनवरुंधे॥१॥यज्ञोदेवेभ्योनिलायतविष्णूरूपंकृत्वासपृथिवींप्राविशत्तंदेवाहस्तान्त्सꣳ
रभ्यैच्छंतमिंद्रउपर्युपर्यत्यक्रामत्सोऽब्रवीत्कोमायमुपर्युपर्यत्यक्रमीदित्यहंदुर्गेहंतेत्यथकस्त्वमित्यहं
दुर्गादाहर्तेतिसोऽब्रवीद्दुर्गेवैहंतावोचथावराहोयंवाममोषः॥२॥सप्तानांगिरीणांपरस्ताद्वित्तंवेद्य
मसुराणांबिभर्तितंजहियदिदुर्गेहंतासीतिसदर्भपुंजीलमुद्वृह्यसप्तगिरीन्भित्वातमहन्त्सोऽब्रवीद्दु
र्गाद्वाआहर्तावोचथाएतमाहरेतितमेभ्योयज्ञएवयज्ञमाहरद्यत्तद्वित्तंवेद्यमसुराणामविंदंततदे
कंवेद्यैवेदित्वमसुराणां॥३॥वाइयमग्रआसीद्यावदासीनःपरापश्यतितावद्देवानांतेदेवाअब्रुवन्न

स्त्वेवनोस्यामपीतिकियद्वोदास्यामइतियावदियꣳसलावृकीत्रिःपरिक्रामतितावन्नोदत्तेतिसइंद्रःसला
वृकीरूपंकृत्वेमांत्रिःसर्वतःपर्यक्रामत्तदिमामविंदंतयदिमामविंदंततद्वेद्यैवेदित्वं॥ ४॥ सावाइयꣳसर्वै
ववेदिरियतिशक्ष्यामीतित्वाऽवमाययजंतेत्रिꣳशत्पदानिपश्चात्तिरश्चीभवतिषट्त्रिꣳशत्प्राचीचतु
र्विꣳशतिःपुरस्तात्तिरश्चीदशदशसंपद्यंतेदशाक्षराविराडन्नंविराड्विराजैवान्नाद्यमवरुंधउद्धंति
यदेवास्याअमेध्यंतदपहंत्युद्धंतितस्मादोषधयःपराभवंतिबर्हिस्तृणातितस्मादोषधयःपुनराभ
वंत्युत्तरंबर्हिषउत्तरबर्हिस्तृणातिप्रजावैबर्हिर्यजमानउत्तरबर्हिर्यजमानमेवायजमानादुत्तरंकरोति
तस्माद्यजमानोयजमानादुत्तरः॥ ५॥ रुंधेवाममोषावेदित्वमसुराणांवेदित्वंभवंतिपंचविꣳशति
श्च॥ ४॥ ॥ यद्वाअग्नीशानोभारमादत्तेविवसलिन्यातेयद्द्वादशसान्हस्योपसदस्युऽस्तिस्त्रोहीनस्य
यज्ञस्यविलोमक्रियततिस्रएवसान्हस्योपसदोद्वादशाहीनस्ययज्ञस्यसवीर्यत्वायाथोसलोमक्रि

यंतेवत्सस्यैकस्तनोभागीहिसोथैकꣳस्तनंव्व्रतमुपेत्यथद्वावथत्रीनथचतुरएतद्वै ॥ १ ॥ क्षुरपविनामव्व्र
तंयेनप्रजातान्भ्रातृव्यान्नुदतेप्रतिजनिष्यमाणानथोकनीयसैवभूयउपैतिचतुरोग्रेस्तनान्व्व्रतमुपे
त्यथत्रीनथद्वावथैकमेतद्वैसुजघनन्नामव्व्रतंतपस्यꣳसुवर्ग्यमथोप्रैवजायतेप्रजयापशुभिर्यवागू
राजन्यस्यव्व्रतंक्रूरेववैयवागूःक्रूरइव ॥ २ ॥ राजन्योवज्रस्यरूपꣳसमृद्ध्याआमिक्षावैश्यस्यपाक
यज्ञस्यरूपंपुष्ट्यैपयोब्राह्मणस्यतेजोवैब्राह्मणस्तेजःपयस्तेजसैवतेजःपयआत्मंधत्तेथोपय
सावैगर्भोवर्धतेगर्भइवखलुवाएषयद्दीक्षितोयदस्यपयोव्व्रतंभवत्यात्मानमेवतद्वर्धयतित्रिव्व्रतोवैम ५६
नुरासीद्द्विव्रताअसुराएकव्व्रताः ॥ ३ ॥ देवाःप्रातर्मध्यंदिनेसायंतन्मनोर्व्व्रतमासीत्पाकयज्ञस्यरू
पंपुष्ट्यैप्रातश्चसायंचासुराणांनिर्मध्यंक्षुधोरूपंततस्तेपराभवन्मध्यंदिनेमध्यरात्रेदेवानांततस्ते
भवन्सुवर्गंलोकमायन्यदस्यमध्यंदिनेमध्यरात्रेव्व्रतंभवतिमध्यतोवाअन्नेनभुंजतेमध्यतएव

तदूर्ज्जंधत्तेभ्रातृव्याभिभूत्यैभवत्यात्मना॥ ४ ॥ परास्यभ्रातृव्योभवतिगर्भोवाएषयद्दीक्षितोयोनिर्दीक्षि
तविमितंयद्दीक्षितोदीक्षितविमितात्प्रवसेद्यथायोनेर्गर्भस्कंदतितादृगेवतन्नप्रवस्तव्यमात्मनोगो
पीथायैषवैव्याघ्रःकुलगोपोयदग्निस्तस्माद्यद्दीक्षितःप्रवसेत्सएनमीश्वरोनूत्थायहंतोर्नप्रवस्त
व्यमात्मनोगुप्त्यैदक्षिणतःशयएतद्वैयजमानस्यायतनंस्वएवायतनेशयेग्निमभ्यावृत्यशयेदे
वताएवयज्ञमभ्यावृत्यशये॥ ५ ॥ एतद्वैक्रूरुद्वैकव्रताआत्मनायजमानस्यत्रयोदशाव॥ ५ ॥ ॥
पुरोहविषिदेवयजनेयाजयेद्यंकामयेतोपैनमुत्तरोयज्ञोनमेदभिसुवर्गंल्लोकंजयेदित्येतद्वैपुरोह
विर्देवयजनंयस्यहोताप्रातरनुवाकमनुब्रुवन्नग्निमपआदित्यमभिविपश्यत्युपैनमुत्तरोयज्ञोन
मत्यभिसुवर्गंल्लोकंजयत्याप्तेदेवयजनेयाजयेद्भ्रातृव्यवंतंपंथांवाधिस्पर्शयेत्कर्तंवायावन्ना
नसेयातवै॥ १ ॥ नरथाक्षेतद्वाआप्तंदेवयजनमाप्नोत्येवभ्रातृव्यंनैनंभ्रातृव्यआप्नोत्येकोन्नतेदे

वयजनेयाजयेत्पशुकाममेकोन्नताद्धिदेवयजनादंगिरसःपशूनसृजंतांतरासदोहविर्धानेउन्नतः
स्यादेतद्वाएकोन्नतंदेवयजनंपशुमानेवभवतिसमुन्नतेदेवयजनेयाजयेत्सुवर्गकामंसमुन्नताद्धिदेव
यजनादंगिरसःसुवर्गंलोकमायन्नंतराहवनीयंचहविर्धानंच॥ २ ॥ उन्नतःस्यादंतराहविर्धाने
चसदश्चांतरासदश्चगार्हपत्यंचैतद्धिसमुन्नतंदेवयजनꣳसुवर्गमेवलोकमेतिप्रतिष्ठितेदेवयजनेया
जयेत्प्रतिष्ठाकाममेतद्धिप्रतिष्ठितंदेवयजनंयत्सर्वतःसमम्प्रत्येवतिष्ठतियत्रान्याअन्याओषध
योव्यतिषक्तास्तस्मिन्याजयेत्पशुकाममेतद्धिपशूनाꣳरूपꣳरूपेणैवास्मैपशून्॥ ३ ॥अवरुंधे
पशुमानेवभवतिनिर्ऋतिगृहीतेदेवयजनेयाजयेद्यंकामयेतनिर्ऋत्यास्ययज्ञंग्राहयेयमित्ये
तद्धिनिर्ऋतिगृहीतंदेवयजनंयत्सदृश्यैसत्याऋक्षंनिर्ऋत्यैवास्ययज्ञंग्राहयतिव्यावृत्तेदेवयजने
याजयेद्व्यावृत्कामंयंपात्रेवातल्पेवामीमाꣳसेरन्प्राचीनमाहवनीयात्प्रवणःस्यात्प्रतीचीनंगार्हप

सं·ष
२०

त्यादेतद्वैव्यावृत्तंदेवयजनंविपाप्मनाभ्रातृव्येणावर्ततेनैनंपात्रेनतल्पेमीमाꣳसंतेकार्येदेवयजनेयाज
येद्भूतिकामंकार्योवैपुरुषोभवत्येव ॥ ४ ॥ यातवैहविर्धानंवपश्चत्पाप्मनाशदज्ञाव ॥ ६ ॥ ॥ तेभ्यउ
त्तरवेदिःसिꣳहीरूपंकृत्वोभयानंतरापक्रम्यातिष्ठत्तेदेवाअमन्यंतयतरान्वाइयमुपावर्त्स्यतितइदं
भविष्यंतीतितामुपामंत्रयंतसाब्रवीद्वरंवृणैसर्वान्मयाकामान्व्यश्नवथपूर्वांतुमाग्नेराहुतिरश्नव
ताइतितस्मादुत्तरवेदिंपूर्वामग्नेर्व्याघारयंतिवारेवृतꣳह्यस्यैशम्ययापरिमिमीते ॥ १ ॥ मात्रैवास्यै
सार्थायुक्तेनैवयुक्तमवरुंधेवित्तायनीमेसीत्याहवित्ताह्येनानावत्तिक्तायनीमेसीत्याहतिक्तान्ह्ये
नानावदवतान्मानाथितमित्याहनाथितान्ह्येनानावदवतान्माव्यथितमित्याहव्यथितान्ह्येनाना
वद्विधेरग्निर्नभोनाम ॥ २ ॥ अग्नेअंगिरइतित्रिर्हरतियएवैषुलोकेष्वग्नयस्तानेवावरुंधेतूष्णींचतु
र्थꣳहरत्यनिरुक्तमेवावरुंधेसिꣳहीरसिमहिषीरसीत्याहसिꣳहीह्येषारूपंकृत्वोभयानंतरापक्र

राम
२०

भ्यातिष्ठदुरुप्रथस्वोरुतेयज्ञपतिःप्रथतामित्याहयजमानमेवप्रजयापशुभिःप्रथयतिध्रुवा॥३॥
असीतिसꣳहत्यैदेवेभ्यःशुंधस्वदेवेभ्यःशुंभस्वेत्यवचास्यतिप्रकिरतिशुध्याइंद्रघोषस्त्वा
वसुभिःपुरस्तात्पात्वित्याहदिग्भ्यएवैनांप्रोक्षतिदेवाꣳश्चेदुत्तरवेदिरुपावर्तीहैवविजयामहाइ
त्यसुरावज्रमुद्यत्यदेवानभ्यायंततानिंद्रघोषोवसुभिःपुरस्तादप॥ ४ ॥अनुदतमनोजवाःपितृ
भिर्दक्षिणतःप्रचेतारुद्रैःपश्चाद्विश्वकर्मादित्यैरुत्तरतोयदेवमुत्तरवेदिंप्रोक्षतिदिग्भ्यएवतद्यज
मानोभ्रातृव्यान्प्रणुदतइंद्रोयतीन्त्सालावृकेभ्यःप्रायच्छत्तान्दक्षिणतउत्तरवेद्याआदन्यत्प्रोक्षणी
नामुच्छिष्येततद्दक्षिणतउत्तरवेद्यैनिनयेद्यदेवतत्रक्रूरंतत्तेनशमयतियंद्विष्यात्तंध्यायेच्छुचैवैनम
र्पयति॥ ५ ॥भिमीतेनामध्रुवापशुचावीणिच॥ ७॥ ॥सोत्तरवेदिरब्रवीत्सर्वान्मयाकामान्व्यश्न
वथेतितेदेवाअकामयंतासुरान्भ्रातृव्यानभिभवेमेतितेऽजुहवुःसिꣳहीरसिसपत्नसाहीस्वाहेति

सं.ष.
२१ तेसुरान्भ्रातृव्यानभ्यभवन्तेसुरान्भ्रातृव्यानभिभूयाकामयंतप्रजांविंदेमहीतितेज्जुहवुःसिꣳहीर
सिसुप्रजावनिःस्वाहेतितेप्रजामविंदंततेप्रजांवित्वा॥ १॥अकामयंतपशून्विंदेमहीतितेज्जुहवुः
सिꣳहीरसिरायस्पोषवनिःस्वाहेतितेपशूनविंदंततेपशून्वित्वाकामयंतप्रतिष्ठांविंदेमहीतितेज्जु
हवुःसिꣳहीरस्यादित्यवनिःस्वाहेतितइमांप्रतिष्ठामविंदंततइमांप्रतिष्ठांवित्वाकामयंतदेवताआ
शिषउपेयामेतितेज्जुहवुःसिꣳहीरस्यावहदेवान्देवयते॥ २॥यजमानायस्वाहेतितेदेवताआशिष
उपायन्पंचकृत्वोव्याघारयतिपंचाक्षरापंक्तिःपांक्तोयज्ञोयज्ञमेवावरुंधेक्ष्णयाव्याघारयतितस्माद
क्ष्णयापशवोंगानिप्रहरंतिप्रतिष्ठित्यैभूतेभ्यस्त्वेतिस्रुचमुद्गृह्णातियएवदेवाभूतास्तेषांतद्भाग
चि२ धेयंतानेवतेनप्रीणातिपौतुद्रवान्परिधीन्परिदधात्येषां॥ ३ ॥लोकानांविधृत्याअग्नेस्त्रयोज्यायाꣳ राम
सोभ्रातरआसंतेदेवेभ्योहव्यंवहंतःप्रामीयंतसोग्निरबिभेदित्थंवावस्यआर्तिमारिष्यतीतिस २१

निलायतसयांवनस्पतिष्ववसत्तांपूतुद्रौयामोषधीषुताꣳसुगंधितेजनेयांपशुषुतांपेत्वस्यांतराशृं
गेतंदेवताःप्रैषमैछंतमन्वविंदंतमब्रुवन्॥ ४ ॥ उपनआवर्तस्वहव्यन्नोवहेतिसोब्रवीद्वरंवृणैयदे
वगृहीतस्याहुतस्यबहिःपरिधिस्कंदात्तन्मेभ्रातृणांभागधेयमसदितितस्माद्यद्गृहीतस्याहु
तस्यबहिःपरिधिस्कंदतितेषांतद्भागधेयंतानेवतेनप्रीणातिसोमन्यतास्थन्वंतोमेपूर्वेभ्रातरः
प्रामेषतास्थानिशातयाइतिसयानि॥ ५ ॥ अस्थांन्यशातयततत्पूतुद्र्वभवद्यन्माꣳसमुपमृतं
तद्गुल्गुलुयदेतान्त्संभारान्त्संभरत्यग्निमेवतत्संभरत्यग्नेःपुरीषमसीत्याहाग्नेर्ह्येतत्पुरीषंय
त्संभाराअथोखल्वाहुरेतेवावैनंतेभ्रातरःपरिवारेयत्पौतुद्रवाःपरिधयइति॥ ६ ॥ विल्वाद्देवयत
एषामब्रुवन्यानिवतुश्चत्वारिꣳशाच्च॥ ७ ॥ ॥बध्यमवस्यतिवरुणपाशादेवैनंमुंचतिप्रणेनक्ति
मेध्यमेवैनंकरोतिसावित्रियर्चाहुत्वाहविर्धानेप्रवर्तयतिसवितृप्रसूतएवैनेप्रवर्तयतिवरुण्यावाए

सं·ष·
२२

षडुर्वाउभयतोबद्धोपदक्षः सयदुत्सर्जेद्यजमानस्यगृहानभ्युत्सर्जेत्सुवाग्देवदुर्याः आवदेत्याहद्व
द्वा वैदुर्याः शालैपत्नी ॥ १ ॥ उपानक्तिपत्नीहिसर्वस्यमित्रंमित्रत्वाययद्वैपत्नीयज्ञस्यकरोतिमिथुनंत
द्योपत्नियाएवैषयज्ञस्यान्वारंभोनवच्छित्यैवर्त्मनावाअन्वित्ययज्ञं रक्षांसिजिघांसंतिवैष्ण
वीभ्यामृग्भ्यांवर्त्मनाजुहोतियज्ञोवैविष्णुर्यज्ञादेवरक्षांस्यपहंतियदध्वर्युरनग्नावाहुतिंजुहुयाद
धोध्वर्युस्याद्रक्षांसियज्ञं हन्युः ॥ २ ॥ हिरण्यमुपास्यजुहोत्यग्निवत्येवजुहोतिनांधोध्वर्युर्भवति
नयज्ञं रक्षांसिघ्नंतिप्राचीप्रेतमध्वरंकल्पयंतीइत्याहसुवर्गमेवैनंलोकंगमयत्यत्ररमेथांवर्ष्म
न्पृथिव्याइत्याहवर्ष्महेतत्पृथिव्यायद्देवयजनं शिरोवाएतद्यज्ञस्ययद्धविर्धानंदिवोवाविष्णवु
तवापृथिव्याः ॥ ३ ॥ इत्याशीर्पदयर्चादक्षिणस्यहविर्धानस्यमेथींनिहंतिशीर्षतएवयज्ञस्यय
जमानआशिषोवरुंधेदंडोवाऔपरस्तृतीयस्यहविर्धानस्यवषट्कारेणाक्षमच्छिनद्यत्तृतीयंछदि न

राम
२२

र्हविर्धानयोरुदाह्रियतेतृतीयस्यहविर्धानस्यावरुध्यैशिरोवाएतद्यज्ञस्ययद्धविर्धानंविष्णोरराट
मसिविष्णोःपृष्ठमसीत्याहतस्मादेतावद्धाशिरोविष्यूतंविष्णोःस्यूरसिविष्णोर्ध्रुवमसीत्याहवैष्णवꣳ
हिदेवतयाहविर्धानंयंप्रथमंग्रंथिंग्रथ्नीयाद्यत्तंन्नविस्रꣳसयेदमेहेनाध्वर्युःप्रमीयेततस्मात्सवि
स्रस्यः॥ ४ ॥ पत्नीहंन्युर्वापृथिव्याविष्यूतंविष्णोःषड्डूꣳश्चातिस्रश्च॥ ९॥ ॥ देवस्यत्वासवितुःप्रसव
इत्यभ्रिमादत्तेप्रसूत्याअश्विनोर्बाहुभ्यामित्याहाश्विनौहिदेवानामध्वर्यूआस्तांपूष्णोहस्ताभ्या
मित्याहयत्यैवज्रइववाएषायदभ्रिरभ्रिरसिनारिरसीत्याहशांत्यैकांडेकांडेवैक्रियमाणेयज्ञꣳर
क्षाꣳसिजिघाꣳसंतिपरिलिखितꣳरक्षःपरिलिखिताअरातयइत्याहरक्षसामपहत्यै॥ १॥ इदम
हꣳरक्षसोग्रीवाअपिकृंतामियोस्मान्द्वेष्टियंचवयंद्विष्मइत्याहद्वौवावपुरुषौयंचैवद्वेष्टियश्चैनंद्वे
ष्टितयोरेवानंतरायंग्रीवाःकृंततिदिवेत्वांतरिक्षायत्वापृथिव्यैत्वेत्याहैभ्यएवैनांल्लोकेभ्यःप्रोक्ष

तिपरस्तादर्वाचींभोक्ष्यतितस्मात्॥ २॥ पुरस्तादर्वाचींमनुष्याऊर्जमुपजीवंतिक्रूरमिववाएतत्करो
तियत्खनत्यपोवनयतिशांत्यैयवमतीरवनयत्यूर्ग्वैयवऊर्गुदुंबरऊर्जैवोर्ज॰ समर्धयतियजमाने
नसंमितौदुंबरीभवतियावानेवयजमानस्तावतीमेवास्मिन्नूर्जंदधातिपितृणा॰ सदनमसीतिब
र्हिरवस्तृणातिपितृदेवत्यं॥ ३॥ ह्येतद्यन्निखातंयद्बर्हिरनवस्तीर्यमिनुयात्पितृदेवत्यानिखाता
स्याद्बर्हिरवस्तीर्यमिनोत्यस्यामेवैनांमिनोत्यथोस्वारुहमेवैनांकरोत्युद्दिवं॰ स्तभानांतरिक्षंपृणेत्या
हैषांलोकानांविधृत्यैद्युतानस्त्वामारुतोमिनोत्वित्याहद्युतानोहस्मवैमारुतोदेवानामौदुंबरींमि
नोतितेनैव॥ ४॥ एनांमिनोतिब्रह्मवनिंत्वाक्षत्रवनिमित्याहयथायजुरेवैतद्घृतेनद्यावापृथिवी
आपृणेथामित्यौदुंबर्यांजुहोतिद्यावापृथिवीएवरसेनानक्त्यंततमन्ववस्रावयत्यंततमेवयज
मानंतेजसानक्त्यैंद्रमसीतिछदिरधिनिदधात्यैंद्रं॰ हिदेवतयासदोविश्वजनस्यच्छायेत्याहविश्वज

नस्यह्येषाच्छायायत्सदोमवच्छदि॥ ५ ॥ तेजस्कामस्यमिनुयात्रिवृतास्तोमेनसंमितंतेजस्त्रिवृत्तेज
स्व्येवभवत्येकादशछदींद्रियकामस्यैकादशाक्षरात्रिष्टुगिंद्रियंत्रिष्टुगिंद्रियाव्येवभवतिपंचदश
छदिंभ्रातृव्यवतःपंचदशोवज्रोभ्रातृव्याभिभूत्यैसप्तदशछदिंप्रजाकामस्यसप्तदशःप्रजापतिः
प्रजापतेराप्त्याएकविंःशतिछदिंप्रतिष्ठाकामस्यैकविंःस्तोमानांप्रतिष्ठाप्रतिष्ठित्याउदरंवै
सदऊर्गुदुंबरोमध्यतऔदुंबरींमिनोतिमध्यतएवप्रजानामूर्जंदधातितस्मात्॥ ६ ॥ मध्यतऊ
र्जंभुंजतेयजमानलोकेवैदक्षिणानिछदीःषिभ्रातृव्यलोकउत्तराणिदक्षिणान्युत्तराणिकरो
तियजमानमेवायजमानादुत्तरंकरोतितस्माद्यजमानोयजमानादुत्तरोंतर्वतोन्करोतिव्यावृत्त्यै
तस्मादरण्यंप्रजाउपजीवंतिपरित्वागिर्वणोगिरइत्याहयथायजुरेवैतदिंद्रस्यस्यूरसींद्रस्यध्रु
वमसीत्याहैंद्रंःहिदेवतयासदोयंप्रथमंग्रंथिंग्रथ्नीयाद्यत्तन्नविस्रंःसयेदमेहेनाध्वर्युःप्रमी

येततस्मात्सविस्त्रस्यः॥ ७ ॥ अपहृत्यैतस्मात्पितृदेवत्यंतेनैवनवच्छदितस्मात्सदः पंचविंशतिश्च॥
॥ १०॥ ॥शिरोवाएतद्यज्ञस्ययद्धविर्धानंप्राणाउपरवाद्धविर्धानेखायंतेतस्माच्छीर्षन्प्राणाअधस्तात्खा
यंतेतस्मादधस्ताच्छीर्ष्णः प्राणारक्षोहणोवलगहनोवैष्णवान्खनामीत्याहवैष्णवाहिदेवतयोपरवा
असुरावैनिर्यंतोदेवानांप्राणेषुवलगान्यखनंतान्बाहुमात्रेन्वविंदंस्तस्माद्बाहुमात्राः खायंतइ
दमहंतंवलगमुद्वपामि॥ १ ॥यन्नः समानोयमसमानोनिचखानेत्याहद्वौवावपुरुषौयश्चैवसमा
नोयश्चासमानोयमेवास्मैतोवलगंनिखनतस्तमेवोद्वपतिसंतृणत्तितस्मात्संतृण्णाअंतरतः प्राणा
नसंभिनत्तितस्माद्संभिन्नाः प्राणाअपोवनयतितस्मादार्द्राअंतरतः प्राणायवमतीरवनयति
॥ २ ॥ ऊर्ग्वैयवः प्राणाउपरवाः प्राणेष्वेवोर्जंदधातिबर्हिरवस्तृणातितस्माल्लोमशाअंतरतः प्राणा
आज्येनव्याघारयतितेजोवाआज्यंप्राणाउपरवाः प्राणेष्वेवतेजोदधातिहनूवाएतेयज्ञस्ययदधि

षवणेनसंतृणत्त्यसंतृण्णेहिहनूअथोखलुदीर्घसोमेसंतृद्येधृत्यैशिरोवाएतद्यज्ञस्ययद्धविर्धानं
॥ ३ ॥ प्राणाउपरवाहनूअधिषवणेजिह्वाचर्मग्रावाणोदन्तामुखमाहवनीयोनासिकोत्तरवेदिरु
दरꣳसदोयदाखलुवैजिह्वयादत्स्वधिखादत्यथमुखंगच्छतियदामुखंगच्छत्यथोदरंगच्छतितस्मा
द्धविर्धानेचर्मन्नधिग्रावभिरभिषुत्याहवनीयेहुत्वाप्रत्यंचःपरेत्यसदसिभक्षयंतियोवैविराजोय
ज्ञमुखेदोहंवेददुहएवैनामियंवैविराट्तस्यैत्वक्चर्मौधोधिषवणेस्तनाउपरवाग्रावाणोवत्साऋत्वि
जोदुहंतिसोमःपयोयएवंवेददुहएवैनां ॥ ४ ॥ वपामियवमतीरवनयतिहविर्धानमेवत्रयोविꣳ
शतिश्च ॥ २१ ॥ ॥ यदुभौदेवासुरामियस्तेषाꣳसुवर्गंयद्वाअनीशानःपुरोहविषितेभ्यउत्तरवेदिः
सोत्तरवेदिर्बद्धदेवस्याग्निꣳशिरोवाएकादश ॥ ११ ॥ ॥ यदुभावित्याहदेवानांयज्ञोदेवेभ्योनरथा
ययजमानायपरस्तादर्वाचीन्नवपंचाशत ॥ ५१ ॥ ॥ हरिःओम ॥ ॥ चात्वालात्धिष्णियानुपवप

तियोनिर्वैयज्ञस्यचात्वालंयज्ञस्यसयोनित्वायदेवावैयज्ञंपराजयंतत्तमाग्नीध्रात्पुनरपाजयन्ततद्वै
यज्ञस्यापराजितंयदाग्नीध्रंयदाग्नीध्राद्धिष्ण्यान्विहरतियदेवयज्ञस्यापराजितंततएवैनंपुनस्तनु
तेपराजित्यैवखलुवाएतेयंतियेबहिष्पवमानꣳसर्पंतिबहिष्पवमानेस्तुते ॥ १ ॥ आहाग्नीदग्नीन्वि
हरबर्हिस्तृणाहिपुरोडाशाꣳअलंकुर्वितियज्ञमेवापजित्यपुनस्तंन्वानायंत्यंगारैर्हस्मवनेविहरति
शलाकाभिस्तृतीयꣳसस्रुक्त्वायायाथोसंभरत्यैवैनद्धिष्ण्यावाअमुष्मिंल्लोकेसोममरक्षंतेभ्योधि
सोममाहरंतमन्ववायंतंपर्यविशांन्यएवंवेदविंदते ॥ २ ॥ परिवेष्टारंतेसोमपीथेनव्यार्ध्यंततेदेवेषुसो
मपीथमैछंततांदेवाअब्रुवंद्वेद्वेनामनीकुरुध्वमथप्रवाप्स्यथनवेत्यग्नयोवाअथधिष्ण्यास्तस्माद्द्वि
नामाब्राह्मणोर्धुकस्तेषांयेनेदिष्ठंपर्यविशान्तेसोमपीथंप्राप्नुवन्नाहवनीयआग्नीध्रीयोहोत्रीयोमा
र्जालीयस्तस्मात्तेषुजुह्वत्यतिहायवषट्करोतिधिष्ण्याहि ॥ ३ ॥ एतेसोमपीथेनार्ध्यंतदेवावैयाःप्रावीरा

हुतीर्जुहवुर्येपुरस्तादसुराआसंताꣳस्ताभिःप्राणुदंतयाःप्रतीचीर्येपश्चादसुराआसंताꣳस्ताभिर
पानुदंतप्राचीरन्याआहु तयोहूयंतेप्रत्यङासीनोधिष्ण्यियान्व्याघारयतिपश्चाद्वैवपुरस्ताच्चयज
मानोभ्रातृव्यान्प्रणुदतेतस्मात्पराञ्चीःप्रजाःप्रवीयंतेप्रतीचीः॥४॥जायंतेप्राणावाएतेयद्धिष्ण्यि
यायदध्वर्युःप्रत्यङ्धिष्ण्यियानतिसर्पेत्प्राणान्त्संकर्षेत्प्रमायुकस्यान्नाभिर्वाएषायज्ञस्ययद्धोतोर्ध्वः
खलुवैनाभ्यैप्राणोवाङपानोयदध्वर्युःप्रत्यङ्होतारमतिसर्पेदपानेप्राणंदध्यात्प्रमायुकस्यान्ना
ध्वर्युरुपगायेद्धाग्विर्पीवाअध्वर्युर्यदध्वर्युरुपगायेदुद्गात्रे॥५॥वाचꣳसंप्रयच्छेदुपदासुकास्यवा
कस्याद्ब्रह्मवादिनोवदंतिनासꣳस्थितेसोमेध्वर्युःप्रत्यङ्दोतीयादथकथादाक्षिणानिहोतुमेतिया
मोहिसतेषांकस्माअहृदेवायामंवायामंवानुज्ञास्यंतीत्युत्तरेणाग्नीध्रंपरीत्यजुहोतिदाक्षिणानि
नप्राणान्त्संकर्षतिन्यंन्येधिष्ण्यियाउप्यंतेनान्येयान्निवपतितेनतान्प्रीणातियान्ननिवपतियदनु

सं·ष
२६

द्विशातितेनतान्॥६॥स्कृतेविंदतेह्विवीयंतेप्रतीन्वीरुक्षात्रउप्यंतेचतुर्दशचा॥१॥ ॥सुवर्गायवाएतानि
लोकायहूयंतेयद्वैसर्जनानिद्वाभ्यांगार्हपत्येजुहोतिद्विपाद्यजमानःप्रतिष्ठित्याआग्नीध्रेजुहोत्यं
तरिक्षएवाक्रमतआहवनीयेजुहोतिसुवर्गमेवैनंलोकंगमयतिदेवान्वैसुवर्गंल्लोकंयतोरक्षाꣳस्य
जिघाꣳसन्तेसोमेनराज्ञारक्षाꣳस्यपहत्याप्तुमात्मानंकृत्वासुवर्गंलोकमायन्रक्षसामनुपलाभा
यात्तःसोमोभवत्यथ॥१॥वैसर्जनानिजुहोतिरक्षसामपहत्यैत्वꣳसोमतनूकृद्भ्यइत्याहतनूकृद्ध्ये
षद्वेषोभ्योन्यकृतेभ्यइत्याहान्यकृतानिहिरक्षाꣳस्युरुयंतासिवरूथमित्याहोरुणस्कृधीतिवावैत
दाहजुषाणोअप्तुराज्यस्यवेत्वित्याहाप्तुमेवयजमानंकृत्वासुवर्गंल्लोकंगमयतिरक्षसामनुपला
भायासोमंददते॥२॥आग्राव्णआवायव्यान्याद्रोणकलशासुत्पत्नीमानयंत्यन्वनाꣳसिप्रवर्तयंतिया
वदेवास्यास्तितेनसहसुवर्गंल्लोकमेतिनयवत्यर्चाग्नीध्रेजुहोतिसुवर्गस्यलोकस्याभिनीत्यैग्राव्णोवा

राम
२६

यव्यानिद्रोणकलशमाग्नीध्रउपवासयति विह्येनंतैर्गृह्णातियत्सहोपवासयेदनुवायेतसौम्यर्चाप्रपा
दयतिस्वया ॥ ३ ॥ एवैनंदेवतयाप्रपादयत्यदित्याःसदोःस्यदित्याःसदआसीदेत्याहयथायजुरेवैत
द्यजमानोवाएतस्यपुरागोप्ताभवत्येषवोदेवसवितःसोमइत्याहसवितृप्रसूतएवैनंदेवताभ्यःसंप्र
यच्छत्येतत्त्वंसोमदेवोदेवानुपागाइत्याहदेवोह्येषसन् ॥ ४ ॥ देवानुपैतीदमहंमनुष्योमनुष्यानित्या
हमनुष्याꣳह्येषसन्मनुष्यानुपैतियदेतद्यजुर्नब्रूयादप्रजाअपशुर्यजमानस्यात्सहप्रजयासह
रायस्पोषेणेत्याहप्रजयैवपशुभिःसहेमंल्लोकमुपावर्ततेनमोदेवेभ्यइत्याहनमस्कारोहिदेवानां
स्वधापितृभ्यइत्याहस्वधाकारोहि ॥ ५ ॥ पितृणामिदमहन्निर्वरुणस्यपाशादित्याहवरुणपाशादे
वनिर्मुच्यतेग्नेव्रतपतआत्मनःपूर्वातनूरादेयेत्याहुःकोहितद्वेदयद्वसीयान्स्वेवशेभूतेपुनर्वाददाति
नवेतिग्रावाणोवैसोमस्यराज्ञोमलिम्लुसेनायएवंविद्वान्ग्राव्णआग्नीध्रउपवासयतिनैनंमलिम्लु

सेनाविंदति॥ ६ ॥अथददतेस्वयासन्त्स्वधाकारोहिविंदति॥२॥ ॥वैष्णव्यर्चाहुत्वायूपमच्छैतिवैष्णवो
वैदेवतयायूपः स्वयैवैनंदेवतयाच्छैत्यत्यन्यानगान्नान्यानुपागामित्याहातिह्यन्यानेतिनान्यानुपैत्य
र्वाक्त्वापरैरविदंपरावरैरित्याहार्वाग्घ्येनंपरैर्विंदतिपरावरैस्तंत्वाजुषे॥ १ ॥वैष्णवंदेवयज्यायाइत्याह
देवयज्यायैह्येनंजुषतेदेवस्त्वासवितामध्वानक्त्वित्याहतेजसैवैनमनक्त्योषधेत्रायस्वैनꣳस्वधिते
मैनꣳहिꣳसीरित्याहवज्रोवैस्वधितिःशांत्यैस्वधितेर्वृक्षस्यबिभ्यतःप्रथमेनशकलेनसहतेजःपराप
ततियःप्रथमःशकलःपरापतेत्तमप्याहरेत्सतेजसं॥ २ ॥एवैनमाहरतीमेवैलोकायूपात्प्रयतोबि
भ्यतिदिवमग्रेणमालेखीरंतरिक्षंमध्येनमाहिꣳसीरित्याहैभ्यएवैनंलोकेभ्यःशमयतिवनस्पतेशत
वल्शोविरोहेत्याव्रश्चनेजुहोतितस्मादाव्रश्चनाद्वृक्षाणांभूयाꣳसउत्तिष्ठंतिसहस्रवल्शाविवयꣳरु
हेमेत्याहाशिषमेवैतामाशास्तेनक्षसंगं॥ ३ ॥वृश्चेद्यदक्षसंगंवृश्चेदधर्ष्ठंयजमानस्यप्रमायुकꣳ

स्याद्यंकामयेताप्रतिष्ठितस्यादित्यारोहंतस्मैवृश्चेदेषवैवनस्पतीनामप्रतिष्ठितोप्रतिष्ठितएवभवति
यंकामयेतापशुस्यादित्यपर्णंतस्मैशुष्कायंवृश्चेदेषवैवनस्पतीनामपशव्योपशुरेवभवतियंका
मयेतपशुमान्त्स्यादितिबहुपर्णंतस्मैबहुशाखंवृश्चेदेषवै॥४॥वनस्पतीनांपशव्यःपशुमानेवभ
वतिप्रतिष्ठितंवृश्चेत्प्रतिष्ठाकामस्यैषवैवनस्पतीनांप्रतिष्ठितोयःसमेभूम्यैस्वाद्योनेरूढःप्रत्येवति
ष्ठतियःप्रत्यङुपनतस्तंवृश्चेत्सुहि मेधमभ्युपनतःपंचारत्निंतस्मैवृश्चेद्यंकामयेतोपैनमुत्तरोयज्ञो
नमेदितिपंचाक्षरापंक्तिःपांक्तोयज्ञउपैनमुत्तरोयज्ञः॥५॥नमतिषडरत्निंप्रतिष्ठाकामस्यष
ड्वाऋतवऋतुष्वेवप्रतितिष्ठतिसप्तारत्निंपशुकामस्यसप्तपदाशाक्करीपशवःशाक्करीपशूनेवा
वरुंधेनवारत्निंतेजस्कामस्यत्रिवृतास्तोमेनसंमितंतेजस्त्रिवृत्तेजस्व्येवभवत्येकादशारत्नि
मिंद्रियकामस्यैकादशाक्षरात्रिष्टुगिंद्रियंत्रिष्टुगिंद्रियाव्येवभवतिपंचदशारत्निंभ्रातृव्यवतः

सं·ष·
२८

पंचदशोवज्रोभ्रातृव्याभिभूत्यैसप्तदशारत्निंप्रजाकामस्यसप्तदशःप्रजापतिःप्रजापतेराप्त्याएक
विंꣳशत्यरत्निंप्रतिष्ठाकामस्यैकविंꣳशस्तोमानांप्रतिष्ठाप्रतिष्ठित्याअष्टाश्रिर्भवत्यष्टाक्षरागायत्री
तेजोगायत्रीगायत्रीयज्ञमुखंतेजसैवगायत्रियायज्ञमुखेनसंमितः॥ ६॥ जुषेसतेजसमनक्तसंगं
बहुशाखंवृश्चेदेषवैयज्ञउपैनमुत्तरोयज्ञआप्त्याएकान्नविंꣳशतिश्च॥ ३॥ ॥ पृथिव्यैत्वांतरिक्षा
यत्वादिवेत्वेत्याहैभ्यएवैनंलोकेभ्यःप्रोक्षतिपरांचंप्रोक्षतिपराङिवह्येसुवर्गोलोकःक्रूरमिववाएतत्क
रोतियत्खनत्यपोवनयतिशांत्यैयवमतीरवनयत्यूर्ग्वैयवोयावानेवयजमानस्तावतीमेवास्मिन्नूर्जंद
धाति॥ १॥ पितॄणाꣳसदनमसीतिबर्हिरवस्तृणातिपितृदेवत्या१आꣳह्येतद्यन्निखातंयद्बर्हिरनवस्ती
र्यमिनुयात्पितृदेवत्योनिखातःस्याद्बर्हिरवस्तीर्यमिनोत्यस्यामेवैनंमिनोतियूपशकलमवास्यतिस
तेजसमेवैनंमिनोतिदेवस्त्वासवितामध्वानक्त्वित्याहतेजसैवैनमनक्तिसुपिप्पलाभ्यस्त्वौषधीभ्यइति
यजमानेनयूपःसंमितो ४

व
राम्
२८

च्चषालंप्रति॥२॥मुंचतितस्माछीर्षतओषधयःफलंगृह्णंत्यनक्तितेजोवाआज्यंयजमानेनाग्निष्ठाश्रिः
संमितायदग्निष्ठामश्रिमनक्तियजमानमेवतेजसानक्त्यंतमनक्त्यंतमेवयजमानंतेजसानक्तिस
र्वतःपरिमृशत्यपरिवर्गमेवास्मिंतेजोदधात्युद्दिवंस्तभानांतरिक्षंपृणेत्याहैषांलोकानांविधृत्यैवै
ष्णव्यर्चा॥३॥कल्पयतिवैष्णवोवैदेवतायूपस्स्वयैवैनंदेवतयाकल्प [illegible] तिद्वाभ्यांकल्पौतिद्विपाद्यजमा य
नःप्रतिष्ठित्यैयंकामयेततेजसैनंदेवता×या×भिरिंद्रियेणव्यर्धयेयमित्यग्निष्ठांतस्याश्रिमाहवनी
वैन यादित्थंवेत्थंवातिनावयेत्तेजसैवैनंदेवताभिरिंद्रियेणव्यर्धयतियंकामयेततेजसैनंदेवताभिरिंद्रिये
णासमर्धयेयमिति॥४॥अग्निष्ठांतस्याश्रिमाहवनीयेनसंमिनुयात्तेजसैवैनंदेवताभिरिंद्रियेण
समर्धयतिब्रह्मवनिंत्वाक्षत्रवनिमित्याहयथायजुरेवैतत्परिव्ययत्यूर्ग्वैरशनायजमानेनयूपःसं
मितोयजमानमेवोर्जासमर्धयतिनाभिदघ्नेपरिव्ययतिनाभिदघ्नएवास्माऊर्जंदतितस्मान्नाभिद

धा

सं॰ष॰
२९

घ्नऊर्जाभुंजतेयंकामयेतोर्जैनं॥ ५ ॥व्यर्धयेयमित्यूर्ध्वांवातस्यावाचींवावोहेदूर्जैवैनंव्यर्धयतियदिका
मयेतवर्षुकःपर्जन्यस्यादित्यवाचीमवोहेद्वृष्टिमेवनियच्छतियदिकामयेतावर्षुकस्यादित्यूर्ध्वामुद्वोहेद्वृ
ष्टिमेवोद्यच्छतिपितृणांन्निखातंमनुष्याणामूर्ध्वंन्निखातादारशनायाओषधीनाꣳरशनाविश्वेषां
॥ ६ ॥देवानामूर्ध्वꣳरशनायाआचषालादिंद्रस्यचषालꣳसाध्यानामतिरिक्तꣳसवाएषसर्वदेवत्यो
यद्यूपोयद्यूपंमिनोतिसर्वाएवदेवताःप्रीणातियज्ञेनवैदेवाःसुवर्गंल्लोकमायंतेमन्यंतमनुष्यानो
न्वाभविष्यंतीतितेयूपेनयोपयित्वासुवर्गंल्लोकमायंतमृषयोयूपेनैवानुप्राजानंतद्यूपस्ययूपत्वं
॥ ७ ॥यद्यूपंमिनोतिसुवर्गस्यलोकस्यप्रज्ञात्यैपुरस्तान्मिनोतिपुरस्ताद्धियज्ञस्यप्रज्ञायतेप्रज्ञातꣳ
हितद्यदतिपन्नआहुरिदंकार्यमासीदितिसाध्यावैदेवायज्ञमत्यमन्यंततान्यज्ञोनास्पृशत्तान्यद्यज्ञ
स्यातिरिक्तमासीत्तदस्पृशदतिरिक्तंवाएतद्यज्ञस्ययदग्नावग्निंमथित्वाप्रहरत्यतिरिक्तमेतत॥ ८ ॥

राम
२९

यूपस्ययदूर्ध्वंचषालात्तेषांतद्भागधेयंतानेवतेनप्रीणातिदेवावैसꣳस्थितेसोमेप्रस्रुचोहरन्प्रयूपंतेमं
२२ न्यंतयज्ञवेशसंवाइदंकुर्मइतितेप्रस्तरꣳस्रुचांनिष्क्रयणमपश्यन्स्वरुंयूपस्यसꣳस्थितेसोमेप्रप्रस्त
रꣳहरतिजुहोतिस्वरुमयज्ञवेशसाय॥१॥ ॥दधातिप्रत्युष्टावासमर्धयेयमितिस्रुर्जैनंविश्वेषांयूपत्व
मतिरिक्तमेतद्द्विचत्वारिꣳशच्च॥४॥ ॥साध्यावैदेवाअस्मिन्लोकआसन्नान्यत्किंचनमिषत्तेऽग्नि
मेवाग्नयेमेधायालभंतनह्यन्यदालंभ्यमविंदंततोवाइमाःप्रजाःप्राजायंतयदग्नावग्निंमथि
त्वाप्रहरतिप्रजानांप्रजननायरुद्रोवाएषयदग्निर्यजमानःपशुर्यत्पशुमालभ्याग्निंमंथेद्रुद्राय
यजमानं॥१॥अपिदध्यात्प्रमायुकस्यादथोखल्वाहुरग्निःसर्वादेवताहविरेतद्यत्पशुरितियत्प
शुमालभ्याग्निंमंथतिहव्यायैवासन्नायसर्वादेवताजनयत्युपाहृत्यैवमंथ्यःतन्नेवालब्धंनेवा
नालब्धमग्नेर्जनित्रमसीत्याहाग्नेर्ह्येतज्जनित्रंवृषणौस्थइत्याहवृषणौ॥२॥ह्येतावुर्वश्यस्या

सं.ष
३०

युरसीत्याहमिथुनत्वायघृतेनाक्तौवृषणंदधाथामित्याहवृषणाःह्येतौदधातेयेअग्निंगायत्रंछंदोनुप्र
जायस्वेत्याहछंदोभिरेवैनंप्रजनयत्यग्नयेमथ्यमानायानुब्रूहीत्याहसावित्रीमृचमन्वाहसवितृप्र
सूतएवैनंमंथतिजातायानुब्रूहि ॥ ३ ॥ प्रह्रियमाणायानुब्रूहीत्याहकांडेकांडएवैनंक्रियमाणेसम
र्धयतिगायत्रीःसर्वाअन्वाहगायत्रंछंदोवाअग्निःस्वेनैवैनंछंदसासमर्धयत्यग्निःपुराभवत्यग्निं
मथित्वाप्रहरंतितौसंभवंतौयजमानमभिसंभवतोभवतंनःसमनसावित्याहशांत्यैप्रहृत्यजुहो
तिजातायैवास्माअन्नमपिदधात्याज्येनजुहोत्येतद्वाअग्नेःप्रियंधामयदाज्यंप्रियेणैवैनंधाम्नासम
र्धयत्यथोतेजसा ॥ ४ ॥ यजमानमाहवृषणोजातायानुब्रूह्यप्यष्टादश्राव ॥५॥ ॥ दृषेत्वेतिबर्हिरा
दत्तइच्छनद्वर्ह्येषपोयज्ञतउपवीरसीत्याहोपह्येनानाकरोत्युपोदेवांदैवीर्विशःप्रागुरित्याहदेवीर्ह्येता
विशःसतीर्देवानुपयंतिवन्हीरुशिजइत्याहर्त्विजोवैवन्हयउशिजस्तस्मादेवमाहबृहस्पतेधारयावसू

राम
३०

नीति॥ १॥आहब्रह्मवैदेवानांबृहस्पतिर्ब्रह्मणैवास्मैपशूनवरुंधेहव्यातेस्वदंतामित्याहस्वदयत्ये
वैनंदेवत्वष्टर्वसुरण्वेत्याहत्वष्टावैपशूनांमिथुनानांरूपकृद्रूपमेवपशुषुदधातिरेवतीरमध्व
मित्याहपशवोवैरेवतीःपशूनेवास्मैरमयतिदेवस्यत्वासवितुःप्रसवइति॥ २॥रशनामादत्तेप्र
सूत्याअश्विनोर्बाहुभ्यामित्याहाश्विनौहिदेवानामध्वर्यूआस्तांपूष्णोहस्ताभ्यामित्याहयत्या
ऋतस्यत्वादेवहविःपाशेनारभइत्याहसत्यंवाऋतंसत्येनैवैनमृतेनारभतेक्ष्णयापरिहरति भ
वध्यंहिप्रत्यंचंप्रतिमुंचंतिव्यावृत्त्यैधर्षामानुषानितिनियुनक्तिधृत्याअद्भ्यः॥ ३॥त्वौ
षधीभ्यःप्रोक्षामीत्याहाद्भ्योह्येषओषधीभ्यःसंभवतियत्पशुरपांपेरुरसीत्याहएषह्यपांपाता
योमेधायारभ्यतेस्वात्तंचित्सदेवंहव्यमापोदेवीस्वदतैनमित्याहस्वदयत्येवैनमुपरिष्टात्प्रोक्ष
त्युपरिष्टादेवैनंमेध्यंकरोतिपाययत्यंतरतएवैनंमेध्यंकरोत्यधस्तादुपोक्षतिसर्वतएवैनंमेध्यं

सं·ष·
३१

करोति ॥ ४ ॥ वसूनीत्तिसंप्रेवदूत्यङ्गौतरत एवैनंदत्राव ॥ ६ ॥ ॥ अग्निनावैहोत्रादेवा असुरा
न्भ्यभवन्नग्नयेसमिध्यमानायानुब्रूहीत्याहभ्रातृव्याभिभूत्यैसप्तदशसामिधेनीरन्वाहस
प्तदशः प्रजापतिः प्रजापतेराप्त्यैसप्तदशान्वाहद्वादशमासाः पंचर्तवः संवत्सरः संवत्सरंप्रजा स
अनुप्रजायंतेप्रजानांप्रजननायदेवावैसामिधेनीरनूच्ययज्ञन्नान्वपश्यन्सप्रजापतिस्तूष्णी
माघारं ॥ १ ॥ आघारयत्ततोवैदेवायज्ञमन्वपश्यन्यत्तूष्णीमाघारमाघारयतियज्ञस्यानुख्यात्यै
असुरेषुवैयज्ञआसीत्तंदेवास्तूष्णींहोमेनावृंजतयत्तूष्णीमाघारमाघारयतिभ्रातृव्यस्यैवतद्य
ज्ञंवृंक्तेपरिधीन्त्संमार्ष्टिपुनात्येवैनांत्रिःस्त्रिःसंमार्ष्टित्र्यावृद्धियज्ञोथोरक्षसामपहत्यैद्वादश
संपद्यंतेद्वादश ॥ २ ॥ मासाःसंवत्सरःसंवत्सरमेवप्रीणात्यथोसंवत्सरमेवास्माउपदधातिसुव राम
र्गस्यलोकस्यसमष्ट्यैशिरोवाएतद्यज्ञस्ययदाघारोग्निःसर्वादेवतायदाघारमाघारयतिशी ३१

र्षतएवयज्ञस्ययजमानःसर्वादेवताअवरुंधेशिरोवाएतद्यज्ञस्ययदाघारआत्मापशुराघारमाघार्यपशुंसमनक्त्यात्मन्नेवयज्ञस्य॥३॥शिरःप्रतिदधातिसंतेप्राणोवायुनागच्छतामित्याहवायुदेवत्योवैप्राणोवायावेवास्यप्राणंजुहोतिसंयजत्रैरंगानिसंयज्ञपतिराशिषेत्याहयज्ञपतिमेवास्याशिषंगमयतिविश्वरूपोवैत्वाष्ट्रउपरिष्टात्पशुमभ्यवमीत्तस्मादुपरिष्टात्पशूनांवद्यंतियदुपरिष्टात्पशुंसमनक्तिमेध्यमेव॥४॥एनंकरोत्यृत्विजोवृणीतेछंदांस्येववृणीतेसप्तवृणीतेसप्तग्राम्याःपशवःसप्तारण्याःसप्तछंदांस्युभयस्यावरुध्याएकादशप्रयाजान्यजतिदशवैपशोःप्राणाआत्मैकादशोयावानेवपशुस्तंप्रयजतिवपामेकःपरिशयआत्मैवात्मानंपरिशायवज्रोवैस्वधितिर्वज्रोयूपशकलोघृतंखलुवैदेवावज्रंकृत्वासोमममघ्नन्घृतेनाक्तौपशुंत्रायेथामित्याहवज्रेणैवैनंवशेकृत्वालभते॥५॥आघारंपद्यंतेद्वादशात्मन्नेवयज्ञस्यमेध्यमेवखलु

नमोनयतीषेत्वेतिवपामुत्खिदतीछतइवह्येषयोयजतेयदुपतृंद्याद्रुद्रोस्यपशून्घातुकस्याद्यन्नो
पतृंद्यादयतास्यादन्ययोपतृणत्त्यन्ययानधृत्यैघृतेनद्यावापृथिवीप्रोर्णुवाथामित्याहद्यावापृथि
वीएवरसेनानक्त्यच्छिन्नः ॥ ३ ॥ रायः सुवीरइत्याहयथायजुरेवैतत्क्रूरमिववाएतत्करोतियद्वपा
मुत्खिदत्युर्वंतरिक्षमन्विहीत्याहशांत्यैप्रवाएषोस्माल्लोकाच्च्यवतेयःपशुंमृत्यवेनीयमानमन्वा
रभतेवपाश्रपणीपुनरन्वारभतेस्मिन्नेवलोकेप्रतितिष्ठत्यग्निनापुरस्तादेतिरक्षसामपहत्या
अथोदेवताएवहव्येन ॥ ४ ॥ अन्वेतिनांतममंगारमतिहरेद्यदंतममंगारमतिहरेद्देवताअतिमन्येत
वायोवीहिस्तोकानामित्याहतस्माद्विभक्ताःस्तोकाअवपद्यंतेग्रंवाएतत्पशूनांयद्वपाग्रमोषधी
नांबर्हिरग्रेणैवाग्रंसमर्धयत्यथोओषधीष्वेवपशून्प्रतिष्ठापयतिस्वाहाकृतीभ्यःप्रेष्येत्याह ॥ ५ ॥
यज्ञस्यसमिद्ध्यैप्राणापानौवाएतौपशूनांयत्पृषदाज्यमात्मावपापृषदाज्यमभिघार्यवपामभि

धारयत्यात्मन्नेवपशूनांप्राणापानौदधातिस्वाहोर्ध्वनभसंमारुतंगच्छतमित्याहोर्ध्वनभाहस्मवै
मारुतोदेवानांवपाश्रपणीप्रहरतितेनैवैनेप्रहरतिविषूचीप्रहरतितस्माद्विष्वंचौप्राणापानौ ॥ ६ ॥
स्वधितिश्चैवाह्लिनोहृव्येनेष्यत्याह षट्चत्वारिꣳशच्च ॥ ९ ॥ ॥ पशुमालभ्यपुरोडाशन्निर्वपतिसमेध
मेवैनमालभतेवपयाप्रचर्यपुरोडाशेनप्रचरत्यूर्ग्वैपुरोडाशऊर्जमेवपशूनांमध्यतोदधात्यथोपशो
रेवछिद्रमपिदधातिपृषदाज्यस्योपहत्यत्रिःपृच्छतिशृतꣳहवीः३ शमितरितित्रिषत्याहिदेवायो
ऽशृतꣳशृतमाहसएनसाप्राणापानौवाएतौपशूनां ॥ १ ॥ यत्पृषदाज्यंपशोःखलुवाआलब्धस्यहृ
दयमात्माभिसमेतियत्पृषदाज्येनहृदयमभिघारयत्यात्मन्नेवपशूनांप्राणापानौदधातिपशु
नावैदेवाःसुवर्गंलोकमायंतेमन्यंतमनुष्यानोन्वाभविष्यंतीतितस्यशिरश्छित्वामेधंप्राक्षारयं
स्सप्लक्षोभवत्तत्प्लक्षस्यप्लक्षत्वंयत्प्लक्षशाखोत्तरबर्हिर्भवतिसमेधस्यैव ॥ २ ॥ पशोरवद्यतिपशुंवै

सं.ष.
३४

ह्रियमाणꣳरक्षाꣳस्यनुसचंतेतंतरायूपंचाहवनीयंचहरतिरक्षसामपहत्यैपशोर्वाआलब्धस्यम
नोपक्रामतिमनोतायैहविषोवदीयमानस्यानुब्रूहीत्याहमनएवास्यावरुंधेएकादशावदानान्य
वद्यतिदशवैपशोःप्राणाआत्मैकादशोयावानेवपशुस्तस्याव॥३॥द्यतिहृदयस्याग्रेवद्यत्य
थजिह्वायाअथवक्षसोयद्वैहृदयेनाभिगच्छतितज्जिह्वयावदतियज्जिह्वयावदतितदुरसोधिनि
र्वदत्येतद्वैपशोर्यथापूर्वंयस्यैवमवदाययथाकाममुत्तरेषामवद्यतियथापूर्वमेवास्यपशोरव
त्तंभवतिमध्यतोगुदस्यावद्यतिमध्यतोहिप्राणउत्तमस्यावद्यति॥४॥उत्तमोहिप्राणोयदी
तरंयदीतरमुभयमेवाजामिजायमानोवैब्राह्मणस्त्रिभिर्ऋणवाजायतेब्रह्मचर्येणर्षिभ्यो
यज्ञेनदेवेभ्यःप्रजयापितृभ्यएषवाअनृणोयःपुत्रीयज्वाब्रह्मचारिवासीतदवदानैरेवावदय
तेतदवदानानामवदानत्वंदेवासुराःसंयत्ताआसंतेदेवाअग्निमब्रुवंत्वयावीरेणासुरानभिभ

राम
३४

सोब्रवीद्वरं वृणै पशोरुद्धारमुद्धराइतिसएतमुद्धारमुदहरतदोःपूर्वार्धस्यगुदंमध्यतः
वामेति॥ ५॥ श्रोणिंजघनार्धस्यततोदेवाअभवन्परासुरायत्र्यंगाणाꣳसमवद्यतिभ्रातृव्याभिभूत्यैभवत्यात्म
नापरास्यभ्रातृव्योभवत्यक्ष्णयावद्यतितस्मादक्ष्णयापशवोंगानिप्रहरंतिप्रतिष्ठित्यै॥ ६॥ एतौ
पशूनाꣳसमेधस्यैवतस्यावोत्तमस्यावद्यतीतिपंचचत्वारिꣳशच्च॥ १०॥ ॥मेदसास्रुचौप्रोर्णोतिमे
दोरूपावैपशवोरूपमेवपशुषुदधातियूषन्नवधायप्रोर्णोतिरसोवाएषपशूनांयद्यूषोरसमेवपशुषुद
धातिपार्श्वेनवसाहोमंप्रयौतिमध्यंवाएतत्पशूनांयत्पार्श्वꣳरसएषपशूनांयद्वसायत्पार्श्वेनवसा
होमंप्रयौतिमध्यतएवपशूनाꣳरसंदधातिघ्नंति॥ १॥ वाएतत्पशुंयत्संज्ञपयंत्यैंद्रःखलुवैदेवत
याप्राणऐंद्रोपानऐंद्रःप्राणोअंगेअंगेनिदेध्यदित्याहप्राणापानावेवपशुषुदधातिदेवत्वष्टर्भूरि
तेसꣳसमेत्वित्याहत्वाष्ट्राहिदेवतयापशवोविषुरूपायत्सलक्ष्माणोभवथेत्याहविषुरूपाह्येते

सं·१·
३५

संतःसलक्ष्माणएतर्हिभवंतिदेवत्रायंतं॥ २ ॥अवसेसखवायोनुत्वामातापितरोमदंत्वित्याहानुम
तमेवैनंमात्रापित्रासुवर्गंल्लोकंगमयत्यर्धर्चेवसाहोमंजुहोत्यसौवाअर्धर्चइयमर्धर्चइमेवैवएरसे
नानक्तिदिशोजुहोतिदिशएवरसेनानक्त्यथोदिग्भ्यएवोर्जꣳरसमवरुंधेप्राणापानौ वाए
तौपशूनांयत्पृषदाज्यंवानस्पत्याःखलु॥ ३ ॥वैदेवतयापशवोयत्पृषदाज्यस्योपहत्याहवनस्पत
येनुब्रूहिवनस्पतयेप्रेष्येतिप्राणापानावेवपशुषुदधात्यन्यस्यान्यस्यसमवत्तꣳसमवद्यतितस्मा
न्नानारूपाःपशवोयूष्णोपसिंचतिरसोवाएषपशूनांयद्यूषरसमेवपशुषुदधातीडामुपह्वयतेपश
वोवाइडापशूनेवोपह्वयतेचतुरुपह्वयते॥ ४ ॥चतुष्पादोहिपशवोयंकामयेतापशुःस्यादित्यमे
दस्कंतस्माआदध्यान्मेदोरूपावैपशवोरूपेणैवैनंपशुभ्योनिर्भजत्यपशुरेवभवतियंकामयेतप
शुमान्त्स्यादितिमेदस्वत्तस्माआदध्यान्मेदोरूपावैपशवोरूपेणैवास्मैपशूनवरुंधेपशुमानेवभ

राम
३५

वतिप्रजापतिर्यज्ञमसृजतसआज्यं॥ ५ ॥ पुरस्तादसृजतपशुंमध्यतःपृषदाज्यंपश्चात्तस्मा
दाज्येनप्रयाजाइज्यंतेपशुनामध्यतःपृषदाज्येनानूयाजास्तस्मादेतन्मिश्रमिवपश्चात्सृष्टं
ह्येकादशानूयाजान्यजतिदशवैपशोःप्राणाआत्मैकादशोयावानेवपशुस्तमनुयजतिघ्नंतिवा
एतत्पशुंयत्संज्ञपयंतिप्राणापानौखलुवाएतौपशूनांयत्पृषदाज्यंयत्पृषदाज्येनानूयाजान्यज
तिप्राणापानावेवपशुषुदधाति॥ ६ ॥ घ्नंतियंतंखलुवैतुरूपंक्रियतआज्यंयत्पृषदाज्येनषड्ढ॥ ११॥
चात्वालात्सुवर्गायवैसर्जनानिवैष्णव्यर्चापृथिव्येसाध्याद्वेषेत्त्वेत्यग्निनापर्यग्निपशोःपशुमाल
भ्यमेदसाखुर्वानेकादश॥ ११॥ ॥ चात्वालाद्वालुपैतिमुंवतिसुवतिप्रक्रियमाणायपर्यग्निपशु
मालभ्यन्वलुष्पादोद्विषष्टिः॥ ६२॥ ॥ हरिःॐम्॥ यज्ञेनवैप्रजापतिःप्रजाअसृजततताउपयड्भिरे
वासृजतयदुपयजउपयजतिप्रजाएवतद्यजमानःसृजतेजघनार्धादवद्यतिजघनार्धाद्धिप्रजाः

सं·घ·
३६

प्रजायंतेस्थविमतोवद्यतिस्थविमतोहिप्रजाःप्रजायंतेसंभिंदन्नवद्यतिप्राणानामसंभेदायनपर्या
वर्तयतियत्पर्यावर्तयेदुदावर्तःप्रजाग्राहुकस्यात्समुद्रंगच्छस्वाहेत्याहरेतः॥ १ ॥एवतद्दधात्यंतरिक्षं
गच्छस्वाहेत्याहांतरिक्षेणैवास्मैप्रजाःप्रजनयत्यंतरिक्षꣳह्यनुप्रजाःप्रजायंतेदेवꣳसवितारंगच्छ
स्वाहेत्याहसवितृप्रसूतएवास्मैप्रजाःप्रजनयत्यहोरात्रेगच्छस्वाहेत्याहाहोरात्राभ्यामेवास्मैप्र
जाःप्रजनयत्यहोरात्रेह्यनुप्रजाःप्रजायंतेमित्रावरुणौगच्छस्वाहा॥ २ ॥इत्याहप्रजास्वेवप्रजाता
सुप्राणापानौदधातिसोमंगच्छस्वाहेत्याहसौम्याहिदेवतयाप्रजायज्ञंगच्छस्वाहेत्याहप्रजाएवय
ज्ञियाःकरोतिछंदाꣳसिगच्छस्वाहेत्याहपशवोवैछंदाꣳसिपशूनेवावरुंधेद्यावापृथिवीगच्छस्वाहे
त्याहप्रजाएवप्रजाताद्यावापृथिवीभ्यामुभयतःपरिगृह्णातिनभः॥ ३ ॥दिव्यंगच्छस्वाहेत्याह
प्रजाभ्यएवप्रजाताभ्योवृष्टिंनियच्छत्यग्निंवैश्वानरंगच्छस्वाहेत्याहप्रजाएवप्रजाताअस्यांप्रतिष्ठा

राम
३६

पश्यतिप्राणानांवाएषोवद्यतियोवद्यतिगुदस्यमनोमेहार्दियच्छेत्याहप्राणानेवयथास्थानमुप
ह्वयतेपशोर्वाआलब्धस्यहृदयंशुगृच्छतिसाहृदयशूलं॥ ४ ॥अभिसमेतियत्पृथिव्याःहृद
यशूलमुद्वासयेत्पृथिवींशुचार्पयेद्यदप्स्वपःशुचार्पयेच्छुष्कस्यचार्द्रस्यचसंधावुद्वासयत्युभ
यस्यशांत्यैयंद्विष्यात्तंध्यायेच्छुचैवैनमर्पयति॥ ५ ॥रेतोमित्रावरुणोगच्छस्वाहानभोहृदयशूलं
द्वात्रिंशत्॥१॥ ॥ देवावैयज्ञमाग्नीध्रेव्यभजंततेतोयदत्यशिष्यततदब्रुवन्वसतुनुनइदमि
तितद्वसतीवरीणांवसतीवरित्वंतस्मिन्प्रातर्नसमशक्नुवंतदप्सुप्रावेशयन्तावसतीवरीरभवन्व
सतीवरीर्गृह्णातियज्ञोवैवसतीवरीर्यज्ञमेवारभ्यगृहीत्वोपवसतियस्यागृहीताअभिनिम्रोचेद
नारब्धोस्ययज्ञस्यात्॥१॥ यज्ञंविच्छिंद्याज्ज्योतिष्यावागृह्णीयाद्धिरण्यंवावधायसशुक्राणा
मेवगृह्णातियोवाब्राह्मणोबहुयाजीतस्यकुंभ्यानांगृह्णीयात्सहिगृहीतवसतीवरीकोवसती

सं·प·
३७

वरीर्गृह्णातिपशवोवैवसतीवरीःपशूनेवारभ्यगृहीत्वोपवसतियदन्वीपंतिष्ठन्गृह्णीयान्निर्मा
तीसुवर्गन्लोकमेतियजमानमभ्युत्सृजतिक्षिप्रेसहस्रंप्रजायतउत्तमानीयतेप्रथमादेवान्गच्छति
॥४॥ लोकान्गमयतिसाविद्वान्त्सुत्रोवामाविज्ञाययजमानंद्वादशान्॥ ५॥ ॥ अत्रिरददादौर्वायप्रजां
पुत्रकामायसरिरिचानोमन्यतनिर्वीर्यः शिथिलोयातयामासएतंचतूरात्रमपश्यत्तमाहरत्तेनाय
जततततोवैतस्यचत्वारोवीराआजायंतसुहोतासूद्गातास्वध्वर्युः सुसभेयोयएवंविद्वाꣳश्चतुरात्रेण
यजतआस्यचत्वारोवीराजायंतेसुहोतासूद्गाता स्वध्वर्युः सुसभेयोयेचतुर्विꣳशाः पवमानाब्रह्मव
र्चसंतत्॥ १॥ यउद्यंतस्तोमाः श्रीः सात्रिꣳश्रद्धादेवंयजमानंचत्वारिवीर्याणिनोपानमंतेजइंद्रिय

सं॰स॰
७

ब्रह्मवर्चसमन्नाद्यꣳ सएताꣳश्चतुर श्चतुष्टोमान्त्सोमानपश्यत्तानाहरत्तैरयजततेज एवप्रथमे
नावारुंधेंद्रियंद्वितीयेनब्रह्मवर्चसंतृतीयेनान्नाद्यंचतुर्थेनयएवंविद्वाꣳश्चतुरश्चतुष्टोमान्त्सोमा
नाहरतितैर्यजतेतेजएवप्रथमेनावरुंधइंद्रियंद्वितीयेनब्रह्मवर्चसंतृतीयेनान्नाद्यंचतुर्थेनयामे
वात्रि ऋध्धिमार्ध्नोत्तामेवयजमानऋध्नोति॥२॥तत्तेजश्चाष्टादशराच॥ ८ ॥जमदग्निःपुष्टि
कामश्चतूरात्रेणायजतएसैतान्पोषाꣳअपुष्यत्तस्मात्पलितौजामदग्नियौनसंजानातेएतानेवपो
षान्पुष्यतियएवंविद्वाꣳश्चतूरात्रेणयजतेपुरोडाशिन्यउपसदोभवंतिपशवोवैपुरोडाशाःपशूने
वावरुंधेन्नंवैपुरोडाशोन्नमेवावरुंधेन्नादःपशुमान्भवतियएवंविद्वाꣳश्चतूरात्रेणयजते॥१॥
जमदग्नेरष्टाचत्वारिꣳशत्॥९॥ ॥संवत्सरोवाइदमेकआसीत्सोकामयतऋतून्त्सृजेयेतिसए
तंपंचरात्रमपश्यत्तमाहरत्तेनायजतततोवैसऋतूनसृजतयएवंविद्वान्पंचरात्रेणयजतेप्रैव

राम
७

जायतेतऋतवःसृष्टानव्यावर्त्ततततएतंपंचरात्रमपश्यन्तमाहरंतेनायजंतततोवैतेव्यावर्त्तंत
॥१॥ यएवंविद्वान्पंचरात्रेणयजतेविपाप्मनाभ्रातृव्येणावर्त्ततेसार्वसेनिःशौचेयोकामयतपशुमा
न्स्यामितिसएतंपंचरात्रमाहरत्तेनायजततततोवैससहस्रंपशून्प्राप्नोद्यएवंविद्वान्पंचरात्रेणयज
तेप्रसहस्रंपशूनाप्नोतिबबरःप्रावाहणिरकामयतवाचःप्रवदितास्यामितिसएतंपंचरात्रमा ॥२॥
अहरत्तेनायजततततोवैसवाचःप्रवदिताभवद्यएवंविद्वान्पंचरात्रेणयजतेप्रवदितैववाचोभवत्य
थोएनंवाचस्पतिरित्याहुरनाप्त श्चतूरात्रोतिरिक्तः षड्रात्रोथवाएषसंप्रतियज्ञोयत्पंचरात्रोयए
वंविद्वान्पंचरात्रेणयजतेसंप्रत्येवयज्ञेनयजतेपंचरात्रोभवतिपंचवाऋतवःसंवत्सरः ॥३॥ ऋतुष्वे
वसंवत्सरेप्रतितिष्ठत्यथोपंचाक्षरापंक्तिःपांक्तोयज्ञोयज्ञमेवावरुंधेत्रिवृदग्निष्टोमोभवतितेजए
वावरुंधेपंचदशोभवतींद्रियमेवावरुंधेसप्तदशोभवत्यन्नाद्यस्यावरुध्याअथोप्रैवतेनजायतेपं

चविꣳशोग्निष्टोमोभवतिप्रजापतेराप्त्यैमहाव्रतवानन्नाद्यस्यावरुध्यैविश्वजित्सर्वपृष्ठोतिरात्रोभव
तिसर्वस्याभिजित्यै॥४॥तेव्यावर्ततप्रवदितास्यामितिसएतंपंचरात्रमासंवत्सरोभिजित्यै॥१०॥ ॥
देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामाददेमामग्रभ्णन्रशनामृतस्यपूर्वआयु
षिविदथेषुकव्या॥तयादेवाःसुतमाबभूवुर्ऋतस्यसामन्त्सरमारपंती।अभिधाअसिभुवनमसियं
तासिधर्तासिसोग्निंवैश्वानरꣳसप्रथसंगछस्वाहाकृतःपृथिव्यांयंताराड्यंतासियमनोधर्तासिध
रुणःकृष्यैत्वाक्षेमायत्वारय्यैत्वापोषायत्वापृथिव्यैत्वांतरिक्षायत्वादिवेत्वासतेत्वासतेत्वाद्भ्यस्त्वौष
धीभ्यस्त्वाविश्वेभ्यस्त्वाभूतेभ्यः॥१॥धरुणःपंचविꣳशतिश्च॥११॥ ॥विभूर्मात्राप्रभूःपित्राश्वोसि
हयोस्यत्योसिनरोस्यर्वासिसप्तिरसिवाज्यसिवृषासिनृमणाअसिययुर्नामास्यादित्यानांपत्वा
न्विह्यग्नयेस्वाहास्वाहेंद्राग्निभ्याꣳस्वाहाप्रजापतयेस्वाहाविश्वेभ्योदेवेभ्यःस्वाहासर्वाभ्योदेवता

भ्यइहधृतिःस्वाहेहविधृतिःस्वाहेहरंतिःस्वाहेहरमतिःस्वाहाभूरसिभुवेत्वाभव्यायत्वाभविष्यतेत्वाविश्वे
भ्यस्त्वाभूतेभ्योदेवाआशापालाएतंदेवेभ्योश्वंमेधायप्रोक्षितंगोपायत॥१॥रंतिःस्वाहाद्वाविंश
तिश्च॥१२॥ ॥आयनायस्वाहाप्रायणायस्वाहोद्द्रावायस्वाहोद्द्रुतायस्वाहाशूकारायस्वाहाशूकृ
तायस्वाहापलायितायस्वाहाप×य×लायितायस्वाहावल्गतेस्वाहापरावल्गतेस्वाहायतेस्वा
हाप्रयतेस्वाहासर्वस्मैस्वाहा॥१॥आयनायोत्तरमापलायितायषड्विंशतिः॥१३॥ ॥अग्नये
स्वाहासोमायस्वाहावायवेस्वाहापांमोदायस्वाहासवित्रेस्वाहासरस्वत्यैस्वाहेंद्रायस्वाहाबृह
स्पतयेस्वाहामित्रायस्वाहावरुणायस्वाहासर्वस्मैस्वाहा॥१॥अग्नयेवायवेपांमोदायेंद्रायत्र
योविंशतिः॥१४॥ ॥पृथिव्यैस्वाहांतरिक्षायस्वाहादिवेस्वाहासूर्यायस्वाहाचंद्रमसेस्वाहानक्ष
त्रेभ्यःस्वाहाप्राच्यैदिशेस्वाहादक्षिणायैदिशेस्वाहाप्रतीच्यैदिशेस्वाहोदीच्यैदिशेस्वाहोर्ध्वायैदि

शेस्वाहादिग्भ्यःस्वाहावांतरदिशाभ्यःस्वाहासमाभ्यःस्वाहाशरद्भ्यःस्वाहाहोरात्रेभ्यःस्वाहार्धमासे
भ्यःस्वाहामासेभ्यःस्वाहर्तुभ्यःस्वाहासंवत्सरायस्वाहासर्वस्मैस्वाहा॥१॥ पृथिव्यैस्सूर्यायनक्षत्रेभ्यः
प्राच्यैसप्तचत्वारिंशत॥१५॥ ॥अग्नयेस्वाहासोमायस्वाहासवित्रेस्वाहासरस्वत्यैस्वाहापूष्णेस्वा
हाबृहस्पतयेस्वाहापांमोदायस्वाहावायवेस्वाहामित्रायस्वाहावरुणायस्वाहासर्वस्मैस्वाहा॥१॥
अग्नयेसवित्रेपूष्णेपांमोदसप्तमंवायवेत्रयोविंशतिः॥१६॥ ॥पृथिव्यैस्वाहांतरिक्षायस्वाहादिवे
स्वाहाग्नयेस्वाहासोमायस्वाहासूर्यायस्वाहाचंद्रमसेस्वाहान्हेस्वाहारात्रियैस्वाहर्जवेस्वाहासाधवे
स्वाहासुक्षित्यैस्वाहाक्षुधेस्वाहाशितिम्नेस्वाहारोगायस्वाहाहिमायस्वाहा शीतायस्वाहातपाय
स्वाहारण्यायस्वाहासुवर्गायस्वाहालोकायस्वाहासर्वस्मैस्वाहा॥१॥ पृथिव्याअग्नयेन्हेचतुश्च
त्वारिंशत॥१७॥ ॥भुवोदेवानांकर्मणापसर्तस्यपथ्यासिवसुभिर्देवेभिर्देवतयागायत्रेणत्वाछंदसा

युनज्मिवसंतेनत्वर्तुनाहविषादीक्षयामिरुद्रेभिर्देवेभिर्देवतयात्रैष्टुभेनत्वाछंदसा युनज्मिग्रीष्मेण
त्वर्तुनाहविषादीक्षयाम्यादित्येभिर्देवेभिर्देवतयाजागतेनत्वाछंदसायुनज्मिवर्षाभिस्त्वर्तुनाहवि
षादीक्षयामिविश्वेभिर्देवेभिर्देवतयानुष्टुभेनत्वाछंदसायुनज्मि॥१॥शारदात्वर्तुनाहविषादीक्षया
म्यंगिरोभिर्देवेभिर्देवतयापांक्तेनत्वाछंदसायुनज्मिहेमंतशिशिराभ्यांत्वर्तुनाहविषादीक्षयाम्या
हंदीक्षामरुहमृतस्यपत्नींगायत्रेणछंदसाब्रह्मणाचर्तंः सत्येधाः सत्यमृतेधां॥ मृहीमूषुसुत्रामा
णामिहधृतिःस्वाहेहविधृतिःस्वाहेहरंतिःस्वाहेहरमतिःस्वाहा॥२॥आनुष्टुभेनत्वाछंदसायुनज्म्येका
न्नपंचाशाच्च॥१८॥ ॥ईंकारायस्वाहेंकृतायस्वाहाक्रंदतेस्वाहावक्रंदतेस्वाहाप्रोथतेस्वाहाप्रप्रोथते
स्वाहागंधायस्वाहाघ्रातायस्वाहाप्राणायस्वाहाव्यानायस्वाहापानायस्वाहासंदीयमानायस्वा
हासंदितायस्वाहाविचृत्यमानायस्वाहाविचृत्तायस्वाहापलायिष्यमाणायस्वाहापलायिताय

सं·स·
१०

स्वाहोपरꣳस्यतेस्वाहोपरतायस्वाहानिवेक्ष्यतेस्वाहानिविशमानायस्वाहानिविष्टायस्वाहानिष
त्स्यतेस्वाहानिषीदतेस्वाहानिषण्णायस्वाहा ॥१॥ आसिष्यतेस्वाहासीनायस्वाहासितायस्वाहानि
पत्स्यतेस्वाहानिपद्यमानायस्वाहानिपन्नायस्वाहाशयिष्यतेस्वाहाशयानायस्वाहाशयितायस्वा
हासंमीलिष्यतेस्वाहासंमील्लतेस्वाहासंमीलितायस्वाहास्वप्स्यतेस्वाहास्वपतेस्वाहासुप्तायस्वा
हाप्रभोत्स्यतेस्वाहाप्रबुध्यमानायस्वाहाप्रबुद्धायस्वाहाजागरिष्यतेस्वाहाजाग्रतेस्वाहाजागरि
तायस्वाहाशुश्रूषमाणायस्वाहाशृण्वतेस्वाहाश्रुतायस्वाहावीक्षिष्यतेस्वाहा ॥२॥ वीक्षमाणा
यस्वाहावीक्षितायस्वाहासꣳहास्यतेस्वाहासंजिहानायस्वाहोज्जिहानायस्वाहाविवर्त्स्यतेस्वा
हाविवर्त्तमानायस्वाहाविवृत्तायस्वाहोत्थास्यतेस्वाहोत्तिष्ठतेस्वाहोत्थितायस्वाहाविधविष्यते
स्वाहाविधून्वानायस्वाहाविधूतायस्वाहोत्क्रꣳस्यतेस्वाहोत्क्रामतेस्वाहोत्क्रांतायस्वाहाचंक्रमि

राम
१०

ष्यतेस्वाहाचंक्रम्यमाणायस्वाहाचंक्रमितायस्वाहाकंडूयिष्यतेस्वाहाकंडूयमानायस्वाहाकंडू
यितायस्वाहानिकषिष्यतेस्वाहानिकषमाणायस्वाहानिकषितायस्वाहायदत्तितस्मैस्वाहाय
त्पिबतितस्मैस्वाहायन्मेहतितस्मैस्वाहायच्छकृत्करोतितस्मैस्वाहारेतसेस्वाहाप्रजाभ्यःस्वाहा
प्रजननायस्वाहासर्वस्मैस्वाहा॥३॥निषण्णायस्वाहावीक्षिष्यतेस्वाहानिकषमाणायस्वाहासप्त
विंशतिश्च॥१९॥ ॥अग्नयेस्वाहावायवेस्वाहासूर्यायस्वाहाऋतमस्यृतस्यर्तमसिसत्यमसिसत्य
स्यसत्यमस्यृतस्यपंथा असिदेवानांछायामृतस्यनामतत्सत्यंयत्त्वंप्रजापतिरस्यधियदस्मिन्वा
जिनीवशुभःस्पर्धतेदिवःसूर्येणविशोपोरणानःपवतेकव्युन्नपशुन्नपोगोदूर्यःपरिज्मा॥१॥
अग्नयेवायवेष्टाचत्वारिंशत्॥२०॥ ॥प्रजननंप्रातःसवनेवैब्रह्मवादिनःसत्वोंगिरसआपोवै
सोमोवैसहस्रतम्यात्रिर्जमदग्निःसंवत्सरोदेवस्यविन्नरायनायाग्नयेपृथिव्याअग्नयेपृथिव्यैस्वु

अं

सं·स·
११

वईंकारायाग्नयेवायवेविंꣳशतिः॥२०॥ ॥प्रजननमंगिरसःसोमोवैप्रतिगृह्णातिविभूर्वीक्षमाणा।
यद्द्विपंचाशात्॥५२॥ ॥हरिः ओम्॥ साध्यावैदेवाःसुवर्गकामाएतꣳषड्रात्रमपश्यन्तमाहरन्तेन।
यजंततततोवैतेसुवर्गंल्लोकमायन्यएवंविद्वाꣳसःषड्रात्रमासतेसुवर्गमेवलोकंयंतिदेवसत्रंवैषड्रा
त्रःप्रत्यक्षꣳह्येतानिपृष्ठानियएवंविद्वाꣳसःषड्रात्रमासतेसाक्षादेवदेवताअभ्यारोहंतिषड्रात्रोभ
वतिषड्वाऋतवःषट्पृष्ठानि॥१॥ पृष्ठैरेवर्तूनन्वारोहंत्यृतुभिःसंवत्सरंतेसंवत्सरएवप्रतितिष्ठंति
बृहद्रथंतराभ्यांयंतीयंवावरथंतरमसौबृहदाभ्यामेवयंत्यथोअनयोरेवप्रतितिष्ठंत्येतेवैयज्ञस्यांजसा
यनीसृतीताभ्यामेवसु×व×वर्गंल्लोकंयंतित्रिवृदग्निष्टोमोभवतितेजएवावरुंधतेपंचदशोभव
तींद्रियमेवावरुंधतेसप्तदशः॥२॥ भवत्यन्नाद्यस्यावरुध्याअथोप्रैवतेनजायंतएकविंꣳशोभव
तिप्रतिष्ठित्याअथोरुचमेवात्मंदधतेत्रिणवोभवतिविजित्यैत्रयस्त्रिंꣳशोभवतिप्रतिष्ठित्यैसदोह

राम
११

विर्धानिनएतेनषड्रात्रेणयजेरन्नाभ्वत्थीहविर्धानंवाग्नीध्रंचभवतस्तद्धिसुवर्ग्यंवृक्षीबतीभवतः
सुवर्गस्यलोकस्यसमष्ट्याउलूखलबुध्नोयूपोभवतिप्रतिष्ठित्यैप्रांचोयांतिप्राङिवहिसुवर्गः॥३॥
लोकःसरस्वत्यायांत्येषवैदेवयानःपंथास्तमेवान्वारोहंत्याक्रोशंतोयांत्यवर्तिमेवान्यस्मिन्प्रतिष
ज्यप्रतिष्ठांगछंतिदायदशशातंकुर्वंत्यथैकमुत्थानःशतायुःपुरुषःशतेंद्रियआयुष्येवेंद्रियेप्रति
तिष्ठंतियदाशातःसहस्रंकुर्वंत्यथैकमुत्थानःसहस्रसंमितोवाअसौलोकोमुमेवलोकमभिजयं
तियदेषांप्रमीयेतयदावाजीयेरन्नथैकमुत्थानंतद्धितीर्थं॥४॥पृष्ठानिसप्तदशाःसुवर्गोजयंति
यदैकादशाव॥१॥ ॥कुसुरुबिंदऔद्दालकिरकामयतपशुमान्स्यामितिसएतंःसप्तरात्रमाहरत्तेना
यजततेनवैसयावंतोग्राम्याःपशवस्तानवारुंधयएवंविद्वान्सप्तरात्रेणयजतेयावंतएवग्राम्याःप
शवस्तानेवावरुंधेसप्तरात्रोभवतिसप्तग्राम्याःपशवःसप्तारण्याःसप्तछंदांःस्युभयस्यावरुध्यै

सं·स·
२२

त्रिवृदग्निष्टोमो भवतितेजः॥१॥एवावरुंधेपंचदशोभवतींद्रियमेवावरुंधेसप्तदशोभवत्यन्नाद्यस्या
वरुध्याअथोप्रैवतेनजायतएकविंशोभवतिप्रतिष्ठित्याअथोरुचमेवात्मंधत्तेत्रिणवोभवतिविजित्यै
पंचविंशोग्निष्टोमोभवतिप्रजापतेराप्त्यैमहाव्रतवानन्नाद्यस्यावरुध्यैविश्वजित्सर्वपृष्ठोतिरात्रोभ
वतिसर्वस्याभिजित्यैयत्प्रत्यक्षंपूर्वेष्वहःसुपृष्ठान्युपेयुःप्रत्यक्षं॥२॥विश्वजितियथादुग्धामुपसी
दत्येवमुत्तममहःस्यान्नैकरात्रश्चनस्याद्बृहद्रथंतरेपूर्वेष्वहःस्वुपयंतीयंवावरथंतरमसौबृहदाभ्यामे
वनयंत्यथोअनयोरेवप्रतितिष्ठंतियत्प्रत्यक्षंविश्वजितिपृष्ठान्युपयंतियथाप्रत्तांदुहेतादृगेवतत्॥
॥३॥तेजउपेयुःप्रत्यक्षंद्विचत्वारिंशोरात्रः॥२॥ ॥ बृहस्पतिरकामयतब्रह्मवर्चसीस्यामितिसएतम
ष्टरात्रमपश्यत्तमाहरत्तेनायजततोवैसब्रह्मवर्चस्यभवद्यएवंविद्वान ष्टरात्रेणयजतेब्रह्मवर्च
स्येवभवत्यष्टरात्रोभवत्यष्टाक्षरागायत्रीगायत्रीब्रह्मवर्चसंगायत्रियैवब्रह्मवर्चसमवरुंधेष्टरात्रो

राम
१२

भवतिचतस्रोवैदिशश्चतस्रोवांतरदिशादिग्भ्यएवब्रह्मवर्चसमवरुंधे ॥१॥ त्रिवृदग्निष्टोमोभवति
तेजएवावरुंधेपंचदशोभवतींद्रियमेवावरुंधेसप्तदशोभवत्यन्नाद्यस्यावरुध्याअथोप्रैवतेनजाय
तएकविंशोभवतिप्रतिष्ठित्याअथोरुचमेवात्मंधत्तेत्रिणवोभवतिविजित्यैत्रयस्त्रिंशोभवतिप्र
तिष्ठित्यैपंचविंशोग्निष्टोमोभवतिप्रजापतेराप्त्यैमहाव्रतवानन्नाद्यस्यावरुध्यैविश्वजित्सर्वपृष्ठोति
रात्रोभवतिसर्वस्याभिजित्यै ॥२॥ दिग्भ्यएवब्रह्मवर्चसमवरुंधेभिजित्यै ॥३॥ ॥प्रजापतिःप्रजाअ
सृजतताःसृष्टाःक्षुधंन्यायन्सएतंनवरात्रमपश्यत्तमाहरत्तेनायजतततोवैप्रजाभ्योकल्पतय
र्हिप्रजाःक्षुधंनिगच्छेयुस्तर्हिनवरात्रेणयजेतेमेहिवाएतासांलोकाअक्लृप्ताअथैताःक्षुधंन्निग
च्छंतीमानेवाभ्योलोकान्कल्पयतितान्कल्पमानान्प्रजाभ्योनुकल्पतेकल्पंते ॥१॥ अस्मादिमेलोका
ऊर्जंप्रजासुदधातित्रिरात्रेणैवेमंलोकंकल्पयतित्रिरात्रेणांतरिक्षंत्रिरात्रेणामुंलोकंयथागुणेगु

णामन्वस्यत्येवमेवतल्लोकेलोकमन्वस्यतिधृत्याअशिथिलंभावायज्योतिर्गौरायुरितिज्ञाताःस्तोमाभ
वंतीयंवावज्योतिरंतरिक्षंगोरसावायुरेष्वेवलोकेषुप्रतितिष्ठंतिज्ञात्रंप्रजानां ॥२॥ गच्छतिनवरात्रोभव
त्यभिपूर्वमेवास्मिन्तेजोदधातियोज्योगामयावीस्यात्सनवरात्रेणयजेतप्राणाद्धिवाएतस्याधृताअथै
तस्यज्योगामयतिप्राणानेवास्मिन्दाधारोतयदीतासुर्भवतिजीवत्येव ॥३॥ कल्पंतेप्रजानांत्रयस्त्रिं
शाच्च ॥४॥ ॥प्रजापतिरकामयतप्रजायेयेतिसएतंदशहोतारमपश्यत्तमजुहोत्तेनदशरात्रमसृ
जततेनदशरात्रेणप्राजायतदशरात्रायदीक्षिष्यमाणोदशहोतारंजुहुयाद्दशहोत्रैवदशरात्रंसृज
तेतेनदशरात्रेणप्रजायतेवैराजोवाएषयज्ञोयद्दशरात्रोयएवंविद्वान्दशरात्रेणयजतेविराजमेवगच्छ
तिप्राजापत्योवाएषयज्ञोयद्दशरात्रः ॥१॥ यएवंविद्वांदशरात्रेणयजतेप्रैवजायतइंद्रोवैसदृङ्दे
वताभिरासीत्सनव्यावृतमगच्छत्सप्रजापतिमुपाधावत्तस्माएतंदशरात्रंप्रायच्छत्तमाहरत्तेनायज

ततोवैसोन्याभिर्देवताभिर्व्यावृततमगछ्द्यएवंविद्वांदशरात्रेणयजतेव्यावृतमेवपाप्मनाभ्रातृ
व्येणगछतित्रिककुद्दै॥२॥एषयज्ञोयद्दशरात्रःककुत्पंचदशःककुदेकविंशःककुत्त्रयस्त्रिंशो
यएवंविद्वांदशरात्रेणयजतेत्रिककुदेवसमानानांभवतियजमानःपंचदशोयजमानएकविंशोय
अ जमानस्त्रयस्त्रिंशःपुरउत्तरोभिचर्यमाणोदशरात्रेणयजेतदेवपुराएवपर्यूहतेतस्यनकुतश्चनो
पाव्याधोभवतिनैनमभिचरंस्तृणुतेदेवासुराःसंयत्ताआसन्तेदेवाएताः॥३॥देवपुराअपश्यन्य
द्दशरात्रस्ताःपर्यौहंततेषान्नकुतश्चनोपाव्याधोभवत्ततोदेवाअभवन्परासुरायोभ्रातृव्यवान्त्स्या
त्सदशरात्रेणयजेतदेवपुराएवपर्यूहतेतस्यनकुतश्चनोपाव्याधोभवतिभवत्यात्मनापरास्यभ्रा
तृव्योभवतिस्तोमस्तोमस्योपस्तिर्भवतिभ्रातृव्यमेवोपस्तिंकुरुतेजामिवै॥४॥एतत्कुर्वंतियद्भूयांसं
संस्तोममुपेत्यकनीयांसमुपयंतियदग्निष्टोमसामान्यवस्ताच्चपरस्ताच्चभवंत्यजामित्वायत्रि

वृदग्निष्टोमोग्निष्टुदाग्नेयीषुभवतितेजएवावरुंधेपंचदशउक्थ्यऐंद्रीष्विंद्रियमेवावरुंधेत्रिवृदग्नि
ष्टोमोवैश्वदेवीषुपुष्टिमेवावरुंधेसप्तदशोग्निष्टोमः प्राजापत्यासुतीव्रसोमोन्नाद्यस्यावरुध्याअ
थोप्रैवतेनजायते ॥ ५ ॥ एकविंꣳशउक्थ्यः सौरीषुप्रतिष्ठित्याअथोरुचमेवात्मंधत्तेसप्तदशोग्निष्टोमः
प्राजापत्यास्तपहव्यउपहवमिच्छंतित्रिणवावग्निष्टोमावभितऐंद्रीषुविजित्यैत्रयस्त्रिंꣳशउक्थ्योवै
श्वदेवीषुप्रतिष्ठित्यैविश्वजित्सर्वपृष्ठोतिरात्रोभवतिसर्वस्याभिजित्यै ॥ ६ ॥ प्राजापत्योवाएषयज्ञो
यद्दशरात्रस्त्रिककुद्वाएतावैजायतएकत्रिंꣳशच्च ॥ ७ ॥ ॥ ऋतवोवैप्रजाकामाः प्रजान्नाविंदंततेका
मयंतप्रजाꣳसृजेमहिप्रजामवरुंधीमहिप्रजांविंदेमहिप्रजावंतस्यामेतितएतमेकादशरात्रमप
श्यन्तमाहरन्तेनायजंतततोवैतेप्रजामसृजंतप्रजामवारुंधतप्रजामविंदंतप्रजावंतोभवन्तऋत
वोभवंतदार्तवानामार्तवत्वमृतूनांवाएतेपुत्रास्तस्मात् ॥ ८ ॥ आर्तवाउच्यंतेयएवंविद्वाꣳसएका

दशरात्रमासतेप्रजामेवसृजंतेप्रजामवरुंधतेप्रजांविंदंतेप्रजावंतोभवंतिज्योतिरतिरात्रोभवतिज्यो
तिरेवपुरस्ताद्दधतेसुवर्गस्यलोकस्यानुख्यात्यैपृष्ठ्यःषडहोभवतिषड्वाऋतवःषट्पृष्ठानिपृष्ठैरेवर्तू
नन्वारोहंत्यृतुभिःसंवत्सरंतेसंवत्सरएवप्रतितिष्ठंतिचतुर्विंशोभवतिचतुर्विंशत्यक्षरागायत्री॥२॥
गायत्रंब्रह्मवर्चसंगायत्रियामेवब्रह्मवर्चसेप्रतितिष्ठंतिचतुश्चत्वारिंशोभवतिचतुश्चत्वारिंशदक्ष
रात्रिष्टुगिंद्रियंत्रिष्टुप्त्रिष्टुभ्येवेंद्रियेप्रतितिष्ठंत्यष्टाचत्वारिंशोभवत्यष्टाचत्वारिंशदक्षराजगती
जागताःपशवोजगत्यामेवपशुषुप्रतितिष्ठंत्येकादशरात्रोभवतिपंचवाऋतवआर्तवाःपंचर्तुष्वेवा
र्तवेषुसंवत्सरेप्रतिष्ठायप्रजामवरुंधतेतिरात्रावभितोभवतःप्रजायैपरिगृहीत्यै॥३॥एतेपुत्रास्त
स्माज्ज्यायस्येकान्नपंचाशाद्रात्र॥६॥ ॥ऐंद्रवायवाग्रान्गृह्णीयाद्यःकामयेतयथापूर्वंप्रजाःकल्पेरन्निति
यज्ञस्यवैक्लृप्तिमनुप्रजाःकल्पंतेयज्ञस्याक्लृप्तिमनुनकल्पंतेयथापूर्वमेवप्रजाःकल्पयतिनज्यायाꣳ

संक्नीयानतिक्रामत्यैंद्रवायवाग्रान्गृह्णीयादामयाविनः प्राणेनवाएष ॅ ध्यतेयस्यामयतिप्राणऐं
द्रवायवः प्राणेनैवैनꣳ समर्धयतिमैत्रावरुणाग्रान्गृह्णीरन्येषांदीक्षिता×व्यृ×नांप्रमीयेत॥१॥प्रा
णापानाभ्यांवाएतेव्यृध्यंतेयेषांदीक्षितानांप्रमीयतेप्राणापानौमित्रावरुणौप्राणापानावेवमुखतः
परिहरंतआश्विनाग्रान्गृह्णीतानुजावरोश्विनौवैदेवानामानुजावरौपश्चेवाग्रंपर्यैतामश्विनावेतस्यदे
वतायआनुजावर स्तावेवैनमग्रंपरिणयतःशुक्राग्रान्गृह्णीतगतश्रीःप्रतिष्ठाकामोसौवाआदित्यः
शुक्रएषोंतोतमनुष्यः॥१॥श्रियैगत्वानिवर्ततेंतादिवांतमारभेतेनततःपापीयान्भवतिमंथ्यग्रान्गृ
ह्णीताभिचरन्नार्तपात्रंवाएतद्यन्मंथिपात्रंमृत्युनैवैनंग्राहयतिताजगार्तिमार्छत्याग्रयणाग्रान्गृह्णी
तस्यैयेपितापितामहःपुण्यःस्यादथतंन्नप्रा प्नुयाद्वाचावाएषइंद्रियेणव्यृध्यतेयस्यपितापितामृ
हःपुण्यः॥२॥भवत्यथतन्नप्राप्नोत्युरद्वैतद्यज्ञस्यवागिवयदाग्रयणोवाचैवैनमिंद्रियेणसमर्ध

यतिनततःपापीयान्भवत्युक्थ्याग्रान्गृह्णीताभिचर्यमाणःसर्वेषांवाएतत्पात्राणामिंद्रियंयदुक्थ्य
पात्रꣳसर्वेणैवैनमिंद्रियेणातिप्रयुंक्तेसरस्वत्यभिनोनेषिवस्यइतिपुरोरुचंकुर्याद्वाग्वै॥३॥सर
स्वतीवाग्वैवैनमतिप्रयुंक्तेमात्वत्क्षेत्राण्यरणानिगन्मेत्याहमृत्योर्वैक्षेत्राण्यरणानितेनैवमृत्योःक्षे
त्राणिनगच्छतिपूर्णान्ग्रहान्गृह्णीयादामयाविनःप्राणान्वाएतस्यशुगृच्छतियस्यामयतिप्राणाग्र
हाःप्राणानेवास्यशुचोमुंचत्युतयदीतासुर्भवतिजीवत्येवपूर्णान्ग्रहान्गृह्णीयाद्यर्हिपर्जन्योनवर्षे
त्प्राणान्वाएतर्हिप्रजानाꣳशुगृच्छतियर्हिपर्जन्योनवर्षतिप्राणाग्रहाःप्राणानेवप्रजानाꣳशुचो
मुंचतिताजक्प्रवर्षति॥४॥प्रमीयेतमनुष्यऋध्यतेयस्यपितापितामहःपुण्योवाग्वाएषपूर्णान्ग्र
हान्पंचविꣳशतिश्च॥५॥ ॥गायत्रोवाऐंद्रवायवोगायत्रंप्रायणीयमहस्तस्मात्प्रायणीयेहन्नैं
द्रवायवोगृह्यतेस्वएवैनमायतनेगृह्णातित्रैष्टुभोवैशुक्रस्त्रैष्टुभंद्वितीयमहस्तस्माद्द्वितीयेहन्शुक्रो

गृह्यतेस्वएवैनमायतनेगृह्णातिजागतोवाआग्रयणोजागतंतृतीयमहस्तस्मात्तृतीयेहन्नाग्रय
णोगृह्यतेस्वएवैनमायतनेगृह्णात्येतद्वै॥१॥यज्ञमापद्यच्छंदाꣳस्याप्नोतियदाग्रयणःश्वोगृह्यतेयत्रै
वयज्ञमदृशंततएवैनंपुनःप्रयुंक्तेजगन्मुखोवैद्वितीयस्त्रिरात्रोजागतआग्रयणोयच्चतुर्थेहन्नाग्र
यणोगृह्यतेस्वएवैनमायतनेगृह्णात्यथोस्वमेवछंदोनुपर्यावर्तंतेराथंतरोवाऐंद्रवायवोराथंत
रंपंचममहस्तस्मात्पंचमेहन्॥२॥ऐंद्रवायवोगृह्यतेस्वएवैनमायतनेगृह्णातिबार्हतोवैशुक्रोबार्ह
तःषष्ठमहस्तस्मात्षष्ठेहञ्छुक्रोगृह्यतेस्वएवैनमायतनेगृह्णात्येतद्वैद्वितीयंयज्ञमापद्यच्छंदाꣳस्या
प्नोतियच्छुक्रःश्वोगृह्यतेयत्रैवयज्ञमदृशंततएवैनंपुनःप्रयुंक्तेत्रिष्टुब्मुखोवैतृतीयस्त्रिरात्रस्त्रैष्टुभः
॥३॥शुक्रोयत्सप्तमेहञ्छुक्रोगृह्यतेस्वएवैनमायतनेगृह्णात्यथोस्वमेवछंदोनुपर्यावर्तंतेवाग्वाआ
ग्रयणोवागष्टममहस्तस्मादष्टमेहन्नाग्रयणोगृह्यतेस्वएवैनमायतनेगृह्णातिप्राणोवाऐंद्रवायवः

प्राणोनवममहस्तस्मान्नवमेहन्नैंद्रवायवोगृह्यतेस्वएवैनमायतनेगृह्णात्येतत् ॥ ४ ॥ वैतृतीयंयज्ञ
मापुद्यत्छंदाꣳस्याप्नोतियदैंद्रवायवःश्वोगृह्यतेयत्रैवयज्ञमदृशन्ततत एवैनंपुनःप्रयुंक्तेथोस्वमेव
छंदोनुपर्यावर्ततेपृथोवाएतेध्यपथेनयंतियेन्यनैंद्रवायवात्प्रतिपद्यंतेतःखलुवाएषयज्ञस्यय
दृशममहर्दृशमेहन्नैंद्रवायवोगृह्यतेयज्ञस्य ॥ ५ ॥ एवांतंगत्वापथ्यात्संथ्यामपियंत्यथोयथावद्दी
यसाप्रतिसारंवहंतितादृगेवतच्छंदाꣳस्यन्योन्यस्यलोकमभ्यध्यायंतान्येतेनैवदेवाव्यवाहयन्नैं
द्रवायवस्यवाएतदायतनंयच्चतुर्थमहस्तस्मिन्नाग्रयणोगृह्यतेतस्मादाग्रयणस्यायतनेनव
मेहन्नैंद्रवायवोगृह्यतेशुक्रस्यवाएतदायतनंयत्पंचमं ॥ ६ ॥ अहस्तस्मिन्नैंद्रवायवोगृह्यतेतस्मा
दैंद्रवायवस्यायतनेसप्तमेहञ्छुक्रोगृह्यतआग्रयणस्यवाएतदायतनंयत्षष्ठमहस्तस्मिंछुक्रोगृ
ह्यतेतस्माच्छुक्रस्यायतनेष्टमेहन्नाग्रयणोगृह्यतेछंदाꣳस्येवतद्विवाहयतिप्रवस्यसोविवाहमा

मोतियएवंवेदाथोदेवताभ्यएवयज्ञेसंविदंदधातिस्मैनौतदिदमन्योन्यस्मैददाति॥७॥ एतद्वैपंचमे
हंत्रैष्टुभएतद्ध्येतयज्ञस्यपंचममुन्यस्माएकंच॥८॥ ॥ प्रजापतिरकामयतप्रजायेयेतिसएतंद्वा
दशरात्रमपश्यत्तमाहरत्तेनायजतततोवैसप्राजायतयःकामयेतप्रजायेयेतिसद्वादशरात्रेण
यजेतप्रैवजायतेब्रह्मवादिनोवदंत्यग्निष्टोमप्रायणायज्ञाअथकस्मादतिरात्रःपूर्वःप्रयुज्य
तद्वृतिन्चक्षुषीवाएतेयज्ञस्ययदतिरात्रोकनीनिकेअग्निष्टोमोयत्॥१॥ अग्निष्टोमंपूर्वंप्रयुंजी
रन्बहिर्धाकनीनिकेदध्युस्तस्मादतिरात्रःपूर्वःप्रयुज्यतेचक्षुषीएवयज्ञेधित्वामध्यतःकनीनिके
प्रतिदधतियावैगायत्रीज्योतिःपक्षांवेदज्योतिषाभासासुवर्गंल्लोकमेतियावग्निष्टोमौतौप
क्षौयेंतरेष्टावुक्थ्याःसआत्मैषावैगायत्रीज्योतिःपक्षायएवंवेदज्योतिषाभासासुवर्गंल्लोकं॥२॥
एतिप्रजापतिर्वाएषद्वादशधाविहितोयद्द्वादशरात्रोयावतिरात्रौतौपक्षौयेंतरेष्टावुक्थ्याःस

आत्माप्रजापतिर्वावैषसन्त्सद्धवैसत्रेणस्पृणोतिप्राणावैसत्प्राणानेवस्पृणोतिसर्वासांवाएतेप्र
जानांप्राणैरासतेयेसत्रमासतेतस्मात्पृच्छंतिकिमेतेसत्रिणइतिप्रियःप्रजानामुत्थितोभवति
यएवंवेद॥३॥अग्निष्टोमोयत्सुवर्गंलोकंप्रियःप्रजानांपंचच॥१॥ ॥नवाएषोन्यतोवैश्वानरः
सुवर्गायलोकायप्राभवदूर्ध्वोहवाएषआततआसीत्तेदेवाएतंवैश्वानरंपर्यौहन्त्सुवर्गस्यलोक
स्यप्रभूत्याऋतवोवाएतेनप्रजापतिमयाजयन्तेष्वार्ध्नोदधितदृध्नोतिहवाऋत्विक्षुयएवंविद्वां
द्वादशाहेनयजतेतेस्मिन्नैच्छंतसरसमहवसंतायप्रायच्छत्॥१॥यवंग्रीष्मायौषधीर्वर्षाभ्यो
व्रीहींछरदेमाषतिलौहेमंतशिशिराभ्यांतेनेंद्रंप्रजापतिरयाजयत्ततोवाइंद्रइंद्रोभवत्तस्मादा
हुरानुजावरस्ययज्ञइतिसह्येतेनाग्रेयजतैषहवैकुणपमत्तियःसत्रेप्रतिगृह्णातिपुरुषकुणपम
श्वकुणपंगौर्वाअन्नंयेनपात्रेणान्नंबिभर्तियत्तन्ननिर्णेनिजतिततोधि॥२॥मलंजायतएक

सं॰स॰
१८

एवयज्ञेनैकोहिप्रजापतिरार्ध्मोंद्वादशरात्रीर्दीक्षितस्याद्द्वादशमासाः संवत्सरः संवत्सरः प्रजापतिः
प्रजापतिर्वावैषएषहृत्वैजायतेयस्तपसोधिजायतेचतुर्थीवाएतास्तिस्रस्तिस्रोरात्रयोयद्द्वादशो
पसदोयाः प्रथमायज्ञंताभिः संभरतियाद्वितीयायज्ञंताभिरारभते॥३॥ या स्तृतीयाः पात्राणिता
भिर्निर्णेनिक्तेयाश्चतुर्थीरपिताभिरात्मानमंतरतः शुंधतेयोवाअस्यपशुमत्तिमाꣳसꣳसोत्ति
यः पुरोडाशंमस्तिष्कꣳसयः परिवापंपुरीषꣳसयआज्यंमज्जानꣳसयः सोमꣳस्वेदꣳसोपिहवाँश्री
र्षण्यान्निष्पदः प्रतिगृह्णातियोद्वादशाहेप्रतिगृह्णातितस्माद्द्वादशाहेननयाज्यंपाप्मनोव्या×अस्य×
वृत्त्यै॥९॥अयच्छदधिरभंत्तेद्वादशाहेनचत्वारिव॥१०॥ ॥ एकस्मैस्वाहाद्वाभ्याꣳस्वाहात्रिभ्यः
स्वाहाचतुर्भ्यः स्वाहापंचभ्यः स्वाहाषड्भ्यः स्वाहासप्तभ्यः स्वाहाष्टाभ्यः स्वाहानवभ्यः स्वाहादशा
भ्यः स्वाहैकादशाभ्यः स्वाहाद्वादशाभ्यः स्वाहात्रयोदशाभ्यः स्वाहाचतुर्दशाभ्यः स्वाहापंचदशाभ्यः

राम
१८

स्वाहाषोडशभ्यः स्वाहासप्तदशभ्यः स्वाहाष्टादशभ्यः स्वाहैकान्नविꣳशत्यैस्वाहानवविꣳशत्यैस्वाहैकान्नचत्वारिꣳशतेस्वाहानवेचत्वारिꣳशतेस्वाहैकान्नषष्ट्यैस्वाहानवषष्ट्यैस्वाहैकान्नाशीत्यैस्वाहानवाशीत्यैस्वाहैकान्नशतायस्वाहाशतायस्वाहाद्वाभ्याꣳशताभ्याꣳस्वाहासर्वस्मैस्वाहा॥१॥ नेवचत्वारिꣳशतेस्वाहैकान्नैकविꣳशतिः॥११॥ ॥ एकस्मैस्वाहात्रिभ्यः स्वाहापंचभ्यः स्वाहासप्तभ्यः स्वाहानवभ्यः स्वाहैकादशभ्यः स्वाहात्रयोदशभ्यः स्वाहापंचदशभ्यः स्वाहासप्तदशभ्यः स्वाहैकान्नविꣳशत्यैस्वाहानवविꣳशत्यैस्वाहै कान्नचत्वारिꣳशतेस्वाहानवचत्वारिꣳशतेस्वाहैकान्नषष्ट्यैस्वाहानवषष्ट्यैस्वाहैकान्नाशीत्यैस्वाहानवाशीत्यैस्वाहैकान्नशतायस्वाहाशतायस्वाहासर्वस्मैस्वाहा॥१॥ एकस्मैपंचाशत्॥१२॥ ॥ द्वाभ्याꣳस्वाहाचतुर्भ्यःस्वाहाषड्भ्यः स्वाहाष्टाभ्यः स्वाहादशभ्यः स्वाहाद्वादशभ्यःस्वाहाचतुर्दशभ्यःस्वाहाषोडशभ्यः स्वाहाष्टादशभ्यः स्वाहाविꣳशत्यैस्वाहाष्टान

वत्यैस्वाहाशतायस्वाहासर्वस्मैस्वाहा॥१॥द्वाभ्यांचतुर्विꣳशतिः॥१३॥ ॥त्रिभ्यःस्वाहापंचभ्यःस्वाहा
सप्तभ्यस्वाहानवभ्यःस्वाहैकादशभ्यःस्वाहात्रयोदशभ्यःस्वाहापंचदशभ्यःस्वाहासप्तदशभ्यःस्वा
हैकान्नविꣳशत्यैस्वाहानवविꣳशत्यैस्वाहैकान्नचत्वारिꣳशतेस्वाहानवचत्वारिꣳशतेस्वाहैकान्न
षष्ट्यैस्वाहानवषष्ट्यैस्वाहैकान्नाशीत्यैस्वाहानवाशीत्यैस्वाहैकान्नशतायस्वाहाशतायस्वाहासर्व
श्री स्मैस्वाहा॥१॥त्रिभ्योचत्वारिꣳशत्॥१४॥ ॥चतुर्भ्यःस्वाहाष्टाभ्यःस्वाहाद्वादशभ्यःस्वाहाषोडश
भ्यःस्वाहाविꣳशत्यैस्वाहाषण्णवत्यैस्वाहाशतायस्वाहासर्वस्मैस्वाहा॥१॥चतुर्भ्यःषोडश॥१५॥ ॥
पंचभ्यःस्वाहादशभ्यःस्वाहापंचदशभ्यःस्वाहाविꣳशत्यैस्वाहापंचनवत्यैस्वाहाशतायस्वाहासर्व
स्मैस्वाहा॥१॥पंचभ्यश्चतुर्दश॥१६॥ ॥दशभ्यःस्वाहाविꣳशत्यैस्वाहात्रिꣳशतेस्वाहाचत्वारिꣳश
तेस्वाहापंचाशतेस्वाहाषष्ट्यैस्वाहासप्तत्यैस्वाहाशीत्यैस्वाहानवत्यैस्वाहाशतायस्वाहासर्वस्मै

स्वाहा॥१॥ दशभ्योद्वाविंशतिः॥१७॥ ॥विंशत्यैस्वाहाचत्वारिंशतेस्वाहाषष्ट्यैस्वाहाशीत्यैस्वा
हाशतायस्वाहासर्वस्मैस्वाहा॥१॥ विंशत्यैद्वादश॥१८॥ ॥पंचाशतेस्वाहाशतायस्वाहाद्वाभ्यां
शताभ्यांस्वाहात्रिभ्यःशतेभ्यस्वाहाचतुर्भ्यःशतेभ्यःस्वाहापंचभ्यःशतेभ्यःस्वाहाषड्भ्यःशतेभ्यः
स्वाहासप्तभ्यःशतेभ्यःस्वाहाष्टाभ्यःशतेभ्यःस्वाहानवभ्यःशतेभ्यःस्वाहासहस्रायस्वाहासर्वस्मै
स्वाहा॥१॥ पंचाशतेद्वात्रिंशत॥१९॥ ॥शतायस्वाहासहस्रायस्वाहायुतायस्वाहानियुतायस्वा
हाप्रयुतायस्वाहार्बुदायस्वाहान्यर्बुदायस्वाहासमुद्रायस्वाहामध्यायस्वाहांतायस्वाहापरार्धा
यस्वाहोषसेस्वाहाव्युष्ट्यैस्वाहोदिष्यतेस्वाहोद्यतेस्वाहोदितायस्वाहासुवर्गायस्वाहालोकायस्वाहा
सर्वस्मैस्वाहा॥१॥ शतायाष्टात्रिंशत॥२०॥ ॥साध्याःषड्रात्रंकुसुरुबिंदःसप्तरात्रंबृहस्पतिरष्ट
रात्रंप्रजापतिःक्षुधंन्नवरात्रंप्रजापतिर्देवाहोतारमृतवऐंद्रवायववायान्गायत्रोवैप्रजापतिःसद्वाद

सं॰स॰
२०

शारात्रं नवाएकस्माएकस्मैद्वाभ्यांत्रिभ्यश्चतुर्भ्यः पंचभ्योदशभ्योविंशत्यैपंचाशतेशतायविंऽश
तिः॥२०॥ ॥ साध्याउअस्माद्गमेलोकागायत्रंवैतृतीयमेकस्मैपंचाशात॥५०॥ ॥ हरिः ओम्॥ ॥
प्रजवंवाएतेनयंतियद्दशममहः पापावहीयंवाएतेनभवंतियद्दशममहर्योवैप्रजवंयुतामपश्येन
प्रतिपद्यतेयस्स्थाणुंहंतियोभ्रेषंन्येतिसहीयतेसयोवैदशमेहन्नविवाक्यउपहन्यतेसहीयतेत
स्मैयउपहतायव्याहतमेवान्वारभ्यसमश्नुतेयोव्याहसः॥१॥ हीयतेतस्माद्दशमेहन्नविवाक्य
उपहतायनव्युव्यमथोखल्वाहुर्यज्ञस्यवैसमृद्धेनदेवाः सुवर्गंल्लोकमायन्यज्ञस्यव्यृद्धेनासुरान्प
राभावयन्नितियत्खलुवैयज्ञस्यसमृद्धंतद्यजमानस्ययद्व्यृद्धंतद्भ्रातृव्यस्यसयोवैदशमेहन्नवि
वाक्यउपहन्यतेसएवातिरिचयतितेयबाह्याद्दशीकवः॥२॥ स्युस्तेविब्रूयुर्यदितत्रनविंदेयुरंतः स
दसाद्युर्व्यंयदितत्रनविंदेयुर्गृहपतिनाव्युव्यांतद्व्युव्यमेवाथवाएतत्सर्पराज्ञियाऋग्भिः स्तुवंतीयं

राम्
२०

वैसर्पतोराज्ञीयद्वाअस्यांकिंचार्चंतियदानृचुस्तेनेयꣳसर्पराज्ञीतियदेवकिंचवाचानृचुर्यदतोध्य
र्चितारः॥३॥तदुभयमाप्त्वावरुध्योत्तिष्ठामेतिताभिर्मनसास्तुवतेनवाइमामश्वरथेनाश्वतरीरथः
सद्यःपर्याप्तुमर्हतिमनोवाइमाꣳसद्यःपर्याप्तुमर्हतिमनःपरिभवितुमथब्रह्मवदंतिपरिमितावाऋ
चःपरिमितानिसामानिपरिमितानियजूꣳष्यथैतस्यैवांतोनास्तियद्ब्रह्मतत्प्रतिगृणतआचक्षीत
सप्रतिगरः॥४॥व्याहृसदृशीकवोर्चितारःसएकंच॥१॥ ॥ब्रह्मवादिनोवदंतिकिंद्वादशाहस्यप्रथ
मेनाह्नर्त्विजांयजमानोवृंक्तइतितेजइंद्रियमितिकिंद्वितीयेनेतिप्राणानन्नाद्यमितिकिंतृतीयेने
तित्रीनिमांलोकानितिकिंचतुर्थेनेतिचतुष्पदःपशूनितिकिंपंचमेनेतिपंचाक्षरांपंक्तिमितिकिꣳ
षष्ठेनेतिषडृतूनितिकिꣳसप्तमेनेतिसप्तपदांशाक्वरीमिति॥१॥किमष्टमेनेत्यष्टाक्षरांगायत्री
मितिकिंनवमेनेतित्रिवृतꣳस्तोममितिकिंदशमेनेतिदशाक्षरांविराजमितिकिमेकादशेनेत्येका

दशाक्षरांत्रिष्टुभमितिकिंद्वादशेनेतिद्वादशाक्षरांजगतीमित्येतावद्वाअस्तियावदेतद्यावदेवास्ति
तदेषांहंत्के॥२॥शाक्करीमित्येकचत्वारिंशत्॥२॥ ॥एषवाआप्तोद्वादशाहोयत्त्रयोदशरात्रःसमा
नंह्येतदहर्यत्प्रायणीयश्चोदयनीयश्चत्र्यतिरात्रोभवतित्रयइमेलोकाएषांलोकानामाप्त्यैप्रा
णोवैप्रथमोतिरात्रोव्यानोद्वितीयोपानस्तृतीयःप्राणापानोदानेष्वेवान्नाद्येप्रतितिष्ठंतिसर्व
मायुर्यंतियएवंविद्वांसस्त्रयोदशरात्रमासतेतदाहुर्वाग्वाएषावितता॥१॥यद्द्वादशाहस्तांवि
छिंद्युर्यन्मध्येतिरात्रंकुर्युरुपदासुकागृहपतेर्वाक्स्याद्युपरिष्टाच्छंदोमानांमहाव्रतंकुर्वंतिसंततामे
ववाचमवरुंधतेनुपदासुकागृहपतेर्वाग्भवतिपशवोवैछंदोमाअन्नंमहाव्रतंयदुपरिष्टाच्छंदो
मानांमहाव्रतंकुर्वंतिपशुष्वेवान्नाद्येप्रतितिष्ठंति॥२॥विततात्रिचत्वारिंशत्॥३॥ ॥
आदित्याअकामयंतोभयोर्लोकयोर्ऋध्नुयामेतितएतंचतुर्दशरात्रमपश्यन्तमाहरन्तेनायजं

तततोवैतउभयोर्लोकयोरार्ध्नुवन्नस्मिंश्चामुष्मिंश्चय एवंविद्वांसश्चतुर्दशरात्रमासतउभ
योरेवलोकयोर्ऋध्नुवंत्यस्मिंश्चामुष्मिंश्चचतुर्दशरात्रोभवतिसप्तग्राम्याओषधयःसप्तार
ण्याउभयीषामवरुध्यैयत्पराचीनानिपृष्ठानि ॥१॥ भवंत्यमुमेवतैर्लोकमभिजयंतियत्प्रतीची
नानिपृष्ठानिभवंतीममेवतैर्लोकमभिजयंतित्रयस्त्रिंशोमध्यतस्तोमोभवतःसाम्राज्यमेव
गछंत्यधिराजोभवतोधिराजाएवसमानानांभवंत्यतिरात्रावभितोभवतःपरिगृहीत्यै ॥२॥ पृ
ष्ठानिचतुस्त्रिंशत्रात्र ॥४॥ ॥प्रजापतिःसुवर्गंल्लोकमैत्तंदेवाअन्वायंतानादित्याश्चपशवश्चा
न्वायंतेदेवाअब्रुवन्यान्पशूनुपाजीविष्मतइमेन्वाग्मन्नितितेभ्यएतंचतुर्दशरात्रंप्रत्यौहंस्तआ
दित्याःपृष्ठैःसुवर्गंल्लोकमारोहंस्त्र्यहाभ्यामस्मिन्ल्लोकेपशून्प्रत्यौहन्पृष्ठैरादित्याअमुष्मिन्ल्लो
कआर्ध्नुवंत्र्यहाभ्यामस्मिन् ॥१॥ लोकेपशवोवायएवंविद्वांसश्चतुर्दशरात्रमासतउभयोरेव

लोकयोर्ऋध्नुवंत्यस्मिंश्चामुष्मिंश्चपृष्ठैरेवामुष्मिन्लोकऋध्नुवंतित्र्यहाभ्यामस्मिन्लोकेज्यो
तिर्गौरायुरितित्र्यहोभवतीयंवावज्योतिरंतरिक्षंगौरसावायुरिमानेवलोकानभ्यारोहंतियदन्य
तःपृष्ठानि स्युर्विविवधःस्यान्मध्येपृष्ठानिभवंतिसविवधत्वाय॥ २॥ ओजोवैवीर्यंपृष्ठान्योज
एववीर्यंमध्यतोदधतेबृहद्रथंतराभ्यांयंतीयंवावरथंतरमसौबृहदाभ्यामेवयंत्यथोअनयो
रेवप्रतितिष्ठंत्येतेवैयज्ञस्यांजसायनीस्रुतीताभ्यामेवसुवर्गंल्लोकंयंतिपरांचोवाएतेसुवर्गंल्लो
कमभ्यारोहंतियेपराचीनानिपृष्ठान्युपयंतिप्रत्यङ्त्र्यहोभवतिप्रत्यवरूढ्याअथोप्रतिष्ठित्या
उभयोर्लोकयोर्ऋध्वोत्तिष्ठंतिचतुर्दशैता स्तासांयादशदशाक्षराविराडन्नंविराड्विराजैवान्नाद्य
मवरुंधतेया श्चतस्रश्चतस्रोदिशोदिक्ष्वेवप्रतितिष्ठंत्यतिरात्रावभितोभवतःपरिगृहीत्यै॥ ३॥
आर्ध्नुवंत्र्यहाभ्यामस्मिन्सविवधत्वायप्रतिष्ठित्याएकत्रिंशद्रात्र॥ ४॥ ॥इंद्रोवैसदृङ्देवताभिरासी

सं·स·
२५

ष्ठायद्धाग्रह्यंतेभूयिष्ठꣳशस्यतेयज्ञस्यैवतन्मध्यतोग्रथिंग्रथ्नात्यविस्रꣳसायसप्तगृह्यंतेसप्तवै
शीर्षण्याःप्राणाःप्राणानेवयजमानेषुदधतियत्पराचीनानिपृष्ठानिभवंत्यमुमेवतैर्लोकमभ्या
रोहंतियदिमंलोकंन॥३॥प्रत्यवरोहेयुरुद्ग्रामाध्येयुर्यजमानाःप्रवामीयिरन्यत्प्रतीचीनानिपृष्ठा
निभवंतीममेवतैर्लोकंप्रत्यवरोहंत्यथोअस्मिन्नेवलोकेप्रतितिष्ठंत्यनुन्मादायेंद्रोवाअप्रति
ष्ठितआसीत्सप्रजापतिमुपाधावत्तस्माएतमेकविꣳशातिरात्रंप्रायच्छत्तमाहरत्तेनायजतततो
वैसप्रत्यतिष्ठद्येबहुयाजिनोप्रतिष्ठिताः॥४॥स्युस्तएकविꣳशातिरात्रमासीरंद्वादशमासाःपं
चर्तवस्त्रयइमेलोकाअसावादित्यएकविꣳशएतावंतोवैदेवलोकास्तेष्वेवयथापूर्वंप्रतितिष्ठंत्य
सावादित्योनव्यरोचतसप्रजापतिमुपाधावत्तस्माएतमेकविꣳशातिरात्रंप्रायच्छत्तमाहरत्तेना
यजतततोवैसोरोचतयएवंविद्वाꣳसएकविꣳशातिरात्रमासतेरोचंतएवैकविꣳशातिरात्रोभवति

राम
२५

र्यसस्यान्नाद्यस्यपरिगृहीत्यै॥ ३॥ यंजतेब्रह्मवान्तंवसुवर्गमेतेसुवर्गंत्रयोविःऽग्रातिस्व॥ २१॥
असावादित्योस्मिँल्लोकआसीत्तंदेवाःपृष्ठैःपरिगृह्यसुवर्गंल्लोकमगमयन्परैरवस्तात्पर्यगृह्णन्
दिवाकीर्त्येनसुवर्गेलोकेप्रत्यस्थापयन्परैःपरस्तात्पर्यगृह्णन्पृष्ठैरुपावारोहन्सवाअसावादित्योमु
ष्मिँल्लोकेपरैरुभयतःपरिगृहीतोयत्पृष्ठानिभवंतिसुवर्गमेवतेलोकंयजमानायंतिपरैरवस्ता
त्परिगृह्णंतिदिवाकीर्त्येन॥ १॥ सुवर्गेलोकेप्रतितिष्ठंतिपरैःपरस्तात्परिगृह्णंतिपृष्ठैरुपावरोहंति
यत्परेपरस्तान्नस्युःपरांचःसुवर्गाल्लोकान्निष्पद्येरन्यदवस्तान्नस्युःप्रजानिर्दहेयुरभितोदिवा
कीर्त्यंपरःसामानोभवंतिसुवर्गएवैनांल्लोकउभयतःपरिगृह्णंतियजमानावैदिवाकीर्त्यंःऽसंव
त्सरःपरःसामानोऽभितोदिवाकीर्त्यंपरःसामानोभवंतिसंवत्सरएवोभयतः॥ २॥ प्रतितिष्ठंतिपृष्ठं
वैदिवाकीर्त्यंपार्श्वेपरःसामानोऽभितोदिवाकीर्त्यंपरःसामानोभवंतितस्मादभितःपृष्ठंपार्श्वेभयि

विꣳशतिः॥२१॥ ॥ सितायस्वाहासितायस्वाहाभिहितायस्वाहानभिहितायस्वाहायुक्तायस्वाहा
युक्तायस्वाहासुयुक्तायस्वाहोद्युक्तायस्वाहाविमुक्तायस्वाहाप्रमुक्तायस्वाहावंचतेस्वाहापरिवंच
तेस्वाहासंवंचतेस्वाहानुवंचतेस्वाहोद्वंचतेस्वाहायतेस्वाहाधावतेस्वाहातिष्ठतेस्वाहासर्वस्मैस्वाहा
॥१॥ सितायाष्टात्रिꣳशत॥२२॥ ॥ बृहस्पतिःश्रद्धयथावाकृक्षावैप्रजापतिर्येनयेनद्वेवावादित्यावसिष्ठः
संवत्सरायसुवर्गंब्रह्मवादिनोऽज्यातिष्टोमंमेषःकूप्याभ्योऽद्भ्योयोअर्वंतन्नमोराज्ञेमयोभूःकिꣳस्विदं
वेभूःप्राणायसितायद्वाविꣳशतिः॥२३॥ ॥ बृहस्पतिःप्रतितिष्ठतिवैदनारात्रेणसुवर्गेयोअर्वंतंभ्र
स्त्रिपंचाशत्॥५३॥ ॥ हरिःओम्॥ गावोवाएतत्सत्रमासताशृंगाःसतीःशृंगाणिनोजायंताइति
कामेनतासांदशमासानिषण्णाआसन्नथशृंगाण्यजायंततताउदतिष्ठन्नरात्स्मेत्यथयासांनाजा
यंतताःसंवत्सरमाप्त्वोदतिष्ठन्नरात्स्मेतियासांचाजायंतयासांचनताउभयीरुदतिष्ठन्नरात्स्मेतिगा

सं·स·
३९

सत्रंवै॥१॥संवत्सरोयएवंविद्वांसःसंवत्सरमुपयंत्यृध्नुवंत्येवतस्मात्तूपुरावार्षिकोमासोपर्त्वाच्चरति
सत्राभिजितःह्यस्यैतस्मात्संवत्सरसदोयत्किंचगृहेक्रियतेतदाप्तमवरुद्धमभिजितंक्रियतेसमुद्रं
वाएतेप्रप्लवंतेयेसंवत्सरमुपयंतियोवैसमुद्रस्यपारंनपश्यतिनवैसततउदेतिसंवत्सरः॥२॥वैस
मुद्रस्तस्यैतत्पारंयदतिरात्रौयएवंविद्वांसःसंवत्सरमुपयंत्यनार्ताएवोदृचंगच्छंतीयंवैपूर्वोतिरा
त्रोसावुत्तरोमनःपूर्वोवागुत्तरःप्राणःपूर्वोपानउत्तरःप्ररोधनंपूर्वंउदयनमुत्तरोज्योतिष्टोमोवैश्वा
नरोतिरात्रोभवतिज्योतिरेवपुरस्ताद्दधतेसुवर्गस्यलोकस्यानुख्यात्यैचतुर्विंशःप्रायणीयोभ
वतिचतुर्विंशतिरर्धमासाः॥३॥संवत्सरःप्रयंतएवसंवत्सरेप्रतितिष्ठंतितस्यत्रीणिचशतानि
षष्टिश्चस्तोत्रीयास्तावतीःसंवत्सरस्यरात्रयउभेएवसंवत्सरस्यरूपेआप्नुवंतितेसंस्थित्याअरि
ष्ट्याउत्तरैरहोभिश्चरंतिषडहाभवंतिषड्वाऋतवःसंवत्सरऋतुष्वेवसंवत्सरेप्रतितिष्ठंतिगोश्चायु

राम
३९

रुग्वाएकविꣳशोरुचमेवगच्छन्त्यथोप्रतिष्ठामेवप्रतिष्ठाह्येकविꣳशोतिरात्रावभितोभवतोब्रह्मवर्च
सस्यपरिगृहीत्यै॥५॥गृह्णंतिदिवाकीर्त्यैनैवोभयतेनाप्रतिष्ठिताआसतएकविꣳशातिस्त्र॥१०॥
अर्वाङ्यज्ञःसंक्रामत्वमुष्मादधिमामभिंऋषीणांयःपुरोहितः।निर्देवंनिर्वीरंकृत्वाविष्कंधंत
स्मिन्हीयतांयोस्मान्द्वेष्टि।शरीरंयज्ञशमलंकुसीदंतस्मिन्त्सीदतुयोस्मान्द्वेष्टि।यज्ञयज्ञस्ययत्ते
जस्तेनसंक्राममामभि।ब्राह्मणानृत्विजोदेवान्यज्ञस्यतपसातेसवाहमाहुवे।इष्टेनपक्वमुप
॥१॥तेहुवेसवाहं।संतेवृंजेसुकृतꣳसंप्रजांपशून्।प्रैषान्त्सामिधेनीराघारावाज्यभागावाश्रु
तंप्रत्याश्रुतमावृणामिते।प्रयाजानूयाजान्त्स्विष्टकृतमिडामाशिषआवृंजेसुवः।अग्निनेंद्रेण
सोमेनसरस्वत्याविष्णुनादेवताभिः।याज्यानुवाक्याभ्यामुपतेहुवेसवाहंयज्ञमाददेतेवषट्कृ
तं।स्तुतꣳशस्त्रंप्रतिगरंग्रहमिडामाशिषः॥२॥आवृंजेसुवः।पत्नीसंयाजानुपतेहुवेसवाहꣳ

समिष्टयजुरादद्देतव। पश्मन्स्कृतं पुरोडाशान्त्सवनान्योतयज्ञं। देवान्त्सेंद्रानुपतेदुवेसवाहमग्नि
मुखान्त्सोमवतोयेचविश्वे॥ ३॥ उपयद्वमिडामाशिषोद्दृत्रिंःशाञ्च॥ ११॥ ॥ भूतंभव्यंभविष्यद्व
षट्स्वाहानमऋक्सामयजुर्वषट्स्वाहानमोगायत्रीत्रिष्टुप्जगतीवषट्स्वाहानमः पृथिव्यंतरि
क्षंद्यौर्वषट्स्वाहानमोग्निर्वायुः सूर्योवषट्स्वाहानमः प्राणोव्यानोपानोवषट्स्वाहानमोन्नं
कृषिर्वृष्टिर्वषट्स्वाहानमः पितापुत्रः पौत्रोवषट्स्वाहानमोभूर्भुवः सुवर्वषट्स्वाहानमः॥ १॥
मुवश्चुत्वारिन॥ १२॥ ॥ आमेगृहाभवंत्वाप्रजामआमोयज्ञोविशतुवीर्यवान्॥ आपोदेवीर्यज्ञिया
माविशंतुसहस्त्रैमाभूमामाप्रहासीत्। आमेग्रहोभवत्वापुरोरुक्स्तुतशस्त्रेमाविशताः समी
ची। आदित्याः*स्य*द्रावसर्वेसिदस्योः सहस्त्रस्यमाभूमामाप्रहासीत्। आमाग्निष्टोमोविशा
तूक्थ्यश्चातिरात्रोमाविशात्वा*मे*पिशार्वरः। तिरोअन्हियामासुहुताआविशंतुसहस्त्रस्यमाभू

मामाप्रहासीत् ॥१॥ अग्निष्टोमोविन्नात्वष्टादशच ॥१३॥ ॥ अग्निनातपोन्वभवद्वाचाब्रह्ममणिना
रूपाणींद्रेणदेवान्वातेनप्राणान्सूर्येणद्यांचंद्रमसानक्षत्राणियमेनपितॄन्राज्ञामनुष्यान्फलेन
नादेयानजगरेणसर्पान्व्याघ्रेणारण्यान्पशूञ्छ्येनेनपतत्रिणोवृष्णाश्वानृषभेणगाबस्तेनाजा
वृष्णिनावीर्व्रीहिणान्नानियवेनौषधीर्न्यग्रोधेनवनस्पतीनुदुंबरेणोर्जंगायत्रियाछंदाꣳसित्रिवृ
तास्तोमान्ब्राह्मणेनवाचं ॥१॥ ब्राह्मणेनैकंच ॥१४॥ ॥ स्वाहाधिमाधीतायस्वाहास्वाहाधीतंम
नसेस्वाहास्वाहामनःप्रजापतयेस्वाहाकायस्वाहाकस्मैस्वाहाकतमस्मैस्वाहादित्यैस्वाहादित्यै
मह्यैस्वाहादित्यैसुमृडीकायैस्वाहासरस्वत्यैस्वाहासरस्वत्यैबृहत्यैस्वाहासरस्वत्यैपावकायै
स्वाहापूष्णेस्वाहापूष्णेप्रपथ्यायस्वाहापूष्णेनरंधिषायस्वाहात्वष्ट्रेस्वाहात्वष्ट्रेतुरीपायस्वाहात्वष्ट्रे
पुरुरूपायस्वाहाविष्णवेस्वाहाविष्णवेनिखुर्यपायस्वाहाविष्णवेनिभूयपायस्वाहासर्वस्मैस्वाहा ॥१॥

सं·स·
२७

पुरुरूपायस्वाहादशान्व॥१५॥ ॥दद्भ्यःस्वाहाहनूभ्याꣳस्वाहोष्ठाभ्याꣳस्वाहामुखायस्वाहानासि
काभ्याꣳस्वाहाक्षीभ्याꣳस्वाहाकर्णाभ्याꣳस्वाहापारइक्षवोवार्येभ्यःपक्ष्मभ्यःस्वाहावारइक्षवःपा
र्येभ्यःपक्ष्मभ्यःस्वाहाशीर्ष्णेस्वाहाभ्रूभ्याꣳस्वाहाललाटायस्वाहामूर्ध्नेस्वाहामस्तिष्कायस्वाहा
केशेभ्यःस्वाहावहायस्वाहाग्रीवाभ्यःस्वाहास्कंधेभ्यःस्वाहाकीकसाभ्यःस्वाहापृष्टीभ्यःस्वा
हापाजस्यायस्वाहापार्श्वाभ्याꣳस्वाहा॥१॥ अꣳसाभ्याꣳस्वाहादोषभ्याꣳस्वाहाबाहुभ्याꣳस्वा
हाजंघाभ्याꣳस्वाहाश्रोणीभ्याꣳस्वाहोरुभ्याꣳस्वाहाष्ठीवद्भ्याꣳस्वाहाजंघाभ्याꣳस्वाहाभसदेस्वा
हाशिखंडेभ्यःस्वाहावालधानायस्वाहांडाभ्याꣳस्वाहाशेपायस्वाहारेतसेस्वाहाप्रजाभ्यःस्वाहा
प्रजननायस्वाहापद्भ्यःस्वाहाशफेभ्यःस्वाहालोमभ्यःस्वाहात्वचेस्वाहालोहितायस्वाहामाꣳ
सायस्वाहास्नावभ्यःस्वाहास्थभ्यःस्वाहामज्जभ्यःस्वाहांगेभ्यःस्वाहात्मनेस्वाहासर्वस्मैस्वाहा॥

रामू
२७

॥२॥ पार्श्वाभ्याᳪं स्वाहामज्जभ्यः स्वाहाषड्व॥१६॥ ॥अंज्येतायस्वाहांजिसक्थायस्वाहाशितिप
देस्वाहाशितिककुदेस्वाहाशितिरंध्रायस्वाहाशितिपृष्ठायस्वाहाशित्यᳪंसायस्वाहापुष्पकर्णा
यस्वाहाशित्योष्ठायस्वाहाशितिभ्रवेस्वाहाशितिभसदेस्वाहाश्वेतानूकाशायस्वाहांजयेस्वाहा
ललामायस्वाहासितज्ञवेस्वाहाकृष्णैतायस्वाहारोहितैतायस्वाहारुणैतायस्वाहेदृशायस्वाहा
कीदृशायस्वाहातादृशायस्वाहासदृशायस्वाहाविदृशायस्वाहासुसदृशायस्वाहारूपायस्वा स
हासर्वस्मैस्वाहा॥१॥ रूपायस्वाहाद्वेच॥१७॥ ॥कृष्णायस्वाहाश्वेतायस्वाहापिशंगायस्वाहासा
रंगायस्वाहारुणायस्वाहागौरायस्वाहाबभ्रवेस्वाहानकुलायस्वाहारोहितायस्वाहाशोणायस्वा
हाश्यावायस्वाहाश्यामायस्वाहापाकलायस्वाहासुरूपायस्वाहानुरूपायस्वाहाविरूपायस्वा
हासरूपायस्वाहाप्रतिरूपायस्वाहाशबलायस्वाहाकमलायस्वाहापृश्नयेस्वाहापृश्निसक्थाय

सं·स·
२८

स्वाहासर्वस्मैस्वाहा ॥१॥ कृष्णायषट्चत्वारिꣳशत ॥१८॥ ॥ओषधीभ्यःस्वाहामूलेभ्यःस्वाहातू
लेभ्यःस्वाहाकांडेभ्यःस्वाहावल्शेभ्यःस्वाहापुष्पेभ्यःस्वाहाफलेभ्यःस्वाहागृहीतेभ्यःस्वाहागृही
तेभ्यःस्वाहावपन्नेभ्यःस्वाहाशयानेभ्यःस्वाहासर्वस्मैस्वाहा ॥१॥ ओषधीभ्यश्चतुर्विꣳशतिः॥
॥१९॥ ॥वनस्पतिभ्यःस्वाहामूलेभ्यःस्वाहातूलेभ्यःस्वाहास्कंधेभ्यःस्वाहाशाखाभ्यःस्वाहापर्णे
भ्यःस्वाहापुष्पेभ्यःस्वाहाफलेभ्यःस्वाहागृहीतेभ्यःस्वाहागृहीतेभ्यःस्वाहावपंनेभ्यःस्वाहाश
यानेभ्यःस्वाहाशिष्टायस्वाहातिशिष्टायस्वाहापरिशिष्टायस्वाहासꣳशिष्टायस्वाहोच्छिष्टाय
स्वाहारिक्तायस्वाहारिक्तायस्वाहाप्ररिक्तायस्वाहासꣳरिक्तायस्वाहोद्रिक्तायस्वाहासर्वस्मैस्वा
हा ॥१॥ वनस्पतिभ्यःषट्चत्वारिꣳशत ॥२०॥ ॥प्रजवंब्रह्मवादिनःकिमेषवाआमआदित्याउभ
यीःप्रजापतिरन्वायन्निंद्रोवैसदृङ् [illegible] द्रोवैशिथिलःप्रजापतिरकामयतान्नादःसाविराडसा

राम
२८

वादित्योर्वाङ्भूतमाभेग्निनातपः स्वाहाधिंद्भ्योऽज्येभ्यायक्लृप्लायौषधीभ्योवनस्पतिभ्योविꣳशतिः
॥२०॥ ॥श्रजवंश्रजापतिर्यंदछंदोमंतेद्धुवसवाह्मोषधीभ्योद्विचत्वारिꣳशत्॥४२॥ ॥हरिःओम्॥
बृहस्पतिरकामयतश्रन्मेदेवादधीरन्गच्छेयंपुरोधामितिसएतंचतुर्विꣳशतिरात्रमपश्यत्तमाहरत्ते
नायजततोवैतस्मैश्रद्देवाअदधतागच्छत्पुरोधांयएवंविद्वाꣳसश्चतुर्विꣳशतिरात्रमासतेश्रदेभ्यो
मनुष्यादधतेगच्छंतिपुरोधांज्योतिर्गौरायुरितित्र्यहाभवंतीयंवावज्योतिरंतरिक्षंगौरसावायुः॥१॥
इमानेवलोकानभ्यारोहंत्यभिपूर्वंत्र्यहाभवंत्यभिपूर्वमेवसुवर्गंल्लोकमभ्यारोहंत्यसत्रंवाएतद्य
दछंदोमंयच्छंदोमाभवंतितेनसत्रंदेवताएवपृष्ठैरवरुंधतेपशूंछंदोमैरोजोवैवीर्यंपृष्ठानिपशवश्छंदो
माओजस्येववीर्येपशुषुप्रतितिष्ठंतिबृहद्रथंतराभ्यांयंतीयंवावरथंतरमसौबृहदाभ्यामेव॥२॥
यंत्यथोअनयोरेवप्रतितिष्ठंत्येतेवैयज्ञस्यांजसायनीस्रुतीताभ्यामेवसुवर्गंल्लोकंयंतिचतुर्विꣳशा

तिरात्रोभवतिचतुर्विꣳशतिरर्धमासाः संवत्सरः संवत्सरः सुवर्गोलोकः संवत्सरएवसुवर्गेलोकेप्रति
तिष्ठंत्यथोचतुर्विꣳशत्यक्षरागायत्रीगायत्रीब्रह्मवर्चसंगायत्रियैवब्रह्मवर्चसमवरुंधतेतिरात्रा
वभितोभवतोब्रह्मवर्चसस्यपरिगृहीत्यै॥ ३॥ अंतरिक्षंगौरसावायुराभ्यामेवपंचचत्वारिꣳशाच्च
॥१॥ ॥ यथावैमनुष्याएवंदेवाअग्रआसंतेकामयंतावर्तिंपाप्मानंमृत्युमपहत्यदैवीꣳसꣳसदंग
च्छेमेतिएतंतंचतुर्विꣳशतिरात्रमपश्यंतमाहरंतेनायजंततोवैतेवर्तिंपाप्मानंमृत्युमपहत्यदैवीꣳ
सꣳसदमगच्छन्यएवंविद्वाꣳसश्चतुर्विꣳशतिरात्रमासतेवर्तिमेवपाप्मानमपहत्यश्रियंगच्छंतिश्री
र्हिमनुष्यस्य॥१॥ दैवीसꣳसज्ञोतिरतिरात्रोभवतिसुवर्गस्यलोकस्यानुख्यात्यैपृष्ठ्यः षडहोभवति
षड्वाऋतवः संवत्सर स्तमासाअर्धमासाऋतवः प्रविश्यदैवीꣳसꣳसदमगच्छन्यएवंविद्वाꣳसश्च
तुर्विꣳशतिरात्रमासतेसंवत्सरमेवप्रविश्यवस्यसीꣳसꣳसदंगच्छंतित्रयस्त्रयस्त्रिꣳशाअवस्ताद्व

वंतित्रयस्त्रयस्त्रिꣳशाः परस्तात्त्रयस्त्रिꣳशेरेवोभयतोवर्तिंपाप्मानमपहत्यदेवीꣳसꣳसदंम
ध्यतः॥ २॥ गच्छंतिपृष्ठानिहिदैवीसꣳसज्ज्ञामिवाएतत्कुर्वंतियत्त्रयस्त्रयस्त्रिꣳशाअन्वंवोमध्ये
निरुक्तोभवतितेनाजाम्यूर्ध्वानिपृष्ठानिभवंत्यूर्ध्वाश्छंदोमाउभाभ्याꣳरूपाभ्याꣳसुवर्गंल्लोकंयंत्य
सत्रंवाएतद्यदछंदोमंयत्छंदोमाभवंतितेनसत्रंदेवताएवपृष्ठैरवरुंधतेपशूंछंदोमैरोजोवैवीर्यं
पृष्ठानिपशवः॥ ३॥ छंदोमाओजस्येववीर्येपशुषुप्रतितिष्ठंतित्रयस्त्रयस्त्रिꣳशाअवस्ताद्भवं
तित्रयस्त्रयस्त्रिꣳशाः परस्तान्मध्येपृष्ठान्युरोवैत्रयस्त्रिꣳशाआत्मापृष्ठान्यात्मनएवतद्यजमा
नाःशर्मनह्यंतेनार्त्यैबृहद्रथंतराभ्यांयंतीयंवावरथंतरमसौबृहदाभ्यामेवयंत्यथोअनयोरेवप्र
तितिष्ठंत्येतैर्वैयज्ञस्यांजसायनीस्रुतीताभ्यामेव॥ ४॥ सुवर्गंल्लोकंयंतिपरांचोवाएतेसुवर्गंल्लो
कमभ्यारोहंतियेपराचीनानिपृष्ठान्युपयंतिप्रत्यङ्षडहोभवतिप्रत्यवरूढ्याअथोप्रतिष्ठित्या

सं·स·
३०

उभयोर्लोकयोर्ऋद्ध्वोत्तिष्ठंतित्रिवृतोधित्रिवृतमुपयंतिस्तोमानाꣳसंपत्त्यैप्रभवायज्योतिरग्निष्टोमो
भवत्ययंवावसक्षयोस्मादेवतेनक्षयान्नयंतिचतुर्विꣳशतिरात्रोभवतिचतुर्विꣳशतिरर्धमासाः संव
त्सरः संवत्सरः सुवर्गोलोकः संवत्सरएवसुवर्गेलोकेप्रतितिष्ठंत्यथोचतुर्विꣳशत्यक्षरागायत्री
गायत्रीब्रह्मवर्चसंगायत्रियैवब्रह्मवर्चसमवरुंधतेतिरात्रावभितोभवतोब्रह्मवर्चसस्यपरिगृ
हीत्यै॥५॥मनुष्यस्यमध्यतःप्रावस्ताभ्यामेवसंवत्सरश्चतुर्विꣳशतिश्च॥२॥॥इयंवाइदमग्रे
लोमकासीत्साकामयतोषधीभिर्वनस्पतिभिःप्रजायेयेतिसैतास्त्रिꣳशतꣳरात्रीरपश्यत्ततो
वाइयमोषधीभिर्वनस्पतिभिःप्राजायतयेप्रजाकामाःपशुकामाःस्युस्तएताआसीरन्प्रैवजायं
तेप्रजयापशुभिरियंवाअक्षुध्यत्सैतांविराजमपश्यत्तामात्मन्धित्वान्नाद्यमवारुंधौषधीः॥१॥
वनस्पतीन्प्रजांपशून्तेनावर्धतसाजेमानंमहिमानमगच्छद्यएवंविद्वाꣳसएताआसतेविराजमे

राम्
३०

वात्मंधित्वान्नाद्यमवरुंधतेवर्धंतेप्रजयापशुभिर्जैमानेमहिमानंगच्छंतिज्योतिरतिरात्रोभवतिसु
वर्गस्यलोकस्यानुख्यात्यैपृष्ठ्यःषडहोभवतिषड्वाऋतवःषट्पृष्ठानिपृष्ठैरेवर्तूनन्वारोहंत्यृतुभिः
संवत्सरंतेसंवत्सरएव॥ २॥प्रतितिष्ठंतित्रयस्त्रिꣳशात्त्रयस्त्रिꣳशमुपयंतियज्ञस्यसंतत्याअ
थोप्रजापतिर्वैत्रयस्त्रिꣳशः प्रजापतिमेवारभंतेप्रतिष्ठित्यैत्रिणवोभवतिविजित्याएकविꣳशोभ
वतिप्रतिष्ठित्याअथोरुचमेवात्मंदधतेत्रिवृदग्निष्टुद्भवतिपाप्मानमेवतेननिर्दहंतेथोतेजोवैत्रि
वृत्तेजएवात्मंदधतेपंचदशाइंद्रस्तोमोभवतींद्रियमेवाव॥ ३॥रुंधतेसप्तदशोभवत्यन्नाद्यस्या
वरुध्याअथोप्रैवतेनजायंतएकविꣳशोभवतिप्रतिष्ठित्याअथोरुचमेवात्मंदधतेचतुर्विꣳशोभव
तिचतुर्विꣳशतिरर्धमासाःसंवत्सरःसंवत्सरःसुवर्गोलोकःसंवत्सरएवसुवर्गेलोकेप्रतितिष्ठंत्यथो
एषवैविषूवान्विषूवंतोभवंतियएवंविद्वाꣳसएताआसतेचतुर्विꣳशात्पृष्ठान्युपयंतिसंवत्सरएव

प्रतिष्ठाय॥४॥देवताअभ्यारोहंतित्रयस्त्रिꣳशात्त्रयस्त्रिꣳशामुपयंतित्रयस्त्रिꣳशद्वैदेवतादेवतास्वे
वप्रतितिष्ठंतित्रिणवोभवतीमेवैलोकास्त्रिणवएष्वेवलोकेषुप्रतितिष्ठंतिद्वावेकविꣳशौभवतःप्र
तिष्ठित्याअथोरुवमेवात्मंदधतेबहवःषोडशिनोभवंतितस्माद्बहवःप्रजासुवृषाणोयदेतेस्तोमा
व्यतिषक्ताभवंतितस्मादियमोषधीभिर्वनस्पतिभिर्व्यतिषक्ता॥५॥व्यतिषज्यंतेप्रजयापशुभि
र्यएवंविद्वाꣳसएताआसतेकॢप्तावाएतेसुवर्गंल्लोकंयंत्युच्चावचान्हिस्तोमानुपयंतियदेतऊर्ध्वाः
कॢप्तास्तोमाभवंतिकॢप्ताएवसुवर्गंल्लोकंयंत्युभयोरेभ्योलोकयोःकल्पतेत्रिꣳशदेतास्त्रिꣳशदक्ष
राविराडन्नंविराड्विराजैवान्नाद्यमवरुंधतेतिरात्रावभितोभवतोन्नाद्यस्यपरिगृहीत्यै॥६॥ओ
षधीःसंवत्सरएवावप्रतिष्ठायव्यतिषक्तैकान्नपंचाशच्च॥३१॥ ॥प्रजापतिःसुवर्गंल्लोकमैत्तंदे
वायेनयन्नछंदसानुप्रायुंजततेननाप्नुवंतएताद्वात्रिꣳशतꣳरात्रीरपश्यन्द्वात्रिꣳशदक्षरानुष्टु

गानुष्टुभः प्रजापतिः स्वेनैवछंदसाप्रजापतिमाप्त्वाभ्यारुह्यसुवर्गंल्लोकमायन्यएवंविद्वाꣳसए
ताआसतेद्वात्रिꣳशदेताद्वात्रिꣳशदक्षरानुष्टुगानुष्टुभः प्रजापतिः स्वेनैवछंदसाप्रजापतिमाप्त्वा
श्रियंगछंति ॥१॥ श्रीर्हिमनुष्यस्यसुवर्गोलोकोद्वात्रिꣳशदेताद्वात्रिꣳशदक्षरानुष्टुग्वागनुष्टुप्सर्वा
मेववाचमाप्नुवंतिसर्वेवाचोवदितारोभवंतिसर्वेहिश्रियंगछंतिज्योतिर्गौरायुरितित्र्यहाभवंतीयंवा
वज्योतिरंतरिक्षंगौरसावायुरिमानेवलोकानभ्यारोहंत्यग्निपूर्वंत्र्यहाभवंत्यग्निपूर्वमेवसुवर्गंल्लो
कमभ्यारोहंतिबृहद्रथंतराभ्यांयंति ॥२॥ इयंवावरथंतरमसौबृहत्ताभ्यामेवयंत्यथोअनयोरे
वप्रतितिष्ठंत्येतेवैयज्ञस्यांजसायनीस्रुतीताभ्यामेवसुवर्गंल्लोकंयंतिपरांचोवाएतेसुवर्गंल्लोक
मभ्यारोहंतियेपराचस्त्र्यहाननुपयंतिप्रत्यङ्त्र्यहोभवतिप्रत्यवरूढ्याअथोप्रतिष्ठित्याउभयो
र्लोकयोर्ऋध्वोत्तिष्ठंतिद्वात्रिꣳशदेतास्तासांयास्त्रिꣳशात्रिꣳशदक्षराविराडन्नंविराड्विराजैवा

न्नाद्यमवरुंधतेयेद्वेअहोरात्रेएवतेउभाभ्यांऽरूपाभ्यांऽसुवर्गंल्लोकंयंत्यतिरात्रावभितोभवतः
परिगृहीत्यै॥३॥गछंतियंतित्रिंऽशदक्षराद्वाविंऽशतिश्च॥४॥ ॥द्वेवावदेवसत्रेद्वादशाहश्चैव
त्रयस्त्रिंऽशदहश्चयएवंविद्वांऽसस्त्रयस्त्रिंऽशदहमासतेसाक्षाद्देवदेवताअभ्यारोहंतियथाखलुवै
श्रेयानभ्यारूढः कामयतेतथाकरोतियद्यवविध्यतिपापीयान्भवतियदिनावविध्यतिसदृङ्यएवं
विद्वांऽसस्त्रयस्त्रिंऽशदहमासतेविपाप्मनाभ्रातृव्येणावर्तंतेहर्भाजोवाएतादेवाअग्रआहैन्॥१॥२
अहरेकोभजताहरेकस्ताभिर्वैतेप्रबाहुगार्ध्नुवन्यएवंविद्वांऽसस्त्रयस्त्रिंऽशमासतेसर्वएवप्रबाहुगृ
ध्नुवंतिसर्वेग्रामणीयंप्राप्नुवंतिपंचाहाभवंतिपंचवाऋतवःसंवत्सरऋतु×दह×ष्वेवसंवत्सरेप्रति
तिष्ठंत्यथोपंचाक्षरापंक्तिःपांक्तोयज्ञोयज्ञमेवावरुंधतेत्रीण्याश्विनानिभवंतित्रयइमेलोकाएषु॥
॥२॥एवलोकेषुप्रतितिष्ठंत्यथोत्रीणिवैयज्ञस्येंद्रियाणितान्येवावरुंधतेविश्वजिद्भवत्यन्नाद्यस्या

वैरूप्येसर्वस्तोमोभवतिसर्वस्याभिजित्यैवाग्वैद्वादशाहोयत्पुरस्ताद्द्वादशाहमुपेयुरनाप्तांवाचमु
पेयुरुपदासुकैषांवाक्स्यादुपरिष्टाद्द्वादशाहमुपयंत्याप्तामेववाचमुपयंतितस्मादुपरिष्टाद्वाचा
वदामोवांतरं॥ ३॥ द्वादशरात्रेणप्रजापतिःप्रजाअसृजतयद्द्वादशरात्रोभवतिप्रजाएवतद्यजमानाः
सृजंतएताꣳहवाउदंकःशौल्बायनःसत्रस्यर्धिमुवाचयद्द्वादशरात्रोयद्द्वादशरात्रोभवतिसत्रस्यर्ध्यै
अथोयदेवपूर्वैरहःसुविलोमक्रियतेतस्यैवैषाशांतिर्द्व्यनीकावाएतारात्रयोयद्यजमानाविश्व
जित्सहातिरात्रेणपूर्वाःषोडशासहातिरात्रेणोत्तराःषोडशायएवंविद्वाꣳसस्त्रयस्त्रिꣳशद
हमासतऐषांद्व्यनीकाप्रजाजायतेतिरात्रावभितोभवतःपरिगृहीत्यै॥ ४॥ अहरन्तेषवांतरꣳ
षोडशासहसमदशाव॥ ५॥ ॥ आदित्याअकामयंतसुवर्गन्लोकमियामेतितेसुवर्गन्लोकन्न
प्राजानन्नसुवर्गन्लोकमायंतएतꣳषड्त्रिꣳशद्रात्रमपश्यंस्तमाहरंस्तेनायजंतततोवैतेसुवर्ग

सं॰स॰
३३

न
न्लोकंप्राजानन्सुवर्गन्लोकमायन्यएवंविद्वांसःषड्विंशद्रात्रमासतेसुवर्गमेवलोकंप्रजानंतिसुव
र्गंलोकंयंतिज्योतिरतिरात्रः॥१॥भवतिज्योतिरेवपुरस्ताद्दधतेसुवर्गस्यलोकस्यानुख्यात्यैषडहा
भवंतिषड्वाऋतवऋतुष्वेवप्रतितिष्ठंतिचत्वारोभवंतिचतस्रोदिशोदिक्ष्वेवप्रतितिष्ठंत्यसत्रंवाए
तद्यदछंदोमंयच्छंदोमाभवंतितेनसत्रंदेवताएवपृष्ठैरवरुंधतेपशूंश्छंदोमैरोजोवैवीर्यंपृष्ठानिप
शवश्छंदोमाओजस्येव॥२॥वीर्येपशुषुप्रतितिष्ठंतिषड्विंशद्रात्रोभवतिषड्विंशदक्षराबृहती
बार्हताःपशवोबृहत्यैवपशूनवरुंधतेबृहतीछंदसांस्वाराज्यमाश्नुताश्नुवतेस्वाराज्यंयएवंविद्वां
सःषड्विंशद्रात्रमासतेसुवर्गमेवलोकंयंत्यतिरात्रावभितोभवतःसुवर्गस्यलोकस्यपरिगृहीत्यै
॥३॥अतिरात्रओजस्येवषड्विंशद्रात्र॥६॥ ॥वसिष्ठोहतपुत्रोकामयतविंदेयप्रजामभिसौदासा
न्भवयमितिसएतमेकस्मान्नपंचाशंरात्रमपश्यत्तमाहरत्तेनायजतततोवैसोविंदतप्रजामभिसौदा

राम
३३

सान्नभवद्यएवंविद्वांꣳसएकस्मान्नपंचाशमासतेविंदंतेप्रजामभिभ्रातृव्यान्भवंतित्रयस्त्रिवृतो
ग्निष्टोमाभवंतिवज्रस्यैवमुखꣳसꣳश्यंतिदशपंचदशाभवंतिपंचदशोवज्रः॥१॥वज्रमेवभ्रा
तृव्येभ्यःप्रहरंतिषोडशिमद्दशममहर्भवतिवज्रएववीर्यंदधतिद्वादशसप्तदशाभवंत्यन्नाद्यस्या
वरुध्याअथोप्रैवतेर्जायंतेपृष्ठ्यःषडहोभवतिषड्वाऋतवःषट्पृष्ठानिपृष्ठैरेवर्त्तूनन्वारोहंत्यृतुभिः
संवत्सरंतेसंवत्सरएवप्रतितिष्ठंतिद्वादशैकविꣳशाभवंतिप्रतिष्ठित्याअथोरुचमेवात्मन्॥२॥
दधतेबहवःषोडशिनोभवंतिविजित्यैषडाश्विनानिभवंतिषड्वाऋतवऋतुष्वेवप्रतितिष्ठंत्यूना
तिरिक्तावाएतारात्रयऊनास्तद्यदेकस्यैनपंचाशदतिरिक्तास्तद्यद्भूयसीरष्टाचत्वारिꣳशतऊनाच्च
खलुवाअतिरिक्ताच्चप्रजापतिःप्राजायतयेप्रजाकामाःपशुकामाःस्युस्तएताआसीरन्प्रैवजा
यंतेप्रजयापशुभिर्वैराजोवाएषयज्ञोयदेकस्मान्नपंचाशोयएवंविद्वाꣳसएकस्मान्नपंचाशम्

सतेविराजमेवगच्छंत्यन्नादाभवंत्यतिरात्रावभितोभवतोन्नाद्यस्यपरिगृहीत्यै॥ ३॥ वज्रआत्मन्प्रज
याद्वाविंशतिश्च॥ ७॥ ॥ संवत्सरायदीक्षिष्यमाणाएकाष्टकायांदीक्षेरन्नेषावैसंवत्सरस्यपत्नीय
देकाष्टकैतस्यांवाएषएतां रात्रिंवसतिसाक्षादेवसंवत्सरमारभ्यदीक्षंतआर्तंवाएतेसंवत्सरस्या
भिदीक्षंतेयएकाष्टकायांदीक्षंतेंतनामानावृतूभवतोव्यस्तंवाएतेसंवत्सरस्याभिदीक्षंतेयएका
ष्टकायांदीक्षंतेंतनामानावृतूभवतःफल्गुनीपूर्णमासेदीक्षेरन्मुखंवाएतत्॥ १॥ संवत्सरस्य
यत्फल्गुनीपूर्णमासोमुखतएवसंवत्सरमारभ्यदीक्षंतेतस्यैकैवनिर्यायत्सांमेघ्येविषूवान्संपद्य
तेचित्रापूर्णमासेदीक्षेरन्मुखंवाएतत्संवत्सरस्ययच्चित्रापूर्णमासोमुखतएवसंवत्सरमारभ्य
दीक्षंतेतस्यनकाचननिर्याभवतिचतुरहेपुरस्तात्पौर्णमास्यैदीक्षेरंतेषामेकाष्टकायांक्रयःसंप
द्यतेतेनैकाष्टकान्नछंबट्कुर्वंतितेषां॥ २॥ पूर्वपक्षेसुत्यासंपद्यतेपूर्वपक्षंमासाअभिसंपद्यंतेते

पूर्वपक्षउत्तिष्ठंतितानुत्तिष्ठतओषधयोवनस्पतयोनूत्तिष्ठंतितान्कल्याणीकीर्तिरनूत्तिष्ठत्यरासुत्
रिमेयजमानाइतितदनुसर्वेराध्नुवंति॥३॥एतन्हलंबट्कुर्वंतितेषांत्वतुस्त्रिꣳशद्रात्र॥८॥ ॥सुव
र्गंवाएतेलोकंयंतियेसत्रमुपयंत्यभींधतएवदीक्षाभिरात्मानꣳश्रपयंतउपसद्भिर्द्वाभ्यांलोमा
वद्यंतिद्वाभ्यांत्वचंद्वाभ्यामसृग्द्वाभ्यांमाꣳसंद्वाभ्यामस्थिद्वाभ्यांमज्जानमात्मदक्षिणंवैसत्रमा
त्मानमेवदक्षिणांनीत्वासुवर्गंलोकंयंतिशिखामनुप्रवपंतऋध्याअथोरघीयाꣳसःसुवर्गंलो
कमयामेति॥१॥सुवर्गंपंचाशत्॥९॥ ॥ब्रह्मवादिनोवदंत्यतिरात्रःपरमोयज्ञक्रतूनांकस्मात्त
प्रथममुपयंतीत्येतद्वाअग्निष्टोमंप्रथममुपयंत्यथोक्थ्यमथषोडशिनमथातिरात्रमनुपूर्व
मेवैतद्यज्ञक्रतूनुपेत्यतानालभ्यपरिगृह्यसोममेवैतत्पिबंतआसतेज्योतिष्टोमंप्रथममुपयंति
ज्योतिष्टोमोवैस्तोमानांमुखंमुखतएवस्तोमान्प्रयुंजतेते॥१॥सꣳस्तुताविराजमभिसंपद्यंतेद्वे

सं॰स॰
३५

चैवतिरिच्येतेएकयागौरतिरिक्तएकयायुरूनःसुवर्गोवैलोकोज्योतिरूर्ग्विराट्सुवर्गमेवतेनलो
कंयंतिरथंतरंदिवाभवतिरथंतरंनक्तमित्याहुर्ब्रह्मवादिनःकेनतदजामीतिसौभरंतृतीयसवनेब्र
ह्मसामंभवतितन्मध्यतोदधतिविधृत्यैतेनाजामि॥१॥नएकान्नपंचाशत्॥१०॥ ॥ज्योतिष्टोमंप्र
थममुपयंत्यस्मिन्नेवतेनलोकेप्रतितिष्ठंतिगोष्टोमंद्वितीयमुपयंत्यंतरिक्षएवतेनप्रतितिष्ठंत्या
युष्टोमंतृतीयमुपयंत्यमुष्मिन्नेवतेनलोकेप्रतितिष्ठंतीयंवावज्योतिरंतरिक्षंगौरसावायुर्यदेतान्स्तो
मानुपयंत्येष्वेवतल्लोकेषुसत्रिणःप्रतितिष्ठंतोयंतितेसꣳस्तुताविराजं॥१॥अभिसंपद्यंतेद्वेवर्चौ
वतिरिच्येतेएकयागौरतिरिक्तएकयायुरूनःसुवर्गोवैलोकोज्योतिरूर्ग्विराडूर्जमेवावरुंधतेतेन
क्षुधार्तिमार्छेत्यस्तोधुकाभवंतिसुत्संबाधाद्बहिःसत्रिणोग्निष्टोमावभितःप्रधीतावुक्थ्यामध्ये
नभ्यंतत्तदेतत्परियद्देवचक्रंयदेतेन॥२॥षडहेनयंतिदेवचक्रमेवसमारोहंत्यरिष्ट्यैतेस्वस्तिसम

राम
३५

श्रुवेतेषडहेनयंतिषड्वाऋतवऋतुष्वेवप्रतितिष्ठंत्युभयतोज्योतिषायंत्युभयतएवसुवर्गेलोकेप्र
तितिष्ठंतोयंतिद्वौषडहौभवतस्तानिद्वादशाहानिसंपद्यंतेद्वादशोवैपुरुषोद्वेसक्थ्यौद्वौबाहूआ
त्माचशिरश्चचत्वार्यंगानिस्तनौद्वादशौ॥ ३ ॥तत्पुरुषमनुपर्यावर्तंतेत्रयःषडहाभवंतितान्यष्टा
दशाहानिसंपद्यंतेनवान्यानिनवान्यानिनववैपुरुषेप्राणास्तत्प्राणाननुपर्यावर्तंतेचत्वारःषड
हाभवंतितानिचतुर्विंशतिरहानिसंपद्यंतेचतुर्विंशतिरर्धमासाःसंवत्सरस्तत्संवत्सरमनुपर्या
वर्तंतेप्रतिष्ठितःसंवत्सरइतिखलुवाआहुर्वर्षीयान्प्रतिष्ठायाइत्येतावद्वैसंवत्सरस्यब्राह्मणंयाव
न्मासोमासिमास्येवप्रतितिष्ठंतोयंति॥ ४ ॥विराजमेतेनद्वादशावेतावद्वाअश्वेत्व॥ ११ ॥ ॥मेषस्त्वा
पचतैरवतुलोहितग्रीवश्छागैःशाल्मलिर्वृध्यापर्णोब्रह्मणाप्लक्षोमेधेनन्यग्रोधश्चमसैरुदुंबरऊ
र्जागायत्रीछंदोभिस्त्रिवृत्स्तोमैरवंतीस्थावंतीस्त्वावंतुप्रियंत्वाप्रियाणांवर्षिष्ठमाप्यानांनिधीनांत्वा

निधिपतिꣳहवामहेवसोमम॥१॥मेषःषड्विꣳशत॥१२॥ ॥कूप्याभ्यःस्वाहाकूल्याभ्यःस्वाहाविकर्या
भ्यःस्वाहावध्याभ्यःस्वाहाखन्याभ्यःस्वाहाह्रद्याभ्यःस्वाहासूद्याभ्यःस्वाहासरस्याभ्यःस्वाहावैशं
तीभ्यःस्वाहापल्वल्याभ्यःस्वाहावर्ष्याभ्यःस्वाहावृष्याभ्यःस्वाहाह्रादुनीभ्यःस्वाहापृष्वाभ्यःस्वाहा
स्यंदमानाभ्यःस्वाहास्थावराभ्यःस्वाहानादेयीभ्यःस्वाहासैंधवीभ्यःस्वाहासमुद्रियाभ्यःस्वाहा
सर्वाभ्यःस्वाहा॥१॥कूप्याभ्यश्चत्वारिꣳशत॥१३॥ ॥अद्भ्यःस्वाहावहंतीभ्यःस्वाहापरिवहंतीभ्यः
स्वाहासमंतंवहंतीभ्यःस्वाहाशीघ्रंवहंतीभ्यःस्वाहाशीभंवहंतीभ्यःस्वाहोग्रंवहंतीभ्यःस्वाहाभी
मंवहंतीभ्यःस्वाहांभोभ्यःस्वाहानभोभ्यःस्वाहामहोभ्यःस्वाहासर्वस्मैस्वाहा॥१॥अद्भ्यएकान्न
त्रिꣳशत॥१४॥ ॥योऽर्वंतंजिघांꣳसतितमभ्यमीतिवरुणः।पुरोमर्त्तःपुरःश्वा।अहंचत्वंचवृत्र
हन्त्संबभूवसनिभ्यआ।अरातीवाचिदद्रिवोनुनौश्शूरमꣳसतेभद्राइंद्रस्यरातयः।अभिक्रत्वेंद्रभू

था॥१॥वरुणोद्भिःसाम्नेसमनमदृचेसमनमद्यथासामर्चाब्रह्मणेसमनमत्क्षत्रायसमनमद्यथा
